छान्दोग्योपनिषदि
विशिष्टाद्वैतपरकम्
श्रीराघवकृपाभाष्यम्
(संस्कृत-हिन्दी भाष्य सहितम्)
भाष्यकाराः – जगद्गुरुरामानन्दाचार्याः
स्वामिरामभद्राचार्यमहाराजाः चित्रकूटीयाः

।। श्रीमद्राघवो विजयतेतराम् ।।
।। श्रीरामानन्दाचार्याय नमः ।।

छान्दोग्योपनिषदि
(विशिष्टाद्वैतपरकम्)

श्रीराघवकृपाभाष्यम्
(संस्कृत-हिन्दी भाष्य सहितम्)

भाष्यकाराः-
जगद्गुरुश्रीरामानन्दाचार्याः
स्वामिरामभद्राचार्यजीमहाराजाः
चित्रकूटीयाः

प्रकाशकः
श्रीतुलसीपीठसेवान्यासः
तुलसीपीठः, आमोदवनम्
श्रीचित्रकूटधाम, जनपदं-सतना (म० प्र०)

प्रकाशकः

श्रीतुलसीपीठसेवान्यासः

तुलसीपीठः, आमोदवनम्,
श्रीचित्रकूटधाम, जनपदं-सतना (म० प्र०)
दूरभाष : ०७६७०-६५४७८

✪

प्रथमसंस्करणम् : ११०० प्रतयः

✪

✪

मूल्यम् : २००.०० रुपया

✪

प्राप्तिस्थानम् :
तुलसीपीठः, आमोदवनम्, चित्रकूटं जनपदं-सतना (म० प्र०)
वसिष्ठायनम्, (रानीगली) जगद्गुरु रामानन्दाचार्य मार्ग, भोपतवाला, हरिद्वार (उ० प्र०)
श्रीगीताज्ञानमन्दिर, भक्तिनगर सर्कल, राजकोट (गुजरात) पिन– ३६०००२

✪

मुद्रक :
राघव ऑफसेट
बैजनत्था, वाराणसी– १०
फोन : ३२००३९

।। श्रीराघवो विजयतेतराम् ।।

प्रकाशकीयम्

नीलनीरदसंकाशकान्तये श्रितशान्तये ।
रामाय पूर्णकामाय जानकीजानये नमः ।।

साम्प्रतिकबुद्धिजीविवर्गे पण्डितसमाजे च श्रीवैष्णवसत्समाजे को नाम नाभिनन्दति ? पदवाक्यप्रमाणपारावारीणकवितार्किकचूडामणिसारस्वत-सार्वभौमपण्डितप्रकाण्डपरमहंसपरिव्राजकाचार्यश्रीवैष्णवकुलतिलकत्रिदण्डीश्वर-श्रीचित्रकूटतुलसीपीठाधीश्वरजगद्गुरुरामानन्दाचार्यवाचस्पतिमहामहनीयस्वामिरामभद्राचार्य-महाराजराजिष्णुप्रतिभाधनम् । आचार्यचरणैः श्रीसम्प्रदायश्रीरामानन्दीय-श्रीवैष्णवानुमोदितविशिष्टाद्वैतवादाम्नायमनुसृत्य ईशावास्यादि बृहदारण्यकान्तानामेका-दशोपनिषदां श्रीराघवकृपाभाष्यं प्रणीय भारतीयसंस्कृतवाङ्मयसनातनधर्मावलम्बिनां कियान् महान् उपकारो व्यधायीति तु निर्णेष्यतीतिहासः सोल्लासः । अस्य ग्रन्थरत्नस्य प्रकाशनदायित्वं श्रीतुलसीपीठसेवान्यासाय प्रदाय ऋणिनः कृता वयं श्रीमज्जगद्गुरुभिः वयं तेषां सततमाघमर्ण्यभाजः । अहं धन्यवादं दित्सामि साधुवादं च, वाराणसीस्थाय राघव ऑफसेट मुद्रणालयाध्यक्षाय चन्दनेशाय श्रीविपिनशंकरपाण्ड्यामहाभागाय, येन महता परिश्रमेण निष्ठया च गुरुगौरवेण जनताजनार्दनकरकमलं समुपस्थापितं ग्रन्थरत्नमेतत् । अहमाभारं बिभर्मि सकल-शास्त्रनिष्णातानां पण्डितप्रवराणां मुद्रणदोषनिराकरणचञ्चुनां जगद्गुरुवात्सल्यभाजनानां परमकुशलकर्मणां पं० प्रवर श्रीशिवरामशर्मणाम् पं० कृपासिन्धुशर्मणाम् च ।

अन्ततः साग्रहं निवेदयामि सर्वान् विद्वत्प्रवरान्, यत्—

ग्रन्थरत्नमिदं मत्वा सीताभर्तुरनुग्रहम् ।
निराग्रहाः समर्चन्तु रामभद्रार्यभारतीम् ।।

इति निवेदयते
राघवीया
कु० गीता देवी
प्रबन्धन्यासी, श्रीतुलसीपीठसेवान्यासस्य

श्रीराघवाष्टकम्

निशल्या कौसल्या सुखसुरलतातान्तिहृतये ।
यशोवारां राशेरुदयमभिकाङ्‌क्षन्निव शशी ।
समञ्चन् भूभागं प्रथयितुमरागं पदरतिम् ।
तमालश्यामो मे मनसि शिशुरामो विजयते ।।१।।

क्वचित् क्रीडन् व्रीडाविनतविहगैर्वृन्दविरुदो ।
विराजन् राजीवैरिव परिवृतस्तिग्मकिरणः ।
रजोवृन्दं वृन्दाविमलदलमालामलमलम् ।
स्वलङ्‌कुर्वन् बालः स इह रघुचन्द्रो विजयते ।।२।।

क्वचिन् माद्यन् माद्यन् मधुनवमिलिन्दार्यचरणा- ।
म्बुजद्वन्द्वो द्वन्द्वापनयविधिवैदग्ध्यविदितः ।
समाकुञ्चत् केशैरिव शिशुघनैः संवृतमिव ।
विधुं वक्त्रं विभ्रन् नरपतितनूजो विजयते ।।३।।

क्वचित् खेलन् खेलन् मृदुमरुदमन्दाञ्चलचल- ।
च्छिरः पुष्पैः पुञ्जैर्विवुधललनानामभिचितः ।
चिदान्दो नन्दन् नवनलिननेत्रो मृदुहसन् ।
लसन् धूलीपुञ्जैर्जगति शिशुरेको विजयते ।।४।।

क्वचिन् मातुः क्रोडे चिकुरनिकरैरंजितमुखः ।
सुखासीनो मीनोपमदृशिलसत्कज्जलकलः ।
कलातीतो मन्दस्मितविजितराकापतिरुचिः ।
पिबन् स्तन्यं रामो जगति शिशुहंसो विजयते ।।५।।

क्वचिद् बालो लालालसितललिताम्भोजवदनो ।
वहन् वासः पीतं विशदनवनीतौदनकणान् ।

विलुण्ठन् भूभागे रजसि विरजा सम्भृत इव ।
तृषा ताम्यत्कामो भवभयविरामो विजयते ।।६।।

क्वचिद् राज्ञो हर्षं प्रगुणयितुकामः कलगिरा ।
निसिञ्चन् पीयूषं श्रवणपुटके सम्मतसताम् ।
विरिंगन् पणिभ्यां वनरुहपदाभ्यां कलदृशा ।
निरत्यन् नैराश्यं नवशशिकरास्यो विजयते ।।७।।

क्वचिन् नृत्यन् छायाछपितभवभीतिर्भवभवो ।
दधानोऽलंकारं विगलितविकारं शिशुवरः ।
पुरारातेः पूज्यः पुरुषतिलकः कन्दकमनः ।
अयोध्यासौभाग्यं गुणितमिहरामो विजयते ।।८।।

जयत्यसौ नीलघनावदातो ।
विभा विभातो जनपारिजातः ।
शोभा समुद्रो नरलोकचन्द्रः ।
श्रीरामचन्द्रो रघुचारुचन्द्रः ।।९।।

ईशावास्यसमारब्धाः बृहदारण्यकान्तिमाः ।
ऐकादशोपनिषदो विशदाः श्रुतिसम्मताः ।।१०।।

श्रीराघवकृपाभाष्यनाम्ना भक्तिसुगन्धिना ।
पुण्यपुष्पोत्करेणेड्याः मया भक्त्या प्रपूजिताः ।।११।।

क्वचित्क्वचित् पदच्छेदः क्वचिदन्वययोजना ।
क्वचिच्छास्त्रार्थपद्धत्या पदार्थाः विशदीकृताः ।।१२।।

खण्डनं परपक्षाणां विशिष्टाद्वैतमण्डनम् ।
चन्दनं वैष्णवसतां श्रीरामानन्दनन्दनम् ।।१३।।

श्रीराघवकृपाभाष्यं भूषितं सुरभाषया ।
भाषितं भव्यया भक्त्या वेदतात्पर्यभूषया ।।१४।।

प्रमाणानि पुराणानां स्मृतीनामागमस्य च।
तथा श्रीमानसस्यापि दर्शितानि स्वपुष्टये।।१५।।

प्रत्यक्षमनुमानं च शाब्दञ्चेति यथास्थलम्।
प्रमाणत्रितायं ह्यत्र तत्वत्रयविनिर्णयम्।।१६।।

विशिष्टाद्वैतसिद्धान्तदर्पणं श्रुतितर्पणम्।
अर्पणं रामभद्रस्य रामभद्रसमर्पणम्।।१७।।

यदि स्युः त्रुटयः काश्चित्ताः ममैवाल्पमेधसः।
यदत्र किञ्चिद्वैशिष्ट्यं तच्छ्रीरामकृपाफलम्।।१८।।

रुद्रसंख्योपनिषदां मया भक्त्या प्रभाषितम्।
श्रीराघवकृपाभाष्यं शीलयन्तु विमत्सराः।।१९।।

इति मंगलमाशास्ते
श्रीवैष्णवविद्वत्प्रीतिवशंवदो राघवीयो जगद्गुरु रामानन्दाचार्यो स्वमिरामभद्राचार्यः
अधिचित्रकूटम्।

●

।। श्रीराघवो विजयतेतराम् ।।

उपोद्घात

वैदिक मन्त्र भाग का यदि मलभंग के लिये कर्मकाण्ड में उपयोग है तो वहीं परमात्मा की अपरोक्ष अनुभूति एवं भारत-भारती की अक्षय्य संवित के लिए उपनिषद् का भी प्रत्येक आध्यात्मिक व्यक्ति के लिये चिर संस्मरणीय विनियोग भी है। उपनिषद् हमारी भारतीय मनीषा का एक ऐसा अविरल और अनादि ज्ञान स्रोत है जिसका प्रवाह शाश्वत एवं पुरातन है। वेद के ज्ञानकाण्ड में तपःपूत महर्षियों द्वारा साक्षात्कार की हुई ये उपनिषदें आज भी लगभग एक सौ पचास की संख्या में उपलब्ध होती है जो सबकी सब पूर्वाचार्यों द्वारा स्वतः प्रमाण की कोटि में लाई गई हैं। उनमें छान्दोग्य उपनिषद् ब्रह्मजिज्ञासुओं के लिये बहुत ही उपयोगी निधि है।

छान्दोग्य उपनिषद् पर मैंने प्रस्थानत्रयी के भाष्य के क्रम में हिन्दी तथा संस्कृत भाषा में श्रीराघवकृपा भाष्य नामक दो व्याख्याओं का प्रणयन किया है। जिनमें श्रुतियों का अक्षरार्थ, अन्वयार्थ, भावार्थ तथा गंभीरतम पदार्थों को समझाने का यथा संभव एक लघुतम प्रयत्न मात्र किया गया है। मुझे विश्वास है कि श्रीराघव ऑफसेट प्रेस में मुद्रित तथा श्रीतुलसीपीठ सेवा न्यास आमोदवन श्रीचित्रकूट धाम से प्रकाशित छान्दोग्योपनिषदि श्रीराघवकृपाभाष्य निश्चित ही अपने अध्येताओं के मन मन्दिर में प्रभु श्री सीताराम के श्रीचरण कमल की प्रेम सुरभि बिखेरने में कृतकार्य हो सकेगा।

।। इति मंगलमाशास्ते धर्मचक्रवर्ती चित्रकूटस्थ श्रीतुलसीपीठाधीश्वर जगद्गुरु
रामानन्दाचार्यस्वामी रामभद्राचार्य महाराज ।।

।। श्रीराघवः शन्तनोतु ।।

●

वाचस्पति, श्री तुलसी पीठाधीश्वर
जगद्गुरू रामानन्दाचार्य स्वामी रामभद्राचार्य जी महाराज
तुलसीपीठ, आमोदवन, चित्रकूट, जि. सतना (म.प्र.)

पदवाक्यप्रमाणपारावारीण, विद्यावारिधि, वाचस्पति परमहंस
परिव्राजिकाचार्य, आशुकवि यतिवर्य प्रस्थानत्रयी भाष्कार –

श्रीतुलसीपीठाधीश्वर जगद्‌गुरु रामानन्दाचार्य

पूज्यपाद

श्री श्री १००८ स्वामी रामभद्राचार्य जी महाराज

का

संक्षिप्त जीवन वृत्त

आर्विभाव

आपका अर्विभाव १४ जनवरी १९५० तद्‌नुसार मकर संक्राति की परम पावन सान्ध्य बेला में वशिष्ठ गौत्रीय उच्च धार्मिक शरयूपारीण ब्राह्मण मिश्र वंश में उत्तर-प्रदेश के जौनपुर जनपद के पवित्र ग्राम शाडीखुर्द की पावन धरती पर हुआ। सर्वत्र-आत्म-दर्शन करने वाले हरिभक्त, या मानवता की सेवा करने दानवीर, या अपनी मातृभूमि की रक्षा में प्राण बलिदान करने वाले शूर-वीर योद्धा देश भक्त, को जन्म का सौभाग्य तो प्रभुकृपा से किसी भी मां को मिल जाता है। परन्तु भक्त, दाता और निर्भीक तीनों गुणों की सम्पदा से युक्त बालक को जन्म देने का परम श्रेय अति विशिष्ठ भगवद् कृपा से किसी विरली मां को ही प्राप्त होता है। अति सुन्दर एवं दिव्य बालस्वरुप आचार्य-चरण को जन्म देने का परम सौभाग्य धर्मशीला माता श्रीमति शची देवी और पिताश्री का गौरव पं० श्री राजदेव मिश्रजी को प्राप्त हुआ।

आपने अपनी शैशव अवस्था में ही अपने रूप, लावण्य एवं मार्धुय से सभी परिवार एवं प्रियजनों को मोहित कर दिया। आप की बाल क्रीड़ाए अद्‌भुत थी। आपके श्वेतकमल समान सुन्दर मुख मंण्डल पर बिखरी मधुर मुस्कान, हर देखने वाले को सौम्यता का प्रसाद बांटती थी। आपका विस्तृत एवं तेजस्वी ललाट, आपके अपार शस्त्रीय ज्ञानी तथा त्रिकालदर्शी होने का पूर्व सकेंत देता था। आपका प्रथम दर्शन मन को शीतलता प्रदान करता था। आपके कमल समान नयन उन्मुक्त हास्यपूर्ण मधुर चितवन चंचल बाल क्रीड़ाओं की चर्चा शीघ्र ही किसी महापुरुष के प्राकट्य की शुभ सूचना की भान्ति दूर-दूर तक फैल गई, और यह धारणा बन गई की यह बालक असाधारण है। 'होनहार विरवान के होत चीकने पात' की कहावत को आपने चरितार्थ किया।

भगवत् इच्छा

अपने प्रिय भक्त को सांसारिक प्रपन्चों से दूर रखने के लिए विधाता ने आचार्यवर

के लिए कोई और ही रचना कर रखी थी। जन्म के दो महिने बाद ही नवजात शिशु की कोमल आखों को रोहुआ रोग रुपी राहू ने तिरोहित कर दिया। आचार्य प्रवर के चर्म-नेत्र बन्द हो गए। यह हृदय विदारक दुर्घटना प्रियजनों को अभिशाप लगी, परन्तु नवजात बालक के लिए यह वरदान सिद्ध हुई। अब तो इस नन्हे शिशु के मन-दर्पण पर परमात्मा के अतिरिक्त जगत के किसी भी अन्य प्रपञ्च के प्रतिबिम्बित होने का कोई अवसर ही नहीं था। आपको दिव्य प्रज्ञा-चक्षु प्राप्त हो गए। आचार्य प्रवर ने भगवद् प्रदत्त अपनी इस अन्तर्मुखता का भरपूर उचित उपयोग किया। अब तो दिन-रात परमात्मा ही आपके चिन्तन, मनन और ध्यान का विषय बन गए।

आरम्भिक शिक्षा

अन्तमुर्खता के परिणामस्वरूप आपमें दिव्य मेधा शक्ति और अद्भुत स्मृति का उदय हुआ, जिसके फलस्वरूप कठिन से कठिन श्लोक कवित्त, छन्द, सवैया आदि आपको एक बार सुनकर सहज कन्ठस्थ हो जाते थे। मात्र पांच वर्ष की आयु में आचार्य श्री ने सम्पूर्ण श्रीमद्भगवद्गीता तथा मात्र आठ वर्ष की शैशव अवस्था में पूज्य पितामह श्रीयुत सूर्यबली मिश्र जी के प्रयासों से गोस्वामी तुलसीदास जी रचित सम्पूर्ण रामचरितमानस क्रमवद्ध पक्ति, संख्या सहित कण्ठस्थ करली थी। आपके पूज्य पितामह आपको खेत की मेंढ़ पर बिठाकर आपको एक एक बार में श्रीमानस के पचास पचास दोहों की आवृतिकरा देते थे। हे महामनीषी, आप उन सम्पूर्ण पचास दोहों को उसी प्रकार पंक्ति क्रम संख्या सहित कण्ठथ कर लेते थे। अब आप अधिकृत रूप से श्रीरामचरितमानस-सरोवर के राजहंस बन कर श्री सीता-राम के नाम, रूप, गुण, लीला, धाम और ध्यान में तन्मय हो गए।

उपनयन एवं दीक्षा

आपका पूर्वाश्रम का नाम 'गिरिधर-मिश्र' था। इसलिए गिरिधर जैसा साहस, भावुकता, क्रान्तिकारी स्वभाव, रसिकता एवं भविष्य निश्चय की दृढ़ता तथा नि:सर्ग सिद्ध काव्य प्रतिभा इनके स्वभाविक गुण बन गये। बचपन में ही बालक गिरिधर लाल ने छोटी-छोटी कविताएँ करनी प्रारम्भ कर दी थीं। २४ जून १९६१ को निर्जला एकादशी के दिन 'अष्टवर्ष ब्राह्माणमुपनयीत' इस श्रुति-वचन के अनुसार आचार्य श्री को वैदिक परम्परापूर्वक उपनयन संस्कार सम्पन्न किया गया तथा उसी दिन गायत्री दीक्षा के साथ ही तत्कालीन मूर्धन्य विद्वान् सकलशास्त्र-मर्मज्ञ पं० श्री ईश्वरदास जी महाराज जो अवध-जानकीघाट के प्रवर्तक श्री श्री १०८ श्री रामवल्लभाशरण महाराज के परम कृपापात्र थे, इन्हें राम मन्त्र की दीक्षा भी दे दी।

उच्च अध्ययन

आपने श्री रामचरितमानस एवं गीताजी के कण्ठस्थीकरण के पश्चात् संस्कृत में उच्च अध्ययन की तीव्र लालसा जागृत हुई और स्थानीय आदर्श श्री गौरीशंकर संस्कृत महाविद्यालय

में पाँच वर्ष पर्यन्त पाणिनीय व्याकरण की शिक्षा सम्पन्न करके आप विशेष अध्ययन हेतु वाराणसी आ गये। सम्पूर्णानन्द संस्कृत विश्वविद्यालय की १९७३ शास्त्री परीक्षा में विश्वविद्यालय में सर्वप्रथम स्थान प्राप्त कर एक स्वर्ण पदक प्राप्त किया एवं १९७६ की आचार्य की परीक्षा में समस्त विश्वविद्यालय में छात्रों में सर्वप्रथम स्थान प्राप्त कर पाँच स्वर्ण पदक तथा एक रजत पदक प्राप्त किया। वाक्पटुता एवं शास्त्री प्रतिभा के धनी होने के कारण आचार्यश्री ने अखिल भारतीय संस्कृत अधिवेशन में सांख्य, न्याय, व्याकरण, श्लोकान्त्याक्षरी तथा समस्यापूर्ति इन पाँच प्रथम पुरस्कार प्राप्त किये, एवं उत्तर प्रदेश को १९७४ की 'चलवैजयन्ती' प्रथम पुरस्कार दिलवाया। १९७५ में अखिल भारतीय संस्कृत वाद-विवाद प्रतियोगिता में प्रथम स्थान प्राप्त कर तत्कालीन राज्यपाल डॉ० एम० चेन्ना रेड्डी से कुलाधिपति 'स्वर्ण पदक' प्राप्त किया। **इसी प्रकार आचार्यचरणों ने शास्त्रार्थों एवं भिन्न-भिन्न शैक्षणिक प्रतियोगिताओं में अनेक शील्ड, कप एवं महत्वपूर्ण शैक्षणिक पुरस्कार प्राप्त किए।** १९७६ वाराणसी साधुबेला संस्कृत महाविद्यालय में समायोजित शास्त्रार्थ आचार्यचरण प्रतिभा का एक रोमांचक परीक्षण सिद्ध हुआ। इसमें आचार्य अन्तिम वर्ष के छात्र, प्रत्युत्पन्न मूर्ति, शास्त्रार्थ-कुशल, श्री गिरिधर मिश्र ने 'अधातु: परिष्कार' पर पचास विद्यार्थियों एवं अध्यापकों को अपनी ऋतम्भरा प्रज्ञा एवं शास्त्रीय युक्तियों से अभिभूत करके निरुत्तर करते हुए सिंह—गर्जन पूर्वक तत्कालीन विद्वान मूर्धन्यों को परास्त किया था। पूज्य आचार्यश्री ने सं० सं० वि० वि० के व्याकरण विभागाध्यक्ष पं० श्री राम प्रसाद त्रिपाठी जी से भाष्यान्त व्याकरण की गहनतम शिक्षा प्राप्त की एवं उन्हीं की सन्निद्धि में बैठकर न्याय, वेदान्त, सांख्य आदि शास्त्रों में भी प्रतिभा ज्ञान प्राप्त कर लिया एवं 'अध्यात्मरामायणे— अपाणिनीय प्रयोगााणां विमर्श:' विषय पर अनुसन्धान करके १९८१ में विद्यावारीधि (Ph.D) की उपाधि प्राप्त की। **अनन्तर "अष्टाध्याय्या: प्रतिसूत्रं शाब्दबोध समीक्षा" इस विषय पर दो हजार पृष्ठों का दिव्य शोध प्रबन्ध प्रस्तुत करके आचार्य चरणों ने शैक्षणिक जगत की सर्वोत्कृष्ट अलंकरण उपाधि वाचस्पत्ति" (Dlit) प्राप्त की।**

विरक्त दीक्षा

मानस की माधुरी एवं भागवतादि सद्गन्थों के अनुशीलन ने आचार्य—चरण को प्रथम से ही श्री सीताराम—चरणानुरागी बना ही दिया था। अब १९ नवम्बर १९८३ की कार्तिक पूर्णिमा के परम—पावन दिवस की श्रीरामानन्द सम्प्रदाय में विरक्त दीक्षा लेकर आयार्चश्री ने एक और स्वर्ण सौरभ-योग उपस्थित कर दिया। पूर्वाश्रम के डॉ० गिरिधर मिश्र अब श्री रामभद्रदास नाम से समलंकृत हो गये।

जगद्गुरु उपाधि

आपने १९८७ में श्रीचित्रकूट धाम में श्रीतुलसीपीठ की स्थापना की। उसी समय

वहाँ के सभी सन्त-महन्तों के द्वारा आपको श्रीतुलसीपीठाधीश्वर पद पर प्रतिष्ठित किया और ज्येष्ठ शुक्ल गंगा दशहरा के परम-पावन दिन वि० सम्वत् २०४५ तद्नुसार २४ जून १९८८ को वाराणसी में आचार्यश्री का काशी विद्वत् परिषद एवं अन्य सन्त-महन्त विद्वानों द्वारा चित्रकूट श्रीतुलसीपीठ के जगद्गुरु रामानन्दाचार्य पद पर विधिवत अभिषेक किया गया एवं ३ फरवरी १९८९ को प्रयाग महाकुम्भ पर्व पर समागत सभी श्री रामानन्द सम्प्रदाय के तीनों अखाड़ों के श्री महन्तों चतु: सम्प्रदाय एवं सभी खालसों तथा सन्तों द्वारा चित्रकूट सर्वाम्नाय श्रीतुलसीपीठाधीश्वर जगद्गुरु श्रीरामानन्दाचार्य श्रीरामभद्राचार्य महाराज को सर्वसम्मति से समर्थनपूर्वक अभिनन्दित किया।

विलक्षणता

आपके व्यक्तित्व में अद्भुत विलक्षणता है। जिसमें कुछ उल्लेखनीय हैं कोई भी विषय आपको एक ही बार सुन कर कण्ठस्थ हो जाता है और वह कभी विस्मृत नहीं होता। इसी विशेषता के परिणामवरूप जगद्गुरु श्रीरामानन्दाचार्य जी ने समस्त तुलसी साहित्य अर्थात् तुलसीदास जी के बारहों ग्रन्थ, सम्पूर्ण रामचरितमानस, द्वादश उपनिषद्, ब्रह्मसूत्र नारद-भक्तिसूत्र, सम्पूर्ण भगवत्गीता, शाण्डिल्य सूत्र, बाल्मीकीयरामायण व समस्त आर्य ग्रन्थों के सभी उपयोगी प्रमुख अंश हस्ताकमलवत् कण्ठस्थ कर लिये। आचार्यश्री हिन्दी एवं संस्कृत के आशुकवि होने के कारण समर्थ रचनाएँ भी करते हैं। वशिष्ठ गोत्र में जन्म लेने के कारण आचार्यवर्य श्री राघवेन्द्र की वात्सल्य भाव से उपासना करते हैं। आज भी उनकी सेवा में शिशु रूप में श्री राघव अपने समस्त परिकर खिलौने के साथ विराजमान रहते हैं। आचार्यवर्य की मौलिक विशेषता यह है कि इतने बड़े पद पर आकर भी आपका स्वभाव निरन्तर निरहंकार, सरल तथा मधुर है। विनय, करूणा, श्रीराम प्रेम, सच्चरित्रता आदि अलौकिक गुण उनके सन्तत्त्व को ख्यापित करते हैं। कोई भी व्यक्ति एकबार ही उनके पास आकर उनका अपना बन जाता है। हे भारतीय संस्कृति के रक्षक। **आप अपनी विलक्षण कथा शैली से श्रोताओं को विभोर कर देते हैं।** माँ सरस्वती की आप पर असीम कृपा है। आप वेद-वेदान्त, उपनिषद्, दर्शन, काव्य शास्त्र व अन्य सभी धार्मिक ग्रन्थों पर जितना अधिकार पूर्ण प्रवचन करते हैं उतना ही दिव्य प्रवचन भगवान श्रीकृष्ण की वाङ्मय मूर्ति महापुराण **श्रीमद्भागवत पर भी करते हैं।** आप सरलता एवं त्याग की दिव्य मूर्ति है। राष्ट्र के प्रति आपकी सत्य निष्ठ स्पष्टवादिता एवं विचारों में निर्भीकता जन जन के लिए प्रेरणादायक है। आपके दिव्य प्रवचनों में ज्ञान, भक्ति और वैराग्य की त्रिवेणी तो प्रवाहित होती है, साथ ही राष्ट्र प्रेम का सागर भी उमड़ता है। जिसे आप अपनी सहज परन्तु सशक्त अभिव्यक्ति की गागर में भर कर अपने श्रृद्धालु श्रोतागणों को पान कराते रहते है।

आपका सामीप्य प्राप्त हो जाने के बाद जीव कृत्य-कृत्य हो जाता है। धन्य हैं

वे माता-पिता जिन्होंने ऐसे 'पुत्ररत्न' को जन्म दिया। धन्य हैं वे सद्गुरु जिन्होंने ऐसा भागवत् रत्नाकर समाज को दिया। हे श्रेष्ठ सन्त शिरोमणी! हम सब भक्तगण आपके व्यक्तित्व एवं कृतित्व पर गौरवान्वित है।

साहित्य सृजन

आपने अपनी बहुमुखी प्रतिभा से हिन्दी एवं संस्कृत के अनेक आयामों को महत्त्वपूर्ण साहित्यिक उपादान भेंट किये हैं। काव्य, लेख निबन्ध, प्रवचन संग्रह एवं दर्शन क्षेत्रो में आचार्य श्री की मौलिक रचनाएँ महत्त्वपूर्ण स्थान रखती है।

इस प्रकार आचार्य श्री अपने व्यक्तित्व, कृतित्व, से श्री राम प्रेम एवं सनातन धर्म के चतुर्दिक प्रचार व प्रसार के द्वारा सहत्राधिक दिग्भ्रान्त नर-नारियों को सनातन धर्म-पीयूष से जीवनदान करते हुए अपनी यशः सुरभि से भारतीय इतिहास वाटिका को सौरभान्वित कर रहे है। तब कहना पड़ता है कि :—

शैले शैले न माणिक्यं, मौक्तिकं न गजे गजे ।
साधवो नहि सर्वत्र, चन्दनं न वने वने ।।

संत सरल चित जगतहित, जानि सुभाउ सनेहु ।
बाल विनय सुनि करि कृपा, रामचरन रहि देहु ।।

धर्माचार्य परम्परा :-

भाष्यकार !

प्राचीन काल में धर्माचार्यों की यह परम्परा रही हैं कि वही व्यक्ति किसी भी सम्प्रदाय के आचार्यपद पर प्रतिष्ठित किया जाता था, जो उपनिषद् गीता तथा बह्मसूत्र पर अपने सम्प्रदाय के सिद्धान्तानुसार वैदुष्यपूर्ण वैदिक भाष्य प्रस्तुत करता था। जिसे हम 'प्रस्थानत्रयी' भाष्य कहते हैं, जैसे शंकराचार्य आदि। आचार्यप्रवर ने इसी परम्परा का पालन करते हुए सर्वप्रथम नारदभक्तिसूत्र पर "श्री राघव कृपा भाष्यम्" नामक भाष्य ग्रन्थ की रचना की। उसका लोकार्पण १७ मार्च १९९२ को तत्कालीन उप राष्ट्रपति डॉ० शंकरदयाल शर्मा द्वारा सम्पन्न हुआ।

पुज्य आचार्यचरण के द्वारा रचित 'अरुन्धती महाकाव्य' का समर्पण समारोह दिनांक ७ जुलाई ९४ को भारत के राष्ट्रपति महामहिम डॉ० शंकरदयाल शर्मा जी के कर कमलों द्वारा सम्पन्न हुआ।

इसी प्रकार आचार्यचरणों ने एकादश उपनिषद् ब्रह्मसूत्र तथा श्रीमद्भगवद्गीता पर रामानन्दीय श्री वैष्णव सिद्धान्तानुसार भाष्य लेखन सम्पन्न करके विशिष्टाद्वैत अपनी श्रुतिसम्मत जगद्गुरुत्व को प्रमाणित करके इस शताब्दी का कीर्तिमान स्थापित किया है।

आप विदेशों में भी भारतीय संस्कृति का विश्वविश्रुत ध्वज फहराते हुए, सजगता एवं जागरूकता से भारतीयधर्माचार्यों का कुशल प्रतिनिधित्व करते हैं।

आचार्य श्री के प्रकाशित ग्रन्थ

१. मुकुन्दस्मरण् (संस्कृत स्तोत्र काव्य) भाग—१—२
२. भरत महिमा
३. मानस में तापस प्रसंग
४. परम बड़भागी जटायु
५. काका बिदुर (हिन्दी खण्ड काव्य)
६. माँ शबरी (हिन्दी खण्ड काव्य)
७. जानकी-कृपा कटाक्ष (संस्कृत स्तोत्र काव्य)
८. सुग्रीव की कुचाल और विभीषण की करतूत
९. अरुन्धती (हिन्दी महाकाव्य)
१०. राघव गीत-गुन्जन (गीत काव्य)
११. भाक्ति—गीता सुधा (गीत काव्य)
१२. श्री गीता तात्पर्य (दर्शन ग्रन्थ)
१३. तुलसी साहित्य में कृष्ण-कथा (समीक्षात्मक ग्रन्थ)
१४. सनातन धर्म विग्रह-स्वरूपा गौ माता
१५. मानस में सुमित्रा
१६. भक्ति गीत सुधा (गीत काव्य)
१७. श्री नारद भक्ति सूत्रेषु राघव कृपा भाष्यम् (हिन्दी अनुवाद सहित)
१८. श्री हनुमान चालीसा (महावीरी व्याख्या)
१९. गंगा महिम्न स्लोत्रम् (संस्कृत)
२० आजादचन्द्रशेखरचरितम् (खण्डकाव्य) संस्कृत
२१. प्रभुकरिकृपा पाँवरि दीन्ही
२२. राघवाभ्युदयम् (संसकृत नाटक)

आचार्यश्री के शीघ्र प्रकाशित होने वाले ग्रन्थ :

१. हनुमत्कौतुक (हिन्दी खण्ड काव्य)
२. संस्कृत शतकावली (१) आर्याशतकम् (२) सीताशतकम् (३) राघवेन्द्र शतकम् (४) मन्मथारिशतकम् (५) चण्डिशतकम् (६) गणपतिशतकम् (७) चित्रकूटशतकम् (८) राघव चरणचिह्नशतकम्
३. गंगा महिम्न स्तोत्रम् (संस्कृत)
४. संस्कृत गीत कुसुमाञ्जलि
५. संस्कृत प्रार्थनाञ्जलि
६. श्लोकमौक्तिकम्
७. कवित भाण्डागारम् (हिन्दी)

।। श्री राघवो विजयतेतराम् ।।

आचार्यचरणानां बिरुदावली

नीलाम्बुज श्यामलकोमलाङ्गं सीतासमारोपितवामभागम् ।
पाणौ महासायकचारुचापं नमामि रामं रघुवंशनाथम् ।।
रामानन्दाचार्यं मन्दाकिनीविमलसलिलासिक्तम् ।
तुलसीपीठाधीश्वरदेवं जगद्गुरुं वन्दे ।।

श्रीमद् सीतारामपदपद्मपरागमकरन्दमधुव्रतश्रीसम्प्रदायप्रवर्तकसकलशास्त्रार्थ-महार्णवमन्दरमतिश्रीमदाद्यजगद्गुरु श्रीरामानन्दाचार्यचरणारविन्दचञ्चरीक: समस्तवैशण-वालंकारभूता: आर्षवाङ्गमयनिगमागमपुराणेतिहाससन्निहित गम्भीरतत्वान्वेषणतत्परा: पदवाक्यप्रमाण पारावारपारीणा: सांख्ययोगन्यायवैशेषिपूर्वमीमांसावेदान्तनारदशा ण्डिल्यभक्तिसूत्रगीतावाल्मीकीयरामायण: भागवतादिसिद्धान्तबोधपुर:सरसमधिकृता-शेषतुलसीदाससाहित्य सौहित्यस्वाद्यायप्रवचनव्याख्यानपरमप्रवीणा: सनातन-धर्मसंरक्षणधुरीणा: चतुराश्रमचातुर्वर्ण्यमर्यादासंरक्षण विचक्षणा: अनाद्यविच्छिन्न-सद्गुरुपरम्पराप्राप्तश्रीमद्सीतारामभक्ति भागीरथीविगाहनविमलीकृतमानसा: श्रीमद्-रामचरितमानसराजमराला: सततं शिशुरूपराघवलालनतत्परा: समस्तप्राच्यप्रतीच्य-विद्याविनोदित विपश्चित: राष्ट्रभाषागिर्वाणगिरामहाकवय: विद्धन्मूर्धन्या: श्रीमद्रामप्रेम साधनधनधन्या: शास्त्रार्थरसिकशिरोमणय: विशिष्टाद्वैतवादानुवर्तिन: परमहंस-परिव्राजकाचार्यत्रिदण्डी वर्या:श्रोत्रियब्रह्मनिष्ठा: प्रस्थानत्रयीभाष्यकारा: श्रीचित्रकूटस्थ मन्दाकिनीविमलपुलिननिवासिन: श्रीतुलसीपीठाधीश्वरा: श्रीमद्जगद्गुरु स्वामी रामानन्दाचार्या: अनन्तश्रीसमलंकृतश्रीश्रीरामभद्राचार्य महाराजा: विजयन्तेतराम्।

।। श्रीराघव: शन्तनोतु ।।

।। श्रीमद्राघवो विजयतेतराम् ।।

।। श्रीमते रामानन्दाचार्याय नमः ।।

छान्दोग्योपनिषदि

श्रीराघवकृपाभाष्य

श्रीछान्दोग्योपनिषद् का
पदवाक्यप्रमाणपारावारीण-
कवितार्किकचूडामणि वाचस्पति-
श्रीजगद्गुरुरामानन्दाचार्य स्वामि रामभद्राचार्य-
प्रणीत श्रीमज्जगद्गुरुरामानन्दाचार्यसम्प्रदायानुसारि
विशिष्टाद्वैत-सिद्धान्त-प्रतिपादक श्रीराघवकृपाभाष्य ।।

॥ श्री राघवोविजयतेतराम् ॥

॥ श्री रामानन्दाचार्यायनमः ॥

छान्दोग्योपनिषदि

श्रीराघवकृपाभाष्यम्

मंगलाचरणम्

नवीनघनसौभगो भगवता स्मरध्वंसिना,
सदैव परिपूजितो भवभयापहः श्रीहरिः ।
शिशुप्रणतरञ्जनकुशलकोसलामण्डनो,
मदीय हृदयाजिरे विहरतु सदा राघवः ॥१॥

बिभ्रन्मारकतीं विभां विधुमुखो विद्योतमानो नमन्,
नाकाधीशशतार्चिताङ्घ्रि कमलो लोलल्लसद्बालकः ।
कौसल्यासुरवल्लिका प्रसवभूर्भूनन्दिनीवल्लभो,
भास्वदभासुर-भाल-भाल-विभवः श्रीराघवश्चित्यते ॥२॥

यच्चानिर्वचनीयमद्वयमजं वेदान्तवेद्यं शिवं,
शान्तं शात्वतसाधितं शुचिसतां यत् स्वानुभूत्यास्पदम् ।
भावातीतमगोचरं किल गिरां वर्धिष्णु तत्त्वं परम्,
सीताराममयं चलाघनमहस्तद्ब्रह्म नित्यं नुमः ॥३॥

केचिन्नरं केऽपि परं तथान्ये तत्वं परे धर्ममयं भजन्ते ।
वयं त्वयोध्यापतिभाग्यसिन्धुनवोडुपं राघवमामनामः ॥४॥

वन्दारुवृन्दास्पदपारिजातं वृन्दारकाकीर्तितकप्रकीर्तिम् ।
तं जातरूपाचलचारुलक्ष्मीं वन्दामहे वानरवारणेन्द्रम् ॥५॥

अनालस्या वश्या निजनिगमबाणे सुमनसा,
समर्चन्त्यो भक्त्या निजपतिमलं ब्रह्मपरमम् ।
विधुन्वन्त्यो नृणां निविडतिमिराज्ञानरजनीं,
जयन्तीड्या दिव्याः श्रुतयइदमा मादृशसुखाः ।।६।।

नमामि परया भक्त्या देशिकं पौण्यसादनिम् ।
यत्करुणाकटाक्षेण मूढोऽहं वस्तुतांगतः ।।७।।

नत्वाथ वल्मीकिनवावतारं,
गोस्वामिनं वैष्णवपुङ्गवांश्च ।
छान्दोग्यमन्त्रेषु च रामभद्रा-
चार्योविपश्चिद् प्रगृणामि भाष्यम् ।।८।।

अथेदानीं सामवेदीयतलवकारशाखान्तर्गता ओमित्येतदक्षरमित्यादिरष्टाध्यायी ब्रह्मविचार विशदा निखिलब्रह्मजिज्ञासुसुखदा श्रीसीतारामपदपद्मभक्तिप्रदा सकलवैष्णवजन-परमार्थजिज्ञासासमाधित्सुना श्रीचित्रकूटविहारिहारिचरणपंकजपरागरसं प्रपित्सुना मया छान्दोग्योपनिषदियं श्रीराघवकृपाभाष्यनाम्ना संकलितश्रीरामानन्दाचार्यसिद्धान्तसारसर्वस्व समलङ्करणेन विवरणेन समलंक्रियते। चन्दयन्ती आह्लादयन्ती समध्येतृणां मनांसि यानि तानि छन्दांसि, अथवा छादयन्ति भार्या इव निजाञ्चलपटैः परमात्मानं समावृण्वन्ति यानि तानि छन्दांसि, प्रथमव्युत्पत्तौ **'पृषोदरादित्वात्'** निपातनाच्चकारश्चकार:। द्वितीयपक्षे छकारस्य ह्रस्वः मध्येनुमागमः अस्प्रत्यश्च उभयत्र, तानि छन्दांसि अर्थद्वयमभिदधते वृत्ताख्यं मन्त्राख्यञ्च, प्रकृते वृत्तात्मकस्यानुपयोगात्, न खलु गायत्रीप्रमुखानि वैदिकानि अनुष्टुप् प्रमुखानि च लौकिकानि पिंगलशास्त्रीयाणि वृत्तानि प्रकृतब्रह्मविचारणोपयोगीनि। तस्मादिह मन्त्रार्थानि छन्दांसि तानि च पौरुषेयाणि परमेश्वरनिःस्वासभूतानि **तान्योसामनाम**छन्दांसि गायन्ति इति छन्दोगाः तेषां इयम् इति छान्दोग्या सा चैवोपनिषद् सम्बन्धश्च **ऋते ज्ञानान्न मुक्तिः ज्ञानादेव हि कैवल्यम्'** इत्यादि श्रुतेः। **नहि ज्ञानेन सदृशं पवित्रमिह विद्यते** । (गीता ४/३८) इत्यादि स्मृतेः। भगवद्भक्त्यै तन्महात्मज्ञानस्य सुतरामावश्यकत्वात् ज्ञानस्यश्च च भगवदुपासनाप्राप्यत्वात् उपासनाज्ञानयोः समन्वयभूतेयमुपनिषदारभ्यते। ननु ज्ञानमुपासनाप्राप्यमित्यत्र किम् मनमिति चेच्छृणु **भक्त्या मामभिजनाति** । (गीता १८/५५) इति गीतावचनमेव प्रमाणम्। वस्तुतस्तु परामार्थे उपासनमेव ज्ञानफलम्। ननु वेदेषूपासनाकाण्डस्य मध्यवर्तित्वाज्ज्ञानस्य

चरमकाण्डत्वात् ज्ञानमेवोपासनाफलमिति चेन्न उभयोरपि भिन्नविषयत्वात्। यत्र काण्डत्वेनोपासना निर्दिष्टा, सा खलु ज्ञानफलका, परन्तु ज्ञानकाण्डस्था सा ज्ञानस्यापि फलमिति हि विवेक:। ननूभयोरुपासनयो: किं वैलक्षयम्? श्रूयतां कण्डस्वरूपोपासना-फलाभिसन्धिपूर्विका तत्तन्मन्त्रनिर्दिष्ट तत्तदैव संतुष्टिफला, किन्तु ज्ञानकाण्डान्तर्गता प्रेमप्रवणचेतसा भगवते समर्पितस्वत्वा, तन्मयीभावनामयी भगवन्ममत्वातिशयसर्वस्वा भगवन्नामरूपलीलाधामसमनुशीलव्यापारामनोद्रवाकारा निरस्तसेव्यसेवकविप्रकृष्टत्वप्रकारा सर्वेश्वरे परमानुरक्तिरेव इयम् ज्ञानस्यापि फलम्। यत्तु ज्ञानमुपासना फलमितिप्राहु: तन्न परमार्थेतूपासनाज्ञानयोरेकत्वप्रायत्वात्। तथा च तैत्तरेया: पठन्ति। **आकाशशरीरं ब्रह्म प्राणारामं प्राचीनयोग्योपाशस्व** (तै.उ.शि. ६) अत्र पूर्वार्धेन ब्रह्मलक्षणमुक्त्वा उत्तरार्धेन 'उपास्य' इति क्रियापदं विधेयत्वेनाभिधाय श्रुति:स्वयमेव ज्ञानोपासना-वैलक्षण्यं निराचकार। यत्तु नान्यत्राद्वैतज्ञानादात्यन्तिकी गति: तदप्यशात्रीयं, स्वरूपतो द्वैतज्ञानस्य सर्ववेदान्तसम्मत्वाभावात् । न ह्यद्वैतशब्दस्य तावद् भाववाचकत्वं दृष्टमुपनिषत्सु। **शैवमद्वैतम् चतुर्थं मन्यन्ते** (मा. उ. ७) इत्यत्र श्रुतौ ब्रह्मविशेषणस्यैवाद्वैतशब्दस्य श्रवणात्। ननु **'अथ येऽन्यथातो विदुरन्य राजानस्ते क्षय्यलोका भवन्ति'**। (छ. उ. ७।२५।२) इत्यत्र श्रुतौ सुस्पष्टमद्वैतज्ञानं प्रतिपादितं, नैवेत्थं, तत्रत्यं प्रसंगमनालोच्यैव शङ्कत एवं भवान्। तत्रत्योऽयमर्थ:– अथ अनन्तरं ये साधका: अत: अस्मात् **भगवान् स्वामी अहं सेवक:** इत्याकारकाद् भावात् अन्यथा अन्यप्रकारेण अहं ब्रह्मास्मीत्यादिरूपेण, ये विदु: ये जानन्ति, ते अन्यराजान: अन्य: परमात्मातिरिक्त: मोहनामा राजा शासक: एषां तेऽन्यराजन: क्षय्य: विनाशशील: लोक: एषां तथाभूता भवन्ति। स्वयमेव परमेश्वरं मन्यमाना: नरकगामिनो भवन्तीति तात्पर्यम्। इत्यनेन अहं ब्रह्मवादिन: परास्ता:। एवमेव **'ब्रह्मसंस्थोऽमृतत्वमेति'** (छा. उ. २।२३।१) इत्यत्रापि ब्रह्मणि परमेश्वरे संस्था अस्य स ब्रह्मसंस्था इति बहुव्रीहिणा ब्रह्म-विषयकशरणागतपर्यायसंस्थावान् अमृतत्वमयं गच्छतीत्यर्थेन पूर्वोक्तशङ्कापरिहारसम्भव: **'आत्मैवेदं सर्वम्'** (छा. उ. ७।२।२५) इत्यत्र आत्मन: एव इदं सर्वम् इति विग्रहे **'सुपांसुलुक्'** इत्यनेन षष्ठीलुकिवृद्धौ गुणे च आत्मैवेदं इति सिद्धम्। आत्मन: परमात्मन: एव सम्बन्धिभूतमिदं सर्वं दृश्यमानञ्जगदित्यर्थकम्। नन्वात्मपदं परमात्मार्थक-मित्यत्र किं मानम् **आत्माशरीरे जीवे च जीविते परमात्मनि** इति कोश एव प्रमाणम्।

अथ **'तरति शोकमात्मवित्'** इत्यादि श्रुतयस्तु आत्मज्ञस्यैव शोकसागरतरण-सामर्थ्यं निश्चिन्वन्तीति चेन्न, आत्मशब्दस्य परमात्मार्थकत्वेन व्याख्यातपूर्वत्वात्।

ननु **'तरति शोकमात्मवित्'** इत्यत्र शोकतरणमात्मविदः प्रतिपादितं अपरत्र **'न च तस्यास्ति वेत्ता'** (श्वे. उ. ४।१९) इत्यात्मवेतृत्वनिषेधः असामञ्जस्यमिदं सत्यम्। इदमसामञ्जस्यमेवास्माकमिष्टं विशिष्टाद्वैतवादबीजभूतम्। **'तरति शोकमात्मवित्'** इति श्रुत्या आत्मवेतृत्वं यत्किञ्चित्तया प्रतिपादयति, **न च तस्यास्ति वेत्ता** इत्यनया पूर्णतया वेतृत्वं निषेधयति इदमेवानिर्वचनीयत्वं तच्च यत्किंचत् वक्तुमर्हत्वे सति निःशेषेण वक्तुमर्नहत्त्वम्।

ननु अस्मिन् दर्शने किं बीजम्? श्रुतय एवेति ब्रूमः तद्यथा **'यन्मनसा न मनुते'** (केन. उ. खण्ड २, ४ से ९) न खलु ब्रह्म निःशेषेण वक्तुं शक्यम्। अतएव **'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह'** (तै. उ. ब्र. १) ब्रह्म खलु इन्द्रियमनोवचनागोचरं, वाणी कर्मेन्द्रियं तेन जडप्रायेण विशुद्धं चेतनघनं कथमभिधातुं शक्यम्। अतएव **'नेति-नेति'** श्रुतयः प्राहुः। अथ दर्शनेऽस्मिन् किं वैशिष्ट्यमद्वैततो, यतो हि तदपि निर्वचनानर्हम् ? इति चेन्मैवम्, विषयभेदः खलु द्वयोः। अस्मद्दर्शने ब्रह्मविशेषणमद्वैतं विशिष्टं च तद् विशेषणं, व्युपसर्गस्य विशेषोऽर्थः निरुपसर्गस्य निःशेषोऽर्थः। अत्रहि प्रमेयत्वेन श्रीसीताराममयं ब्रह्मतत्त्वं, प्रमातृत्वेन जीवाः, प्रत्यक्षं वेदानुवचनमनुमानं चेति प्रमाणत्रयम्। यथा मदुक्तम्—

प्रमेयः श्रीरामः सगुणमगुणं ब्रह्म विमलम्।
प्रमातारो जीवा भजनरसिका मैथिलिपतौ ।।

प्रमाणं प्रत्यक्षं श्रुतिवचनमेवानुमितिकम् ।
गुरू रामानन्दः प्रणिगदति वेदान्तनिगमे ।।

(श्रीरामानन्दसिद्धान्तचन्द्रिका मं. ९)

यद्यपि जीवब्रह्मणोर्वैलक्षण्यप्रमाणभूताः शताधिकाः श्रुतयः। यथा **'द्वासुपर्णा सयुजासखाया'** (मु. उ. नि. ३।१)। **'छायातपौ ब्रह्मविदो वदन्ति'** (क. उ. १।३।१) इत्यादयः। यत्र च क्वचिद्भेदपराः श्रुतयः तत्र सम्बन्धाद्वैवभावनया। यत्तु श्रुतिषु बाध्यबाधकत्वं कल्पयन्ति तदनुचितं, श्रुतिषु उत्सर्गापवादकल्पनं सर्वथा पापावहं न हि नित्या श्रुतिः काचित् कयाचित् बाध्यते तथा सति तदप्रामाण्यं स्यात्। पाणिन्यादि-पौरुषेयसूत्रेषु समुचितमिदं कल्पनं, तस्मात् स्वरूपतस्तु द्वैतं सम्बन्धतोऽद्वैतं इति समन्वयोऽस्मद्विशिष्टाद्वैतदर्शने। इममेव सिद्धान्तमाश्रित्य छान्दोग्योपनिषदमिमां व्याख्यातु-मीहे। तथा हि चिज्जीवः अचित् प्रकृतिः ते शरीरशरीरिभावेन ब्रह्मणि विशेषणे, तच्च

चिदचिद्भ्यां विशिष्टं सदद्वैतम्, अत एव **'पृथगात्मानं प्रेरितारं च मत्वा'** इत्यादयः श्रुतयः संगच्छन्ते। भावपरके व्याख्याने कार्यकारणभेदेन ब्रह्म द्विधा, तच्च प्रत्येकं चिदचिद्विशिष्टम्। तथा हि विशिष्टं च विशिष्टं च विशिष्टे कार्यकारणब्रह्मणी तयोः विशिष्टयोः कार्यकारणब्रह्मणोः अद्वैतम् इति विशिष्टाद्वैतम्। प्रकृतिजीवब्रह्माणीति तत्वत्रयं प्रत्यक्षमनुमानं शब्द इति प्रमाणत्रितयं, परब्रह्मैव सकलजगदभिन्ननिमित्तोपादानं, जीवाः प्रमातारः ज्ञातव्यं च स्वपरोपायविरोधिफलस्वरूपपञ्चकमिति, ब्रह्मजीवयोः स्वरूपतो भेदः सम्बन्धतश्चाभेदः, सत्कार्यवादः जीवानां नित्यत्वं बहुत्वं च साकेताधिपति श्रीसीतारामाभिधं विशिष्टाद्वैतात्मकं ध्येयं श्रीसीतामाराख्यं ब्रह्म। मन्त्रश्च षडक्षरो राममन्त्रः द्वादशाक्षरो वा युगलमन्त्रः इति संक्षेपः।

शान्तिपाठः

ॐ आप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षुः श्रोत्रमयो बलमिन्द्रियाणि च सर्वाणि। सर्वं ब्रह्मौपनिषदं माहं ब्रह्म निराकुर्यां मा मा ब्रह्म निराकरोदनिराकरण-मस्त्वनिराकरणं मेऽस्तु तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु।।

ॐ शान्तिः। शान्तिः।। शान्तिः।।।

ॐ इति परमात्मनोऽभिधानं मम अध्येतुः अङ्गानि शरीरावयवा आप्यायन्तु शक्त्या पूर्णानि भवन्तु, वाक्वाणी तद्दैवतञ्च, प्राणः पञ्चविधः शरीरान्तश्चारीवायुः चक्षुः नेत्रम्, तद्दैवतं श्रोत्रं श्रवणेन्द्रियं एवं सर्वाणि इन्द्रियाणि ज्ञानकर्माख्यानि अथोऽन्तरं बलं शारीरम् आध्यात्मिकं च प्राणरूपं इमानि सर्वाणि भजनोपकरणानि आप्यायन्तु भगवद्भक्तिसुधया सम्पुष्टानि भूत्वा परमेश्वरभजनरसे क्षमाणि वर्तन्तामितिभावः। औपनिषदमुपनिषत्सु दृष्टं सर्वं निखिलं पदार्थजातं ब्रह्म मा निराकुर्याम् रावणादिवत् सम्मुखमागतमपि मा तिरस्कुर्यां, तद् ब्रह्म परमकृपालुतया मां साधकं मा निराकरोत्। ''नमाङ्योगे'' इति सूत्रेण अडभावः ''व्यत्ययात्'' लोडर्थे लङ्लकारः, निजचरणारविन्दच्छायातः ब्रह्म मां मा दूरीकरोत्विति भावः।

तत् आत्मनि अत्र विषये सप्तमी परमात्मविषयकभक्तौ निरते तत्परे मयि, ब्रह्मणः अनिराकरणमस्तु मे मम च ब्रह्मणः अनिराकरणमस्तु, उपनिषत्सु उक्तः ये धर्माः ब्रह्मविषयाः ते मयि सन्तु तिष्ठन्तु आदरार्थवीप्सा। ॐ शान्तिः शान्तिः शान्ति त्रिरुक्तिरेषा तापत्रयोपशमनाय।।इति।

।। श्री राघवोविजयतेतराम् ।।

।। श्री रामानन्दाचार्यायनमः ।।

।। अथ प्रथमोऽध्यायः ।।

प्रथमः खण्डः

ओमित्येतदक्षरमुद्गीथमुपासीत। ओमिति ह्युद्गायति तस्योपव्याख्यानम् ।।१।।

अवति सर्वान् रक्षति इति ॐ, इति शब्दोऽत्र प्रकारवाची, एतत् इदं श्रुतिप्रसिद्धम्। ॐ प्रणवमक्षरमकारं वासुदेवं क्षरति साधकेभ्यः समर्पयति यत् तदक्षरं तदेव उद्गीथं सामवेदगानविशेषम्। उत् उत्कर्षेण गीयते तदुद्गीथं औणादिकः कर्मणि थच् प्रत्ययः, अस्यां व्युत्पत्तौ किं मूलमिति? श्रुतिरेव प्राह— इदमेव उपासीत् उपासनाविषयं कुर्यात् हि यतोहि ॐ इति उद्गायति उद्गाता यज्ञे ओमित्युच्चार्य उच्चैः गायति तस्य ओंकारस्यैव उपव्याख्यानं संकीर्तनभूतं उद्गीथम्।।श्रीः।।

अथोद्गीतस्य सर्वातिशयत्त्वमाह—

एषां भूतानां पृथिवी रसः पृथिव्या आपो रसः । अपामोषधयो रस ओषधीनां पुरुषो रसः पुरुषस्य वाग्रसो, वाच ऋग्रस ऋचः साम रसः साम्न उद्गीथो रसः ।।२।।

अत्र रसशब्दः सारवाची, एषां भूतानां भवन्तीति भूतानि, तेषां पृथिवी रसः सारः आधाररूपः, भूतानि खलु पृथिव्यामेवाध्रियन्ते, पृथिव्याः भूमेः आपः जलमेव रसः स्थापकः। अपां जलानां ओषधयः सारः उपयुक्ततत्वविशेषः, ओषधीनां रसः साररूपः पुरुषः। तस्यापि रसः उपयोगविशेषः वाक्वाणी यत्र पुरुषो न ब्रूयात् तदा लोके तस्य कावश्यकता वाण्यपि ऋचं वैदिकवाङ्मयभूतां विना नीरसा, ऋचोऽपि रसः सामानि सामवेदः, तेषामपि रसः मुख्यं वस्तु उद्गीथम्। तदपि प्रणवाभिन्नं, तस्मात् उद्गीथ-रूपप्रणवमुपासीत् इति पूर्वान्वयतो वाक्यार्थः।।श्रीः।।

एवं तस्य रसतभतां साधयति—

स एष रसाना ँ रसतमः परमः परार्ध्योऽष्टमो यदुद्गीथः ।।३।।

स एषः पूर्वं व्याख्यातः, रसानां पृथिवीजलौषधपुरुषवागृक्सामौद्गीथानामष्टाना रसानां मध्ये यत् व्यत्ययान्नपुंसकम्, उद्गीथः गानविशेषः परमःपूजनीयः परार्ध्यः श्रेष्ठः,

रसः सारभूतः तस्मत् तदभिन्नतया प्रणवमुपासीत इति पूर्वान्वयी।।श्रीः।।

विषयं स्पष्टयितुं प्रश्नाकारमाह—

कतमा कतमर्क्कतमत्कतमत्साम कतमः कतम उद्गीथ इति विमृष्टं भवति ।।४।।

एषु ऋक्सामोद्गीथानां किं किं स्वरूपं भविष्यतीति विचारणायां प्रश्नः— कतमा कतमा किं किं स्वरूपा ऋग्भवति? साम कतमत् किं स्वरूपं भवति? द्विरुक्तिरादरार्था, इदं त्रयं विमृष्टं विचारास्पदं भवति।।श्रीः।।

उत्तरमाध्यमेन विषयं स्पष्टयति—

वागेवर्क् प्राणः सामोमित्येतदक्षरमुद्गीथः ।
यद्वा एतन्मिथुनं यद्वाक्च प्राणश्चर्क् च साम च ।।५।।

वाक्वाणी एव ऋक् ऋग्रूपा, एवं प्राणः अशुः, साम सामाकारः ॐ प्रणवः उद्गीथः, इतिशब्दः द्वयोर्भेदसूचकः। विषयं स्पष्टयितुं मिथुनरूपकं रूपयति— वाक् प्राणः ऋक्साम च मिथुनं युग्मम्। यथा लोके स्त्रीपुरुषमिथुनेन प्रजननं जायते तथैव वाग्ऋचोः प्राणसाम्नोः रूपकतया निर्दिष्टयोः ऋक्साममिथुनं वाक्प्राणमिथुनञ्च सत्संस्कारान् उत्पादयति।।श्रीः।।

तमेवार्थं प्रपंचयति—

तदेतन्मिथुनमोमित्येतस्मिन्नक्षरे सꣳसृज्यते यदा वै ।
मिथुनौ समागच्छत आपयतो वै तावन्योन्यस्य कामम् ।।६।।

तत् तस्मात् एतत् इदं ऋक्सामरूपं वाक्प्राणरूपञ्च मिथुनं युगलम्, ॐ इति ये तस्मिन्नक्षरे अविनाशिवर्णे संसृज्यते सम्पृक्तं भवति, यथा मिथुनौ दम्पती समागच्छतः समागमं कुरुतः तदा तौ जायापति अन्योन्यस्य कामम् अभिलाषम् आपयतः पूरयतः तथैवेदमपि कामं पूरयित्वा लक्ष्यान्नावचलति।।श्रीः।।

रोचनार्थं फलश्रुतिं वर्णयति—

आपयिता ह वै कामानां भवति ।
य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते ।।७।।

ह वै इति प्रसिद्धार्थौ निपात्तौ, यः साधकविशेषः एतत् ऋक्सामवाक्प्राणमिथुने ओंकाररूपमुद्गीथं च एवं मिथुनपरम्परया जानाति, विद्वान् जानन् स कामानां मनोरथाना-मापिता पूरयिता भवति।।श्रीः।।

साम्प्रतं भूयोऽपि प्रणवमहिमानं महीयते।

तद्वा एतदनुज्ञाक्षरं यद्धि किं चानुजानात्योमित्येव तदाह एषा एव समृद्धिर्यदनुज्ञा। समर्धयिता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुदगीथमुपास्ते।।८।।

वा इति निश्चयार्थोऽव्ययः, तत् श्रुतिप्रसिद्धं एतत् इदमक्षरमोंकाररूपमनुज्ञा अनुज्ञानमनुमतिरित्यर्थः, कथमित्यत् आह— हि यतो हि यत्किं च यत् किमपि अनुजानाति अनुमन्यते, तत्ॐ इत्यनुमतिसूचकं शब्दमाह कथयति। यथा कोऽपि लोके प्रार्थयते मां व्याकरणं पाठयत्वाचार्यः तदा आचार्यः प्राह ॐ एवमेव एषा ओमित्युक्तिः समृद्धिः सम्पत्सूचिका। यः साधकः एतत् ओंकारमेवमनुज्ञारूपं समृद्धिरूपञ्च विद्वान् जानन् उद्गीथम् ओंकाररूपेण उपासते भजते सकामानां मनोरथानां समर्थयिता समृद्धिकर्त्ता भवति।।श्रीः।।

भूयश्च प्रवणसार्वभौमतां वर्णयति—

तेनेयं त्रयी विद्या वर्तते ओमित्याश्रावयत्योमिति श ँ।
सत्योमित्युद्गायत्येतस्यैवाक्षरस्यापचितयै महिम्ना रसेन ।।९।।

तेन प्रणवेन इयं प्रसिद्धा त्रयी कर्मोपासना ज्ञानरूपा काण्डत्रयी ऋक्सामययूरूपा वेदत्रयी च वर्तते। विद्यते ओंकारमन्तरा न तिष्ठेदिति भावः। तदेव प्रपंचयति ॐ इति प्रणवमुच्चार्य आश्रावयति श्रावकः वेदमन्त्रान् निशामयति, एवं ॐ इति निगदन् शंसति मंत्रशंसकः ओमिति उच्चारणं कृत्वा उद्गायति उद्गाता। एतस्येव वर्णितस्य अक्षरस्य ओंकारस्य महिम्ना महत्वेन रसेन साररूपेण त्रय्यां श्रावकब्राह्मणाच्छंशी उद्गाता च स्वे-स्वे कर्मणि प्रवर्तन्ते।।श्रीः।।

अधुना ज्ञानाज्ञानयोरन्तरं वर्णयति—

तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेद,
नाना तु विद्या चाविद्या च यदेव
विद्या करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं,
भवतीति खल्वेतस्यैवाक्षरस्योपव्याख्यानं भवति।।१०।।

तेन प्रणवमेव माध्यमं विधाय उभौ ज्ञानाज्ञानिनौ कुरुतः उपासाते, कौ तौ? अत आह— एतद् वेद जानाति यश्च न वेद न जानाति। किन्तूभयोरन्तरं भवति, किं तत्? अत आह— विद्येत्यादि विद्यानाम ज्ञानम् अविद्या अज्ञनमियं नाना विभिन्नफला। यश्च विद्यया ज्ञानेन करोति उद्गीयोपासनं तत् एव श्रद्धया आस्तिकबुद्ध्या उपनिषदा श्रुतिविहितमार्गेण कृतं वीर्यवत्तरमत्यन्तप्रभावशालि भवति। तस्यैव अक्षरस्य उद्गीथरूपस्य

प्रणवस्य इदं सर्वमुपव्याख्यानं संकीर्तनं जायते। इत्थं खण्डेऽस्मिन् प्रणव एव उद्गीथानुज्ञासमृद्धिरूपः उपास्यः इति प्रकरणार्थः। तात्पर्यन्तु यदेव विद्यया करोति श्रद्धैवोपनिषदा तदेव वीर्यवत्तरमिति श्रुत्यनुसारं ज्ञानोत्तरमुपासनं तच्च शरणागतिरेव परमेश्वरस्य॥श्रीः॥

इति छान्दोग्योपनिषदि प्रथमाऽध्याये प्रथमखण्डे श्रीराघवकृपाभाष्यम् सम्पूर्णम्।

॥ श्रीराघवः शन्तनोतु ॥

द्वितीयः खण्डः

इदानीं प्राणस्य उद्गीथोपासनायामाख्यायिकामेकां प्रस्तौति। यस्यां प्राणस्य सर्वश्रेष्ठता समर्थिता। अत्र प्राणशब्देन परब्रह्मैवाभिधीयते तथा च बादरायणः **'अतएव प्राणः'** (ब्र. सू. १।१।२३। श्रुतावऽपि **'स प्राणस्य प्राणः'** (के. उ. १।३)।

देवासुरा ह वै यत्र संयेतिर उभये प्राजापत्यास्तद्ध
देवा उद्गीथमाजह्रुरनेनैनानभिभविष्याम इति ॥१॥

ह वै इति प्रसिद्धिद्योतकौ निपातौ, देवाश्चासुराश्च इति देवासुराः देवाः नामः द्योतनशक्तिप्रधानाः इन्द्रादयः तेहि दैवीं सम्पदमुपासीनाः सात्विकाः ते हि अभयादि गीतोक्तषड्विंशतिं गुणयुक्ताः। गीता अध्याय १६।१।२।३।

अभयं सत्त्वसंशुद्धिर्ज्ञानं योगव्यवस्थितिः ।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥१॥

अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् ।
दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥२॥

तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता ।
भवन्ति संपदं दैवीमभिजातस्य भारत ॥३॥

यद्वा दीव्यन्ति स्तुवन्ति पुष्कलाभिः स्तुतिभिः परब्रह्मपरमात्मानं ये ते देवाः सुराःनिरन्तरं परमात्मानं स्तुवन्ति। यथोक्तं भागवते 'यं ब्रह्मावरुणेन्द्ररुद्रमरुतः स्तुन्वन्ति दिव्यैःस्तवैः। तथापि गीतायां पार्थः प्राह—

रुद्रादित्यावसवो ये च साध्या
विश्वेऽश्विनौ मरुतश्चोष्मपाश्च ।
गन्धर्वयक्षासुरसिद्धसंङ्घा
वीक्षन्ते त्वां विस्मिताश्चैव सर्वे ।।

(गीता ११।२२)

इमे हि भागवता: अतोऽमीषां हितं चिकीर्षन् भगवानवातरति। असव: प्राणा: तदुपलक्षितशरीराणि च तेषु रमन्ते इत्यसुरा:। इमे दितिनन्दना: आसुरवृत्तय: दम्भादि षड्दुर्गुणसम्पन्ना:। यथोक्तं गीतायाम्—

दम्भो दर्पोऽभिमानश्च क्रोध: पारुष्यमेव च ।
अज्ञानं चाभिजातस्य पार्थ संपदमासुरीम् ।।

(गीता १६।४)

इमे देवान् देवाधिपतिञ्च द्विषन्ति। अतो नरके क्षिप्यन्ते एषां शाश्वतिको विरोध:। तस्मात् **'एषाञ्च विरोध: शाश्वतिक:'** इत्यनेन द्वन्द्वसमास:। अहिनकुलमिव। नन्वत्रापि अहिंनकुलादिवत् कथं नैकवद्भावो नपुंसकलिङ्गञ्च? समुचितं पृष्टम्, एकवद्भाव: क्लीबता च द्वावपि समाहारानिबन्धिनौ, देवा: सुरा: इत्यत्र **'एषाञ्च विरोध: शाश्वतिक:'** इत्यनेन द्वन्द्वसमासे समाहारे एकवद्भावे नपुंसके देवासुरं 'व्यत्यो बहुलम्' इति पाणिनीयसूत्रेण व्यत्यात् पुंस्त्वम् बहुवचनं च देवासुरा:। यत्तु केचन देवासुरप्रसंगं प्रतीकवादमनुश्रुत्य आध्यात्मिकतया व्याचक्षते, तदनुचितम्। तथा सति सर्वेषां पौराणिकप्रसंगानामालङ्कारिकतया मिथ्यात्वापत्ते:। यद्यपि देवा: चक्षुरादीन्द्रियाधिष्ठिाता:, असुरा: आसुरभावसम्पन्ना: स्वभावा: तेषामेव परस्परवैषम्यात् नैसर्गिकस्य सङ्ग्राम: इत्यपि व्याख्यातुं शक्यते। परन्तु श्रुतितात्पर्यविरुद्धत्वात् उपेक्ष्यते। अथ कथमस्मिन् व्याख्याने श्रुतिविरोध:? तदुपजीवकपुराणेषु तथात्वेनानुपलब्धत्वात्। अथ किं पुराणोपलब्धत्वरूपश्रुतितात्पर्यमूलं श्रुतेरेव पुराणानां उपबृंह्मणत्वात्। तथोक्तम् **'इतिहासपुराणाभ्यां वेदार्थमुपबृंहयेत्'**। **विभेत्यल्पश्रुताद्वेदोमय्यसौ प्रहरिष्यति**।। इति न वेदोपबृंहणरूपपुराणोलङ्घने साहसिका:। उभये समुदायद्वयोक्ता:, प्राजापत्या: प्रजापति:कश्यप: तस्य अपत्यानि प्राजापत्या: **'दित्यदित्यादित्यपत्युत्तरपदाण्य:'** इत्यनेन 'ण्य' प्रत्यय:, अत्र संयति: सङ्ग्राम: तदा देवा: उद्गीथं पूर्वव्याख्यातमाजह्रु:। किं हेतो इत्यत् आह— अनेन उद्गीथोपासना कर्मणा एनान् असुरान् अभिभविष्याम: पराभविष्याम:। उपासनया हि दैवीशक्तय: आसुरीशक्ती: परिभवन्ति। इत्येव इति शब्दार्थ:।।श्री:।।

अथ यथाक्रमं प्राणोपासनामेव प्रपञ्चयति—

ते ह नासिक्यं प्राणमुद्गीथमुपासांचक्रिरे । त ँ् हासुराः पाप्मना विविधुस्तस्मात्तेनोभयं जिघ्रति सुरभि च दुर्गन्धि च पाप्मना ह्येष विद्धः ।।२।।

अथ ते देवाः नासिक्यं नासिका घ्राणः तस्यां नासिकायां भवमिति नासिक्यं **'शरीरावयवाद्यत्'** इत्यनेन यत् प्रत्ययः। नासिकासम्बन्धिनमित्यर्थः। प्राणं घ्राणछिद्र-निर्गमनशीलवायुं, उद्गीथम् उद्गीथात्मकम्, उपासां चक्रीरे, उपासितवन्तः। ह निश्चयेन असुराः आसुरभावापन्नाः देवविरोधिनो देहाभिमाननिरता विरोचनादयः तं निजपराविभूषया सुरैरुपास्यमानं तं प्राणं पाप्मना भगवद्भजनप्रतिबन्धकप्रत्यवायविशेषेण विविधुः विद्धं चक्रुः। ते हि खलु पापाः पापमेव तेषां निजायुधं तेनैव विवुधुः अर्थात् भजनपरम्परामेव व्यवच्छिन्नवन्तः। तस्मात् घ्राणस्य पापविद्धत्वात् देवास्तु भजनविमुखा बभूवुः, सार्धं लोकस्यापि हानिर्जाता पाप्मना विद्धः सः घ्राणस्थः प्राणः सुरभिसुगन्धिं दुर्गन्धं च जिघ्रति घ्राणविषयीकरोति। ननु सुरभिगन्धस्तु सर्वथा समनुकूलः तर्हि तदघ्राणवेलायां कथमुपासनाहानिरिति चेन्न, उपासनायां खलु द्वे अपि शुभाशुभे बाधके आनुकूल्ये सति तदासक्तौ भजनबाधा, प्रातिकूल्ये च तन्निराचिकीर्षा व्यस्ततया भजनबाधा इति चेत् घ्राणोऽयं भजनप्रतिबन्धकप्रत्यूहरूपपाप्मना विद्धो न स्यात्, तदा तेन प्रतिकूल्यानुकूल्ये समतीत्य सुखदुःखात्मकद्वन्द्वत उपरम्य लोकाभिरामे श्रीराम एव रम्येत्। अतएव भगवद्भजनरसं विहाय शरीरानुकूल्यानुभवोऽपि पापपरिणामेव। यथोक्तं मानसकृता—

सानुज सखा समेत मगन मन ।
बिसरे हरष शोक सुख दुख गन ।।

(मानस २।२४०।१)

कथमसौ सुगन्धदुर्गन्धघ्राणेन उभे अनुभवति? इत्यत आह— यतो हि एषः असुरैः पाप्मनाविद्धः सम्पूर्णलोको हि द्वयोरेतयोरनुभवेन नैवानन्दमधिगच्छति, एवं घ्राणोद्गीथोपासनानिरस्ता।

एवमन्यामुपसनां निरसयति—

अथ ह वाचमुद्गीथमुपासांचक्रिरे
त ँ् हासुराः पाप्मना
विविधुस्तस्मात्तयोभयं वदति सत्यं
चानृतं च पाप्मना ह्येषा विद्धा ।।३।।

अथ निराशा:देवा: वाचं वाणीमपि उद्गीथरूपेण उपासांचक्रिरे। तामपि असुरा: भजनरसविस्मारकपाप्मना विद्धांचक्रु:। अतएव लोक: भगवद्गुणगणानां चर्चां परिहृत्य स्वर्गकाम: सत्यं नरककाम: अनृतमसत्यं वदति तेन भजनरसो विहन्यते। इतोऽपि निराशा: सुरा: चक्षुरुपासनां चक्रु:—

अथ ह चक्षुरुद्गीथमुपासांचक्रिरे। तद्धासुराः
पाप्मना विविधुस्तस्मात्तेनोभयं
पश्यति दर्शनीयं चादर्शनीयं
च पाप्मना ह्येतद्विद्धम् ।।४।।

उपास्यमानस्य चक्षुष: असुरै: पाप्मना विद्धत्वात्। ततो भगवत: सकलभुवनाभिराम कोटिकन्दर्पकमनीयसमधिकसौन्दर्यमाधुर्यमयरूपपीयूषपिपासा व्यवगता तेन जगति शोभनाशोभनदर्शनजनितहर्षविषादलोललोचनो लोको राजीवलोचनमनालोक्यविषीदतीति तात्पर्यम्।।श्री:।।

अथ श्रोत्रमुद्गीथरूपेण समुपासनाञ्चक्रिरे तत्परिणाममाह—

अथ ह श्रोत्रमुद्गीथमुपासांचक्रिरे
तद्धासुराः पाप्मना विवुधुस्तस्मात्ते-
नोभय ँ श्रृणोति श्रवणीयं
चाश्रवणीयं च पाप्मना ह्येतद्विद्धम् ।।५।।

श्रोत्रं श्रवणेन्द्रियं शेषं पूर्ववत्। अत्र तात्पर्यमेतत् यदि सुरै: पापविहरत्वादेव श्रवणेन्द्रियमेतत् विरम्य भगवत्कथासुधात: शुभमशुभं श्रृणोति तस्मादुपासनानन्यता व्यवच्छिद्यते। अथ तात्पर्यं ब्रवीमि मन्त्रस्य यद् वैष्णवा: कर्णेन्द्रियविशेषा: क्षणमपि भगवत्कथासुधातो न विरमन्ति। तदतिरिक्तस्य शुभस्याशुभस्य वा श्रवणं पापावहम्। अतएव पृथु: भगवत्कथाश्रवणार्थं दशसहस्रंकर्णान् ययाचे जनार्दनम्। तद्यथा—

न कामये नाथ तदप्यहं क्वचिन्
न यत्र युष्मच्चरणाम्बुजासवः ।
महत्तमान्तर्हृदयान्मुखच्युतो
विधत्स्वकर्णायुतमेष मे वरः ।।श्रीः।।

(भागवत ४।२०।२४)

अथ निराशा: मनस उपासनां चक्रुः तत्फलमाह—

अथ ह मन उद्गीथमुपासांच्चक्रिरे
तद्धासुराः पाप्मना विविधुस्तस्मात्ते-
नोभय॑ँ संकल्पयते संकल्पनीयं
चासंकल्पनीयं च पाप्मना ह्येतद्विद्धम् ।।६।।

सर्वं पूर्ववत्। भावोऽयं यत् मनसैव भगवदीयभावनं चिन्तनं भवति। आसुरपाप्मभिर्यदि मनो विद्धं चेत् तदा भगवत्पदपद्मप्रेमपरागरससङ्कल्पं विहाय जागतिकपदार्थानां सदसत्ता सङ्कल्पेन मानसीपूजा विहन्यते भगवत:, तस्मान्मनोऽपि नोपास्यम्।।श्री:।।

एवं नासिकाचक्षुश्रोत्रमनउपासनात: विरम्य देवा: कस्योपासनां चक्रुः? इत्यत आह—

अथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासांचक्रिरे। त॑ँ हासुरा ऋत्त्वा विदध्वंसुर्यथाश्मानमाखणमृत्वा विध्व॑ँ सेत् ।।७।।

अथानन्तरं ह निश्चयेन य: अयं एष: मुख्य: सर्वेषां प्रमुख: प्राण: परमात्मविभूतिरूप: तमेवोपासांचक्रिरे। अन्ये नासिक्यांदयस्तु असुरैः यथा पापविद्धा: तथैवेममपि बेधितुमागता: तदनन्तरं किं जातम्? अत उपमानविधया प्राह— यथा येन प्रकारेण अस्माकं विशालपाषाणशिलां प्राप्य ऋत्वा गत्यर्थक ऋङ् धातो: 'त्वा' प्रत्यय:। आखण: आखन्यते कुद्दालैः विदार्यते इत्याखण: लोष्ठ: विध्वंसेत लडर्थे लिङ्। विद्ध्वस्तो भवतीत्यर्थ:। तथैव तं भगवद्स्वरूपप्राणोपासकं प्राणं च ऋत्वा प्राप्य विदद्ध्वंसू राक्षसाविध्वस्ता: बभूवु:। न तं पापैः विनाशयितुं शेकुरिति भाव:। तस्यापहतपाप्मत्वात् **'अपहत पाप्मा'** (छा. उ. १।२।९) इत्यादि श्रुते:।।श्री:।। इममेवार्थं दृष्टान्तयति—

एवं यथाश्मानमाखणमृत्वा विध्व॑ँ सत एव॑ँ हैव स विद्ध॑ँ सते। य एवंविदि पापं कामयते यश्चैनमभिदासति स एषोऽश्माखणः ।।८।।

प्रकरणमुपसंहरति। एवमित्थं यथा आखणं लोष्ठमस्मानं पाषाणं ऋत्वा अभिहन्तुं गत्वा विद्ध्वंसते, तथैव एवं विधिप्राणोपासनारहस्यज्ञातरि य: पापमहितं कामयते स एव ह निश्चयेन विद्ध्वंसते। यतो हि एष: उपासके कृतपाप: अस्माखण: अश्मभि: अभिभूताखणमिव। यथोक्तं मानसे—

जो अपराध भगत कर करई। रामरोष पावक सो जरई ।।श्री:।।
(मानस २।२१८।५)

इतरवैलक्षण्यस्योपपत्तिमाह—

नैवैतेन सुरभि न दुर्गन्धि विजानात्यप-
हतपाप्मा ह्येष तेन यदश्नाति
यत्पिबति तेनेतरान् प्राणानवति एतमु
एवान्ततोऽवित्त्वोत्क्रामति व्याददात्येवान्तत इति ।।९।।

एतेन भगवद्विभूतिरूपेण सुगन्धिदुर्गन्धिं न विजानाति, नैव विविच्य बुध्यते कथमित्यत आह— हि यतो हि एष: प्राण: अपहतपाप्मा अपहतं विनाशितम् असुरकृतं पापम् येन अपहता वा पाप्मानो येन स, असुराणां पापानि तत्र गत्वापि तेन हन्यन्ते। अतएव अयं यत् अश्नाति भोजनं करोति यत्पिबति उपलक्षणत्तया सकलेन्द्रियाणां धर्मान् निरस्य केवलं भजनरसिको भवति। तेनेतरानपि संधारयति एतं विदित्वा जीव: विक्रामयति उपरि गच्छति अन्ततश्च गोपनीयभावानपि व्याददाति।।श्री:।।

प्राणस्याङ्गिरोनाम हेतुमाह—

त ँ् हाङ्गिरा उद्गीथमुपासांचक्र एतमु
एवाङ्गिरसं मन्यन्तेऽङ्गानां यद्रसः ।।१०।।

ह, निश्चयेन तं, प्राणं उद्गीथं, उद्गीथरूपम् उपासांचक्रे आनर्च। क:? इत्यत आह— अङ्गिरा ब्रह्मणस्तार्तीयकस्सुत: अतएव इमम् आङ्गिरसम् अङ्गिरस: अयम् आङ्गिरस: तं अङ्गिर: सम्बन्धिभूतमुपास्यं मन्यन्ते स्वीकुर्वन्ति। अथवा एतस्य अङ्गेषु रस: तथा हि अङ्गिरस: यस्य स अङ्गिरा अङ्गिरा एव आङ्गिरस: तम् आङ्गिरसम्।।श्री:।।

अथ बृहस्पतिनाम हेतु माह—

तेन त ँ् ह बृहस्पतिरुद्गीथमुपासांचक्र एतमु
एव बृहस्पतिं मन्यन्ते वाग्घि बृहती तस्या एष पतिः ।।११।।

तेन कारणेनैव तं उद्गीथात्मकं प्राणमुपासांचक्रे। अतएव बृहस्पते: उपास्यत्वात् इमं बृहस्पत्तिं कथयन्ति। बृहस्पतिशब्दनिरुक्तिमाह। वाक् बृहती बृहत्या: पति: बृहस्पति:। 'पृषोदरादित्वात्' बृहती शब्दस्य बृहस् आदेश:।।श्री:।।

आयास्य नाम कारणमाह—

तेन त ँ् हायास्य उद्गीथमुपासांचक्र एतमु
एवायास्यं मन्यन्त आस्याद्यदयते ।।१२।।

तेन उद्गीथोपासनाविशेषेण तं प्राणमायास्य: एतन्नाममहर्षि: उपासांचक्रे। अतएव इमं प्राणमपि आयास्यं मन्यन्ते, अपरोपहेतु: अयं प्राण: आस्यात् मुखात् अयते गच्छति अतोऽप्यायास्य:।।श्री:।।

प्राणोद्गीथोपासनापरम्परामाह—

तेन त ँ ह बको दाल्भ्यो विदांचकार । सह नैमिषीयानामुद्गाता बभूव स ह स्मैभ्यः कामानागायति ।।१३।।

तेन उद्गीथोपासनापारम्पर्येण दाल्भ्य: दल्भ्यस्यापत्य: पुमान् दाल्भ्य:। बक: बं ब्रह्म कायति निरन्तरं चर्चाविषयं करोति इति बक:, तं प्राणं विदांचकार, अत्रोपासनावेदनयोरभेदाभिप्रायेण पूर्वमुपासनमुक्त्वा साम्प्रतं तत्पर्यायं वेदनमाह। विदांचकार माहात्म्यज्ञानपुर:सरं समानर्च। तत् पुण्येन नैमिषायानां नेमि:, ब्रह्मणश्चक्रं शीर्यते विलीयते यस्मिन् तन्नैमिषं तस्मिन् भवा: नैमिषीया: नैमिषीयानामुद्गाता यज्ञकर्मणि उद्गाता बभूव:। स एभ्य: नैमिषमहर्षिभ्य: कामान् उपासना फलानि आगायति आदरेण गायति।।श्री:।।

फलश्रुतिमाह—

आगाता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्त इत्यध्यात्मम् ।।१४।।

ह वै इति निश्चयार्थौ निपातौ। य: एतद् व्याख्यातरहस्यं विद्वान् जानन् एवं उक्तरीत्या अक्षरं अविनाशिनं प्रणवमुद्गीथमुपास्ते भजते स: कामानां मनोरथानां आगाता भवति। इतीत्थम् अध्यात्मौपनिषदं रहस्यम्।।श्री:।।

इति छान्दोग्योपनिषदि प्रथमाध्याये द्वितीयखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।

।। श्रीराघवः शन्तनोतु ।।

तृतीयः खण्डः

इदानीं भूयोऽपि उद्गीथस्य प्रतीकोपासनाक्रमे तेषु तेषु प्रतीकेषु उद्गीथधारणया समुपासनविधित्वेन निर्देष्टुं सकलमिदं प्रारभ्यते। तत्र प्रथमं आदित्यप्रतीकोपासनोपक्रम:।

अथाधिदैवतं य एवासौ तपति तमुद्गीथमुपासीतोद्यन्वा एष प्रजाभ्य उद्गायति उद्य ँ स्तमोभयमपहन्त्यपहन्ता ह वै भयस्य तमसो भवति य एवं वेद ।।१।।

अथ इदानीमधिदैवतम्, देवता एव दैवतं देवशब्दात् स्वार्थे तल् 'देवात् तल्' इति सूत्रेण। तथा च दीव्यतीति देवः देव एव देवता। भूयश्च देवतैव दैवतम् इति विग्रहे स्वार्थ एव प्रज्ञादित्वादण् प्रत्ययः। ननु एकस्मादेव देवशब्दात् स्वार्थिक प्रत्यय-द्वयविधानेन किं विवक्षितम् श्रुत्याः? श्रूयताम् अत्र स्वार्थोनाम आत्मपर्यायस्य स्व-भूतस्योपासकस्य अर्थः प्रयोजनम् तदधिकरणं वा तच्चोपास्यदेवरूपं यथाशास्त्रमुपासितो देवलोकं परलोकं चेति स्वार्थयुग्मं साधयतीति स्वार्थद्वयप्रतिपादकप्रत्यययुगलान्त-दैवतशब्देन सूचितम्। एवमधिकृतं दैवतमधिदैवतं यच्च निज निज वर्णाश्रमाधिकारप्राप्तं तथाभूतं दैवतमधिदैवतमिति भावः।

श्रौतोपासनायां खलु त्रेधाक्रमः। प्रतीकानि भूतदैवतात्मसम्बन्धीनि त्रेधा भवन्ति। भूतसम्बन्धीनि अधिभूतानि, दैवसम्बन्धीन्यधिदैवतानि, आत्मानुबन्धीन्याध्यात्म्यानि, इतः पूर्वयोः शकलयोः यथाक्रमं प्राणोद्गीथोपासनायां मन उपासनायाञ्च द्वे वर्णिते, इदानीमधिदैवतं वर्ण्यते। उपास्य दैवतेषु प्रमुखः प्रथमश्चादित्यः अतस्तमेव प्रतीकीकृत्य उद्गीथोपासनं विधत्ते। यः सर्वजनविदितः असौ सकलचक्षुष्मत् दृग्गोचरः एव, नान्यस्मात् तपति प्रकाशते तमादित्यं सूर्यनारायणमेव उद्गीथम् उद्गीथरूपमुपासीत। उपासनाविषयं कुर्वीत। सूर्यमण्डले नारायणस्थितिः पुराणेषु प्रसिद्धा तथाहि—

ध्येयः सदा सवितृमण्डलमध्यवर्ती
नारायणः सरसिजासनसन्निविष्टः ।
केयूरवान् मकरकुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशंखचक्रः ।।

अतएव सूर्यनारायण इति सूर्यं व्याहरन्त्यास्तिकाः। वस्तु तस्तु, सूर्ये नारायणः सूर्यनारायणः इति सप्तमी योगविभागसमासः। नारायणत्वं च सामस्त्येन श्रीराममेवाधिश्रूयते, तथाहि न रमते संसारिकभोगेषु भगवतप्रेमभक्तिप्रवणचेतस्तया यः स नरः महाराजदशरथः। तथोक्तं श्रीमानसे—

बदऊँ अवध भुआल सत्यप्रेम जेहि रामपद ।
बिछुरत दीन दयाल प्रियतन तृन इव परिहरेउ ।।

(मानस १।१६)

अथवा नरति गच्छति शरण्यत्वेन भगवत्पादमूलं यस्तथाभूतः, अथवा, नारयति शत्रून् क्षयं गमयति यस्तथाविधो नरः दशरथः, अथवा न राति न ददाति याच्यमानोऽपि स्वेच्छया रामचन्द्रं कौशिकाय यः स नरः। यथा चाह प्राचेतसः—

ऊनशोडषवर्षो मे रामो राजीवलोचनः।
न युद्धयोग्यतामस्य पश्यामि सह राक्षसैः ।।

(वा. रा. बालकाण्ड १९।७)

तस्य नरस्य नरपतेः दशरथस्य अयनं निवासस्थाने नरायणं, श्रीअयोध्या तस्मिन् नारायणे चक्रवर्तिदशरथसद्मनि श्रीमदयोध्यापुरीजातः कौसल्यायां यः स नारायणः साक्षात् ब्रह्ममय श्रीहरिः भगवान् रामः स एव सूर्यमण्डलस्थः। यथोक्तं श्रीसनत्कुमार-संहितायाम्—

सूर्यमण्डलमध्यस्थं रामं सीतासमन्वितम् ।
नमामि पुण्डरीकाक्षं अमेयं गुरुतत्परम् ।।

(श्रीयमस्तवराज ५०)

ननु तस्य सूर्यमण्डलस्थत्वे श्रुतौ किं मानमिति चेच्छ्रूयतां योऽसावसौ पुरुषः सोऽहमस्मि (ईशावास्य १६) इति ईशावास्यश्रुतिरेव। किं बहुना समस्तवैदिकमन्त्र माता ब्रह्मगायत्र्यपि मम व्यख्याने परमं प्रमाणम् तथा च

ॐ भूर्भुवः स्वः तत् सवितुर्वरेण्यं भर्गो ।
देवस्य धीमहि धियो यो नः प्रचोदयात् ।।

(शुक्ल यजु. ३ अ.।३५)।

एतदर्थः ओम् इति सर्वव्यापकपरमात्मनः प्रमुखं नाम। यद्वा अकारो वासुदेवः, उकारो ब्रह्मा, मकारो महेश्वरः इमे अकारोकारमकारवाच्याः देवास्त्रयः सन्तिष्ठन्ते यत्र स 'ओम्'। अस्मन्मते तु ओमति ब्रह्मजीवघटकीभूतसेव्यसेवकभावसम्बन्धस्मारक-परममंगलमयभगवन्नाम। तथा च अकारः लुप्तः चतुर्थीकः लुप्ततृतीयापंचमीषष्ठी सप्तमीको वा, उकारः निश्चय परः, मकारः जीववाचकः, एवं परमात्मने अत्र तादर्थ्ये चतुर्थी भगवदर्थभूतः इति यावत् निश्चयेन म जीवः इत्योम् स एवास्त्यस्मिन् इत्योम् अत्र तात्स्थे लक्षणा शक्यतावच्छेदकारोपो वा मञ्चाः क्रोशन्ति इतिवत्। जीवो हि निश्चयेन भगवदर्थभूतः तमुपश्लिष्य तस्मिन्नेव तिष्ठति, अत्र गुरौ वसति इतिवत् सामीप्ये सप्तमी। ननु सामीप्यसप्तम्यां किं मानमिति चेत् 'आधारोधिकरणम्' इति सूत्रे अधिकरणत्रितयव्याख्यावेलायां उपश्लेषस्य संयोगसामीप्यरूपेण वैयाकरणाचार्यैः व्याख्यतपूर्वत्वात् तद्वचनमेव प्रमाणम्। एवंभूतः प्रणवरूपो भगवान्, भूः चरमावच्छेदेन भूः रूपः एवं भुवः हृदयावच्छेदेन भुव आत्मा, स्वः शीर्षतया स्वराकारः भगवानेव हि भूर्भुवः स्वराकारः विश्वरूपः तथा च श्रुत्यन्तरं **'नाभ्या आसीदन्तरिक्ष ँ् शीर्ष्णो द्यौः समवर्त्तत पद्भ्यां भूमिर्दिशः श्रोत्रात् तथा लोकानकल्पयन्न'** (शु. यजु. अ.

३१।म.१३) एवं भूतस्य सवितुः सकलप्रेरकस्य सूर्यस्यापि सम्बन्धिनः देवस्य स्वभाषा द्योतमानस्य, अत्र सवितुर्देवस्य इति वाक्यखण्डे सवितृशब्दस्य देवशब्देन सह प्रकाश्यप्रकाशकभावरूपसम्बन्धः। तदर्थे सवितुरित्यत्र 'षष्ठी शेषे' इति सूत्रेण षष्ठी। न तु नीलस्य घटस्य इति वाक्यखण्डघटकभूतस्य घटविशेषणीभूतनीलशब्दस्येव समानाधिकरणविशेषणषष्ठी। यत्तु पूर्वैः सवितुः देवस्य इत्यत्र उभयत्रापि सामानाधिकरण्यं व्याख्यातम्। तथा च यः सविता देवः तस्य सवितुः देवस्य इति तन्न विचारसहः **'यस्य भाषासर्वमिदं विभाति'** (क. १।३।१३) इति श्रुतिविरोधात्। **'तमीश्वराणां परमं महेश्वरम्'** (श्वे. उ. ६।८) इति श्रुतिस्वारस्यव्याकोपाच्च। **'सूर्यस्यापि भवेत्सूर्यः'** (बा. रा. अ. ४४।१५) इति स्मृतिहार्दविरुद्धत्वाच्च। एवं सवितृप्रतियोगिकद्योतनाधिकरणस्य परात्मनः, तत् तनोति व्याप्नोति चराचरं यत् तथाभूतं सर्वप्रसिद्धं वरेण्यं स्वामित्वेन वरणयोग्यं, भर्गः सकलदोषभर्जनशीलं तेजः धीमहि ध्यायेम, यः देवः सूर्यमण्डलस्थो भगवान् रामः नः अस्माकं धियः धिष्णाः प्रचोदयत् प्राकर्षेण प्रेरयेत्, अशुभकर्मतो व्यावर्त्य शुभकर्मसु नियोजयेदिति भावः। एवं उद्गीथप्रतीकेन सूर्यस्यापि सूर्यं श्रीरामं उपासीत भजेत। कथमत्रोद्गीथत्वम्? अत आह उदेति उद्गायति यः स उद्गीथः व्युत्पत्तिसमर्थने प्राह वा हेतुत्वानुवादकोऽयमव्ययः। एषः उद्यन् उदितो भवन् प्रजाभ्यः संसारप्राणिभ्यः हितकरः उद्गायति उत्कृष्टं गायति निजप्रणतभक्तनामगुणान् संकीर्तयति इति भावः। एतस्योद्यानं उद्गानञ्च प्रजाभ्यः प्रजानां हिताय भवति। यथोक्तं मानसे—

उदित उदय गिरिमंच पर रघुवर बालपतंग ।
बिकसे संत सरोज सब हरषे लोचन भृंग ।।

(मा. बा. २५३)

ननु उद्यन् उद्गायन् वा किं करोति? अत आह उद्यन् उदयं गच्छन् तमः ध्वान्तं अपहन्ति अपकृष्टतया हिनस्ति, उद्गायन् स्वभक्तगुणान् संकीर्तयन् भयं निजजनभीतिं निवारयति। यः आदित्यप्रतीकोद्गीथोपासकः एवं वेद उपासते, अत्र प्रकरणानुरोधेन वेदनं उपासनमेव सोऽपि तमसः अन्धकारस्य भयस्य संसाररूपस्य अपहन्ता भवति।।श्रीः।।

अथ प्राणादित्ययोः सादृश्यं शास्ति। समान इत्यादिना—

समान उ एवायं चासौ
चोष्णोऽसमुष्णोऽसौ स्वर इतीममाचक्षते
स्वर इति प्रत्यास्वर इत्यमुं
तस्माद्वा एतमिममुं चोद्गीथमुपासीत ।।२।।

उ निश्चयेन, अयं उद्गीथप्रतीकरूप: प्राण:, असौ तत्प्रतीक: सूर्य: समान:, अन्योऽन्येन कथं समानत्वमित्यत आह— उभयसाधारणं गुणत्रयमयं प्राण: असौ सूर्यश्च उष्ण: समानतया चोष्णत्वगुणावुभौ, अयं स्वर: स्वरति शरीराणि प्राप्य गच्छति तथैव सूर्योऽपि स्वरति गगनमण्डलं गच्छति प्रत्यास्वरति प्रत्यायाति च अत: प्रत्यास्वरत्वं अस्याधिकं तस्मात् एतं प्राणम् इमं सूर्यम् अमुं परमेश्वरञ्च उपासीत स प्रतीकं निष्प्रतीकं वा भजेत्।।श्रीः।।

इदानीं सूक्ष्मतया व्यानमेवोद्गीथप्रतीकं मत्वा प्राह—

अथ खलु व्यानमेवोद्गीथमुपासीत यद्वै
प्राणिति स प्राणो यदपानिति सोऽपानः ।
अथ यः प्राणापानयोः सन्धिः स व्यानो यो व्यानः
सा वाक् तस्माद्प्राणन्ननपानन्वाचमभिव्याहरति ।।३।।

अथ उद्गीथप्रतीकद्वयोपासनानन्तरं व्यानं प्राणापानविलक्षणं, वैलक्षण्यहेतुमाह— अप्राणनेत्यादिप्राणापानक्रियां निरपेक्षैव इति भाव:। शेषं सुगम्।।श्रीः।।

अथ व्यानवागृक्सामोद्गीथानामेकत्वमाह—

या वाक्सर्क्तस्मादप्राणन्ननपा-
नन्नृचमभिव्याहरति यर्क्तत्साम तस्माद
प्राणन्ननपानन्साम गायति यत्साम स
उद्गीथस्तस्मादप्राणन्ननपानन्नुद्गायति ।।४।।

वाग् ऋचो:, ऋक्साम्नो:, सामोद्गीथयोश्च तत्वं वागेव सा च प्राणापानक्रियानिरपेक्षा तस्माद् तत् सादृश्यतया सर्वपरिणामभूतं व्यानमेवोद्गीथरूपेणोपासनीयमिति मन्त्रार्थ:।।श्रीः।।

व्यानोपासनामेव उपसंहरति—

अतो यान्यन्यानि वीर्यवन्ति कर्माणि
यथाग्नेर्मन्थनमाजेः सरणं दृढस्य ।
धनुष आयमनमप्राणन्नपान ँ स्तानि
करोत्येतस्य हेतोर्व्यानमेवोद्गीथमुपासीत् ।।५।।

अत: अस्माद्धेतो: वीर्यवन्ति पराक्रमसाध्यानि आजि: युद्ध: (एवं निहासुर्नृसुर्नृपदेहमाजौ) (भागवत— ६।१२।१) इति शुकोक्ते:। यत्तु आजेर्मर्यादार्थो व्याख्यात: स तु चिन्त्य:,

अन्ने शरणं युद्धस्य कृते गमनमायमनं विकर्षणमग्निमन्थनसमरगमनचापकर्षणादिकर्माणि प्राणापानननिरपेक्षाणि, नहि कोऽपि प्राणन् अपानन् वा इमानि करोति तस्माद्-व्यानमेवोपासनीयमिति हार्दम्।।श्रीः।।

इदानीमुद्गीथाक्षराणामुपासनमाह—

अथ खलूद्गीथाक्षराण्युपासीतोद्गीथ इति
प्राण एवोत्प्राणेन ह्युत्तिष्ठति ।
वाग्गीर्वाचो ह गिर इत्या
चक्षतेऽन्नं थमन्नेहीद ँ् सर्व ँ् स्थितम् ।।६।।

शब्दार्थः सरलः। वाक्यार्थस्तु प्राणवागन्नरूपोपासनायां त्रयोऽप्यर्थाः। उद्गीथेति वर्णत्रितये निहिताः तथा च उत् शब्दस्य प्राणोऽर्थः उत्तिष्ठति येन स उत् प्राणेनापि सर्व उत्तिष्ठन्ति, गीशब्दस्य गिरार्थः, गिरति स्फोटरूपार्थं व्यनक्ति इति गीः थशब्दस्य अन्नमर्थः। तिष्ठति सम्पूर्णचराचरं यस्मिन् तत्थं, पृषोदरादित्वात् सकारलोपः क प्रत्ययः अनुघटकाकारलोपश्च।।श्रीः।।

भूयोऽप्युद्गीथाक्षरेषु तत्तत्प्रतीकाण्यारोपयति—

द्यौरेवोदन्तरिक्षं गीः पृथिवी यमादित्य
एवो द्वायुर्गीरग्निस्थ ँ् सामवेद एवोद्यजुर्वेदो गीः ऋग्वेदस्थं
दुग्धेऽस्मै वाग्दोहं यो वाचो दोहोऽन्नवानन्नादो भवति
य एतान्येवं विद्वानुद्गीथाक्षराण्युपास्त उद्गीथ इति ।।७।।

मन्त्रेऽस्मिन् उद्गीथाक्षरत्रये प्रतीकत्रिकं, द्यौः स्वर्गलोकः स एव उत तत्रैव साधकानामुत्थानात् अन्तरिक्षं गीः ततो पयआदेर्गिरणात् पृथिवीथं स्थानभूतत्वात् एवं आदित्यः उत् तस्योत्थानस्वभावात्, वायुःगीः गन्धगिरणात्। अग्निःथं तत्रैव समेषां भस्मस्थानात्, सामवेदः उत् उत्कर्षात्, यजुर्वेदः गीः कामनागिरणात्, ऋग्वेदः थं तत्र देवानां स्थितत्वात् अस्मै साधकार्थं दुग्धे कामान्ददाति इति भावः।।श्रीः।।

साम्प्रतं सकामोपासनां वर्णयति—

अथ खल्वाशीः समृद्धिरुपसरणानीत्युपासीत ।
येन साम्नास्तोष्यन्स्यात्तत्सामोपधावेत् ।।८।।

आशी: फलं, उपसरणानि उपसर्तव्यानि गन्तव्यानि सामानि: स्तोष्यन्स्तुति करिष्यन् उपधावे स्तुवीति।।श्री:।।

भूयस्तमेव प्रकारं प्रपञ्चयति—

यस्यामृचि तामृचं यदार्षेयं तमृषिं ।
यां देवतामभिष्टोष्यन्स्यात्तां देवतामुपधावेत् ।।९।।

स्तुतौ हि ऋग्, ऋषिदेवतोपधावनं नितरामपेक्षते। अतस्तदुद्देश्यतः स्तुतिं चिकीर्षन् तेषां चिन्तनं कुर्वीत, ऋषिणा दृष्टमार्षं तत्र भवम् आर्षेयं, उपधावेत्— चिन्तयेत्। नोचेत् वैदिकस्तुतेर्न लाभो भवति। मन्त्रेणानेन मन्त्रविनियोगेषु विधेयता पुरःसरं प्रामाणिकता प्रदर्शिता।।श्री:।।

भूय: तत्प्रकारशेषं विशिनष्टि—

येन च्छन्दसा स्तोष्यनस्यात्तच्छन्द उपधावेद्येन।
स्तोमेन स्तोष्यमाणः स्यात्त ँ स्तोममुपधावेत् ।।१०।।

स्तोमं स्तोत्रम्, एवं अनालोच्य मन्त्रर्षिदेवताछन्दस्तोमान् नाधिगच्छति श्रेय: तस्मात् तदनुबन्धिविनियोगान् नूनमेव विदधीतेति हार्दम्।।श्री:।।

पुनरपि स्तुतिप्रकारशेषं व्याहरति—

यां दिशमभिष्टोष्यन्स्यात्तां दिशमुपधावेत् ।।११।।

स्तुतिविषयभूतदेवताधिष्ठानरूपेण कल्पितां यन्नाम्नीं दिशमुद्दिश्य शेषं पूर्ववत्।।श्री:।।

उपासनोपसंहारमाह—

आत्मानमन्तत उपसृत्य स्तुवीत
कामं ध्यायन्नप्रमत्तोऽभ्याशो ह ।
यदस्मै स कामः समृद्ध्येत यत्कामः
स्तुवीतेति यत्कामः स्तुवीतेति ।।१२।।

एवं यथाक्रमं प्राणादित्यव्यानोद्गीथाक्षरमंत्रर्षिदेवताछन्दस्तोम दिगुपासनां विधाय अमूषां भगवदुपासना द्वारत्वेनोपयोगं कृत्वा, अन्त: सिद्धान्ततः सर्वोपासनानां सारभूतफलरूपतो वा, कामं निजाभीष्टं सांसारिकं पारलौकिकं भगवत्प्राप्तिरूपं वा,

ध्यायन् प्राप्यत्वेन चिन्तयन् अप्रमत्तः भगवत्प्रत्तिरूपोपासनातः प्रमादं न कुर्वन्। अत्र प्रमादो नाम परमेश्वरशरणागतिबेलायां तद्विरुद्धविषयचिन्तनम्। तदनाचरन् अभ्यासः अभितः अस्यति निक्षिपति भगवत् प्रतिकूलदुराचरणानि यस्तथाभूतः। अथवा अभ्यासः पौनःपुन्येन भगवदीयनामरूपलीलाधामनुबन्धिसुमधुरकथासुधारसास्वादन-निसर्गरूपोऽस्त्यस्मिन् इत्यभ्यासः, ततादृशः अन्ततः सिद्धान्तरूपां भगवच्छरणागतिमेव मत्वा आत्मानं आप्नोति सर्वं व्याप्नोति इत्यात्मा। अत्र प्रषोदरादित्वात् आप्तेः 'प' कारस्य तकारः, मनिन् प्रत्ययश्च। आदत्ते भक्तोपहृतानि पत्रपुष्पफलानि यस्तथाभूतः आत्मा अत्रापि 'दा' धातोः आकारलोपः दकारस्य च तकारः पृषोदरादिकृतः तादृशं सर्वव्यापकं भक्तभावानाददानं सादरं स्मृतं सन्तं भक्तमानसानि समञ्चन्तं परमेश्वरं श्रीरामाख्यमुपसृत्य तत्पादपद्मं प्रपद्य तमेव शरणागतो भूत्वा इति भावः। स्तुवीत—तमेव परमात्मानं निजस्तुतिविषयं कुर्वीत। अन्यैव श्रुत्या भगवत् स्तुतिकरणे प्रमाणमपि दर्शितम्। ननु परमात्मस्तुतौ को लाभः? इत्यत आह। यत्कामः यमेव काममुद्दिश्य स्तुवीत परमात्मानं स्तुतिविषयं करोति अस्मै भगवतः पतितपावनात्वादि गुणैः भगवन्तं स्तुवते। परमात्मनैव सकामः समृद्ध्येत् व्यत्ययाल्लडर्थे लिङ् समृद्धः क्रियत इति भावः। साधकेन स्तुतः सन् तत्तत् कामनिबन्धनस्तुतिद्वारा स्मारितभक्तकामनापूर्त्युपयोगिनिरस्त-सकलहेयप्रत्यनीकनिखिलनिरतिशयसममोघगुणगणकल्याणकल्लोलिनीवल्लभभक्तस्य तं कामं स्वयमेव भगवान् समर्धयतीति भावः।

यथोक्तं भागवते श्रीशुकाचार्येण—

अकामः सर्वकामो वा मोक्षकाम उदारधीः ।
तीव्रेण भक्तियोगेन यजेत पुरुषं परम् ।।

(भाग. २।३।१०)

तथा च प्राहुरस्मन्मानसमधुकरपेपीयमानपदपाथोजपरागमकरन्दरसाः श्रीहुलसीहृदयहर्षवर्धनाः। श्रीमानसे—

जो सम्पति शिव रावनहिं दीन्ह दिये दसमाथ ।
सोइ सम्पदा विभीषणहि सकुचि दीन्ह रघुनाथ ।।

(मानस ५।४९ ख)

इति छान्दग्योपनिषदि प्रथमाऽध्याये तृतीयखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।
।। श्रराघवं शन्तनोतु ।।

अथ चतुर्थखण्डः

एवं परम्परासम्बन्धेनानेकमुद्गीथोपासनमुक्त्वा पुनः सिद्धान्ततः प्रणवप्रतीक मुद्गीथोपासनं समभिधत्ते—

ओमित्येतदक्षरमुद्गीथमुपासीतोमिति
ह्युद्गायति तस्योपव्याख्यानम् ।।१।।

आदित्यप्राणादिप्रतीकोपासनावर्णनेन व्यवहितत्वात् मुख्योद्गीथोपासनायाः साधकमनोमूलतो मा दूरं ब्रजतु इति कृत्वा समादरेणाभ्यासाय भूयोऽपि ओमित्येतदक्षर-मन्त्रावृत्तिः शेषं पूर्ववत्।।श्रीः।।

प्रणवोद्गीथोपासनायाः परमोत्कर्षं सूचयितुं स्वयं श्रुतिरेवाख्यायिकामिमां श्रावयति—

देवा वै मृत्योर्बिभ्यतस्त्रयीं विद्यां प्राविशꣳ स्तेछन्दोभिरच्छादयन्यदेभिरच्छादयꣳस्तच्छन्दसां छन्दस्त्वम् ।।२।।

देवाः द्योतवन्तः ब्रह्मादयःसुराः मृत्योः मरणात् बिभ्यतः त्रस्ता भवन्तः सन्तः इति पदोपादानेन श्रुतिरेव सुराणां जीवत्वं सुस्पष्टमाह। जीवान् खलु मृत्युर्मारयति न तु परमेश्वरं **'मृत्युर्धावति पञ्चमः'** (कठ. २।१।११) इति श्रुतेः। पीतामृतानपि सुरान् मृत्युस्त्रासयति तर्हि का कथा वराकाणामस्मादृक्षाणाम्, मृत्योर्भीताः सुराः किं कृतवन्तः? इत्यत आह— त्रयीं विद्यां प्राविशन् यथा कोऽपि लोके शत्रुभ्यो बिभ्यन् प्रविशति गिरिगुहां तथैवेमे त्रयीं ऋग्यजुः सामनाम्नीं विद्यां मन्त्रसंहतिं प्राविशन् प्रविष्टवन्तः, यथा मृत्युर्न पश्येत्। अतः छन्दोभिः मन्त्रैः आत्मानं आच्छादयन् देवानां छादनादेव मन्त्राः छन्दांसि छादयन्ति सुरान् इति छन्दांसि छादधातोः **'छन्दसिः पुनर्वस्वोरेकवचनम्'** (पाणि. अष्टा. १।२।६१) इतिसूत्रेण छन्दस् आदेशः, निपातनं छादनादेव अमीषां प्राविशन् इति कैश्चिद् व्याख्यातम् तदनुचितम् शास्त्रविरुद्धञ्च। ब्राह्मणग्रन्थेषु महाभारतादौ च प्रतिच्छन्दः संविधाने विनियोगस्य देवतादिस्मरणश्रवणात्।।श्रीः।।

तत्रापि ते मृत्योर्न निर्भयो इत्यत आह—

तानु तत्र मृत्युर्यथा मत्स्यमुदके
परिपश्येदेवं पर्यपश्यदृचि साम्नि यजुषि।
ते नु विदित्वोर्ध्वा ऋचः साम्नो
यजुषः स्वरमेव प्राविशन् ।।३।।

तत्र त्रयी विद्यायां प्रविष्टांस्तान् सुरान् तथैव पर्यपश्यत् हन्तुमन्विच्छन् [illegible]केतवान्। यथा कश्चनमात्सिकः उदके नातिगभीरेनीरे मत्स्यं निजत्राणाय निषण्ण [illegible] याति। एवं मृत्युरपि देवान् निजग्राससाध्यान् मत्वा ऋचि ऋग्वेदे साम्नि सामवेदे [illegible] यजुर्वेदे दृष्टवान्। समागतं विलोक्य तं देवाः, नु वितर्क्य ऋक्सामयजुर्भ्यः ऊर्ध्वा [illegible]गताः। स्वरं स्वेन राजमानं स्वं साधकानामात्मीयभूतं धनभूतश्च परमेस्वरं राति यः [illegible] स्वरः तथाभूतं स्वरं, यद्वा स्वरति गच्छति परमेश्वरः भक्तानां पार्श्वं स्मृतिकरणभूतेन [illegible] सस्वरः तं स्वरः, अथवा स्वस्मिन् प्रणतानामात्मीयभूते धनभूते च परमेश्वरे तान् [illegible]ति इति स्वरः तथाविधं, अथवा स्वेषु निजजनेषु परमात्मामेव रमयति स स्वरः तं, [illegible]वा स्वेषु निजज्ञातिषु वेदेषु स्वयमपि रमते यः स स्वरः, अथवा स्वरति सुदूरमाक्षिपति [illegible]तां पापपूगानि यः स स्वरः, तं स्वरं प्रणवं प्राविशन् ब्रह्मरूपत्वात् प्रणवस्य हि [illegible]च्छरणागतान् न प्रधर्षयितुमशकन् मृत्युरिति भावः।।श्रीः।।

तच्छरणागताः सुराः किं वैशिष्ट्यमलभन्तेत्युच्यते पूर्वं प्रणवस्य स्वरत्वं [illegible]म्यते—

यदा वा ऋचमाप्नोत्योमित्येवाति-
स्वरत्येव ँ् सामैवं यजुरेष उ स्वरो
यदेतदक्षरमेतदमृतमभयं तत्प्रविश्य
देवा अमृता अभया अभवन् ।।४।।

कथं प्रणवः स्वरः? इति सिद्धान्तमुपपादयति। यदा यस्मिन् काले वैदिकः ऋचम् आप्नोति आदत्ते अधीत्य कण्ठस्थीकरोति इति भावः, तदा ॐ इति अत्यादरेण स्वरति उच्चारयति। एवं यजूँसि सामान्यपि गृह्णन्। अतएव एष स्वरः ननु गत्याक्षेपार्थस्य स्वरधातोः उच्चारणार्थं कथं **'परौभूवोऽज्ञाने'** इति सूत्रे अज्ञानग्रहणज्ञापकेन समुद्भावितया "अनेकार्थाहि धातवः" इति परिभाषया धातूनां अनेकार्थत्वे भाषिते स्वरधातोरप्युच्चारणार्थस्वीकारेण् दोषपरिहारात्। ननु स्वरधतोरुच्चारणार्थे किं मानम्? [illegible]कृतश्रुतिरेव। एतत् ॐकारम् अक्षरम् सर्वव्यापकम् एतदेव अमृतं मरणभयरहितम्, अभयं भयवर्जितं तस्मादिदं प्रविश्य देवाः अमृताः, मरणरहिताः, अभयाः भवभयवर्जिताः अभवन् अत विश्वजनैरपि अभयममृतमक्षरमुद्गीथमोमित्युपाशितव्यम्।।श्रीः।।

फलश्रुतिमाह सकलपरिसमाप्तौ—

स य एतदेवं विद्वानक्षरं प्रणौत्येतदेवाक्षर ँ् स्वरममृतभयं
प्रविशति तत्प्रविश्य यदमृता देवास्तदमृतो भवति ।।५।।

एवं अक्षरत्वामृतत्वाभयत्वस्वरत्वविशिष्टं यः साधकः विद्वान् जानन् प्रणौति-पाउसते, विशेषणत्रयम् उक्तञ्च प्रणवं प्रविशति, मनसा तल्लीनो भवति, तत्प्रविश्य यत् येन प्रकारेण देशाः अमृताः तथैव अमृतः मरणवर्जितो भवति।।श्रीः।।

इति छान्दोग्यपनिषदि प्रथमाऽध्याये चतुर्थखण्डे श्रीराघवकृपाभाष्यम् सम्पूर्णम्।

।। श्रीराघवः शन्तनोतु ।।

अथ पञ्चमः खण्डः

अथ खलु य उद्गीथः स प्रणवो
यः प्रणवः स उद्गीथ इत्यसौ ।
वा आदित्य उद्गीथ एष
प्रणव ओमिति ह्येष स्वरन्नेति ।।१।।

अथ भेदोपासनावर्णनान्तरं खलु निश्चयेन अभेदोपासना वर्ण्यते। प्रणूयते प्रणामपुरःसरमुपास्यते दिवानिशं मजपाविधिना, स प्रणवः, स एव उद्गीथः सामवेद वर्णितोपासनाप्रकारविशेषः एवं उद्गीथ एव प्रणवः उभयत्र एवकारप्रयोगेण द्वयोर्भेदं निराकरोति। असौ प्रणव एव आदित्यः सूर्यः कथमित्यत आह— स ॐ इति स्वरन् वैखर्या निगदन् एति गगनं गच्छति।।श्रीः।।

इदानीं सूर्यरश्मिषु भेदोपासनां व्याचष्टे— नहि सकामाः उपास्याभेदं सहन्ते, उपासकोपास्याभेदं तु वयं अपि न सहामहे ऋतेऽद्वैतिभ्यः—

एतमु एवाहमभ्यागासिषं तस्मान्मम
त्वमेकोऽसीति ह कौषीतकिः
पुत्रमुवाच रश्मी्ँ स्त्वं पर्यावर्तयाद्बहवो
वै ते भविष्यन्तीत्यधिदैवतम् ।।२।।

कौषीतकिः एतन्नामा महर्षिः, ह वै प्रसिद्धिद्योतकौ निपातौ, पुत्रं निजतनयमुवाच वचनमाह— एतं प्रणवोद्गीथादित्याभेदं अहमेव नान्यः कश्चन 'उ' निश्चयेन ''निपात एकाजनाङ'' (पाणिनि अ. १-१-१४) इति सूत्रेण प्रगृह्यत्वात्। उ एव इत्यत्र न यण्। अभ्यगासिषं अभिमुखोभूत्वा गानविषयमकार्षम्। तस्मात् ततो हेतोः त्वं मम एकः एकमात्रसुतः असि अतस्त्वं भेदबुद्ध्या सूर्यस्य रश्मीन् नैकान् पर्यावर्तयात् व्यत्ययात् मध्यमपुरुषस्थाने प्रथमपुरुषः परिवर्तय उपास्व, ततस्ते बहवः अनेके सुताः भविष्यन्ति इति अधिदैवतं देवताविषयकमुपासनम्।।श्रीः।।

अथ मुख्यप्राणं प्रतीकं मत्वा उद्गीथोपासनं वर्णयति—

अथाध्यात्मं य एवायं मुख्यः ।
प्रणवस्तमुद्गीथमुपासीतोमिति ह्येष स्वरन्नेति ।।३।।

अथ अनन्तरम्, अध्यात्म आत्मनि अधि इत्यध्यात्मम् 'अव्ययं विभक्ति' इत्यादि सूत्रेण विभक्त्यर्थेऽव्ययीभावः। शरीरमध्ये उपासनं वर्ण्यते इति वाक्यार्थः। अथ यः मुख्यः प्राणः प्रथमखण्डवर्णितः तमेव उद्गीथदृष्ट्या उपासीत्। अस्यामुपासनायां प्रणवोपासनां व्याहरन्नाह—यतो हि प्राणोऽपि ॐइति उद्गीथस्य मुख्यं प्रतीकं स्वरन् उच्चारयन् एति मुखनाशिकाभ्याम् निगच्छति। किन्तूभयस्वरसूक्ष्मेक्षिकावन्त एव विदन्ति।।श्रीः।।

एतमु एवाहमभ्यगासिषं तस्मान्मम
त्वमेकोऽसीति ह कौषीतकिः
पुत्रमुवाच प्राणाँ्स्त्वं भूमानमभि-
गायताद्बहवो वै मे भविष्यन्तीति ।।४।।

एतम् मुख्यं प्राणमहम् अभ्यगासिषं, ततो हेतोः त्वं एकोऽसि इति कौषीतकिः पुत्रमुउवाच। किमुवाच? इत्युच्यते। त्वं मे गायकस्य बहवः भविष्यन्ति अनेकपुत्राः उत्पत्स्यन्ते इति संकल्प्य भूमानं सर्वशक्तिसम्पन्नं प्राणं उद्गीथदृष्ट्या अभिगायतात्। "बहुलं छन्दसि" इत्यनेन आशीरभावेऽपि तातङ् अभिगानं कुरुष्व इति भावः।।श्रीः।।

अथ प्रणोद्गीथयोः भेदाभावोपासनाफलमाह—

अथ खलु य उद्गीथः स प्रणवो यः प्रणवः स उद्गीथ इति।
होतृषदनाद्धैवापि दुरुद्गीथमनुसमाहरतीत्यनु समाहरतीति ।।५।।

अभेक्षेपासनया न केवलं निवृत्तिः फलति प्रत्युत शब्दोचारणदोषोऽपि निराक्रियते। अथ अनन्तरम् उद्गीथं प्रणवं प्रणवञ्च उद्गीथं विभावयन् होता हैवापि ह एव अपि इति पदच्छेदः ह इति प्रसिद्धो एव इति अन्ययोगव्यवच्छेदकः अपि इति निश्चयार्थः एवं त्रयो निपाताः है वापीति। होतृषदनात् षीदति तिष्ठति होता मन्त्रसंशनाय यत्र तत्सदनम् अधिकरणे ल्युट् होतुः षदनं होतृषदनं, यत्र स्थित्वा होता संशति तद्यज्ञमण्डपनिर्दिष्टं विशिष्टं स्थानं तस्मात् होतृषदनात् अत्र त्यब्लोपपंचमीहोतृषदनमाश्रित्य द्वयोरभेदे चिन्तयन् दुरुद्गीतं प्रमादात् शब्दतः स्वरतो वा दुष्टं गीतं अशुद्धमुच्चारितमिति भावः। अनुसमाहरति अनुस्मृत्य दोषमार्जनदृष्ट्या प्रायश्चित्तं कुर्वन् समाहरति दार्ढ्यार्था द्विरुक्तिः।।श्रीः।।

इति छांदोग्योपनिषदि प्रथमाध्याये पंचमखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।
।। श्रीराघवः शन्तनोतु ।।

अथ षष्ठः खण्डः

भूयोऽपि सामशब्दव्याख्यानग्रन्थारम्भः—

इयमेवर्गग्निः साम तदेतदेतस्यामृच्यध्यूमूढ साम । तस्यादृच्यध्यूढ ँ साम गीयत इयमेव साग्निरमस्तत्साम ।।१।।

इयं दृश्यमाना पृथिवी ऋक् मन्त्रस्वरूपा अग्निः, सामरूपं यथापृथिव्यां अग्निः तथैव ऋचि साम अधिष्ठितं सामशब्देऽपि पृथिव्यग्न्योः समावेशः, स इति पृथिवीवाचकः अम् इति अग्निवाचकः अध्यूढं प्रतिष्ठितम् इति मन्त्रभावः।।श्रीः।।

भूयोऽपि अन्तरिक्षपवनयोः प्रतीककल्पनम्—

अन्तरिक्षमेवर्ग्वायुः साम तदेतदेतस्मामृच्यध्यूढ ँ साम । तस्मादृच्यध्यूढ ँ साम गीयतेऽन्तरिक्षमेव सा वायुरमस्तत्साम ।।२।।

यथान्तरिक्षे वायुः अध्यूढः तथैव ऋचि सामप्रतिष्ठितं, तस्मात् तस्यामेव ऋचि साम प्रतिष्ठितं तस्मात् तस्यामेव ऋचि प्रतिष्ठितं सामगीयते शेषं पूर्ववत्।।श्रीः।।

पुनरपि दिवादित्याभ्याम् सह ऋक्साम्नि प्रतीकयति—

द्यौरेवर्गादित्यः साम तदेतदेतस्यामृच्यध्यूढ ँ साम । तस्मादृच्यध्यूढ ँ साम गीयते द्यौरेव सादित्योऽमस्तत्साम ।।३।।

ऋग एव देवरूपा आदित्यः सूर्यः तन्मयञ्च साम शेषं पूर्ववत्।।श्रीः।।

पुनर्नक्षत्रचन्द्रमसोः प्रतीकतामाश्रित्य ऋक्साम्नोः आधाराधेयभावं प्रकाश्यप्रकाशक-भावं च सामशब्दघटकीभूतसमुदायद्वयस्य च परस्परसम्बन्धं व्यनक्ति—

नक्षत्राण्येवर्क्चन्द्रमाः साम तदेतदेतस्यामृच्यध्यूढ ँ साम । तस्मादृच्यध्यूढ ँ साम गीयते नक्षत्राण्येव सा चन्द्रमा अमस्तत्साम ।।४।।

नक्षत्राणां अधिपतिः चन्द्रमा तथैवर्चां अधिनायकः साम।।श्रीः।।

अथ ऋक्साम्नो परस्परभविना भावसम्बन्धं समभिधातुं भूयोऽपि सूर्यान्तरगत प्रतीकद्वयमुपस्थापयति—

अथ यदेवैतदादित्यस्य शुक्लं भाः सैवर्गथ यन्नीलं परः । कृष्णं तत्साम तदेतदेस्यामृच्यध्यूढ ँ साम तस्माच्यध्यूढ ँ साम गीयते।।५।।

अथ अनन्तरं यत् एतत् योगिजनध्यानगोचरमादित्यस्य शुक्लं सूर्यमण्डलस्य श्वेतं भा: ज्योति: सैव ऋक् अनन्तरं पर: "व्यत्ययात् पुंस्त्वं" परमिति भाव:। श्रेष्ठं नीलं नीलवर्णं कृष्णं श्यामरूपं तदेव साम। इदं खलु न सर्वसामान्यदृष्टिगोचरं भगवत् कृपा-समाप्तदिव्यदृष्टिभिरेव महापुरुषै: समवलोक्यते, तत् एतस्याम् ऋचि अध्यूढं साम तस्मादिदम् ऋक्स्थं गीयते। वस्तुतस्तु श्रुत्या आदित्यमण्डले यच्छुक्लं भा: प्राभाषि तदेव शुक्लं वर्णं सीताया:। यन्नीलं कृष्णं तदेव कन्दकोटिकमनीयस्य भगवत: श्रीरामभद्रस्य श्यामस्वरूपम्। ननु नीलं वर्णं तु तमसोऽपि भवति तर्हि कथं तदेव न कल्प्यते? इति चेदुच्यते। तमसि तथात्ववारणाव आदित्यस्य इति षष्ठी तस्याश्च सम्बन्धोऽर्थ:, स च आधाराधेयभावरूप:। नहि खलु निसर्गसिद्धशत्रु: तमस आदित्य: भवितुमर्हत्याधार:, तथाच तत्र परमेश्वरद्योतनायैव पर: इति पुंल्लिंगत्वावच्छिन्नशब्दप्रयोग:। तम: नीलं तदपि न परं, न्यायनये तु तस्य पदार्थत्वमेव न तर्हि यस्य स्वयमेव स्थिति: संदिग्धा तत्कथं समेषामपरायणम्। ननु नीलं पर इति कथनमेव पर्याप्तं तत् समानार्थक-कृष्णमिति निरर्थकं पदम्? इति चेन्न कृष्णमिति परमात्मन: नाम तथा चाहोपनिषद् **कृषिर्भूवाचव: शब्दो णस्तु निवृतिवाचक: तयोरैक्यं परब्रह्म कृष्ण इत्यभिधीयते**। अथ वासुदेवपरोऽयं कृष्णशब्द: कथं परमेश्वरत्वसामान्यवाची इति चेत् भ्रान्तोऽसित्वम्। कृष्णशब्दोऽयं परमेश्वरत्वावच्छिन्नमभिधत्ते, इत्यनुपदमेवावोचाम। अतएव भागवते प्रह्लादप्रसंगे—

कृष्णग्रहगृहीतात्मा न वेद जगदीदृशम् ।

(भागवत ४।३७)

यद्वा कृष्णं कृषति दर्शनमात्रेण भक्तानां दु:खं यत् तथाभूतम्। अथवा कर्षति मुनिमनोमधुकरानपि स्ववशीकरोति इति कृष्णम्। इदं शुक्ल नीला एवं परस्परसम्पृक्तं महोद्वयम् आदित्यमण्डलसंस्थम् इदमेव च साम्निप्रतिष्ठितं स अम इति सकलद्वये इति श्रुतेर्हार्दम्।।श्री:।।

ननु सूर्यमण्डले सीताराममहसो: संस्थाने किं मानम्? इति चेत् सनत्कुमार-संहितैव। तथोक्तम्— **सूर्यमण्डलमध्यस्थं रामं सीतासमन्वितम्**। एवं पृथिव्यग्न्यन्तरिक्ष-वायुदिवादित्यनक्षत्रचन्द्रमो भास्करमण्डलस्थशुक्लनीलमहो नामभि: पञ्चभिर्प्रतीकयुगलै: ऋक्साम्नो: आधाराधेयभावाऽविनाभूतसम्बन्धमीमांसा चक्रे श्रुत्यां तत्रैव पञ्चमस्य प्रतीकयुग्मस्य उपसंहारमाह—

अथ यदेवैतदादित्यस्य शुक्लं भा: सैव साथ
यन्नीलं पर: कृष्णं तदमस्तत्सामाथ
य एषोऽन्तरादित्ये हिरण्मय: पुरुषो दृश्यते हिरण्यश्मश्रु-
र्हिरण्यकेश आप्रणखात्सर्व एव सुवर्ण: ।।६।।

अथ अनन्तरं सामशब्दस्य स अम इति द्वयोः समुदाययोः श्रीसीतारामगौरश्याम महसी ध्यातव्ये तदर्थं मन्त्रारम्भः। अथ शब्दोऽत्र प्रस्तावार्थकः।

अदितिः देवमाता, न दीर्यते न केनापि प्रत्यवायेन खण्डयितुं शक्यते इत्यदितिः। अखण्ड ब्रह्मस्मृतिः, अखण्डा ब्राह्मणि स्थितिः अतएव **'अदितिर्द्यौरदितिरन्तरिक्षम्'** इति मन्त्रवर्णे तस्या अपत्यं पुमान् आदित्यः। स्मृतिस्थितिपक्षे अदितेरयं आदित्यः, भक्तिपक्षे अदितिरखण्डभक्तिर्देवता यस्य स आदित्यः "दित्यादित्य पत्युत्तरपदाण्यः" इत्यनेन ण्य प्रत्ययः, स एव आदित्यः सूर्यः भगवद्भक्तो वा। तस्य सूर्यस्य मण्डले, भक्तपक्षे भक्तिसर्वस्वभूतस्य आदित्यवत् प्रकाशमानस्य भक्तस्य हृदये, यत् एव श्रुति-प्रसिद्धम्। श्वेतं रसमानाधिकरणनिरासकम् एतत् अति सन्निकृष्टम्, भक्तानामिति यावत्। शुक्लं— व्यत्ययान्नपुंसकलिंगः 'भा' विशेषणत्वात् शुक्ला इति वक्तव्यम्। सैव श्वेता भाः दीप्तिः जनकनन्दिनीरूपा सैव सा सामशब्दघटक सा इत्याकारकः समुदायः। अथ अनन्तरं यन्नीलं, श्यामवर्णं कृष्णं भक्तविपद्विनाशकं मुनिमन आकर्षकञ्च परः प्राकृतेन्द्रियागोचरं भगवतस्तेजः तदेव अमः। सामशब्दस्य अम इत्युत्तरसमुदायः। एवं शुक्लनीलमहोमिलितरूपं सा अम इति मिलितं साम। इत्थं साममीमांसां विधाय कस्येदं नीलं परः कृष्णं महः? इति जिज्ञासायां तत्प्रतियोगिभूतं तदाधारं पुरुषं वर्णयति मन्त्रोत्तरखण्डे।

यः जिज्ञासाविषयभूतः एषः अयं प्रणतनयनगोचरः आदित्ये भगवति सूर्ये आदित्यमण्डले वा आदित्यस्य इदं आदित्यमिति व्युत्पत्तौ अदितेवादित्यशब्दादपि **दित्यदित्यादित्य** इति सूत्रेण ण्य प्रत्ययविधानशासनात् अनुबन्धकार्ये **हलोयमां यमि लोपः** इति सूत्रेण 'य'कार लोपे। आदित्यमादित्यमण्डलम् तस्मिन् आदित्ये सूर्यमण्डले, **अन्तरा** मध्ये पुरुषः पुरि शेते इति पुरुषः। पुरः शरीराणि 'उ' निश्चयेन, सिनोति निजयोगमायया बध्नाति संसारबन्धने यस्तथाभूतः, **पिपर्ति** पूरयति कल्पतरुरिव भक्तवाञ्छाः सदैव यः स पुरुषः। पुरुः बहुरूपः स एव पुरुषः **हिरण्यमयः** ज्योतिर्मयः इति प्राञ्चः। न च विकारार्थेमयड विधानात् ब्रह्मणि विकारापत्तिरिति वाच्यं बाहुलकेन स्वरूपे मयट् विधाने ना दोषात्, हिरण्यशब्दस्य च ज्योतिरूपलक्षणत्वात्। नव्यास्तु हिरण्यविकाराः हिरण्मयानि स्वर्णरचितानि किरीटकुंडलकेयूरकटककिंकिणीनूपूरप्रभृति-भूषणादि हिरण्यमयानि तानि नित्यं सत्यस्मिन्निति **हिरण्मयः** भगवान् हि विविधमयहिरण्मयभूषणभूषितः, एवं **हिरण्यश्मश्रुः** ज्योतिर्मयकूर्च इति प्राञ्चः। वस्तुस्तु नीलश्मश्रुरेव भगवान् परन्तु स्वकपोलावलम्बि मकरकेतनकेतनकनककुण्डलयुग्मप्रमया हिरण्मय्या तत् श्मश्रूण्यपि हिरण्मयानीव दृश्यन्ते एवं हिरण्यभासाभाषितं श्मश्रु यस्य

= हिरण्यश्मश्रुः, एवं हिरण्येन कनकरचितकिरीटसुवर्णकान्त्या भाषिताः केशाः यस्य = हिरण्यकेशः। प्रमाणाञ्चास्यं मामकीनव्युत्पत्तौ कृष्णावतारप्रघट्टे श्रीभागवतम्। यथा—

महार्हवैदूर्यकिरीटकुण्डलत्विषापरिष्वक्तसहस्रकुन्तलम् ।
उद्दामकाञ्च्यांगदकैकणादिभिर्विरोचमानं वसुदेव ऐक्षत ।।

(भाग १०।३।१०)

प्रणखः श्रीचरणकमललाग्रभागः, तं मर्यादीकृत्य इति आप्रणखात्। पदपद्म-नखमणिमारभ्येति भावः। सर्वः सर्वाङ्गवच्छेदसहितः नखमारभ्य शिरो यावत् सर्व एव सम्पूर्णाङ्गश्रीविग्रहः सुवर्णः सुवर्णालंकारयुक्तः, अथवा शोभनं वर्णं कोटिकन्द-र्पदर्पदलनपटीयसी श्रीविग्रहकान्तिः यस्य तथाभूतः। अथवा शोभनं नीलं, नयनसुखदं तरुणतमालनवीननीरधरयामुजलसौभगं वर्णं यस्य तथाभूतः। नीलं हि वर्णं स्निग्धं भवति अतएव हि लोके चक्षुसो रवितापतस्त्राण मिच्छन् नीलोपनयनं परिधत्ते, अतएव आह प्राचेतसः स्निग्धवर्णः प्रतापवान्' (वा. १।१।११)। दृश्यते— भक्तिप्रवणमानसैः विलोक्यते तस्यैवेदं नीलं भाः इति वाक्य- योजना।।श्रीः।।

अथ निसर्गसुन्दरस्य परमात्मनः निजप्राणवल्लभस्य श्रुतिः कमलनेत्रे वर्णयति दयिताया इव तत्र विशेषरसनिष्पत्तेः—

तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी
तस्योदितिनाम स एष सर्वेभ्य पाप्मभ्य
उदित उदेति ह वै सर्वेश्यः पाप्मभ्यो य एवं वेद ।।७।।

तस्य सर्वांगसुन्दरस्य सूर्यमण्डलस्य देवस्य अक्षिणी नेत्रे कीदृशे? इत्यत् आह— पुण्डरीकं कमलं कीदृशं कमलेमित्यत आह कप्यासं पुण्डरीकं यथा कं जलं पिबति स्वरश्मिभिः शोषयति इति कपिः सूर्यः अतएव रघुकाव्ये **''सहस्रगुणमादातुं मादत्ते हिरसं रविः''** (रघुवंश १।१८)। तेन कपिना सूर्येण जलशोषकेणापि अस्यते रात्रिकालीनकोषसंकोचो निरस्यते यस्य तत् कप्यासम्। प्रभातोदितसूर्यरश्मिलब्धनिवासं पुण्डरीकं कमलं, यथा येन प्रकारेण, शोभते एवमेव प्रत्यूषनवविकसितकमलमिव भगवतः अक्षिणी नेत्रे, यत्तु कप्यासं मरकटगुदमिव यत् कमलं एवं नेत्रे भगवतः, इति व्याख्यातं गोविन्दपाददेशिकविधेयैर्भगवतपादैः तदसंगतमनुचितमाशास्त्रीयमश्लीलं च। नहि उपमितोपमानं हीनमुपमेयमुत्कर्षति सर्वज्ञशिरोमणिश्रुतिः स्वभर्त्तुर्नेत्रकमलोपमायै इदमत्यन्तमश्लीलमेवोपमानमन्विष्टवती भवेत्। नैवेत्थं इदं तु कदाप्यनास्वादित-

परमेश्वरपादपद्ममकरन्दरसानां भगवद्भक्तिविहीनमरुस्थलतुल्यशुष्कचेतसां महारौरवनरकावहं सन्निपातप्रलपितमिवोपेक्षम्।

आस शब्दो हि पायुपर्यायत्वेन कुत्रापि कोषे न दृष्टः। तस्मात् निक्षिप्यतामेषा पापीयसी कल्पना। यदि कपिशब्देन मर्कटस्यैव आग्रहः तदा कपीन् परमचंचलान् वानरानपि आसयति निजसुरभिणा मुग्धान् कृत्वा निश्चलयति इति कप्यासम्। तादृशं कमलं यस्य सौरमेण वशीकृतनाशिकाचित्तो वानरोऽपि घ्रातुं निश्चलो भवति इति भावः।

अथवा कपीन् निरतिशय चंचलान् मर्कटानपि प्रकृति चपलान् निजसौन्दर्येण आसयति उपवेशयति निश्चलयति तत्कप्यासम्। तादृशं यत्कमलं तद्वन्नेत्रे। कप्यासं यथा इत्युपमानेन भगवतो नेत्रोपमानस्य कमलस्य लोकोत्तरसौन्दर्यसौगन्ध्यादीनां प्रस्तुतीकरणम्।

तस्य परमात्मन् किन्नाम? अत आह उत इति नाम। उपपत्तिं वर्णयति यतोहि एषः परमात्मा सर्वेभ्यः चराचारेभ्यः पाप्मभ्यः पातकेभ्यः उदितः उत्कृष्टमुपरिगतः। अपहतपाप्मा इत्यादि वक्ष्यमाणत्वात्, य एवं वेद जानाति सोऽपि सर्वेभ्यः पाप्मेभ्यः उदेति उपरिगच्छति।।श्रीः।।

अथ चरमे मन्त्रे सिद्धान्ततः पूर्वश्रुतिद्वयवर्णितस्वरूपं परमात्मानमेव उद्गीथरूपं तन्महातात्पर्यञ्च श्रुतिरङ्गीकरोति—

तस्यर्क्य साम च गेष्णौ तस्मादुद्गीथस्तस्मात्त्वेवोद्गातैतस्य हि गाता स एष, ये चामुष्मात्परञ्चो लोकास्तेषां चेष्टे देवकामानां चेत्यधिदैवतम्।।८।।

स परमात्मा पक्षीव "द्वासुपर्णा सयुजा सखाया" (मुण्डक ३।१।१) इति श्रुत्यन्तरात् तस्य पक्षीभूतस्य ऋक् साम च गेष्णौ पक्षौ, याभ्यां स उड्डीयमानः भक्तमपि गच्छति, तस्मात् ततो हेतोः अयं उद्गीथः स उद्गीथः इति व्युत्पत्तेः। तस्मादेव एतस्य उद्गाता गाता गायकः उत परमात्मा तं गायति इति उद्गाता एव विग्रहात् एषः परमात्मैव उत अमुष्मात् एतस्मात् साकेतविहारिणः श्रीरामपरब्रह्मणः पराञ्चः निम्नगामिनः ये लोकाः ब्रह्मलोकादयः तेषां देवकामानामिन्द्राद्यभीसितानां स एव ईष्टे शासनं करोति। इति इत्थमेव अधिदैवतम् देवतासम्बन्धि उद्गीथ उपासनम्।।श्रीः।।

इति छान्दोग्य उपनिषदि प्रथमाध्याये षष्ठखण्डे श्रीराघवकृपाभाष्यम् सम्पूर्णम्।

।। श्रीराघवः शन्तनोतु ।।

अथ सप्तमः खण्डः

एवमधिदैवोद्गीथोपासनां वर्णयित्वा साम्प्रतम् अध्यात्मोद्गीथोपासनां वर्णयितमुपक्रमते। यत्र उपासनायां देवतानां सम्बन्धः तदधिदैवतं, यत्र च आत्मनि विषये उपासनमारभ्यते तदध्यात्मम् आत्मनि इत्यद्यात्म "अव्ययं विभक्तीत्यादिना" अव्ययीभावः समासः। आत्मशब्दोऽत्र शरीरपरः आत्माशरीरे इति कोशात्। उद्गीथं नाम भक्तिसंबलितसामगानं साम च ऋच्यधिष्ठितम् अतः ऋक्साम्नोरेव तत्प्रतीकमिथुनद्वारेण पौनःपुन्येन स्मरणं, साम्प्रतं शरीरावयवेषु उद्गीथधारणा निर्दिश्यते, तत्र प्रथमं चक्षुषि अथेत्यादिना—

अथाध्यात्मं वागेवर्क्प्राणः साम तदेतदेतस्यामृच्यमूढँ्साम । तस्मादृच्यध्यमूढँ्साम गीयते वागेव सा प्राणोऽमस्तत्साम ।।१।।

अथ इदानीम् अध्यात्मम् अध्यात्मविषया उद्गीथोपासना प्रस्तूयते। वाग् वाणी एव ऋक् तस्याः वाङ्मयत्वात्, प्राणः साम ऋचि साम अध्यूढं प्रतिष्ठितं तस्मात् तस्यां तद्गीयते, वाक्यखण्डपक्षे वागेव सा प्राण एव अमः।।श्रीः।।

भूयश्चक्षुरात्मनोः ऋक्सामप्रतीकत्वमुपस्थापयति आत्मा खलु प्रकाशरूपत्वात् चक्षुरधिवसति यथा ऋचं साम—

चक्षुरेवर्गात्मा साम तदेतदेतस्यामृच्य साम तस्मादृत्तयध्यूढँ्साम गीयते। चक्षुरेव सात्मामस्तत्साम ।।२।।

ऋक्साम्नोरिव चक्षुरात्मनोः सततसाहचर्यात्।

तयोः तत् प्रतीककल्पनमेवं चक्षुरात्मनोरेव सा अम् इति सामोपासनायाः प्रतीकता।।श्रीः।।

श्रोत्रमेवङ्र्मनः साम तदेतदेतस्यामृच्यध्यूढँ्साम । तस्मादृच्यध्यूढँ्साम गीयते श्रोत्रमेव सा मनोऽमस्तत्साम ।।३।।

श्रोत्रेऋचः, मनसि च साम्नः धारणा कार्येति फलितार्थः। श्रोत्रमनसो हि नित्यसाहचर्यं शेषं सुगमम्।

भूयः चक्षुषि वर्तमानयोः शुक्लनीलरोचिषोः ऋक्सामप्रतीकतामुपादयति—

अथ यदेतदक्ष्णः शुक्लं भाः सैवर्गथ यन्नीलं परः कृष्णं तत्साम तदेतदेतस्यामृच्यध्यूढँ्साम तस्मादृच्यध्यूढँ्साम गीयते ।

अथ यदेवैतदक्ष्णः शुक्लं भाः सैवसाऽथ यन्नीलं परः कृष्णं तदमस्तत्साम ।।४।।

चक्षुषि द्वे तेजसी शुक्लं नीलं चेति तत्र शुक्लम् ऋचि नीलं साम्नि प्रतीकायितं शेषं पूर्ववत्।।श्रीः।। अथ चाक्षुषादित्यवर्तिपुरुषयोरैक्यं दर्शयति—

अथ य एषोऽन्तरक्षिणि पुरुषो दृश्यते
सैवक्र्तत्साम तदुक्थं तद्यजुस्तद्ब्रह्म ।
तस्यैतस्य तदेवरूपं यदमुष्य रूपं
यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नाम ।।५।।

यः एषः सर्वजनदृश्यः आक्षिणि नेत्रे अन्तर्मध्ये पुरुषो दृश्यते स एव ऋक् तदेव च साम अत्र ऋक् साम्नोः न विशेषः। तदेव उक्थं स्तोत्रविशेषः तदेव ब्रह्म परमेश्वरः एवमेतस्य आदित्येन सह पुरुषेण पूर्णमैक्यं तदर्थमुत्तरार्धारम्भः।।श्रीः।।

तथा च आदित्यं मण्डलस्थपुरुषस्य यौ पक्षौ तावेवास्य यत्तस्य नाम तदेवास्य एतस्य कार्यं, वैशिष्ट्यमाह—

स एष ये चैतस्मादर्वाञ्चो लोकास्तेषां
चेष्टे मनुष्यकामानां चेति ।
तद्य इमे वीणायां गायन्त्येतं
ते गायन्ति तस्मात्ते धनसनयः ।।६।।

सः अक्षि वर्तमानः एषः आदित्यमण्डलस्थसदृश एव अक्ष्णोरादित्यमयत्वात्। एवमेषः स्वस्मात् अर्वाञ्चः निम्नाः ये लोकाः अन्तरिक्षादयः तेषाम् ईष्टे ईशनं करोति। मनुष्यकामानाञ्च अत्र मातुः स्मरति इति वत् कर्मणः सम्बन्धविवक्षायां षष्ठी। "विवक्षाधीनानि कारणाणि भवन्ति" इति वैयाकरणनियमात्। एवमेतं पुरुषं ये वीणायां स्तुतिवाद्यविशेषे तन्त्रीनामके ये गायन्ति ते धनसनयः धनं हिरण्यादिकं सनिः लाभः येषां ते धनसनयः।।श्रीः।।

एतद्धारणया सामगानफलमाह—

अथ य एतदेवं विद्वान्साम गायत्युभौ स गायति ।
सोऽमुनैव स एष ये चामुष्मात्पराञ्चो लोकास्ताँश्चाप्नोति देवकामाँश्च।।७।।

अथ अनन्तरं यः जिज्ञासुः एतत् अक्षिपुरुषादित्यपुरुषयोरभेदं विद्वान् जानन् कथमित्यतत् आह— एवं पूर्वदर्शितरीत्या जानन् सामगायति सामगानं करोति। सः

...स्थत्वादनयोः उभौ आक्ष्यादित्यवर्तिनौ पुरुषौ गायति सः अमुना आदित्येन ...दिलोकान्नीयते। यतो हि स एष अक्षि पुरुष एव आदित्यपुरुषः। एवं गायकः ...त् परान् लोकान् देवकामाँश्च देवदुर्लभान् भोगान् आप्नोति लभते।।श्रीः।।

पूर्वशेषं स्पष्टयति—

अथानेनैव ये चैतस्मादर्वाञ्चो लोकास्ताँश्चाप्नोति ।
मनुष्यकामाँश्च तस्मादु हैवंविदुद्गाता ब्रूयात् ।।८।।

अथ अनेनैव आदित्यमण्डलस्थेन पुरुषेण अमुष्मात् आदित्यलोकात् अर्वाञ्चः ...वरे ये लोकाः तान् आप्नोति, देवकामांश्च लभते, तस्मात् ततो हेतोः एवंवित् ...वंवेत्ति जानाति यस्तथाभूतः उद्गाता ब्रूयात् संशेत विधिरयम्।।श्रीः।।

इति छांदोग्योपनिषदि प्रथमाऽध्ये सप्तमे खण्डे श्रीराघवकृपाभाष्यम् सम्पूर्णम्।।
।।श्रीराघवः शन्तनोन्तु।।

।। अथ अष्टमः खण्डः ।।

उद्गीथोपासनायामनेके प्रकाराः प्रदर्श्यन्तेऽस्मिन् खण्डे। व्यापकत्वात् तस्याः सिद्धान्तः ससुखमध्येतृणां हृदयंगमा भवन्तु इति कृत्वा उत्तमश्लोकशिखामणीनां त्रयाणां महर्षीणां ज्ञातोद्गीथानाम् आख्यायिकां श्रुतिः प्रस्तौति। पुण्यवतां हि संकीर्तनं महते श्रेयसे भजन— प्रतिबन्धकप्रत्यवायनिराशाय च कल्पते।

त्रयो होद्गीथे कुशला बभूवुः शिलकः
शालावत्यश्चैकितायनो दाल्भ्यः प्रवाहणो
जैवलिरिति ते होचुरुद्गीथे वै कुशलाः
स्मो हन्तोद्गीथे कथां वदाम इति ।।१।।

सुप्रसिद्धमेतदैतिह्यिकं यत् कस्मिंश्चित्काले शालावतस्य पुत्रः शालावत्यः शीलकः एतन्नामा ऋषिपुत्रः शिलानि लूनशस्यतः पतितान्यन्नानि अन्विच्छति तथाभूतगुणविशिष्टः अन्वर्थाभिधोमुनिः चेकितायनस्य पुत्रः चैकितायनः, दाल्भ्यः दल्भगोत्रोत्पन्नः जेवलस्य ऋषेः पुत्रः जैविलिः, **प्रवाहणः** प्रवाहयति दिव्यज्ञानगंगा यस्तथागुणः एते त्रय उद्गीथे उद्गीतरहस्यज्ञाने कुशलाः निपुणाः पारोक्षेण भूताः। अथ ते पारिषद्यान् ह निश्चयेन उचुः कथयामासु उद्गीथे एतदुपासनाज्ञाने कुशलाः विदग्धाःस्मः। हन्त हर्षार्थोऽयं निपातः प्रश्नार्थो वा। यदि भवताम् अनुमतिश्चेत् कथां

उद्गीथसम्बन्धिनीं विचारणां वदाम कथयाम सम्प्रश्ने लोट्। एवम् ऋषिकुमाराणां स्वकीयानुभवप्रस्तावचिकीर्षां समीक्ष्य ऋषयोऽनुजज्ञुः।।श्रीः।।

इत्थं परस्परं संमत्र्य किं चक्रुः? इत्यग्रिममन्त्रमाह—

तथेति ह समुपविविशुः स ह प्रवाहणो जैवलिरुवाच । भगवन्तावग्रे वदतां ब्राह्मणयोर्वदतोर्वाचँ श्रोष्यामीति ।।२।।

तथा स्वीकारार्थोऽयमव्ययः, तथा पूर्वोक्तप्रस्तावं स्वीकृत्य इति उद्गीथकथा निश्चयं कृत्वा समुपविविशुः सम्यक्त्वेन नातिदूरे त्रयः उपविष्टवन्तः उपवेशने सम्यक्त्वं च उद्गीथरूपब्रह्मविचारोद्देश्यकं 'ह' निश्चयेन जैवलस्य प्राग्यः पुत्रः प्रवाहणः राजन्यः ह निश्चयेन उवाच निवेदयामास तौ शिलकचैकितायनौ भगवन्तौ सम्मानवाचकमिदं सम्बोधनं भगवत् स्वरूपौ भगवन्तौ ब्राह्मणौ अग्रे पूर्वं वदताम् उद्गीथविचारणां प्रस्तुतां, वदतामिति प्रार्थने लोट्। यतो हि ब्राह्मणत्वेन जन्मना गुरुत्वात् भवद्भ्यां पूर्वं किमपि कथयन् न प्रत्यवायभाक् बुभूषामि। ब्राह्मणयोः तपश्शास्त्रयो निसम्पन्नयोः विशुद्धयोः वदतो उद्गीथं कथयतोः सतोः, अथवा वदतोरिति नादरार्था षष्ठी "षष्ठी चानादरे" इत्यनेन एवं ब्राह्मणौ वदन्तौ आद्रियमाणः वाचं वाणीं श्रोष्यामः समाकर्णयिष्यामि इति शब्दः वचनप्रकारसंकेतकः।।श्रीः।।

अथ प्रश्नप्रकारं निरूपयति शिलकस्य—

स ह शिलकः शालावत्यश्चैकितायनं दाल्भ्यमुवाच । हन्त त्वा पृच्छानीति पृच्छेति होवाच ।।३।।

एवमुक्तवति जैविलौ प्रवाहणे शालावतस्य पुत्रः शिलकः चिकीतायनपुत्रं दाल्भ्यं उवाच अकथयत्। **हन्त** स्नेहेन त्वां पृच्छामि इति शब्दः, अनुमति याच्ञाप्रकारपरः दाल्भ्यः उवाच पृच्छ प्रश्नं कुरु आज्ञार्थेलोट्।।श्रीः।।

प्रश्नमनुवदति—

का साम्नो गतिरिति स्वर इति होवाच स्वरस्य का गतिरिति प्राण इति होवाच । प्राणस्य का गतिरित्यन्नमिति होवाचान्नस्य का गतिरित्याप इति होवाच ।।४।।

अत्र चत्वारः प्रश्नाश्चत्वार्येव उत्तराणि। साम्नः सामवेदस्तोत्रस्य का गतिः कः आश्रयः। इति पृच्छति, दाल्भ्यः उवाच, स्वरः प्रणवः पुनः स्वरस्य प्रणवस्य का गतिः? क आधारः? इति प्रष्टवति शिल्के, दाल्भ्य उवाच, निश्चयेन प्राणः तमेव स्वरोऽधितिष्ठति। भूयः प्राणस्य का गतिः? किमधिकरणम्? इति प्रश्ने दाल्भ्यः ह,

उवाच अन्नम् अदनीयं वस्तु नैतदन्तरेण प्राण: स्थातुं शक्य:। पुनरन्नस्य ? का प्रतिष्ठा? इति जिज्ञासमाने शिलके दाल्भ्य: निश्चयेन उवाच आप: इति शब्दोऽत्र अष्टकृत्व: प्रयुक्त: यथाक्रमं चतुर्णां प्रश्नानाम् उत्तराणां च निर्दिशति।।श्री:।।

अथ साम्न: चरमस्थितिं वर्णयितुं प्रश्नोत्तरविराममाह—

अपां का गतिरित्यसौ लोक इति होवाचामुष्य
लोकस्य का गतिरिति न स्वर्गं
लोकमतिनयेदिति होवाच स्वर्गं वयं लोक ँ्
सामाभिसंस्थापयामः स्वर्ग स ँ्तावत ँ् हि सामेति।।५।।

अपां जलानां का गति: क आश्रय:? इति शिलके पृच्छति दाल्भ्य उवाच असौ निर्देशेनाह अग्रे वर्तमानोऽन्तरिक्षलोक: अमुष्मादेव जलं वर्षति, पुन: अमुष्य का गति:? इति पृष्टवति स्वर्गम् इति उत्तरं दत्त्वा, पुन: पिपृच्छिसन्तं समीक्ष्य निवारयति अग्रे न पृष्टव्यम्। यतो हि स्वर्गलोक: भगवत: परमं व्योम-भिधान: अष्टचक्रा नवद्वारा देवानां पूरयोध्या इत्याथर्वणोक्ते:। अत: त्वेन समादिशति स्वर्गं स्व: स्वर्गेऽपि गीयते इति स्वर्ग: साकेतलोक:, क्रम्य कमपि लोकान्तरं न नयेत् अत्र शक्यार्थे 'शकि लिङ् च' इति सूत्रात्। हि स्वर्गं लोकं अतिक्रम्य कोऽपि कमपि नैव लोकान्तरं नेतुं शक्नोति इति भाव:। रिक्तलोकाभावात्। अत: वयं स्वर्गं लोकं साकेताख्यं लब्ध्वा तत्रैव स्तुतिपरकवेदं संस्थापयाम: संस्थं जानीय संस्थं कुर्मो वा। तत्रैव साकेते जमानस्य सीतापते: मंगलमयस्तवनाय सामवेदस्य पूर्णतयोपयोगात् अतस्तेन व स्थातव्यमिति भाव:। स्वर्गो लोको वै सामवेद: इति श्रुत्यन्तरमानाच्च, एवं यतो हि साम सामवेद: स्वर्ग- संस्तावम् स्वर्गे साकेते भगवत: सीताभिरामस्य स्य संस्ताव: संस्तव एव संस्ताव:, (स्वार्थे अण्) सम्यक्स्तुति: येन तादृशम् इत्थं निगद्य दाल्भ्य: शिलकं स्वर्गस्य का गतिरिति प्रश्नकरणान्निषेधति।।श्री:।।

उत्तरादसन्तुष्यन् शिलक: दाल्भ्यं प्रति करोति। तमित्यादिना—

त ँ् ह शिलकः शालावत्यश्चैकितायनं
दाल्भ्यमुवाचाप्रतिष्ठितं वै किल ते
दाल्भ्य साम यस्त्वेतर्हि ब्रूयान्मूर्धा ते
विपतिष्यतीति मूर्धा ते विपतेदिति ।।६।।

असन्तुष्यन् शिलक: आह चेकितायनसुतं दाल्भ्यं यद्दाल्भ्य ते साम मवेदज्ञानमप्रतिष्ठितं प्रतिष्ठारहितं निराधारमित्यर्थ:। एवं ज्ञानशून्यं त्वां यदि

कश्चिद् ब्रूयात् शपेत् यत्ते ज्ञानशून्यस्य मूर्धा शिर: निपतिष्यति कबन्धत: पृथकभविष्यति। तेन शापेन मूर्धा मस्तकं तव निपतेदेव। नहि अल्पज्ञानस्य मूर्धधारणाधिकारो बुद्धिमत्सु।।श्री:।।

शिलकेन समधिक्षिप्तो दाल्भ्य: जिज्ञासते—

हन्ताहमेतद्भगवतो वेदानीति विद्धीति होवाचामुष्य लोकस्य का गतिरित्ययं लोक इति होवाचास्य लोकस्य का गतिरिति न प्रतिष्ठां लोकमतिनयेदिति होवाच प्रतिष्ठा वयं लोकँ् सामाभिसँ्स्थापयामासः प्रतिष्ठासँ्स्तावँ्हि सामेति ।।७।।

हन्त इति विषादेऽपि भगवत: श्रीमत: एतत् किं प्रतिष्ठं साम इति वेदानि ज्ञातुमिच्छामि इच्छार्थे लोट्। विद्धि जानीहि इति शिलकेन अनुज्ञात: दाल्भ्य: ब्रूहि अमुष्य लोकस्य का गति क आश्रय:? अयं लोक: मर्त्याख्य: अस्मिन्नेव निहितकर्मणां फलानुसारं तल्लोकप्राप्यत्ते तस्मात् इममेव लोकं प्रतिष्ठात्वेन स्वीकुर्म:। इमं लोकं प्रतिष्ठा नातिनयेत् न कोऽपि साम अतीत्य नयेत् अत्रैव होमदानादिकर्मसु अस्मिन् लोके वा धृतावतारस्य भगवत: अयोध्यायां गोकुले च लीलया क्रीडत: स्तुतये तस्य परमोपयोगात्। तस्मात् इयमेव लोक साम अभिसंस्थापयाम:। प्रतिष्ठा संस्तावं प्रतिष्ठायामेव संस्ताव: स्तुति: यस्य तथाभूतमिति शिलकेन भगवदवतारभूमावेव सामवेदस्य परमोपयोगो निश्चित:। न हि स्वर्गादौ भगवतोऽवतार: तस्मादयमेव श्रेष्ठ:।।श्री:।।

शिलकस्य उत्तरेण असन्तुष्यन् जेवलपुत्र: प्रावाहण: समाक्षिपति—

तँ्ह प्रवाहणो जैवलिरुवाचान्तवद्वै किल ते
शालावत्य साम यस्त्वेतर्हि ब्रूयान्मूर्धा ।
ते विपतिष्यतीति मूर्धा ते विपतेदिति हन्ताहमेतद्
भगवतो वेदानीति विद्धीति होवाच ।।८।।

अथ तं जेवलपुत्र: प्रावाहण: आक्षिपत्, शालावत्य शलावतपुत्र ते साम, तव सामवेदज्ञानं वै निश्चयेन अन्तवत् विनाशशीलं, एवमज्ञानं त्वां कश्चित् एतर्हि अस्मिन्समये ब्रूयात् आक्रोशेत् यत्ते मूर्धानिपतिष्यति च्युतो भविष्यति। तदा ते मूर्धा निपतेत् इत्याक्षिप्त: शिलक: प्राह हन्त! विस्मये अहं एतत् सामप्रतिष्ठाविषयं भगवत: श्रीमत: प्रवाहणात् वेदानि वेदितुम् इच्छामि प्रावाहण: उवाच विद्धि जानीहि।।श्री:।।

इति छान्दोग्योपनिषदि प्रथमाध्यायेऽष्टमे खण्डे श्रीराघवकृपाभाष्यम् सम्पूर्णम्।।
।। श्रीराघव: शन्तनोतु ।।

।। अथ नवमः खण्डः ।।

एवमष्टसु खण्डेषु उद्गीथोपासनायाः विविधप्रतीकानि वर्णयित्वा समेषां [illegible]नां सिद्धान्ततः परमव्योमभूते नितान्तपूते अपहतपाप्मनि निरस्तसकलहेयगुण-[illegible]के निखिलकल्याणगुणगणसागरे शततदत्तप्रपन्नजनमनोवांछावकाशे चिदाकाशे [illegible]काशे आकाशे ब्रह्मणि परमतात्पर्यमध्यवसीय सिद्धान्ततः तमेवोदगीथमध्यवस्यन्ती [illegible]: प्रवाहणमुखेन सिद्धान्तपीयूषं प्रवाहयन्ती नवमखण्डं उपक्रमते।

प्रतीकोपासनायाः अवास्तविकत्वात् **'न प्रतीके नहि सः'** (ब्रह्मसूत्र १-४-४) [illegible] बादरायणोक्त्यापि प्रतीकोपासनायाः अयथात्वबुबोधयिषया ग्रन्थारम्भः। ननु [illegible] प्रतीकोपासनायाः वैयर्थ्यं तर्हि तत्प्रतिपादनपराः अष्टौ खण्डाः छांदोग्योपनिषदः [illegible]रम्भाः? इति चेन्न। सत्यं बोधयितुं तत्सहकारित्वेन असत्यारम्भस्यापि सफल[illegible]दर्शनात्। नहीतरतारकदर्शमन्तेरण सहसा कोऽपि ध्रुवं दुष्टुमर्हति। यथोक्तं [illegible]रिणा—

उपायाः शिक्षमाणानां बालानां उपलालनाः ।
असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते ।।

(वाक्यपदीय पदखण्ड १०)

तस्मात् सिद्धान्तद्रढीकरणाय तेषामुपोयगात् सफलारम्भास्ते।

अस्य लोकस्य का गतिरित्याकाश
इति होवाच सर्वाणि ह वा इमानि
भूतान्याकाशादेव समुत्पद्यन्त आकाशं प्रत्यस्तं
यन्त्याकाशो ह्येवैभ्यो ज्यायानाकाशः परायणम् ।।१।।

पूर्वस्मिन् खण्डे शिलकस्योत्तरेण संतोषमलभमानेन अन्तवत्तेषामिति समधिक्षिप्तः शिलकः तद्रहस्यं तस्मादेव प्रावाहणात् ज्ञातुं तेनानुज्ञातः पृच्छति। अस्य दृश्यमानस्य लोकस्य जगतः का गतिः, कः आश्रयः? इति इत्थं पृच्छन्तं शिलकं ह निश्चयेन जैवलिः आकाशः इत्याकारकम् उत्तरम् उवाच प्राह। अत्राकाशशब्दः परमात्मवाची न तु नभोवाची नभोवाचिन आकाशस्य महाभूतत्वेऽपि अष्टाष्वपराषु प्रकृतिषु अन्यतमत्वात् जडप्रायत्वाच्च तत्र लोकस्य गत्यसंभवात्। **आकाशस्तल्लिंगात्** (ब्रह्मसूत्र १।१।२२) इति बादरायणनिर्देशात् श्रुतावपि आकाश इति पुंल्लिगं निर्देशात् नभोवाचिनश्च क्लीववृत्तित्वप्रसिद्धेः आकाशोऽत्र परमेश्वरवाची, सैव सर्वेषां गतिः, 'सा निष्ठा सा परागतिः' (कठ. १।३।९) इति श्रुतेः। **'गतिर्भर्त्ताप्रभुःसाक्षी'** (गीता ९।१८) इति स्मृतेश्च। उपपत्तिमाह— ह वा इति प्रसिद्धिद्योतको निपातौ

भवन्ति इति भूतानि प्राणवन्ति सत्वानि सर्वाणि इमानि दृग्गोचराणि आकाशादेव परब्रह्मण: सकाशात् एव समुत्पद्यन्ते प्रादुर्भवन्ति, प्रलये आकाशं प्रति अस्तम्यन्ति तिरोभवन्ति। तस्मात् एभ्य: प्राणभृद्भ्य: आकाश: एव निर्लेपस्वभावपरमात्मा ज्यायान् प्रशस्यतर:। अत: एषामाकाश: परायणम् परं प्राप्तिस्थानम् तस्मात् आकाशवत् सवलावकाश: अकाशवच्च नील: तद्वत् च कृपावारिधरधाराधर: परायणम् परमं गन्तव्यमिति हार्दम्।।श्री:।।

अथ तमेवाकाशं परोवरीयोद्गीथत्वेन निश्चाययति। एष इत्यादिना—

स एष परोवरीयानुद्गीथ:
स एषोऽनन्त: परोवरीयो हास्य ।
भवति परोवरीयसो ह लोकाञ्जयति य
एतदेवं विद्वान्परोवरीयाँ्समुद्गीथमुपास्ते ।।२।।

स एष: **'आकाशो वै नाम'** बृहदारण्यक (८।१४।१) इति श्रुत्यन्तरेण दत्ताकाशानामा एष: अनुभवगम्य: परमात्मा परोवरीयान् पर: सर्वत: श्रेष्ठ: अवरीयान् अवरतोऽपि श्रेष्ठ: परश्च अवरीयांश्च इति परोवरीयान्। इति प्राञ्च:। वयं तु परो हिरण्यगर्भतोऽपि श्रेष्ठ: वरीयान् इति निर्गुण-सगुणमध्ये निर्गुणापेक्षया सगुणत्वेन वरीयान्। यदि च परश्चासौ अवरीयानिति तदा कर्मधारये सति पर शब्दघटकाकारणे सह अवर इति आकारस्य दीर्घे परावरीयान् छान्दसे ओकारे परोवरीयान्, परस्मादपि परतर:, उद्गीथ: स एष: अन्त: अन्तर्हित: देशकालाभ्या अपरिच्छिन्नत्वात्। एतत् ज्ञानफलमाह, अस्य तज्ज्ञातु: जीवनं परोवरीय: श्रेष्ठतरं भवति। य: एवं विद्वान् उद्गीथं आकाशरूपम् उपास्ते स: परोवरीय: स: श्रेष्ठतरान् लोकान् आब्रह्मभुवनानि जयति अधिकरोति।।श्री:।।

पुनरुद्गीथोपासनाया: फलश्रुतिप्रमाणं प्रत्यायितु शाण्डिल्यवचनमुद्धरति—

तँ्हैतमतिधन्वा शौनक उदरशाण्डिल्या-
योक्त्वोवाच यावत्त एनं प्रजायामुद्गीथं
वेदिष्यन्ते परोवरीयो हैभ्यस्ता-
वदस्मिंल्लोके जीवनं भविष्यति ।।३।।

तं श्रुतिप्रसिद्धं एतम् इमम् आकाशनामानमुद्गीथं ह निश्चयेन अतिधन्वा अतीतं प्रणवाख्यं धनु: येन अथवा अतसज्जं प्रणवाख्यं धनु: येन स अतिधन्वा **प्रणवोधनु:**

…ह्यात्मा (वा. १।९।४) इति श्रुतेः, आत्तप्रणवचाप इति भावः। शौनकः शुनकपुत्रः …शाण्डिल्याय, उदरे जठरे शाण्डिल्यः, शाण्डिल्यगोत्रपावकः, विज्ञानरूपः यस्य …भूतः उदरशाण्डिल्यः अस्मै अन्वर्थनाम्ने ऋषये उक्त्वा विधिवत् पाठयित्वा …च, फलश्रुतिं वर्णयामास। काम इत्याह— वत्स ते तव प्रजायामत्र …ख्यायामेकवचनं, संततिपरम्परायां येन उद्‌गीथं वेदिष्यन्ते यथा रहस्यमुपाशिष्यन्ते। …वन् एभ्यः तव वंशेभ्यः परोवरीयः अति श्रेष्ठतरं जीवनं भविष्यति। …स्यते।।श्रीः।।

भूयोऽपि फलश्रुतेरेतस्याः व्यापकत्वमाह— न केवल उदरशाण्डिल्यस्यैव …देवं विदामन्यषामपि—

तथामुष्मिँल्लोके लोक स य
एतदेवं विद्वानुपास्ते परोवरीय एव ।
हास्यास्मिंल्लोके जीवनं भवति तथा-
मुष्मिंल्लोके लोक इति लोके लोक इति ।।४।।

एवं यथोक्तरीत्या विद्वान् जानन् एतमुद्‌गीथमुपास्ते तस्य अमुष्मिंल्लोके स्वर्गे …वरीयः भगवत् सान्निध्यमूलकं जीवनं भवति। तथा अमुस्मिन्स्वर्गे लोके साकेते …कः भगवदवलोकनञ्च जायते। लोके लोके इति आदरार्थे द्विरुक्तिः।।श्रीः।।

इति छांदोग्यमुपनिषदि प्रथमाध्याये नवमखण्डे श्रीराघवकृपाभाष्यम् सम्पूर्णम्।।

।। श्रीराघवः शन्तनोतु ।।

।। अथ दशमः खण्डः ।।

पूर्वेषु सकलेष्वनेकैः प्रकारैरुद्गीथोपासना सविस्तरं वर्णिता, तत्र तस्यैव महत्वं प्रस्तोतुमुद्गीथस्य प्रतिहारप्रस्तावोऽपि अवश्यं वर्णनीय इति कृत्वा शकलचतुष्टयं आरभ्यते। जानन्नेव खलु प्रतिहारः प्रस्तुतवन्नुद्गीथं यजमानश्रेयसे प्रभवति। अतस्तद्विज्ञानविजृम्भणेयमाख्यायिका प्रतिपाद्यं स्पष्टयितुं सुखावबोधाय समारभ्यते। यत्र धर्मपरायणस्योशस्त्यस्य तत्पत्न्याश्च काचिदपूर्वाचारसंहिता संश्राव्यते। स्वयमेव श्रुत्या—

मटचीहतेषु कुरुष्वाटिक्या सह जाययोषस्तिर्ह ।
चाक्रायण इभ्यग्रामे प्रद्राणक उवास ।।१।।

ह निश्चयेन प्रसिद्धो वा, श्रुत्युक्तत्वात् प्रसिद्धमिदमाख्यानमिति भावः। कुरुषु, उत्तराकुरुषु एतन्नामकेषु देशेषु मटचीः वज्रं, 'मटचीः कुलिषं वज्रं पविरशनिः सुरायुधः'

इति वैष्णवकोषः। व्युत्पत्तिश्चात्र मथति विनाशयति पर्वतादिपार्थिवानि वस्तूनि या सा मटची। अत्र विनाशनार्थक मथ् धातोः औणादिकश्चिष्प्रत्ययः **''षः प्रत्ययस्य''** (पा. सूत्र १।३।६) इत्यनेन षकारलोपे परिषोदरादित्वात् थकारस्य टकारे मटचीः। **वज्रं तया** मट्च्या वज्रपातेन हतेषु कार्त्स्न्येन नाशंगतेषु यदा वज्रपातेन सम्पूर्णकुरुजाङ्गलं शस्यावच्छेदेन नष्टं जातं तस्मिन्समये मटचीहतेषु कुरुषु इत्यत्र भावलक्षणसप्तमी। चाक्रायणं, चक्रनामकमहर्षेः अपत्यं पुमान् स च किं भूत? इत्यत आह प्रद्राणकः द्रा कुत्सितगत्यर्थकः कुत्सितगतिश्च दुर्गतिः सा च धनाभावजन्यदरिद्रता प्रकृष्टा, द्रा इति प्रद्रा प्राकर्षञ्च तत्र ज्ञानाभावमूलकम्। यथोक्तं गोस्वामिपादैः, **'जलसंकोच विकल भये मीना। अबुधकुटुम्बी जिमि धनहीना'**। ननूषस्तेः ज्ञानाभावजन्यदारिद्रमवोचः तदनुचितम्, सति ज्ञानाभावे तेन राजसभे समस्तयाज्ञिकानां समक्षं कृतो ज्ञानोपदेशो नोपपद्येत? नैष दोषः तस्योद्गीथविषयकज्ञाने सत्यपि ब्रह्मज्ञानं स्यादेवेति नोपपद्यत। तज्ज्ञानं हि यज्ञविषयं यश्च द्रव्यमयः तस्मिन् सत्यपि विषयासक्तिर्न समाप्यते। अन्यथोषस्तिः स्वजीवनत्राणार्थं कथमुच्छिष्टान् कुल्भमाषान् भिक्षेत? नहि ब्रह्मज्ञानिनो जिजीविषोपपद्यते। तस्मात् सत्यपि द्रव्यज्ञवैदग्ध्ये उषस्तौ नितान्तविषयविरक्तिसाध्यस्य बाधितसकलभवप्रपञ्चस्य ज्ञानयज्ञस्य नितरामभावः कल्पनीयः। न च द्रव्ययज्ञेन सह ज्ञानयज्ञसमन्वयस्यादितिवाच्यम्? तस्य त्रिकालमप्यसम्भवात्। न खलु कोऽपि सुधीः पृथ्वीस्वर्गयोः सामञ्जस्यं कर्तुमीष्टे यथोक्तं गीतायाम्—

'श्रेयान् द्रव्यमयाद्यज्ञाज् ज्ञानयज्ञः परन्तप' (गीता ४।३३)।

तस्मात् तत्र प्राकर्ष्यं ब्रह्मज्ञानशून्यत्वमूलकमेवेति विरम्यते। एवं प्रकृष्टा या द्रा सा प्रद्रा तामाश्रित्यैव आनिति कथञ्चित् श्वसिति स प्रद्राणकः तादृशः उषस्ति, उषसि प्रातः जातः इति उषस्तिः। अत्र भवार्थे औणादिक तिच् प्रत्ययः। यद्यप्यसौ कर्मकाण्डासक्तचित्तस्तथापि विवेकरूपिण्यामुषसि प्रभूतः सः नैव विरक्तः वस्तुतस्तु अतितरां विषयासक्तः अतएव आटिक्या आटकी नाम **'अलब्धयौवना नारी आटिक्य व्यञ्जनस्तनी'** इति स्मरणात् तथैव जायया पत्न्या सह इभ्य ग्रामे इभाः हस्तिनः तान् अर्हन्तीतीभ्याः हस्तिपाः तेषां ग्रामे उवास निवासं चक्रे। दृश्यः ग्राम इति शब्दोऽपि तस्मिन्नुषस्तावध्यात्मविद्याशून्यत्वं सूचयति, न खलु ज्ञानिनः ग्रामवासो घटते। तथोक्तं नीतौ—

यदि वांच्छसि मूर्खत्वं वसग्रामे दिनत्रयम् ।
अन्यस्य ह्यागमो नास्ति आगतस्यापि संशयः ।।

अथ दरिद्रः सन्नुषस्तिः किमकरोदित्यत् आह—

स हेभ्यं कुल्माषान् खादन्तं बिभिक्षे तँ होवाच।
नेतोऽन्ये विद्यन्ते यच्च ये म इम उपनिहिता इति ।।२।।

प्रसिद्धमेतद्, यदेकदा बुभुक्षावशंवदचेतन उषस्तिः भिक्षितुमटन् कुत्राप्यन्नमलभमानो [illegible] इव तस्मिन् परिभ्रमन् माषान् खादन्तं हस्तिपकमेकं ददर्श। तत्र सः उषस्तिः [illegible]न् कुत्सितान् माषान् खादन्तं क्षुत्क्षान्तये भुञ्जानमिभ्यं इभः कुंजरः तमर्हतीति [illegible] अर्हार्थे यत् तथाभूतमम्बष्ठं तानेव कुल्माषान् आत्मनः क्षुत्शमनाय बिभिक्षे [illegible] विधिना ययाचे। एवं भिक्षमानमुषस्तिं प्रति हस्तिचालक उवाच, अवदत्, यत् [illegible] भोजनार्थं गृहीतेभ्यः एभ्यः अन्ये अनुच्छिष्टः कुल्माषाः न सन्ति। यत् यतो [illegible] यावत् प्रमाणकाः मे मम स्वामित्वे आसन् ते इमे तत् प्रमाणका एते उपनिहिताः [illegible]र्थमशनपात्रे निक्षिप्ता, इति भावः।।श्रीः।।

अथ बुभुक्षातुरः किमकरोत्? इत्यत आह—

एतेषां मे देहीति होवाच तानस्मै प्रददौ ।
हन्तानुपानमित्युच्छिष्टं वै मे पीतँ स्यादिति होवाच ।।३।।

अथ भवन्तु नामेमे त्वदुच्छिष्टाः परन्तु एतेषां कुल्माषाणां मे मह्यं देहि। ननु [illegible]तोः कर्मत्वे माषाणां तत्र कर्मणि द्वितीया कथं न एवमेतेषामित्यस्य स्थाने एतानि देहीति कथं न प्रावोचच्छ्रुतिः सत्यम् अत्र मातुः स्मरतीतिवत् कर्मणः सम्बन्धः विवक्षायां षष्ठी विवक्षाधीनानि कारकाणि भवन्तीति वैय्याकरणधौरेयाणां राद्धान्तितत्वात्। अथ किं मूलिकेयं विवक्षा, निजजीवनधारकत्वेन उषस्ते माषेषु सम्बन्धपरिकल्पनात्। इमे मां जीवयेयुरिति समुचितमेव षष्ठीद्योत्यं सम्बन्धोपस्थापनमिति इत्थम् उक्तवत्युषस्तौ सः उवाच हस्तिपकः अथ तानुच्छिष्टानेव तस्मै याचमानायोषस्तये प्रददौ प्राकर्षेण ममत्वशून्यत्वरूपेण समधिसृष्टवानिति भावः। दत्वा पुनः प्रसन्नतया आह हन्त। अनुपानं भोजनमनु अशनस्य पश्चात् यत् पीयते तदनुपानं जलमपि गृह्यताम् इत्युक्तवतीभ्ये ह निश्चयेन उवाच उदतीतरत्। उत्तराकारमाह— त्वया जलमिदमुच्छिष्टं कृतम्। अतः तदुच्छिष्टमनुपानं पिबेयम्। चेत् मे ममेत्यर्थः उच्छिष्टमेव पीतं स्यात् कृतपानं स्यात् इति एष उत्तराकारः।

ऋषेर्वाक्यं श्रुत्वा स्वाभाविकतया संशयालुः जिज्ञासते हस्तिपकः यत् किमुक्तमार्येण एकत्रमदुच्छिष्टान् कुल्माषान् भुङ्क्ते स एवापस्त्र मत्पीतमनुपानमुच्छिष्टं मन्यते अथ तर्हि किं वैशिष्ट्यं समानतया मदुच्छिष्टयोः कुल्याषानुपानयोरिति जिज्ञासाकारमाह—

न स्विदेतेऽप्युच्छिष्टाम इति न वा अजीविष्यमिमां न खादन्निति
होवाच कामो म उदकपानमिति ।।४।।

इभ्य: पृच्छति एते अनुपानविशेषा अपि कुल्माषा इव न उच्छिष्टा स्विदिति प्रश्नसूचकोऽव्यय:। उपस्तिरुवाच उच्छिष्टास्तु परन्तु इमान् कुल्माषान् अखादन् न भुञ्जान: अहं न अजीविष्यं न जीवनमधारयिष्यम्। अत्र हेतुहेतुमद्भावमूलक-क्रियातिपत्तिद्योतनो लिङ्लकार:, अतो जीवनधारणाय उच्छिष्टभोजनमपि न प्रत्यवायावहम्। परन्तु एषामभ्यवहरणमन्तरेणापि कथंचिदपि शरीरयात्रा चलति त अच्छिष्टापदार्था न भोजनीया इति शिष्टाचारसंहितां ध्वनयितुं प्रस्तावोऽयम्। उदकपानं तु मे मम काम: इच्छाविशेष: तं निरोध्धुमहं शक्नोमि, तस्मात् उच्छिष्टतोयं पीत्वा धर्मं नातिचरिष्यामिति भाव:।।श्री:।।

अग्रिमां चेष्टामाह—

स ह खादित्वातिशेषाञ्जायाया आजहार साग्र।
एव सुभिक्षा बभुव तान्प्रतिगृह्य निदधौ ।।५।।

अथ स उषस्ति: कुल्माषान् खादित्वा बुभुक्षा शान्तौ अतिशेषान् अतिसृष्टशेषान् जायायै पत्न्यै आजहार आनीतवान् सा आटकी तदानयनादग्र एव सुभिक्षा लब्धसुष्ठु भोजना बभूव। अत: आगामी दिनस्य कृते पत्यु प्राणपरीप्सया तान् प्रतिगृह्य निर्दधौ कुत्रचित् सुरक्षितान् कृतवती।।श्री:।।

अथ तस्याग्र्यं व्यापारं कथयति—

स ह प्रात: संजिहान उवाच यद्बतान्नस्य लभेमहि
लभेमहि धनमात्राँ् राजासौ यक्ष्यते स मा सर्वैरार्त्विज्यैर्वृणीतेति ।।६।।

स: उपस्ति: प्रात: ब्राह्ममुहूर्त एव सञ्जिहान शय्यां निद्रां च त्यजन् तत्समकालमेव भार्यामुवाच, वत यत् चेत् अन्नस्य लभेमहि स्वजीवनधारकतया सम्बन्धीभूतमन्नम अदनीयं लभेमहि, लब्ध्वाभ्यवहरेम तदा धनमात्रां पुष्कलधनं लभेमहि, एतदन्नमशित्वा लब्धादूरगवनमन्त्रोच्चारणबलोऽहं सर्वामुद्रात्रीन् परिभूय राजानां प्रभावयेमिति भाव:। तत्परिणाममाह असौ राजा यक्ष्यते नाति दूरस्थो नृपति: यज्ञं विधास्यति, मद्वेदे कौशलप्रभावित:, सर्वै: आर्त्विज्यै: ऋत्विक् सम्बन्धकर्मभि: मां वृणीत मुख्याचारत्वेन वृतं विदधीत।।श्री:।।

अथ तत् पत्नी तं प्रत्युत्तयामास—

तं जयोवाच हन्त पत इम एव ।
कुल्माषा इति तान्खादित्वामुं यज्ञं विततमेयाय ।।७।।

तं जाया आटकी उवाच, पते हे प्राणवल्लभ हन्त। प्रसन्नताया: विषयोऽयं यत् भवद्दत्ता कुल्माषा मया न खादिता:, अतस्ते इमे अंगुल्या निर्दिष्टा: साम्प्रतमपि

इत्युक्त्वार्पयति, स तान् द्विरुच्छिष्टान् कुल्माषान् खादित्वा विततं व्याप्तं विस्तृतं वा, अथवा वि विप्राः तैः ततम् अथवा वि विष्णुः तस्मै ततम् अमुम् यज्ञं इयाय जगाम।।श्रीः।।

अनन्तरक्रियामाह—

तत्रोद्गातृनास्तावे स्तोष्यमाणानुपोपविवेश स ह प्रस्तोतारमुवाच ।।८।।

तत्र यज्ञे स्तावे स्तुवन्ति यत्रोद्गातारः तस्मिन् यज्ञमण्डपस्य निर्धारिते स्तुति ने निविष्टान् स्तोष्यमाणान् अत्र यजमानक्रिया व्यतिहारेण कर्त्रात्मनेपदमूलकसत् विषयान् सुरान् करिष्यमाणान् उद्गात्रीन् उपसमीपमुपलक्ष्य वा उपविवेश इति स्म।।श्रीः।।

अनन्तरं प्रस्तोतारमपृच्छत्।

उषस्तिप्रश्नाकारमाह—

प्रस्तोतर्या देवता प्रस्तावमन्वायत्ता तां ।
चेदविद्वान्प्रस्तोष्यसि मूर्धा ते विपतिष्यतीति ।।९।।

हे प्रस्तोतः तव प्रस्तावं या देवता अन्वायत्ता समनुस्थिता ताम् अविद्वान् तस्या देवताः विषये सामग्रेणाजानन् यदि चेत् प्रस्तोष्यसि प्रस्तोतृबुद्ध्या मन्त्राणां प्रस्तुतिं करिष्यति चेत् ते प्रस्तोतः मूर्धा मस्तकं निपतिष्यति नीचैः पतितं भविष्यतीति यजमानो जानातु न वा जानातु वा किन्तु प्रस्तोत्रा तु सामग्रेण प्रस्तावानुगतदेवता विधानं ज्ञात्वैव प्रस्तोतव्यमिति भावः।।श्रीः।।

अग्रिमप्रश्नप्रकारमाह—

एवमेवोद्गातारमुवाचोद्गातर्या देवतोद्गीथमन्वायत्ता तां
चेदविद्वानुद्गास्यसि मूर्धा ते विपतिष्यतीति ।।१०।।

एवं समानमेव प्रश्नाकारमनुश्रुत्य उद्गातारमुवाच अतिक्षिप्य कथितवान्। उद्गातः सम्बोधनमिदं त्वमुद्गीथेसमधिकृतः, परन्तु उद्गीथं अन्वायतता आनुकूल्येनाधिश्रिता या देवता तामविद्वान् अजानन् यदि चेत् उद्‌गास्यसि तदा तवापि मूर्धा पतिष्यतीति।।श्रीः।।

अन्तरभाविनीं क्रियामाह—

एवमेव प्रतिहर्तारमुवाच प्रतिहर्तर्या देवता
प्रतिहारमन्वायत्ता तां चेदविद्वान् ।

प्रतिहरिष्यसि मूर्धा ते वितिष्यतीति
ते ह समारतरास्तूष्णीमासांचक्रिरे ।।११।।

एवमेव प्रतिहारमपृच्छत्, प्रतिहर्तः! प्रतिहारं या देवता अन्वायत्ता समधिश्रित्य विराजते तामविद्वान् तद्विषये किमप्यजानंश्चेत् प्रतिहरिष्यसि तदा ते मूर्धा विपतिष्यति, अज्ञानदोषेन त्वमपि भग्नशिरा भविष्यसि। एवं त्रिष्वपि ऋषिणा निरुत्तरेषु कृतेषु प्रस्तोता उद्गाता प्रतिहर्ता इति त्रयोऽपि स्व स्व देवताविषये कलयन्तोऽज्ञानं निजनिजमूर्धपतनभीत्या त्रस्तमानसाः ते सर्वे तस्य समीपं समागताः तूष्णीं क्रियाविशेषणमिदमव्ययं, मौनीभूता इति भावः। जिज्ञासवः आसांचक्रिरे तमेवोषस्तिं समुपतस्थुरिति भावः।।श्रीः।।

इति छन्दोग्योपनिषदि प्रथमाध्याये दशमखण्डे श्रीराघवकृपाभाष्यम् सम्पूर्णम्।।

।। श्रीराघवः शन्तनोतु ।।

अथ एकादशः खण्डः

इदानीमुषस्तिकृतप्रश्नानां तस्मादेवोत्तरं सुश्रूषमाणो यजमानो राजा तमेव तत्परिचयं पृच्छति पश्चात् च तेनानुनीयमानो द्विजवरः समस्तप्रश्नानामुत्तराणि दातुमुपक्रमते। अत उषस्तिराजसंवादपरम्परया खण्डस्यैतस्य प्रारम्भः—

अथ हैनं यजमान उवाच भगवन्तं वा अहं
विविदिषाणीत्युषस्तिरस्मि चाक्रायण इति होवाच ।।१।।

अथ उषस्तेः प्रतिभापूर्णान् प्रश्नान् आकर्ण्य आश्चर्यचकितः यष्टा राजा महीपतिः एनमुषस्तिमुवाच पप्रच्छ भगवन्तं विद्याधिकत्वात् गौणतयालेशेन च षडैश्वर्याणां वर्तमानत्वात् भगवन्तमिति प्रयोगः। अथवा नैष पारिभाषिको भगवच्छब्दः? किं तर्हि तत्र भवानिव सम्मानवाची। भगवन्तं तत्र भवन्तं वा वै विविदिषाणि ज्ञातुमिच्छानि शक्यार्थे लोट्। किं ज्ञातुं शक्नोमिति भावः। विप्रः पितृनामपुरःसरमात्मनः परिचयं ददाति अहं चाक्रायणः चक्रस्य पुत्रः उषस्तिः एतन्नामास्मि इति उत्तराकारं निर्धारयति शब्दोऽयम् उवाच उषस्तिः प्रत्युत्तरायामास।।श्रीः।।

अथ राजा स्वाभिप्रायं प्रकाशयति—

स होवाच भगवन्तं वा अहमेभिः सर्वैरार्त्विज्यैः।
पर्यैशिषं भगवतो वा अहमवित्त्यान्यानवृषि ।।२।।

अनन्तरमुषस्तिनामवंशं च श्रुत्वा दृष्ट्वा च तदीयां निर्भीकतां विद्याविनयसम्पन्नतां तस्मिन् श्रद्धधानो राजा स्वमनोभावं निवेदयाञ्कार। निवेदनाकारमुच्यते ह निश्चयेन

तद्वंशवृत्तमवधार्य स यजमानः उवाच निवेदयाम्बभूवः, यथार्थमाह। तत्र भवान् अहमपि प्रख्यातमहोच्यकुलनामानं सर्वविद्याव्रतस्नातम् यज्ञकर्मणि च भवन्तं एभिः पुरो वर्तमानैः सर्वैः आर्त्विज्यैः ऋत्विज्यामिमानि आर्त्विज्यानि ऋत्विक् शब्दात् 'कर्मणि शञ्' तैः आर्त्विज्यैः ऋत्विक्सम्बन्धिकर्मभिरिति भावः। अत्र "हेतौ" इति सूत्रेण हेत्वर्थे तृतीया। तथा च आर्त्विज्यैः इत्यस्य ऋत्विक्सम्बन्धकर्मसम्पादनहेतव इत्यर्थः। भवन्तं उद्गीथविद्याविशारदमुषस्तिं पर्यैशिषं 'इषु' धातोः पर्युपसृष्टस्य लुङ् लकारे उत्तम-पुरुषैकवचनरूपमिदम्। पर्येषणविषयमकार्षमित्यर्थः। परन्तु दुर्भाग्येन भगवतः तत्र भवत उषस्तेः अवित्या लाभार्थक 'विद् लृ' धातोः भावे क्तिन् वित्तिः लाभः न वित्तिः अवित्तिः तथा अवित्या अनुपलब्ध्या अत्रापि कारणे तृतीया। भवतोऽनुपलब्धिकारणेन बहुपर्येषणेणाऽपि अज्ञातग्रामगतत्वात् यदा भवान् नोपलब्धस्तदेति भावः, अहं ऋत्विक्कर्मार्थम् इमानज्ञातोद्गीथरहस्यानपि विवशतया अवृषि, अर्थात् उपलब्धे भवति इमे पुनर्निरस्ताः करिष्यन्ते इति हार्दम्।।श्रीः।।

अथ यजमानः पुनः स्वाभिप्रायं स्पष्टं करोति—

भगवाँस्त्वेव मे सर्वैरार्त्विज्यैरिति तथेत्यथ
तर्ह्येत एव समतिसृष्टाः स्तुवतां ।
यावत्त्वेभ्यो धनं दद्यास्तावन्मम दद्या
इति तथेति ह यजमान उवाच ।।३।।

भगवान् तत्र भवानुषस्तिः तु एव इत्यवधारणार्थौ निपातौ, मे मम सर्वैः आर्त्विज्यै तत्कर्मसम्पादनार्थं भवतु इत्यध्याहार्यम्। अथ शब्दोऽयं स्वीकारार्थं, तर्हि एते प्रस्तात्र्युद्गत् प्रतिहर्तारः मया अध्यक्षेण समतिसृष्टाः उद्गीथरहस्यं पाठयित्वा निर्दिष्टाः स्तुवतां स्तुतिं कुर्वतामत्र प्रयुक्तात्मनेपदाभि प्रायोऽयं यत् न केवलं त्वत्फलार्थां प्रत्युत् शुद्धवेदपाठेन जनितपुण्यजनकतया अमीषामपि परलोकः सुगमःस्यादिति निजकल्याणायापि पाठकर्तृगामित्यभिसंन्धिना फलेन स्तुतिं कुर्वन्तीत्यर्थः। परन्तु एभ्योऽधिका धनमात्रा मह्यं नहि यावदेभ्यः धनं दद्या अर्पये तावत् तत्प्रमाणमेव मम उषस्तेरपि अत्र **'स्वमेव ब्राह्मणो भुक्ते स्वं वस्ते स्वं ददाति च'** इति स्मार्तवचनानुरोधेन स्मृतब्राह्मणत्वगौरवतया स्वस्मिन् सम्प्रदानत्वनिरासेन ममेति षष्ठ्यन्तं भावोऽयं, यदहं ब्राह्मणः नान्यस्य भुंजे नान्यस्य वसे सम्पूर्णजगत्त्रयं ममेव अस्मत् कृपया यूयं धनभुजो जाताः। तस्मात् ममैव सम्बन्धीभूतं यद् धनं युष्मासु न्यासभूतं तत एव नास्ति विपुलमहमिच्छामि। **यावद् मीयते जठरं तावद् स्वत्वं हि देहिनम्।** इति स्मार्त वचनात्। तथा तथैव करिष्यामि, यथा श्रीमान् निर्दिषति इति ह निश्चयेन उवाच स्वीचकार।।श्रीः।।

अथ वृत उषस्तो **समतिसृष्टाःस्तुवताम्** इत्युषस्तेर्वाक्यानुसारं पूर्वं प्रस्तोतैव प्रस्तावमन्वायत्तां देवतां जिज्ञासते—

अथ हैनं प्रस्तोतोपससाद प्रस्तोतर्या
देवता प्रस्तावमन्वायत्ता तां चेद- ।
विद्वान्प्रस्तोष्यसि मूर्धा ते विपतितष्यतीति
मा भगवानवोचत्कतमा सा देवतेति ।।४।।

अथ अनन्तरं ह ज्ञाननिश्चयेन कृत्वा एनमुषस्तिं प्रस्तोता प्रस्तावकर्मनिरतो ब्राह्मणः एनमुषस्तिमुपससाद जिज्ञासया समीपं गत्वा प्रणम्य तस्थाविति भावः। प्रस्तोतरि या देवता इत्यारभ्य निपतिष्यति इति यावत् वाक्यखण्डम् उषस्ति वाक्यानुवादरूपं व्याख्यातचरम् तर्हि कतम देवता अत्र देवत्वजातौ निर्धारणे डतमच् किन्नाम्नी सा।।श्रीः।।

उषस्ते उत्तराकारमाह—

प्राण इति होवाच सर्वाणि ह वा इमानि भूतानि
प्राणमेवाभिसंविशन्ति प्राणभ्युज्जिहते सैषा
देवता प्रस्तावमन्वायत्ता तां चेदविद्वान्
प्रास्तोष्यो मूर्धा ते व्यपतिष्यत्तथोक्तस्य मयेति ।।५।।

उत्तरमाह प्रस्तावमन्वायत्तादेवता **'प्राण एव उपपत्तिमाह'** ह यतोहि वा शब्दोऽत्र निश्चयर्थः निश्चयेन सर्वाणि भूतानि चराचराणि प्राणमेव आधारीकृत्य संविशन्ति समधिशेरते, प्राणमेव अनुश्रित्य सर्गकाले समुज्जिहते उदीयमानानि गच्छन्ति, अत्रेदमवधेयं यत् प्राणशब्दोऽत्र परब्रह्मवाची न खलु नासाग्रामिनं प्राणं भूतानि संवेष्टुं शक्यानि। न खलु तमुपश्रुत्य गतिमन्तिभवितुं शक्यानि। अतो **'यतो वा इमानि भूतानि जायन्ते'** इति तैत्तरीपोनिषदः शिक्षाध्याये सप्तमानुवाके वर्णितस्य ब्रह्मलक्षणस्य संघटनात्। प्राण शब्दोऽत्र ब्रह्मतात्पर्य एव निश्चीयते। नन्वत्र निश्चये किमपि प्राचीनमपिमानम्? इति चेत् अस्त्येवेति ब्रूमहे। किं तर्हि वेदान्तदर्शनसूत्रकृतां पाराशरकल्पतरुमहाफलभूतानां बादरायणाचार्यपरनामधेयानां वेदव्यासमहाराजानां सूत्रमेवात्र प्रमाणम् **'अतएव प्राणः'** (ब्रह्म सू. १।१।२३)।

तां प्राणनाम्नीं देवता अविद्वान् चेत् प्रास्तोष्यः स्तुतिमकरिष्यः तदा मयोक्तस्य ते प्रस्तोतुः मूर्धान्यपतिष्यत्, प्रस्तोष्यः न्यपतिष्यत् इत्युभयत्र हेतुहेतुमद्भावव्यंजको क्रियातिपत्तिमूलको लृङ् लकारः। प्राणशब्दस्य च परब्रह्मवाचित्वे व्युत्पत्तिरपि प्रकर्षेण

अनन्ति जीवन्ति भूतानि येन स प्राण: 'करणे घञ्' उपदेशशब्दवत् परमात्मैव जीवनदाता जगतां 'स उ प्राणस्य प्राण:' (केन. उ. १।३)

यथोक्तं मानसे—

पूत परमप्रिय तुम सब हीके ।
प्राण प्राण के जीवन जीके ।।

(मानस अयो. ५६।६)

एवं प्रस्तोतुर्जिज्ञासा समाप्ति:।।श्री:।।

अथोद्गातृप्रश्नं प्रस्तौति—

अथ हैनमुद्गातोपससादोद्गातर्या देवतोद्गीथ-
मन्वायत्ता तां चेदविद्वानुद्गास्यसि मूर्धा
ते विपतिष्यतीति मा भगवान-
वोचकत्तमा सा देवतेति ।।६।।

अथ अनन्तरमुद्गाता जज्ञासार्थमुषस्तिमुपसन्न: पप्रच्छ प्रश्नाकारा: पूर्ववत्। उद्गीथ: सामवेदे भगवद्भक्तिपर: स्तोत्रविशेष: इत्यनेन चतुर्वेदे एवानुपलब्ध: **'भक्तिशास्त्रं भगवान् शाण्डिल्यउपलेभे'** इति शारीरिकभाष्ये शंकराचार्योक्तं खण्डितम्। अत्रैव भाष्ये उद्गीथशब्दस्य तैरेव भक्तिपरकत्वेन व्याख्यातत्वात्। उपनिषदियञ्च सामवेदीय तलवकारब्राह्मणस्य आतृतीयाध्यायात् दशमाध्यायपर्यन्तेति तैरेव स्वीकृतत्वात्। तद्यथा अत्रत्यं शांकरभाष्यम् **'उद्गीथभक्तिमनुगन्तान्वायत्ता देवा?'** यदि चेद भक्तिर्वेदनाभविष्यत् तर्हि किमाधारमेतत् उदाहरति व्याख्यानम् इति तयैवविदां कुर्वन्तु। कतमा किं प्रकारिका उद्गीथं भक्तिपरकस्तोत्रम् अन्वायत्ता अनुश्रिता देवता इति शब्दोऽत्र जिज्ञासाप्रकारसूचव:।।श्री:।।

उत्तरं ददाति—

आदित्य इति होवाच सर्वाणि ह वा
इमानि भूतान्यादित्यमुच्चै: सन्तं गायन्ति ।
सैषा देवतोद्गीथमन्वायत्ता तां चेदविद्वानुदगास्यो
मूर्धा ते व्यपतिष्यत्तथोक्तस्य मयेति ।।७।।

उषस्ति: उवाच उद्गीथं भगवद्भक्तिव्यंजकस्तोत्रम्। अनुगता देवता आदित्य: आदित्यशब्दोऽपि परमात्मपर: **अदितिर्द्यौरदितिरन्तरिक्षम्** (शुक्ल यजु. भदरसूक्त

१०) इति मन्त्रे आदितिशब्दः दिवान्तरिक्षमातापितृपुत्रविश्वेदेवपञ्चजनपरकतया अदिति-शब्दस्य व्याख्यातत्त्वात्। नास्ति दितिः खण्डः यस्यां सादितिः **दोऽवखण्डने** इति धातुना क्तिन् प्रत्ययान्तेन दितिशब्दस्य निष्पन्नत्त्वात्। अदितिः अखण्डो ब्रह्मसर्गः तस्मिन् तस्यां वा अदितौ अखण्डब्रह्मसृष्टौ जातः श्रीरामकृष्णरूपेण धृतावतारः आदित्यः सूर्यप्रतीकगम्यः परमेश्वरः स एव देवता रूपः उद्गीथं सामप्रतिपाद्य भगवद्भक्तिं अनुगतः उपपत्तमाह। यतो हि उद्गीथमित्यत्र उच्चैः सर्वोपरि सन्तं विराजमानं गायति यत् तत् उद्गीथम्। इमामेव व्युत्पत्तिः श्रुतिः स्वयं कथयति उच्चैः सन्तमित्यादिना शेषं पूर्ववत्।

प्रतिहर्तृप्रश्नं स्पष्टयति—

अथ हैनं प्रतिहर्तोपससाद प्रतिहर्तर्या देवता प्रतिहारमन्वायत्ता तां चेदविद्वान्प्रतिहरिष्यसि मूर्धा ते विपतिष्यतीति मा भगवानवोचत्कतमा सा देवतेति।।८।।

अथ प्रतिहर्ता पप्रच्छ शेषं पूर्ववत्।।श्रीः।।

अन्नमिति होवाच सर्वाणि ह वा इमानि
भूतान्यन्नमेव प्रतिहरमाणानि जीवन्ति सैषा
देवता प्रतिहारमन्वायत्ता तां चेदविद्वान्प्रत्यहरिष्यो
मूर्धा ते व्यपतिष्यत्तथोक्तस्य मयेति तथोक्तस्य मयेति।।९।।

उषस्तिरुवाच 'अन्नम्' अद्यते इत्यन्नम् अत्ति वा सम्पूर्णं संसारम् इत्यन्नम्

'यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः। मृत्युर्यस्योपषेचनम्। क इत्था वेद यत्र सः।

(कठ. उपर. १।२।२५)

समर्थितं च श्रीवेदव्यासेन ब्रह्मसूत्रे **'अन्ता चराचरग्रहणात्'** (ब्रह्मसूत्र १-२-९) गीतं च मानस कृता—-

जाके डर अति काल डराई ।
जो सुर असुर चराचर खाई ।।

(मानस सुन्दर २२।९)

अथ अन्नं ब्रह्म इत्यत्र किं मानम्? श्रुतिरेव **'अन्नं ब्रह्म'** (तैत्त. ब्रह्मानंद वल्ली ५।१)।

उपपत्तिमाह अन्नेनैव ब्रह्मणा प्रतिहारमाणानि तेन हेतुना गतिशीलानि भूतान्युपजीवन्ति तामजानश्चेत् प्रत्यहरिष्य: प्रतिहारं व्यधास्य: तदा ते मूर्धान्यपतिष्यत्। भूमौऽच्युतो भविष्यत् मयोक्तस्य द्विरुक्ति: खण्डसमाप्तिसूचिका॥श्री:॥

इति छान्दोग्योपनिषदि प्रथमाध्याये: एकादशखण्ड: श्रीराघवकृपाभाष्यम् सम्पूर्णम्।।
।। श्रीराघव: शन्तनोतु ।।

।। अथ द्वादशखण्ड: ।।

अतीतयोर्द्वयो:खण्डयो: अन्नाभावजनितदारिद्रदुर्विपाकजनिता दुर्व्यस्थोषस्तेरुक्ता, यत्र बुभुक्षितेन तेन उच्छिष्टपर्युषितं भुक्तम् अनाहुतेनापि राजसभां गत्वा सर्वान् ऋत्विज: परिभूय राजानं च प्रभाव्य स्वयमेव प्रसह्य यज्ञाध्यक्षस्थानं समधिष्ठितमयमन्नाभावमाभूदिति तदुपलब्धिसाधनरूपेण शौवोद्गीथोपदेश: प्रारभ्यते—

अथात: शौव उद्गीथस्तद्ध बको दाल्भ्यो ।
ग्लावो वा मैत्रेय: स्वाध्यायमुद्वव्राज ।।१।।

अथान्तरं साधिकृतं वा अत अस्माद्हेतो: यतो ह्यन्नाभाव: क्लेशयति, अत: अस्मात् कारणात्, यद्वा अत: एतस्मात् खण्डादनन्तरं शौवोद्गीथ: स्वभिर्दृष्ट: **'शौव: शेषे'** इत्यनेन अण् प्रत्यय: नकारलोपश्च वृद्धि: अयादेश: शौवश्चासावुद्गीथश्चेति शौवोद्‌गीथ:, हि प्रसिद्धो तत् अधिगन्तुं दल्भ्यस्य पुत्र: दाल्भ्य: बक: एतन्नामा मैत्रेय: मित्राया: अपत्यं पुमान् मैत्रेय: ग्लाव: महर्षि:, अत्र एकस्यैव महर्षेर्द्वेनाम्नी बको ग्लावश्चेति तस्य पितृप्राशस्तुं कथयितुं दाल्भेति मातृप्राशस्त्यं ध्वनयितुं मैत्रेयेति विशेषणद्वयं न खल्वशुद्ध: मातापितृक: वैदिकाध्ययनाय प्रभवति एकस्या एव व्यक्ते: जननीजनकप्राशस्त्यद्योतनाय अन्यत्रापि इत्थमुदाहरणम्। तद्यथा—

रामो दाशरथि: शूरो लक्ष्मणानुचरो बली ।
काकुत्स्थ: पुरुष: पूर्णे कौसल्येयो रघूत्तम: ।।
(रामरक्षास्तोत्र-२२)

स्वाध्यायं स्वस्य स्वाधिकृतवेदस्य स्वस्या: वा वैदिकशाखाया: अध्याय: अभ्यासेयस्मिन् स्थले तत्स्वाध्यायम् उद्वव्राज उदकाशयाभ्यासं जगाम॥श्री:॥

अथाग्र्यघटनां सूचयति—

तस्मै श्वा श्वेतः प्रादुर्बभूव तमन्ये श्वान ।
उपसमेत्योचुरन्नं नो भगवानागायत्वशनायाम वा इति ।।२।।

तस्मै मैत्रेयाय अत्र तादर्थ्ये चतुर्थी वाच्या इति वार्तिकानुरोधेन तथा च तस्मै इत्यस्य मैत्रेयकल्याणार्थमिति शब्दार्थः। श्वेतः शुक्लशरीरः श्वा कुक्कुर एकः प्रादुर्बभूव प्रकटयांबभूव, मैत्रेयकल्याणचिकीर्षया स्वयं भगवानेव परमेश्वरस्वीकृतश्वतनुः स्वं प्रकटयाञ्चकारेति मन्त्रशकलार्थः। भगवतः शुक्लशरीरं पुराणेषु प्रसिद्धम्। तथोक्तं श्रीभागवते गर्गाचार्येण।

आसन् वर्णास्त्रयो ह्यस्य गृह्णतोऽनुयुगं तनुः ।
शुक्लो रक्तस्तथा पीत इदानीं कृष्णतां गतः ।।

(भागवत १०।८।१३)

अथ प्रादुर्भूतं तं श्वानम् अन्ये श्वानः देवभूताः उपसमेत्य उपश्रयेण समीपं गत्वा ऊचुः अवदन् भगवान् तत्र भवान् षडैश्वर्यसम्पन्नः वाराहाद्यवतार इव लीलया गृहीतसारमेय तनुः नः अस्माकं दैवतात्मनां शुनामन्नमन्नप्राप्तिनिमित्तम् आगायतु उद्गीथगानमाध्यमेन अन्नं सुलभयतु अश्नायाम अशनपीडया समाकुला बुभुक्षामहे।।श्रीः।।

अथ श्वेतश्वा उत्तरथां बभूव—

तान्होवाचेहैव मा प्रातरुपसमीयातेति तद्ध बको ।
दाल्भ्यो ग्लावो वा मैत्रेयः प्रतिपालयाञ्चकार ।।३।।

ह निश्चयेन तान् शुनः युष्माकं कृते अन्नमागाष्यामि, परन्तु नाद्य यूयं श्वभूते प्रातः उषसि समीयात संयता आगच्छत, तेऽपि स्वीकृतवन्तः। तत् तादृशं श्वसङ्केतं दाल्भमित्रापुत्रः ग्लावः प्रतिपालयाञ्चकार प्रतीक्षाञ्चक्रे सोऽपि तत्रैव प्रातर्गत इति भावः।।श्रीः।।

अग्रिमघटना आलङ्कारिकतया प्रस्तौति—

ते ह यथैवेह बहिष्पवमानेन स्तोष्यमाणाः सँरब्धाः ।
सर्पन्तीत्येव मा ससृपुस्ते ह समुपविश्य हिंचक्रुः ।।४।।

ह निश्चयेन ते श्वभूते प्रातः कथं श्वेतश्वकं समुपसृता इत्युमानभङ्ग्या निदर्शयति, बहिष्पवमानो नाम वैदिकः स्तोत्रविषेशः यमुद्गातारः सम्भूय गायन्ति पवते पुनीते वा बहिः बाह्यवस्तूनि यस्तथाभूतोऽसौ बहिः पवमाने इति पदच्छेदे कस्कादित्वात् भ्रातुष्पुत्रः इत्यादिवत्। विसर्गस्य सकारे 'इगुपधत्वात्' शकारः। तेन बहिष्पवमाने स्तोत्रेण करणभूतेन स्तोष्यमाणः तत्तत् देवतां स्तुतिविषयं करिष्यमाणाः इहैव अत्रैव

कर्मकाण्डे संरब्धाः समुत्साहवन्तः प्रायशः लोके संरब्धशब्दः क्रोधपरः किन्तु नात्र तादृक् प्रकरणाभावात् अस्या एव श्रुतेरनुरोधेन समुपसृष्टस्य रभेः क्रोधातिरिक्तार्थवाचकत्व-सम्भवात्। तथैवेमे इमं निजान्नदातारं श्वेतमुपसृत्य सहैव तत्रोपविश्य हिंचक्रुः हिङ्कारेण निजोपस्थितिं विज्ञापयामासुः॥श्रीः॥

कां स्तुतिं चक्रुरिति स्तोत्राकारं प्रस्तौति—

ओ३ मदा३ मों३ पिबा३
मों३ देवो वरुणः प्रजापतिः ।
सविता२ न्नमिहा२ हरदन्नपते३
न्नमिहा २ हरा २ हरो ३ मिति ।।५।।

ॐ परमेश्वरस्मरणं हे भूतानां अवितः ॐ भवतः स्मरणेन अदामः गणकार्यस्या-नित्यात्वाच्छप् अद्म इति भावः, भवत्स्मरणेनैव लब्धान्नाभुञ्जमहे। एवमेव ॐ भवत् स्मरणेन पिबामः पानं कुर्मः, अस्मदशनपाने भवदधीन इति भावः एवं ॐ अन्नं ॐङ्कारेणैव भवता ब्रह्मणा प्रजनितं भवतीति तात्पर्यम्। अतएव देवः स भवान् चराचरप्रकाशनशीलं वरुणः वर्षाधिष्ठातृदेवता वरुणलोकपालोऽस्ति, भवानेव प्रजापतिः प्रजानां जन्मदाता ब्रह्मा रजोगुणावच्छिन्नो ब्रह्माभूत्वा भवानेव प्रजा जनयेतीति तात्पर्यम्। भवानेव सविता सूर्यरूपः इह अन्नम् आहरत अत्र बाहुलकाल्लकारव्यत्ययेन लोडर्थे लङ्। एवमेव ॐ हे रक्षितः बुभूक्षितेभ्योऽस्मभ्यं श्वभ्यः अन्नम् अदनीयवस्तु आह उपस्थापय आदरार्थे नित्यत्वे वा द्विरुक्तिः ओमिति परमात्मस्मरणसूचकम् आदावन्ते मध्ये च प्रणवसम्पुटेन मन्त्रेणानेन आदिमध्यावसानेषु सततमेव श्रीरामाभिधानो हरिः स्मरणीय एवेति सूच्यते॥श्रीः॥

इति छान्दोग्यपनिषदि प्रथमाध्याये द्वादशखण्डे श्रीराघवकृपाभाष्यम् सम्पूर्णम्।।
।। श्रीराघवः शन्तनोतु ।।

।। त्रयोदशखण्डः ।।

पूर्वस्मिन् खण्डे शौवोद्गीथोपासनाव्याजेन अन्नमुद्गीथाधीनं वर्णितम्। अथागामिनि शकले उद्गीथोपासनायां तत्तदक्षरेषु तत्तत् देवतानां निवासस्थानानि वर्ण्यन्ते—

अयं वाव लोको हाउकारो वायुहाईकारश्चन्द्रमा ।
अथकारः। आत्मेहाकरोऽग्निरीकारः ।।१।।

देवेषु लोकवाय्वग्निचन्द्रमात्मनामुपासनं मुख्यं तत्र रथन्तरवामदेवप्रभृतीनां सामाक्षराणां निर्दिष्टदेवताधारणयोपासनं विधेयमिति श्रुतेर्हार्दम्। सामानाधिकरण्यञ्च

निर्दिष्टदेवानां स्तोभाक्षरेषु भेदाभावप्रतिपत्तये वा निश्चयेन अयं पुरो वर्तमानः लोकः विलोकनार्हः संसारः हाउकारः एतदभिन्नः वायुः हाईकारः। अथकाररूपः चन्द्रमा आत्मा, इहकाररूपः अग्निश्च इकार व्यपदेशः एवं हाउ हाई अथ इह ई इति रथन्तरवामदेव्य स्तोभाः लोकवायुचन्द्रमाग्निप्रतीकेषूपासनीयाः श्रुतेरेष भावः।।श्रीः।।

एवमेव अन्यस्तोभेष्वपि आदित्यादीनां धारणा व्यपदिष्यन्ते—

आदित्य ऊकारो निहव एकारो विश्वेदेवा औहोइकारः ।
प्रजापतिर्हिंकारः प्राणः स्वरोऽन्नं या वाग्विराट् ।।२।।

ऊकारः एकारः औहोयिकारः हिंकारः स्वरः या वाग् इति सप्त स्तो भेषु आदित्यनिहवविश्वेदेवाप्रजापतिप्राणान्नविराजां धारणाः निहवः वैदिक आह्वानदेवता विराट् परमात्मा।।श्रीः।।

एवं पूर्वयोर्मन्त्रयोर्द्वादशस्तोभा वर्णिता तेषां तत्तत् प्रतीकेषु तादृश्य एव निरुक्तयः त्रयोदशस्तोभसम्बन्धः आह—

अनिरुक्तस्त्रयोदशः स्तोभः संचरो हुंकारः ।।३।।

अनिरुक्तः ब्रह्मस्वरूपत्वात् सर्वज्ञया श्रुत्यापि न व्युत्पादितः इत्यनेन ब्रह्मणोऽनिर्वचनीयता। सञ्चरः सर्वत्र सम्यग् चरणशीलः हुंकारः त्रयोदशः स्तोभः।।श्रीः।।

अध्यायान्ते फलश्रुतिमाह—

दुग्धेऽस्मै वाग्दोहं यो वाचो दोहोऽन्नवानन्नादो भवति ।
य एतामेवँ साम्नामुपनिषदं वेदोपनिषदं वेद ।।४।।

अस्मै जनाय वाक् श्रुतिः स्वमेव दोहं वाचः सन् दोहं दुग्धे दुग्धमिवार्पयति, कस्मै? इत्यत आह यस्तावत् वाचः दोहः स्वयमेव सन्दोहवान् प्राप्तानन्दः सः आनन्दः अशनशीलश्चेत् अन्नवान् भवति। कः? इत्य आह यः साम्नम् पूर्ववर्णिता। उपनिषदं उपनिषद्रहस्यं वेद जानाति। द्विरुक्तिरादरार्था निश्चयदार्ढ्यार्था अध्यायसमाप्तिसूचनार्था च।।श्रीः।।

इति श्रीचित्रकूटनिवासिसर्वाम्नायश्रीतुलसीपीठाधीश्वरंश्रीमज्जगद्गुरुश्रीरामानन्दाचार्य श्रीरामभद्राचार्यकृतौ छान्दोग्योपनिषदि श्रीराघवकृपाभाष्ये प्रथमोऽध्यायःसम्पूर्णः।।१।।

।।श्रीराघवः शन्तनोतु।।

।।श्रीमद्राघवो विजयतेतराम्।।

।। श्रीरामानन्दाचार्याय नमः ।।

।। अथ द्वितीयोऽध्यायः ।।

प्रथमः खण्डः

पूर्णस्मिन्नध्याये व्यस्ततया सामावयवानां विशेषतश्चोद्गीथोपासना सविस्तरं वर्णिता, साम्प्रतमध्यायेऽस्मिन् सामस्त्येन सामोपासनांवर्णयितुं पूर्वप्रसङ्गं स्मारयन्ती श्रुति उपक्रम्यते।

ॐ समस्तस्य खलु साम्न उपसनँ् साधु ।
यत्खलु साधु तत्सामेत्याचक्षते यदसाधु तदसामेति ।।१।।

ॐ इति परमात्मस्मरणं खुल इति निश्चयार्थो निपातः। समस्तस्य सर्वावयवसम्पन्नस्य साम्नः सामवेदमयस्य श्रीहरेः उपासनं भजनसरणिं समुपदेक्ष्यामि इति शेषः। उपासना नाम परमेश्वरसमीपमासनम् उपोपसर्गः सामीप्यद्योतनशीलः आसनम्, समवस्थितिः। ननु **'आस उपवेशने'** इति पाणिनीयधातुपाठानुसारम् आस् धात्वर्थान्तर्भूतैव समीपस्थितिः तर्हि किमनेनोपसर्गेण? उच्यते— उपवेशने आस् धात्वर्थेऽपि सति समधिकसामीप्यद्योतनायोप उपसर्गः। ब्राह्मणवसिष्ठन्यायवत्। अथवा उपस्थातुं परमेश्वरं समाराधयितुमुपवेशनक्रिया आसना सैवोपासनेति व्युत्पत्तिप्रकारः। इत्यनेन व्याख्यानेन परमात्मनः प्रातिकूलवर्जितज्ञानकर्णाद्यपावृत-भगवत्प्राप्त्यतरिक्तसमीप्साशून्यत्वविशिष्टनिष्किञ्चनत्वोपलक्षितविशुद्धानन्यभगवत्प्रेमैकरूप-परमात्मनामरूपलीलाधामसमास्वादनैकव्यापारनिरन्तरश्रीरामचरणारविन्दपरमव्याकुली-भावपुरःसरपौनः पुण्यसमुपलक्षितसंस्मरणमेव उपासनापदार्थः इति ध्वनितम् तामेव वक्तुं प्रतिजानीते, साधु शोभनं साधु साम्नोः समानार्थकत्वं वर्णयति। यत्साधु सुभगं तदेव साम, यत् असाधु अशोभनं तदेव असाम, लोकानुभवमपि निजकथनं द्रढीकरमाय प्रस्तौति "नहि लोकात् भिद्यते शास्त्रम्" इति पातञ्जलोक्तेः। यथा लोके प्रयुज्यते इदं त्वया साम कृतं कृतं इदं च असामकृतम्। तदेवोद्धरति इति एवं प्रकारकाणि वाक्यानि अचक्षते व्याहरन्ति लोका इति शेषः।।श्रीः।।

इममेव सिद्धान्तं द्रढयितुं साध्वसाधुसमानार्थकप्रयोगान् निर्दिशति—

तदुताप्याहुः साम्नैनमुपागादिति साधुनैनमुपागादित्येव ।
तदाहुरसाम्नैनमुपागादित्यसाधुनैनमुपागादित्येव तदाहुः ।।२।।

उत निश्चयेन अपि यतोहि तत्तस्मादेव हेतोः लोका आहुः येनं राजानं साम्ना उपागात् उंपगतोभूत् एतत् समभिप्रायेण पुनरपि आहुः एनं साधुना साधुव्यवहारेण उपागात् इत्थं सामसाधुशब्दौ तुल्यार्थकाविति फलितम्। अतएव राजनीतावपि साधुनीतिरेव सामनीतिरिति कथ्यते। तथोक्तं भारविणा **'निरत्ययं सामान दानवर्जितं'** किरातार्जुनीयम् (१।१२) 'साम सान्त्वम् इति मल्लिनाथः' 'साम शान्तमुभेसमे' इत्यमरः, एवम् असाम शब्दोऽपि असाधु पर्यायः। एत एव एनम असाम्ना असाधुना वा उपागात् इत्यादि लोकाः आहुः।।श्रीः।।

भूयस्तमेवार्थं द्रढयितुं लोकव्यवहारवाक्ये उदाहरति—

अथोताप्याहुः साम नो बतेति यत्साधु भवति साधु बतेत्येव ।
तदाहुरसाम नो बतेति यदसाधु भवत्यसाधु बतेत्येव तदाहुः ।।३।।

अथ उत इति निपातद्वयं पक्षान्तरसूचकम् लोके आहुः कथयन्ति अपि निश्चयार्थः कथनाकारमाह, यत् किमपि साधु भवति तत् शुभघटितम् अन्येषां समक्षमाहु वत अहो इदम् अद्य नः अस्माकं साम केचन इदं शुभं साधुं साधु एतदपि आहुः। एवमेव यदा किमपि असाधु भवति अशुभं घटते तदपि असाम असाधु इत्यपि आहुः एवं मन्त्रयुगलेन सामशब्दस्य साधु शुभरूपद्वयं असामशब्दस्य च असाध्वशुभार्थद्वयं समसूचि।।श्रीः।।

फलश्रुतिमाह—

स य एतदेवं विद्वान्साधु सामेत्युपास्तेऽभ्याशो ह ।
यदेनँ साधवो धर्मा आ च गच्छेयुरुप च नमेयुः ।।४।।

यः स योऽपि पुरुषविशेषः एतत् सामरहस्य एवमुक्तरीत्यैव सामसाधुशुभम् इति एवं धारणां कृत्वा उपास्ते भजते, उपासनं नाम किम्? इत्यत आह—

उपासनं नाम अभ्यासः अभ्यासो नाम तस्य पौनःपुन्येन मनसि समनुशीलनं तत्फलमाह– अथ उपासनान्तरम् एनं सामोपासकं साधवः धर्माः शोभना शुभाश्च अपूर्व विशेषाः। अथवा अत्र धर्मो शब्दः भागवतधर्मपरः साधुत्वं च तत्र भगवदनन्यतामयं परमेश्वरप्रेमधर्माः आ च गच्छेयुः अत्र चकारव्यवधानेऽपि **'व्यवहिताश्च वासु'** अष्टाध्यायी (१-१-८२) इत्यनेन आङ् उपसर्गः, एवं आगच्छेयुः आदरेण प्राप्ता भवितुं शक्यन्ते, आगच्छेयुरिति शकिलिङ् इत्येनेन शक्यार्थे लिङ् लकारः। उप च नमेयुः अत्रापि पूर्वरीत्यैव चकारव्यवधानेऽप्युपोपसर्ग उपश्रिता नमेयुः उपनन्तुं शक्यैव इति भावः।।श्रीः।।

इति छान्दग्योपषिदि द्वितीयाध्याये प्रथमखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।
।। श्रीराघवः शन्तनोतु ।।

।। द्वितीयः खण्डः ।।

साम्प्रतं साम्नां पञ्चविधाः सप्तविधाश्च उपासनाः वर्णयितुं खण्डस्यास्य प्रारम्भः—

लोकेषु पञ्चविधँ सामोपासीत पृथिवी हिंकारः अग्निः प्रस्तवोऽन्तरिक्षमुद्गीथ आदित्यः प्रतिहारो द्यौर्निधनमित्यूर्ध्वेषु ।।१।।

उर्ध्वेषु **उपरितनेषु** भूः प्रवृत्तेषु लोकेषु पञ्चविधं पश्चप्रकारकं साम उपासीत वेदनमिहोपासनं **सामान्यतः** सामानि पञ्चविधानि हिंकारः प्रस्तारः। उद्गीथप्रतिहार-निधनमिति **अमीषामेव पृथिव्यग्न्यन्तरिक्षादित्यद्युषु** समवधारणा तत्र पृथिवी एव हिंकारः **झंकृतत्वात्। अग्निरेव** प्रस्तावः प्रस्तूयते देवेभ्यो हविः येन तादृशः प्रस्तुतिकरण**मुभयसमं,** एवमन्तरिक्षमुद्गीथमुद्गच्छन्ति सूर्यचन्द्रप्रभृतयो ज्योतिराशयो यस्मात् तदु**द्गीथम्। एव मुद्गमनरूपधर्मः** स एव धर्मः आदित्यप्रतिहारः यथा प्रतिहारः प्रतिहरति **यजमानाय पुण्यं** तथैवादित्योऽपि प्रतिहरति प्रकाशं लोकेः, एवं द्यौः स्वर्गं निधनं **निधनेन स्थाप्यन्ते** देवाः यत्र तन्निधनं सामन्यपि समानमेव निधनत्वम्। इति इत्थमुपासीत्।।**श्रीः**।।

अथाधोलोकेषु पुनर्हिंकारादीनां बुद्धिर्व्यवस्थाप्यते—

अथावृत्तेषु द्यौः हिंकार आदित्यः । प्रस्तावोऽन्तरिक्षमुद्गीथोऽग्निः प्रतिहारः पृथिवी निधनम् ।।२।।

अथ **अवृत्तेषु उपरितन**मारभ्याधोलोकेषु हिंकारादीनां धारणा तत्र द्यौः हिंकारः द्वयोशब्दसामान्यात्। आदित्यः प्रस्तावः किरणप्रस्तुतीकरणात् उद्गीथ अन्तरिक्षं पूर्ववत्। अग्निः प्रतिहारः हव्यकव्यादीनां प्रतिहरणात्। पृथिवी निधनम् सर्वेषामाधारभूतत्वात् निदधति वस्तूनि यत्र इति व्युत्पत्तेश्च।।श्रीः।।

अथोपासनाफलमाह—

कल्पन्ते हास्मै लोका ऊर्ध्वाश्चावृत्ताश्च य एतदेवं विद्वाँल्लोकेषु पञ्चविध सामोपास्ते।।३।।

यः कश्चित् साधकः एतद् सामोपासनमेवं विद्वान् ऊर्ध्वेषु चाधस्तनेषु लोकेषु हिंकारादीन् संभावयन् सामोपास्ते अस्मै उपासीनाय ऊर्ध्वा पृथिव्यादयः आवृत्ताः स्वर्गादयः लोकाः कल्पन्ते भोग्यरूपेण स्वयमेव सम्पद्यन्ते, ह निश्चयात्मको निपातः।।श्रीः।।

इति च्छान्दोग्योपनिषदि द्वितीयाध्याये द्वितीयखण्डे श्रीराघवकृपाभ्याष्यम् सम्पूर्णम्।।
।। श्रीराघवः शन्तनोतु ।।

।। तृतीयः खण्डः ।।

पूर्वस्मिन् खण्डे लोकदृष्ट्या सामोपासना वर्णिता। साम्प्रतं वृष्टिदृष्ट्या सैव पञ्चविधा वर्ण्यते—

वृष्टौ पञ्चविधँ सामोपासीत
पुरो वातो हिंकारो मेघो जायते ।
स प्रस्तावो वर्षति स उद्गीथो
विद्योतते स्तनयति स प्रतिहारः ।।१।।

एवमेव वृष्टौ जलवर्षणविषयेऽपि पञ्चानांधारणा तत्र पुरोवातः वर्षातः पूर्वं वहन् वायुः हिंकारः तादृक् शब्दवत्वात् मेघो पर्जन्यः जायते उत्पद्यते स एव प्रस्तावः। यतो हि तेन वारिधारा प्रस्तूयते, यन्मेघः जलं वर्षति स एव उद्गीथः मेघेनोद्गीर्यमाणत्वात्। यच्च विद्योतते चपला चमत्कुरुते स्तनयति नीरदो गर्जति स एव प्रतिहारः, यतो हि स गगनात् पृथिवीं प्रतिहरति जलम्।।श्रीः।।

पारिशेष्यकीर्तनेन सह फलं निर्दिशति—

उद्गृह्णाति तन्निधनं वर्षति हास्मै वर्षयति ।
ह य एतदेवं विद्वान्वृष्टौ पञ्चविधँ सामोपास्ते ।।२।।

यत् पृथिवी पतमानं जलमुद्गृह्णाति उपरितः धारयति। तदेव निधनं निधीयमाना श्रेयस्त्वात्। एवं यः एतद् विद्वान् रहस्यमेतद् जानन् सामोपास्ते निश्चयेनास्मै मेघः वर्षति सर्वसुखं मेघरूपः परमात्मा वर्षयति अन्यानपि देवान् वर्षतः प्रेरयति इति भावः।।श्रीः।।

इति छान्दोग्योपनिषदि द्वितीयाध्याये तृतीयखण्डे श्रीराघवकृपाभाष्यम् सम्पूर्णम्।।
।। श्रीराघवः शन्तेनोतु ।।

।। चतुर्थः खण्डः ।।

इदानीं तुर्ये खण्डे जलदृष्ट्या सामोपासना वर्णयति—

सर्वास्वप्सु पञ्चविधँ सामोपासीत् मेघो
यत्संप्लवते स हिंकारो यद्वर्षति स प्रस्तावो ।
याः प्राच्यः स्यन्दन्ते स उद्गीथो याः प्रतीच्यः
स प्रतिहारः समुद्रो निधनम् ।।१।।

एवं विधं पञ्चोपासनं साम्नां जलेऽपि सर्वासु सागरनदीसरःस्रोतोवहासु अप्सु जलेष्वपि एवमेव धारणाकरणीया मेघमन्तरा जलं न लब्धुं शक्यम्। अतः प्रथमः स्तोभविशेषः हिंकारः स एव मेहति जलं वर्षति इति मेघः। कथम्? इत्यत आह— यत् यस्मात् कारणात् संप्लवते अन्तर्भावित ण्यर्थोऽयं सम्प्लावयतात्यर्थः, यद्वर्षति वर्षणक्रियां करोति, स एव प्रस्तावः प्रस्तवना जलस्य यच्छद्वोऽत्र क्रिया विशेषणं 'वृष्' धातोरकर्मकत्वात् नैव कर्म, याः प्राच्यः पूर्वाभिमुखाः स्पन्दन्ते हिमालयात् स्पन्दमानाः प्रवहन्ति गङ्गायमुनासरयूप्रभृतयः पुण्यनद्य ता एव श्रेष्ठत्वात् उद्गीथसंज्ञाः याश्च प्रतीच्य पश्चिमवहाः स एव प्रतिहारः उभयत्र प्रतिशब्दसामान्यात् समुद्र एव निधनं तत्रैव सर्वासामपां प्रपतनात्।।श्रीः।।

फलश्रुतिमाह—

न हाप्सु प्रैत्यप्सुमान्भवति य एतदेवं ।
विद्वान् सर्वास्वप्सु प्रञ्चविधँ सामोपास्ते ।।२।।

एतदेव विद्वान् सर्वास्वप्सु समस्तजले यः पूर्वोक्तं सामोपास्ते, सः कदापि अप्सु जले पतित्वा न प्रैति न प्रेतो भवति, सामोपासनं कुर्वन् जलेषु तत्र मृतः भगवल्लोकमेव यातीति भावः। अप्सुमान् जलवान् भवति। अथवा जलविषयकसम्मानमान् भवति व्युत्पत्तिश्चात्र मानयति इति मान्। अप्सु इत्यत्र विषये सप्तमी।।श्रीः।।

इति छान्दोग्योपनिषदि द्वितीयाध्याये चतुर्थखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।

।। श्रीराघवः शन्तनोतु ।।

।। पञ्चमः खण्डः ।।

इदानीम् ऋतुषु पञ्चविधसामोपसना निरूप्यते—

ऋतुषु पञ्चविधँ सामोपासीत् वसन्तो हिंकारो ग्रीष्मः
प्रस्तावो वर्षा उद्गीथः शारत्प्रतिहारो हेमन्तो निधनम् ।।१।।

यथा पूर्वं तथैवात्रापि ऋतुषु पञ्चविधं साम—

उपासीत तत्र हिंकारो वसन्तः प्रारम्भिकत्वात् ग्रीष्मो हि प्रस्तावः अनेनैव प्रस्तूयते रसालादीनां फलसमूहः वृक्षेषु च पुराणपत्रापगमापदनन्तरं नवकिसलयचयः वर्षैवोद्गीथः श्रेष्ठत्वात् उद्गीथो हि परमेश्वराधनमाध्यमत्वात् भक्तिरेव अतएव मानसकारोऽप्याह—

वर्षाऋतु रघुपति भगति, तुलसी सालि सुदास ।
राम नाम बर बरन जुग, सावन भादौ मास ।।

(मानस बाल. १९)

एवं शरदेव प्रतिहारः तयैव वार्षिकं जलं सूर्याय प्रतिह्रियते, हेमन्त एव निधनं तत्रैव शैत्याधिक्यात् समेषां प्राणिनां तत्रैवान्तर्पटम् अन्तरा वा गृहस्य निधीयमानत्वात् हेमन्तशिशिरयोः शैत्यप्रधानत्वात् एकत्वभावनयैव हेमन्ते शिशिरान्तर्भावात् तस्य न पृथगुक्तिः।।श्रीः।।

साम्प्रतं चतुर्णां निष्पत्तिः श्रुत्या स्वयमेव क्रियते—

यतो हि हिंकारप्रस्तावयोः नैकत्वमपेक्षते व्याख्यानं सुस्पष्टम्—

यदुरिति स उद्गीथो यत्प्रतीति स प्रतिहारो ।
यदुपेति स उपद्रवो यन्नीति तन्निधनम् ।।

अनेकासु व्युत्पत्तिषु सतीष्वपि केवलमुपसर्गमाश्रित्य उद्गीथप्रत्याहारोपद्रवनिधनानां विदधाति व्याख्यानं श्रुति, तत्तत्यधात्वर्थत्यागानुरोधेन किमनेन द्रविडप्राणायामेन आशयोऽयं यत्धात्वर्थमोषेणाप्यमीषां तत्तदुपसर्गव्युत्पादनेनापीष्टलाभसौलभ्यं धात्वर्थस्तु वर्तत एव वैशिष्ट्यार्थमेषामुपसर्गानुरोधिनी व्युत्पत्तिः प्रदर्शिता हिंकारो नोपसृष्टः प्रस्ताव उपसृष्टोऽपि सुस्पष्टार्थः। उदुपसर्गस्योदयोऽर्थः अत आह—

यदुदेति अभ्युदितो भवति स उद्गीथः। एवं यत्प्रतीति प्रत्युपसर्गघटितः स एव प्रतिहारः यत् उपइत्युपसर्गेण प्रारभ्यते स एवोपद्रव उपद्रवति यन्नीति नी उपसर्गात्प्राभ्यते तदेव निधनम्, लोके निधनशब्दस्य मरणार्थप्रसिद्धेः वैदिकनिधनशब्दे तमर्थं निरस्तुं व्युत्पत्तिरेषा।।श्रीः।।

ऋतूपासनयाः फलं कथयति—

कल्पन्ते हस्मा ऋतव ऋतुमान्भवति ।
य एतदेवं विद्वानृतुषु पञ्चविधँ सामोपास्ते ।।३।।

अस्मै साधकाय ऋतवः कल्पन्ते सुखं दातुं स्वयमुपतिष्ठन्ते स एव ऋतुमान् प्रशस्तर्तुसुखयुक्तो भवति॥श्रीः॥

इति छान्दोग्योपनिषदि द्वितीयाध्याये पञ्चमखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।५।।
।। श्रीराघवः शन्तनोतु ।।

।। अथ षष्ठः खण्डः ।।

इदानीं पशुदृष्ट्या सामोपासनं वर्ण्यते—

पशुषु पञ्चविधँ् सामोपासीताजा हिंकारोऽवयः ।
प्रस्तावो गाव उद्गीथोऽश्वाः प्रतिहारः पुरुषो निधनम् ।।१।।

तत्र अजा हिंकारः समानशब्दत्वात्, अवयः मेषाः प्रस्तावः ता खलु स्वशावकान् प्रस्तूयैव गच्छन्ति। सर्वश्रेष्ठत्वात् गावः उद्गीथः उद्गीयते सुरैरपि इति व्युत्पत्ते, अतएव श्रुतिः प्राह— **माता रुद्राणां दुहिता वसूनां श्वसादित्यानां अमृतस्य नाभिः प्रनुवोचम् विचिकितुषे जनाया मा गामनागामदितिं वधिष्ट**। अमृतस्य अतो हेतोः गारिरक्षयिषुः—

भगवान् रामः प्रादुर्बभूव प्राह मानसकारोऽपि।

विप्र धेनु सुर संतहित लीन्ह मनुज अवतार ।।

गाः पिपालयिषु स्वयमेव गोपालः भगवान् श्रीकृष्णः गाश्चारयन् श्रीवृन्दावनवीथीषु मन्त्रमिममहरहो जपति—

गावो मे पुरतः सन्तु गावो मे सन्तु पृष्ठतः ।
गावो मे मध्यतः सन्तु गवां मध्ये वसाम्यहम् ।।

(पद्मपुराणकाशीखण्डे)

श्रीभागवतेऽपि सकलसुरशिखामणिप्रभुः गोरजः शिरसा बिभर्ति यथा—

तं गोरजश्छुरितकुन्तलबद्धबर्हवन्यप्रसूनरुचिरेक्षणचारुहासम् ।
वेणुं क्वणन्तमनुगैरनुगीतकीर्तिं गोप्यो दिदृक्षितदृशोऽभ्यागमन् समेताः ।।

(भागवत १०-१५-४२)

एवम् अश्वः प्रतिहारः तेनैव वस्तुनि प्रतिह्रियन्ते पुरुषो निधनं सर्वासां उत्कृष्टापकृष्टपशुप्रवृत्तीनां तत्रैव निदर्शनात्, यथा अत्यन्तमभीकत्वात् स अजाप्रवृत्तिः कोऽपि बहु प्रजावत्वात् विद्रोहाधिक्याच्च कोऽपि मेषप्रवृत्तिः कोऽपि च विशुद्धस्वभावः

वात्सल्यवान् पूतात्मा गोप्रवृत्तिः कोऽपि च विद्याविनयविहीनः भारधारणात् विषयरसिकत्वाच्च अश्वप्रवृत्तिः।।श्रीः।।

फलश्रुतिं वर्णयति—

भवन्ति हास्य पशवः पशुमान्भवति ।
य एतदेवं विद्वान्पशुषु पञ्चविधँ् सामोपास्ते ।।२।।

व्याख्यानं पूर्ववत्।।श्रीः।।

इति छान्दोग्योपनिषदि द्वितीयाध्याये षष्ठखण्डे श्रीराघवकृपाभाष्यम् सम्पूर्णम्।।६।।
।। श्रीवाघवः शन्तनोतु ।।

।। अथ सप्तम खण्डः ।।

अथ प्राणोपासनां वर्णयति—

प्राणेषु पञ्चविधं परोवरीयः
सामोपासीत प्राणो हिंकारो ।
वाक्प्रस्तावश्चक्षुरुद्गीथः श्रोत्रं प्रतिहारो
मनो निधनं परोवरीयाँ्सि वा एतानि ।।१।।

एवमेव प्राणेषु पञ्चविधसामोपासना, अत्र प्राणशब्दः नैव पञ्चप्राणपरः, अन्यथा वागादीनां प्राणशब्दवाच्यत्वं नोपपद्येत झंकारप्रधानत्वात्, प्राणः हिंकारः अर्थानां प्रस्तावनात्, वाक् प्रस्तावः सर्वाङ्गेषु श्रेष्ठत्वात्, चक्षुरुद्गीथः शब्दानां प्रतिहरणात् श्रोत्रं प्रतिहारः सर्वेषां सङ्कल्पानां मनसि निधीयमानत्वात्, इन्द्रियाणाञ्च मनः संयोगेनैव च सक्रियत्वात् मनो निधनम्। एतानि पराणि वरीयांसि च सन्ति परोवरीयशब्दे ओंकारो पृषोदरादित्वात् निपात्यते।।श्रीः।।

फलश्रुतिं वर्णयति—

परोवरीयो हास्य भवति परोवरीयसो
ह लोकाञ्जयति य एतदेवं ।
विद्वान्प्राणेषु पञ्चविधं परोवरीयः
सामोपास्त, इति तु पञ्चविधस्य ।।२।।

ह निश्चयेन यः विद्वान् एवं पञ्चविधं सामोपास्ते अस्य परोवरीयः परं श्रेष्ठं वरीयः उत्कृष्टं च फलं भवति परं वरीय इति वक्तव्ये "सुपां सुलुक्" इत्यनेन स्वादेशे तस्य

च अमभावे बाहुलकात् व्यत्यये रोरुकारदेशे गुणे परोवरीय:, स यो परोवरीयस: श्रेष्ठतमान् ब्रह्मादिलोकान् जयति। इति इत्थं तु निश्चयेन पञ्चविधस्य हिंकारप्रस्तावोद्गीथ प्रतिहारनिधननामकस्य साम्न: उपासनं वर्णितम्।।श्री:।।

इति छान्दोग्योपनिषदि द्वितीयाध्याये सप्तमखण्डे श्रीराघवकृपाभाष्यम् सम्पूर्णम्।।

।। श्रीराघवः शन्तनोतु ।।

।। अथ अष्टमखण्डः ।।

हिंकारप्रस्तावाद्युद्गीथप्रतीहारोपद्रवनिधनानां सप्तानां साम्नामुपासनं वाच्यो कल्पते—

अथ सप्तविधस्य वाचि सप्तविधँ॒
सामोपासीत यत्किंच वाचो ।
हुमिति स हिंकारो यत्प्रेति
स प्रस्तावो यदेति स आदिः।।१।।

अथ इदानीं सप्तविधस्य हिंकारादे: साम्न: उपासनमारभ्यते इति शेष:। व्याख्यानमिदं वस्तुतस्तु प्राचामनुरोधेन, नव्यास्तु सप्तविधा: रसरक्तमांसास्थि-मज्जाभेद:शुक्राख्या: सप्तधातवो यस्मिन् ता एव सप्तविधा: सन्ति यत्र स: सप्तिविध: प्राणिवर्ग: तस्य वाचि वाण्यां सप्तविधं सामोपासीत प्राचीनानां व्याख्याने साम्न: उपासनं आरभ्यते इति त्रयाणां पदानां अध्याहार: अस्मद् पक्षे च पुरुषस्य इत्येकपदस्य इत्थं कल्पना लाघवमस्मन्मते। शेषं सुधिय: जानस्ति। वाण्यां य: हुं इति ध्वनि: स एव हिंकार: यत्र प्र इति स्वरूपं स प्रस्ताव यत्र वाचि आ इति श्रूयते स आदि:।।श्री:।।

यदुदिति सः उद्गीथो यत्प्रतीति स प्रतिहारो ।
यदुपेति स उपद्रवो यन्नीति तन्निधनम् ।।२।।

फलश्रुतिं वर्णयति—

दुग्धेऽस्मै वाग्दोहं यो वाचो दोहोऽन्नवानन्नादो भवति ।
य एतदेवं विद्वान् वाचि सप्तविधँ॒ सामोपास्ते ।।३।।

वाच: वाण्या: दोह: सार: यस्मिन् स वाचो दोह: अत्र बाहुलकेन षष्ठी लुगभाव: शेषं व्याख्यातपूर्वम् (छा. उ. १-३-७) इत्यत्र।

इति छान्दोग्योपनिषदि द्वितीयध्यायेऽष्टमखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।८।।
।। श्रीराघवः शन्तनोतु ।।

।। नवमः खण्डः ।।

एवं पूर्वेषु खण्डेषु भिन्नभिन्नोपासनाक्रमेण तत्प्रतीकानि वर्णितानि अथ सूर्य एव सप्तसाम्नां परिकल्पनं विधीयते—

अथ खल्वमुमादित्यँ सप्तविधँ सामोपासीत सर्वदा ।
समस्तेन साम मां प्रति मां प्रतीति सर्वेण समस्तेन साम।।१।।

अथ वाग् उपासनानन्तरमुम पुरोवर्तमानमादित्यं सूर्यमेव सप्तविधं साम सामानाधिकरण्यात् तद्रूपं मत्वा उपासीत कथं इत्यत आह—

साम शब्दो हि समपर्यायः समस्तु सदृशवाचि यतोहि तेन सूर्येण सह समः अथवा यतोहि आदित्यः सर्वदा सर्वेषु कालेषु सम समानरूपेण रङ्केषु धनकेषु च किरणान् विकरति तेन समत्वलक्षणेन हेतुना आदित्यः साम। दृढीकर्तुमनुभवं करोति यतोहि प्रायशः लोका कथयन्ति सूर्यो मांप्रतिप्रकाशते अपरः कथयति माम् प्रति प्रकाशते एवं सर्वेण लोकेन समः तेन हेतुना साम सम एव समः इति साम इति व्युत्पत्तेः अत्र तद्धितत्त्वात् वृद्धिः परन्तु उभय संज्ञानि इति वक्तव्यं इति वार्तिकानुरोधेन ऐसमतादि पठितत्वात् आकृतिगणत्वात् पदसंज्ञया गत्वबाधात् न हि लोपः।

अथ क्रमेणादित्यस्यैकैकस्मिन्रूपे एकैकं साम साधयितमुपक्रमते

तस्मिन्निमानि सर्वाणि भूतान्यन्वायत्तानीति
विद्यात्तस्य यत्पुरोदयात्स हिंकारस्तदस्य
पशवोऽन्वायत्तास्तस्मात्ते हिं कुर्वन्ति
हिंकार भाजनी ह्येदस्य साम्नः ।।२।।

तस्मिन् सूर्ये प्रकाशमाने सति इमानि सर्वाणि भूतानि जीवन्ति इति विद्यात् जानीयात् तस्य सूर्यस्य उदयात् पुरा प्रथमं यद्रूपं जपाकुसुममिवारूणं सैव हिंकारः प्राथम्यात् तस्य हिंकारस्य साम्नः इषवः गवादयः अन्वायत्ताः आनुकूल्येनाधीनाः अतएव ते हिंकुर्वन्ति हिंकारेण शब्दायन्ते यतोहि एते अस्य साम्नः हिंकारभाजिनः हिंकारभजनशीलाः।

अथ द्वितीयसाम्नः प्राहोपपत्तिम्—

अथ यत्प्रथमोदिते स प्रस्तावस्तदस्य
मनुष्या अन्वायत्तास्तस्मात्ते ।

प्रस्तुतिकामाः प्रश ँ्साकामाः
प्रस्तावभाजिनो ह्येतस्य साम्नः ।।३।।

अथ अनन्तरं सूर्यस्य प्रथममुदितमिति प्रथमोदितं तस्मिन् प्रथमोदिते उदितशब्दोऽत्रोदयपर्यायः अथवा कर्तरि क्त प्रत्ययात् उदेति इत्युदितः प्रथममुदितः प्रथमोदितः तस्मिन् प्रथमोदिते सूर्य इति सप्तम्यन्तं विशेष्यं अथवा प्रथम इत्यस्य नपुंसकलिङ्गेऽपि सुपां इत्यादिना पूर्वसवर्णात् प्रथमा एवमुदिते सूर्ये यत्प्रथमारूपम् इति श्रुत्यन्वयः स एव सूर्यस्य प्रथममुहूर्ताकारः स एव प्रस्तावः तस्य साम्नः मनुष्या अन्वायत्ताः अन्वधीनः हि यतोहि एते मनुष्या एतस्य प्रस्तावभाजिनः भाजिनः इति वक्तव्ये भाजिन इति प्रयोगस्तु बाहुलकेन सत्यपि वणित्वे कुत्वाभावात् इमे प्रस्तावं भजन्ते अतएव प्रस्तुतिकामाः श्रुत्यैव प्रस्तावशब्दस्य अर्थद्वयं कृतं प्रस्तावो हि कस्यचित् वस्तुनः प्रस्तुतिकरणं तथा च प्रस्तावो नाम प्रशंसा प्रकृष्टः स्तवः प्रस्तव प्रस्तवः एव प्रस्तावः इति व्युत्पत्तयः अतएव मानवाः कर्मणा प्रस्तुतिकरणं प्रशंसा च कामयन्ते।

अथ तृतीयं साम विवृणोति—

अथ यत्सङ्गवेलाया ँ्स आदिस्तदस्य ।
वया ँ्स्यन्वायत्तानि तस्मात्तन्यन्तरिक्षेऽ-
नारम्भणान्यादायात्मानं परिपतन्त्यादि-
भाजीनि ह्येतस्य साम्नः ।।४।।

अथ सङ्गवेलायां सङ्गवः गवां समवेति भवनं तस्य सङ्गवस्य वेला सङ्गववेला यस्मिन् काले गावः वनचाराय समवयन्ति तादृक् वेलायां सूर्योदयदूर्ध्वं यावत् त्रिमुहूर्तिकालमिति भावः स आदिः आददते स्वात्मानं यत्र तथाभूतः तस्मिन् वयांसि पक्षिणः अन्वायत्तानि अतएव ते तान्यम्वरे अनारम्बणानि आलम्बनम् एव आरम्बणम् अभेदाल्लोरकारः नास्ति आरम्बणम् आलम्बणम् आधारो येषां तथाभूतानि अन्तरिक्षे निराधाराणि चरन्ति आत्मानम् आरायैव परिपतन्ति परितः भूमौ पतन्ति यतोहि तानि आदिभाजीनि आदिनामकसामभक्तिमन्ति।

चतुर्थं सामव्याचष्टे—

अथ यत्सम्प्रति मध्यन्दिने
स उद्गीथस्तदस्य देवा
अन्वायत्तास्तस्मात्ते सप्तमाः प्राजापत्याना-
मुद्गीथभाजिनो ह्येतस्य साम्नः ।।५।।

अथ आद्यनन्तरं सम्प्रति अस्मिन्नेव समये मध्यन्दिने मध्याह्ने सूर्यस्य यद्रूपं स एव उद्गीथ: सर्वश्रेष्ठत्वात् तुरीयब्रह्मरूप: अयं कालोऽपि पावन: भवति तस्यैव देवा: अन्वायत्ता: अनुकूलतयाधीना: अत एव उद्गीथोपासनाहेतो ते प्राजापत्यानाम् प्रजापते: कस्य-यस्य ब्रह्मणो वा अपत्यानि पुमांस: प्रजापत्या: तेषां समेषाम् प्रजापतिसंतीनां मध्ये इमे सत्तमा: श्रेष्ठा अत्र निर्धारणे सप्तमी अतिशयेन सन्त: इति सत्तमा हि यतोहि इमे देवा: उद्गीथभाजिन: उद्गीथभक्ता: अस्य साम्न: मध्याह्नस्योद्गीथमयत्वात् भगवान् रामचन्द्रोऽपि तस्मिन्नेव भुवनपावने भूतभावने काले समाविर्बभूव यथोक्तं मानसे—

मध्य दिवस अति शीत न घामा ।
पावन काल लोक विश्रामा ।।

(मानस १-१९१-२)

अथ प्रतिहारं व्याकरोति—

अथ यदूर्ध्वं मध्यदिनात्प्रागपराह्णात्स प्रतिहारस्तदस्य गर्भा अन्वायत्तास्तस्मात्ते प्रतिहृता नावपद्यन्ते प्रतिहार-भाजिनो ह्येतस्य साम्नः ।।६।।

अथ उद्गीथानन्तरमस्य मध्यन्दिनात् मध्याह्नात् ऊर्ध्वमपराह्णात् पूर्वं यद्रूपं भवति स एव प्रतिहार: तस्य गर्भा: अन्वायत्ता: भवन्ति यतस्ते प्रतिहारभाजिन: अतएव उपरिकृष्टा: नावपद्यन्ते नाधोनीयन्ते।

अथोपद्रवं निरूपयति—

अथ यदूर्ध्वमपराह्णात्प्रागस्तमयात्स उपद्रवस्त स्यारण्या अन्वायत्तास्तस्मात्ते पुरुषं दृष्ट्वा कक्षँ् श्वभ्रामित्युपद्रवन्त्युपद्रवभाजिनो ह्येतस्य साम्नः ।।७।।

अत यत् अपराह्णात् अनन्तरं असतमेवास्तमयम् स्वार्थेमियत् तस्मात् स्तिमितात् पूर्वं भाष्करस्य यद्रूपं स एव उपद्रव: षष्टं साम तस्य आरण्या: अरण्ये भव: पशव: अन्वायत्ता यतोहि इमे उपद्रवसामभाजिन: तस्मात् उपद्रव्यणं तेषां स्वभाव: अतएवैते पुरुषं आखेटकं मनुष्यं दृष्ट्वा कक्षं गहनगह्वरं शुभं पर्वतकन्दरा वा उपद्रवन्ति द्रुत्वा लीयन्ते।

अथ सप्तमं साम स्पष्टयति—

अथ यत्प्रथमास्तमिते तन्निधनं

तदस्य पितरोऽन्वायत्तास्तस्मात्तान्निदधति ।

निधनभाजिनो ह्येतस्य साम्न

एवं खल्वमुमादित्यँ्सप्तविधँ्सामोपास्ते ।।८।।

अथ उपद्रवानन्तरम् अस्तमिते अत्र आदि कर्मणि निष्ठा एवमस्तंगच्छति इति भाव: अस्य यत् प्रथमा व्युत्पत्ति: पूर्ववत् प्रथममिति भाव: संक्षिप्तमण्डलं स्थाल्याकारं यद् रूपं भगवतो भानो: तदेव निधनं निधीयन्ते समूह्यन्ते किरणा यस्मिन् तन्निधनं तस्य पितर: अर्यमादिपितृदैवतानि अन्वायत्ता समधिश्रिता: तस्माज्जना: इमान् पितृन् दर्भेषु निदधति स्थापयन्ति तस्मात् एवमादित्यरूपेषु सप्तषु हुंकारप्रस्तावाद्युद्गीथप्रतिहारोपद्रव निधनान्नीति सप्तसामान उपासते उपासीत इति भाव:।

इति छान्दोग्योपनिषदि द्वितीयाध्याये नवमखण्डे श्रीराघवकृपाभाष्यम् सम्पूर्णम्।।९।।

।। श्रीराघव: शन्तनोतु ।।

।। दशम: खण्ड: ।।

आदित्यो वै अहोरात्राणां प्रविभागकरणात् कालक्षपणहेतुत्वाच्च समस्तप्राणिभृतां मृत्युरूप:। ब्रह्मणा हि यत्कालपरिमाणायुर्निश्चीयते स कालस्तु दिनरात्रिविभागद्वारेणादित्ये नैव क्षप्यते अत एव श्रीभारते वनपर्वणि यक्षप्रश्नमुत्तरयता श्रीधर्मसुनुना युधिष्ठिरेण कटाहरूपकच्छलेन भूतप्रलयप्रस्तावे मोहकटाहाङ्कित्वेन पावकरूपोऽसावादित्य: प्रावर्णि दिवारात्रौ चेन्धनं तत्र मासाश्चदर्व्य: यासां परिघट्टनेन कुशलपाचक: कृतान्त: सततं भूतानि पचति सूर्याग्निसहाय: तथा च श्लोक:—

अस्मिन्महामोहमये कटाहे सूर्याग्निना रात्रिदिवेन्धनेन ।

मासश्चदर्वीपरिघट्टनेन भूतानि काल: पचतीति वार्ता ।।

(भट्टाभारत वनपर्व यक्षयुधिष्ठिरे संवाद-१)

तमेव जगन्मृत्युमादित्यं कथमतीयात् सार्थक: इति कृत्वा खण्डोऽयं प्रस्तूयते—

अथ खल्वात्मसंमितमतिमृत्यु सप्तविधँ्सामोपासीत हिङ्कार ।

इति त्र्यक्षरं प्रस्ताव इति त्र्यक्षरं तत्समम् ।।१।।

अथानन्तरं मृत्युरूपमादित्यमतिवर्तितुम् अतिमृत्युम् मृत्युमतीतम् अत्यादयः क्रान्ताद्यर्थे द्वितीयया इति वार्तिकेन तत्पुरुषसमासः जगज्जायमानो न कोऽपि जन्तुर्मृत्युमत्येति ऋते सीतापतेः परमात्मनः श्रीरामात्। ननु श्रीरामस्यातिमृत्युत्वे किम्मानमिति चेत् **'नावज्ञेयश्च भूतानां न च कालवशानुगः'** (वा. रा. २-१-२९) इति प्राचेतस् वचनप्रमाणमेव गृह्यताम् स एव सूर्यस्यापि सूर्यश्चन्द्रमसोऽपि चन्द्रमाः **'सूर्यस्यापि भवेत्सूर्यः'**। (वा. रा. २-४४-१५) इति ऋषिवचनात् सूर्यान्तर्कान्तिकोपासनाद् भगवतो रामस्य श्रुतौ अथ इति आनन्तर्यवाची खलु शब्दो निश्चयार्थः- आत्मना परमात्मना श्रीरामेण, जीविते परमात्मनीति कोषात्, सम्मितं तुल्यं सप्तविधं हिंकारप्रस्तावाद्युद्गीथप्रत्यहारोपद्रवनिधननामकम् साम उपसीत श्रीरामधारणयैव विज्ञाय भजेत उपासीत इति विधिलिङ्प्रयोगात् विधेयवचनम् मृत्युः खलु द्व्यक्षरः यथा च तन्त्रेऽपि द्वेऽक्षरे च भवेन्मृत्यु त्र्यक्षरे मृतमश्नुते तस्मात् द्व्यक्षरमतिशयितुं त्र्यक्षरमीश्वरमुपासीत इति श्रुत्यर्थः। रामशब्देऽपि रेफमकारौ तु व्यञ्जनौ किन्तु रकारोत्तरर्ती दीर्घाकारतु स्वरः तस्मात् त्र्यक्षरो राम उपासनीय इति श्रुतेर्दम्। प्रस्तुतस्योपपत्यमाह— हिङ्कारः प्रस्ताव इति सामद्वयं त्र्यक्षरं अत ईश्वरेण त्र्यक्षरं समं तस्मात् उभयत्र साम्यम्।

अथ आदिप्रतिहारयोः प्रत्येकं त्र्यक्षरयोः प्राहोपपत्तिम्।

आदिरिति द्व्यक्षरं प्रतिहार इति चतुरक्षरं तत इहैकं तत्समम् ।।२।।

आदीति द्व्यक्षरं वर्णद्वयं प्रतिहार इति चतुरक्षरं चतुर्वर्णात्मकम् एवं द्वयोः सङ्कलनेन षट्संख्यावर्णानां ततः तस्मात् चतुरक्षरात् प्रतिहारशब्दात् एकमक्षरम् आदीति शब्दे सम्मेल्य द्वावपि त्र्यक्षरौ एवमुभाभ्यां त्र्यक्षरमीश्वरोपासनीयः इत्यत् आह तत्समम् ताभ्यां सामाभ्यां सदृशम्।

अथोद्गीथोपद्रवयोः उपपत्तिमाहोपासनायाः—

उद्गीथ इति त्र्यक्षरमुपद्रव इति चतुरक्षरं त्रिभिस्त्रिभिः समं भवत्यक्षरमतिशिष्यते त्र्यक्षरं तत्समम् ।।३।।

एवमुद्गीथ इति त्रिर्वणात्मकः शब्दः उपद्रव इति चतुर्वर्णः त्रिभिश्चतुर्णां संकलने वर्णानां सप्तसंख्या तथा चात्र षण्णां समं विभागद्वयं विधाय वर्णमेकमतिरिच्य प्रत्येकं त्र्यक्षरं तदेव परमेश्वरबुद्ध्योपासनीयमिति हार्दम् अत आह मूले अतिशिष्यते उभयोः वर्णानां संख्या सप्त उपासनीययोः द्वयोः प्रत्येकमपेक्षितं त्रयक्षरम् अतएकमसरमतिशिष्टं यस्याग्रिम उपयोगो निरूपयिष्यत इति भावः।

अथान्तिमं निरूपयति—

निधनमिति त्र्यक्षरं तत्सममेव भवति तानि ।
ह वा एतानि द्वावि्ँशतिरक्षराणि ।।४।।

निधनमिति सप्तमं साम त्र्यक्षरं तत्समं तेन त्र्यक्षरेण ईश्वरेण समं तुल्यं एवमेतानि हिंकारप्रस्तावादिप्रतिहारोद्गीथोपद्रवनिधनानि सप्तसामानि द्वाविंशतिः अक्षराणि तथा च हिंकारस्य त्र्यक्षरं प्रस्तावस्य त्र्यक्षरं आदेर्द्व्यक्षरं प्रतिहारस्य चतुरक्षरं उद्गीथस्य त्र्यक्षरं उपद्रवस्य चतुरक्षरं निधनस्य त्र्यक्षरमिति सप्तानां वर्णसंख्या द्वाविंशतिरिति भावः। अत्र सप्तधा विभक्तेषु तेषु प्रतिविभागं त्र्यक्षरं अविशिष्टस्यैकाक्षरस्य परिणाम उच्यते तदेवाखण्डं ज्ञानगिरा गवामगोचरं सीतेश्वरं परमेश्वरं मन्यामहे।

अथैकविंशति वर्णात्मकसामोपास्तिफलमाह—

एकविंशत्यादित्यमाप्नोत्येकवि्ँशो वा इतोऽसावादित्यो ।
द्वावि्ँशेन परमादित्याजयति तन्नाकं तद्विशोकम्।।५।।

एकविंशत्या वर्णानामिति शेषः एवं सप्तसाम्नां परिगणितवर्णानाम् एकविंशत्या अत्र करणे तृतीया एकविंशतिसंख्यारूपसाधनेनेति भावः आदित्यं संसारो हि मृत्युः अत एव गीतायां **'मृत्युसंसारवर्त्मनि'** **'मृत्युसंसारसागरात्'** (९।३) (१२-७) श्रीमानसकारोऽपि मृत्युरूपं संसारं सूर्यपर्यायेण पतङ्गेनोपमिमीते **'ते संसारपतङ्गघोर-किरणैर्दह्यन्ति नो मानवाः'** (मानस ७ अन्तिम)।

एवं भूत आदित्योऽपि एकविंशति वर्णसमानधर्मा तथा च द्वादशमासाः षड्ऋतवः पूर्वाह्णमध्यान्यापराह्णनामधेयाः त्रयोवस्थाभेदाः एतादृशं सूर्यमाप्नोति। यतो हि इतः अस्माँल्लोकात्परः एकविंशः एकविंशतिसंख्यापूरणः आदित्यः द्वाविंशेन वरणेन साधकतमेन आदित्यादिपरं तन्मण्डलस्थं नाकं कं सुखं तस्य अभावा अकं दुःखं तन्नास्ति यस्मिन् तन्नाकं 'नभ्राण्ण' इति सूत्रेण नञ् समासेऽपि नाकारलोपाभावः। एवं सर्वदासुखाभावमिति भावः अथवा नाकः सुखत्वावच्छिन्नाभावनान् साकेतलोकः सोऽस्ति समधिष्ठेयत्वेन अस्य इति नाकः श्रीरामः साकेतलोकाधीशः अत्र अर्श आदित्वादच् प्रत्ययः तं नाकं साकेताधिपतिं विशोकं विगतशोकं तदीयेष्टयोगासम्भवात् यद्वा विनाशितः प्रणतशोकः येन स विशोकः तं परमात्मानं रघुवरमाप्नोति।

फलश्रुतिं वर्णयति—

आप्नोति हादित्यस्य जयं
परो हास्यादित्यजयाज्जयो भवति य ।
एतदेवं विद्वानात्मसंमितमतिमृत्यु-
सप्तविध्ँसामोपास्ते सामोपास्ते ।।६।।

ह निश्चयेन यः एवं विद्वान् यथोक्तं पूर्वं जानन् अतिमृत्युभावनया सप्तविधसामोपास्ते सः आदित्यस्य जयं सूर्यमण्डलस्य भेदरूपं विजयं आप्नोति आदित्यस्य जयात् तदपेक्षयापि परः परमेश्वरः जयः विजयरूपः उत्कृष्टः भवति सामोपास्ते इति द्विरुक्तिस्त्वादरार्था निश्चयार्था च।

इति छान्दोग्योपनिषदि द्वितीयाध्याये दशमखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।१०।।

।। श्रीराघवः शन्तनोतु ।।

।। एकादशः खण्डः ।।

अथ गायत्रसामोपासनं प्रस्तौति। गायन्तं त्रायते इति गायत्री तस्याः इदं इति गायत्रं सम्बन्धे षष्ठी अनुयोगि अलम्।

मनो हिंकारो वाक् प्रस्तावश्चक्षुरुद्गीथः श्रोत्रं
प्रतिहारः प्राणो निधनमेतद्गायत्रं प्राणेषु प्रोतम् ।।१।।

गायत्र्यां हि मनोवाक्चक्षुश्श्रोत्रप्राणानां पञ्चानामुपभोगो भवति तेषु पञ्चानां हिंकारादीनां गुणसाम्यात् प्रतीकत्वमारोप्यते मनः प्राथम्यात् हिंकारः अनेनैव हि चिन्तनं गायत्री दैवतस्य भावप्रस्तुतिकरणात् वागेव प्रस्तावः गायत्रीदैवतस्य सवितुः चक्षुः स्थितत्वात् तदेवोद्गीथं श्रेष्ठत्वादङ्गानाम् अत्र चक्षुः पदं मानसे चक्षुष् समभिप्रेतं तेनैव सीतापतिसाक्षात्कारसम्भवात् यथोक्तं भगवता,

न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा ।
दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम् ।।

(गीता ११।८)

श्रोत्रं शब्दानां प्रतिहरणात् प्रतिहारः प्राणः समेषां तत्र निधीयमानत्वात् तत्र निधनम् इदं प्राणेषु प्रोतं सन्निहितं फलश्रुतिमाह—

स य एवमेतद्गायत्रं प्राणेषु प्रोतं
वेद प्राणी भवति सर्वमायुरेति।
ज्योग्जीवति महान्प्रजया पशुभिर्भवति
महान् कीर्त्या महामनाः स्यात्तद्व्रतम्।।२।।

यः कश्चन पूर्वोक्तरूपेण जानन् वेदगायत्रं सामोपास्ते वेदनमिहोपासनं तादृक् प्रसङ्गानुरोधात् पूर्वापरग्रन्थानुरोधाच्च प्राणी प्रशस्तप्राणवान् प्रजया सन्तत्या पशुभिः गवादिभिः उपलक्षितः तथाभूतहेतुभिर्वा महान् भवति महीयमानस्तिष्ठति कीर्त्या

यशसा महान् भवति सर्वम् आयुः शतवर्षात्मकं **जीवेम शरदः शतम्** इति श्रुतेः एति प्राप्नोति ज्योक् अनाविलं जीवनं जीवति।

इति छान्दोग्योपनिषदि द्वितीयाध्याये एकादशखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।११।।
।। श्रीराघवः शन्तनोतु ।।

।। द्वादशः खण्डः ।।

अथ रथन्तरसामोपासनं प्रस्तौति। रथन्तरनाम सुगमतया जीवानां भवसागरतारणात्मकं श्रौतं सविशेषं विधानं, रथेन भगवच्चरणकमलजलरथेन भगवच्चरणो हि जलरथः यथोक्तं श्रीविनये श्रीमद् हुलसीहर्षवर्धनेन **'भवसिन्धु दुरस्तरजलरथं'** (विनय पत्रिका १३६) तेन रथेन तरन्ति भवसागरं येन साम्ना तद्रथन्तरसाम।

अभिमन्थति स हिंकारो धूमो जायते
स प्रस्तावो ज्वलति स उद्गीथोऽङ्गारा भवन्ति ।
स प्रतिहार उपशाम्यति तन्निधनँ्
सँ्शाम्यति तन्निधनमेतद्रथन्तरमग्नौ प्रोतम् ।।१।।

याज्ञिकः यत् अभिमन्थति अरणिघर्षणमाध्यमेन स एव हिंकारः प्राथम्यात् धूमो जायते स एव प्रस्तावः प्रस्तवनात् पावकस्य अनन्तरं ज्वलति दीप्यते स एव उद्गीथः श्रेष्ठत्वात् तत्रैवाहुतिसमर्पणयोग्यत्वात् अनन्तरं यदङ्गाराः जायन्ते इन्धनभस्मशब्देषु स एव प्रतिहारः प्रतिहरणात् अनन्तरं यद् उपशाम्यति निर्वाणोन्मुखो भवति तत् निधनं सामान्यं यच्च पूर्णतया शाम्यति तद्विशिष्टं निधनं स्फुल्लिङ्गानां रोचिषां च तत्रैव निधीयमानत्वात्। इदं रथन्तरसाम कथ्यते।

फलश्रुतिं व्रतं चाह—

स य एवमेतद्रथन्तरमग्नौ प्रोतं वेद
ब्रह्मवर्चयन्नादो भवति सर्वमायुरेति ज्यग्जीवति
महान् प्रजया पशुभिर्भवति महान्कीर्त्या
न प्रत्यङ्ङग्निमाचामेन्न निष्ठीवेत्तद्व्रतम् ।।२।।

वेद उपास्ते ब्रह्मवर्चसी ब्रह्मणः ब्राह्मणस्य वर्चः तेजः इति ब्रह्मवर्चसं ब्रह्महस्तिभ्यां वर्चसः इति सूत्रेण समासान्तोच् प्रत्ययः तद् ब्रह्मवर्चसं प्रशस्त-तपःश्रुतयोनिसम्पन्नब्राह्मणतेजः अतिशयेनास्ति यस्मिन् स ब्रह्मवर्चसी इन् प्रत्ययः

अन्नादः दिव्यान्नभोक्ता शेषं पूर्ववत् अग्नेः प्रत्यङ् पावकसमक्षं न आचामेत् नैव मुखं हस्तचरणान् वा प्रक्षालेत् न निष्ठीवेत् न थूत्कुर्यात् तद्व्रत्।

एष रथन्तरसामोपासनानियमः।

इति छान्दोग्योपनिषदि द्वितीयाध्याये द्वादशखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।१२।।

।। श्रीराघवः शन्तनोतु ।।

।। त्रयोदशखण्डः ।।

इदानीं वामदेव्यसामोपसना वर्ण्यते।

अस्य साम्नः वामदेव ऋषिः अत इदं वामदेव्यम्।

उपमन्त्रयते स हिंकारो ज्ञपयते स प्रस्तावः
स्त्रिया सह शेते स उद्गीथः प्रति स्त्रीं
सह शेते स प्रतिहारः कालं गच्छति तन्निधनं
पारं गच्छति तन्निधनमेतद्वामदेव्यं मिथुने प्रोतम् ।।१।।

उपमन्त्रयते पाणिगृहीतभार्यां धर्मतो विजिहीर्षुः स्वसमीपमाह्वयति इङ्गितादिचेष्टाभिः। स एव प्राथम्यात् हिङ्कारः, ज्ञपयते तामनुकूलयति स एव प्रस्तावः सङ्कल्पप्रस्तुतिकरणात् स्त्रिया स्वजायया सह शेते एकपर्यङ्के श्वपिति स एव उद्गीथः शास्त्राविरुद्धत्वेन श्रैष्ठ्यात् पृथक् शय्यायाः नारीदण्डरूपेण शास्त्रे सङ्कीर्तनात् **'स्त्रीणां दण्डे पृथक् शैय्या'** इति स्मृतेः। प्रति स्त्रीं शेते विहर्तुं भार्याम् अभिमुखीभूय शेते इति प्रतिहारः, कालं गच्छति व्यवाय क्रियया विश्रान्तिमेति इदमुपासनं मिथुने दम्पत्यो प्रोतम्। यद्यपि सामान्यतः कार्यमिदं वासनात्मकं परिकल्पयन्ते परन्तु श्रुतिविहितधर्मानुसारेण क्रियमाणं भगवदुपासनेति ज्ञेयम्—

फलश्रुतिं च तत्फलमाह—

स य एवमेतद्वामदेव्यं मिथुनं प्रोतं
वेदमिथुनां भवति मिथुनान्मिथुनात्प्रजायते ।
सर्वमायुरेति ज्योग्जीवति महान्प्रजया
पशुभिर्भवति महान्कीर्त्या न काञ्चन परिहरेत्तद्व्रतम् ।।२।।

पाणिगृहीतां स्वतल्पगतां काञ्चनकुरूपामपि न त्यजेत् पाणिगृहीतभार्यात्यागे महताप्रत्यवायस्य श्रुत्यैव सङ्कीर्तत्वात्। इदमेव व्रतम्।

इति छान्दोग्योपनिषदि द्वितीयाध्याये त्रयोदशखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।१३।।

।। श्रीराघवः शन्तनोतु ।।

।। अथ चतुर्दशः खण्डः ।।

अथ बृहत् सामोपासनं प्रस्तौति तदाधार आदित्यः न दीयते केनापि, नैव खण्डयते इति अदितिः तैलधारावदविच्छिन्नप्रवाहा भगवदीया परमप्रेमैकरूपा भगवन्नामरूप- लीलाधाम-रसास्वादनापरपर्यायानिरपाया भगवदाशक्तिरूपाभक्तिः तस्याः भक्तेरदितेः अयं आदित्यः भगवद् भजनानन्दरूपः परमेश्वरानुग्रहस्वरूपो वा तस्मिन् आदित्ये सूर्ये इदं बृहत्साम संन्निहितं तच्च भगवत् विभूतिः यथोक्तं गीतासु **बृहत्साम तथासाम्नां**, (गीता १०-३५) तदेवास्मिच्छकले यथावस्थमादित्यस्य संकीर्त्यते उद्यन्नित्यादिना—

उद्यन्हिंकार उदितः प्रस्तावो मध्यन्दिन उद्गीथोऽपराह्णः ।
प्रतिहारोऽस्तं यन्निधनमेतद्बृहदादित्ये प्रोतम् ।।१।।

उद्यन् उदीयमानः सूर्यः हिंकारः उदितः उद्गतः सन् प्रस्तावकिरणानां प्रस्तुतीकरणात् मध्यंदिनम् अवस्थात्वेना स्त्यस्य इति मध्यन्दिनः मध्याह्नकालिकसूर्यः उद्गीथः उत्कृष्टतयागीयमानत्वात् अत एव श्रीराम जन्मनि मध्याह्नकालः तन्महोत्सवे च एकमासं मध्यन्दिनसूर्यो व्यराजत जगौ च मानसकारः—

मासदिवसकर दिव सभा मरम न जानै कोय ।
रथ समेत रबि थाकेउ निसा कवन बिधि होय ।।

(मा. बा. १९५)

एवमपराह्णः अपराह्णकालिकः सूर्यः प्रतिहारः अस्तोन्मुखत्वेन विकीर्णकिरणानां प्रतिहरणात् यत् तस्य अस्तं स्तिमितमण्डलरूपं तन्निधनं तस्मिन् किरणानां निधीयमानत्वात् एतद् बृहत्साम आदित्ये सूर्ये प्रोतं व्याप्तम्।

फलश्रुतिमाह—

स य एवमेतद्बृहदादित्ये प्रोतं
वेद तेजस्व्यन्नादो भवति सर्वमायुरेति ।
ज्योग्जीवति महान्प्रजया पशुभिर्भवति
महान्कीर्त्या तपन्तं न निन्देत्तद्व्रतम् ।।२।।

वेद उपास्ते तेजस्वी प्रसस्ततेजोमयः ज्योग्जीवति उज्ज्वलं जीवनं वर्तयति तपन्तमादित्यम् उद्यन्तं भास्करं न निन्दते न गर्हेत तद्व्रतं अयमेव बृहत् सामोपासकानां नियमः।

इति छान्दोग्योपनिषदि द्वितीयाध्याये चतुर्दशखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।

।। श्रीराघवः शन्तनोतु ।।

।। अथ पञ्चदशः खण्डः ।।

अथ वैरूपसामोपासनं प्रस्तूयते तर्हि किं नाम वैरूपं यस्मिन् विविधानिरूपाणि भवन्ति पर्जन्ये हि अनेकानि रूपाणि विलोक्यन्ते तेष्वपि भगवद्बुद्ध्यैव सामदृष्ट्या सामोपासीत एतदर्थमयमारम्भः विविधानि रूपाणि यस्मिन् तद् विरूपं विरूपमेव वैरूपं प्रज्ञादित्वात् स्वार्थेऽण्प्रत्ययः।

अभ्राणि संप्लवन्ते स हिंकारो
मेघो जायते स प्रस्तावो वर्षति उद्गीथो
विद्योतते स्तनयति स प्रतिहार
उद्गृह्णाति तन्निधनमेतद्वैरूपं पर्जन्ये प्रोतम्।।१।।

अभ्राणि अपः जलानि विभ्रतीति अभ्राणि नीरदाः सम्प्लवन्ते मरुता नभो मार्गेण वर्षणाभिमुखीक्रियन्ते स एव हिंकारः प्राथम्यात् मेघः मेहति धाराबद्धतया जलंमुञ्चति इति मेघः वर्षणशीलघनः जायते उत्पद्यते स एव प्रस्तावः वारिप्रस्तुतीकरणधर्मत्वात् वर्षति कूटते इति उद्गीथः कृषकैः मयूरैः सारंगैश्च उत्पुलकेन गीयमानत्वात् यद्विद्योतते चमत्करोति स्तनयति गर्जति स एव प्रतिहारः पयसां प्रतिहरणात् यद्उद्गृह्णाति वर्षणं विरमयति तदेव निधनं जलानां निधनभूतत्वात् एतत् पर्जन्ये वर्षणशीले मेघे।

फलश्रुतिमाह—

स य एवमेतद्वैरूपं पर्जन्ये प्रोतं वेद
विरूपाँश्च सुरूपाँश्च पशूनवरुन्धे सर्वमायुरेति
ज्योग्जीवति महान् प्रजया पशुभिर्भवति
महान्कीर्त्या वर्षन्तं न निन्देत्तद्व्रतम् ।।२।।

विरूपान् अनेकरूपान् सरूपान् समानाकारान् पशून् गवाश्वादीन् अवरुन्धे पशुशाले बध्नाति वर्षन्तं कटन्तं पर्जन्यं वारिदं न निन्देत नापवदेत तद्व्रतं एष एव वैरूपसामोपासकानां नियमः।

इति छान्दोग्योपनिषदि द्वितीयाध्याये पंचदशखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।

।। श्रीराघवः शन्तनोतु ।।

।। अथ षोडशः खण्डः ।।

अथ वैराजसामोपासनं प्रारभ्यते विविधतया राजते इति विराट् तस्य विराजः इदं इति वैराजं पंचैवर्तूनाश्रित्य भगवतो विराजःसृष्टिश्चलति प्रकृतिः विराड्रूपा विशिष्टा विविधा च विराजते—

वसन्तो हिंकारो ग्रीष्मः प्रस्तावो वर्षा उद्‌गीथः ।
शरत्प्रतिहारो हेमन्तो निधनमेतद्वैराजमृतुषु प्रोतम् ।।१।।

तत्र वसन्तःहिंकारः तस्मिन्नेव नवसंवत्सरस्य नवीनकिसलयानां प्रकृतौ च नवलसौन्दर्यसमारम्भात् ग्रीष्मः प्रस्तावः तत्र फलशस्य विपाकप्रस्तुतीकरणात् वर्षा उद्‌गीथः उत्पुलकैः प्राणिभिः गीयमानत्वात् उद्‌गृणाच्च वारां शरत्प्रतिहारः चण्डकरकिरणैः पयसां प्रतिहरणात् हेमन्तः निधनं तस्मिन्च्छैत्याधिक्येन सर्वेऽपि जीवाः निज निजनिलयेषु निधीयन्ते एतत् पञ्चषु ऋतुषु प्रोतम् समाहितं शिशिरस्य हेमन्त एवान्तर्भावात् पृथङ्नोक्तिः।

फलश्रुतिमाह—

स य एवमेतद्वैराजमृतुषु प्रोतं वेद
विराजति प्रजया पशुभिर्ब्रह्मवर्चसेन ।
सर्वमायुरेति ज्योग्जीवति महान्प्रजया
पशुभिर्भवति महान्कीर्त्यर्तून्न निन्देत्तद्व्रतम् ।।२।।

विराजति विशिष्टः सन् शोभते ऋतून् वसन्तादीन् प्रतिकूलानपि न निन्देत तद्व्रतम् नियमः।

इति छान्दोग्योपनिषदि द्वितीयाध्याये षोडश खण्डे श्रीराघवकृपाभाष्यं संपूर्णम्।।
।। श्रीराघवः शन्तनोतु ।।

।। अथ सप्तदशः खण्डः ।।

अथ शक्वरीसामोपासना प्रस्तूयते यया सामोपासनया प्राप्तुं शक्यन्ते पृथिवी अन्तरिक्षं द्योरिति त्रयो लोका उपासकेन सैव शक्वरी सामोपासना शक्यते प्राप्तुं यया सा शक्वरी इति व्युत्पतेः सामर्थ्यार्थक शक्लृ धातोः क्वरच् प्रत्ययः ईश्वारादिवत्—

पृथिवी हिंकारोऽन्तरिक्षं प्रस्तावो द्यौरुद्गीथो दिशः ।
प्रतिहारः समुद्रो निधनमेताः शक्वर्यो लोकेषु प्रोता ।।१।।

प्राथम्यात् पृथिवी भूर्लोकः हिंकारः प्रस्तुतिकरणात् परलोकाय जीवानाम् अन्तरिक्षं भुवर्लोकः प्रस्तावः अत्रैवान्तरिक्षे स्वर्गमहर्जनस्तपसां समावेशः द्यौः दीव्यतीति द्यौः साकेतलोकः उद्गीथः उत्कृष्टैरपि परमहंसविमलात्मभिः सनकादिमहात्मभिः गीयमानत्वात् दिशः पूर्वादयः प्रतिहारः आभिरेव निजनिजकर्मानुगाःप्राणिनः अधोअधोलोकानि अध्यधिलोकांश्च प्रतिह्रियन्ते समुद्रः सामान्यजीवानां कृते क्षारसागरः वैष्णवानां कृते क्षीरसागरः सामीप्यमुक्तिमिच्छताम् अनन्यगतिकानां श्रीरामोपसकानां कृते स्वयमेव श्रीनारायणाभिन्नः श्रीराम एव **'समुद्र इव गाम्भीर्ये'** वाल्मीकि १-१-१७ 'सर्वदाभिगतःसद्भिः' वाल्मीकि १-१-१६।

जो आनन्द सिन्धु सुख रासी ।
सीकर ते त्रोलोक सुपासी ।।

(मानस १-१-९७-५)

इत्यादि वचनात् स एव आनन्दसुधासागरः निधनं तत्र समेषाम् जीवानाम् प्रलयकाले सन्निहत्वात्— (**यत्प्रयन्तित्यभिसम्विसन्ति** इति श्रुतेः)

लोकेषु भूर्भुवःस्वराख्येषु प्रोताः व्याप्ताः जीवो हि यथाक्रमम् श्रौतस्मार्तकर्माणि यथावर्णाश्रममर्यादं विगलितविषादं कुर्वाणः मातृसेवया पृथवी पितृसेवया दिवं गुरु सेवया वैकुण्ठं क्रमशो लभत इति शक्वरीत्वम् तथा चाह मनुः मातृ शुश्रूषया पृथिवीं पितृ शुश्रूषया दिवम् गुरुसेवया तु वैकुण्ठं प्रेत्य मर्त्यो महीयते।

फलश्रुतिमाह—

स य एवमेताः शक्वर्यो लोकेषु
प्रोता वेद लोकी भवति सर्वमा-
युरेति ज्योग्जीवति महान्प्रजया पशुभि-
र्भवति महान्कीर्त्या लोकान्न निन्देत्तद्व्रतम् ।।२।।

लोकी भवति लब्धप्रशस्तलोको भवति इमे प्राशस्ते विधानात् लोकान् स्वर्गादीन् नास्ति बुद्ध्या न निन्दते तद्व्रतम् स एव शक्वरी सामोपासनया नियमः।

इति छान्दोग्योपनिषदि द्वितीयाध्याये श्रीराघवकृपाभाष्ये सप्तदशोऽध्यायः सम्पूर्णम्।।

।। श्रीराघवः शन्तनोतु ।।

।। अथ अष्टादशः खण्डः ।।

अथ रेवतीसामोपासनं वर्ण्यते रेवते प्लुतो गच्छति इति रेवती रेवृ धातोः प्लुत-गत्यर्थात् कर्तरि तिच् प्रत्ययः रेवती नाम पशुसंगति या प्लवमाना गच्छति तत्रापि सामधारणया करणीयमुपासनम् उपास्यत्वात् पशुनाम् न तेषु निष्कारणं दण्डंधारयेदिति शिक्षयन्ती श्रुति प्राह—

अजा हिंकारोऽवयः प्रस्तावो गाव उद्गीथोऽश्वाः ।
प्रतिहारः पुरुषो निधनमेता रेवत्यः पशुषु प्रोताः ।।१।।

शब्दधर्मतया प्लुतिबहुलतया प्राथम्येन अजा वर्करी हिंकारः अवयः मेषा अञ्जसा विपुलसंततिप्रस्तुतिकरणात् प्रस्तावः गावः धेनवः सुरनरमुनिभिः सर्वोत्कृष्टेन परमात्मनाऽपि गीयमानत्वात् स्वयमपि हुंकारमाध्यमेन प्रणवस्य उच्चैः गातृत्वात् उद्गिरणाच्च पीयूषपयसाम् पूजनतश्च समस्तपुण्यानां श्रेष्ठत्वात् आपरमेश्वर-पामरवन्द्यमानत्वात् उद्गीथः वस्तूनाम् प्रतिहरणात् अश्वाः हयाः प्रतिहारः तेषां पुरुष एव योगात् स एव निधनं अथवा अजाविगवाश्वानां मानसप्रवृत्तीनां पुरुष एव दर्शनात् तत्र निधनत्वम् पशुषु पशुप्रवृत्तिषु जीवेषु तथा च स्पृश्यन्ते बध्यन्ते त्रयाणां गुणानां बन्धनैः एते पशवः जीवो हि सत्वगुणो ज्ञानसुखसंगेन रजोगुणः कर्मसंगेन तमोगुणी प्रमादालस्यनिद्राइति त्रिगुणप्रसूतैः षड्भिः गुणैर्बध्यते तथा चाह भगवान्– तत्र सत्वं निर्मलत्वात् प्रकाशकमनामयम् सुखसंगेन वध्नाति ज्ञानसंगेन चानघ। रजोरागात्मकंविद्धि तृष्णासंगसमुद्भवम् तन्निबधनाति कौन्तेय कर्मसंगेन देहिनम् तमस्त्वज्ञानजमविद्धि मोहिनं सर्वदेहिनाम् प्रमादालस्य निद्राभिः तन्निबधनाति पाण्डव गीता १४-६-७-८।

फलश्रुतिमाह—

स य एवमेता रेवत्यः पशुषु
प्रोता वेद पशुमान् भवति सर्वमायुरेति ।
ज्योग्जीवति महान्प्रजया पशुभिर्भवति
महान्कीर्त्या पशून्न निन्देत्तद्व्रतम् ।।२।।

पशुमान् प्रशस्तपशुयुक्तः परमार्थतस्तु पश्यति परमात्मानं यः स पशुः उणादित्वात् दृश् धातोरूश प्रत्यये शित्वात् पाघ्राध्मा इत्यादि ना पश्यादेशे पृषोदरादित्वात् यकारलोपे पशुरिति निष्पद्यते **'अबध्नन् पुरुषं पशुं'** शुक्ल यजु. ३१-१५ इति श्रुतेः।

प्राशत्यञ्चात्र समत्वेन सर्वत्र परमात्मदृष्टि: वाक्यार्थस्तु पशुमान् भवति परमात्मदर्शनक्षमात्माभवति पशून् घृणा दृष्ट्या न निन्देत तदेव रेवती सामोपासनाव्रतम्।।श्री:।।

इति छान्दोग्योपनिषदि द्वितीयाध्याये अष्टादशखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।

।। श्रीराघवः शन्तनोतु ।।

।। एकोनविंशः खण्डः ।।

इदानीं यज्ञायज्ञीयसामोपासना वर्ण्यते— इज्यते इति यज्ञ: 'यजयाचरुचयत रक्षप्रक्षोनङ' इति सूत्रेण कर्मणि नङ्प्रत्यय: एवं सर्वैरपीज्यमानत्वात् भगवान्परमेश्वर एव यज्ञ: यज्ञोवै विष्णुयज्ञेन यज्ञमयजन्ति इत्यादि श्रुतिवचनप्रामाण्यात्। अयज्ञ: जीव: यज्ञश्च अयज्ञश्च इति यज्ञायज्ञौ ब्रह्मजीवौ तयो: यज्ञायज्ञयो: ब्रह्मजीवयो: इदम् इति यज्ञायज्ञीयं वा नामधेयेषु वृद्धसंज्ञा वक्तव्या इत्यनेन परमेश्वरजीवनाम् ध्येयतया यज्ञायज्ञसमस्तशब्दस्य वृद्धसंज्ञकतया वृद्धाच्छ: इत्यनेन छ प्रत्येय ईयादेशे यज्ञायज्ञीयं नाम शारीरम् उपासनम् अस्मिन्नेव शरीरे यौगपद्येन यज्ञायज्ञौ ब्रह्मजीवौ **'तिष्ठतः ऋतं पिबन्तौ सुकृतस्य लोके'** कठ. १-३-१, 'द्वासुपर्णासियुजासखाय मुण्डक ३-१-१ इत्यादि श्रुते: **'देही नित्यमवध्योयं सर्वदेहेषु भारत'** गीता २-३०।

ईश्वरः सर्वभूतानां हृद्देशे अर्जुन तिष्ठति इत्यादि स्मृतेश्च तदुपासन एव शरीरेषु घृणां निराचिकीर्षु वर्णयति—

लोम हिंकारस्त्वक्प्रस्तावो मासमुद्गीथोऽस्थि ।
प्रतिहारो मज्जा निधनमेतद्यज्ञायज्ञीयमङ्गेषु प्रोतम् ।।१।।

लोम रोमावलि हिंकार: प्राथम्यात् त्वक्चर्मप्रस्ताव: स्तूयमानत्वात् तस्मिन्नेव सौन्दर्यदृष्टे: परिकल्पनात् चर्मणि अयं सुन्दर: इयम् सुन्दरी इदं सुन्दरमिति सर्वानुभवसिद्धत्वात् उत्कृत्ये चर्मणि सर्वे समाना एव मांसं श्रेष्ठत्वात् उद्गीथ: अस्थि प्रतिहरणात् बलस्य प्रतिहार: मज्जा पूर्वधातूनां निधीयमानत्वात् निधनम्।।श्री:।।

फलश्रुतिमाह—

स य एवमेतद्यज्ञीयमङ्गेषु प्रोतं वेदाङ्गी भवति
नाङ्गेन विहूर्च्छति सर्वमायुरेति ज्योग्जीवति ।
महान्प्रजया पशुभिर्भवति महान् कीर्त्या संवत्सरं
मज्ज्ञो नाश्नीयातद्व्रतं मज्ज्ञो नाश्नीयादिति वा ।।२।।

अंगी भवति निर्दुष्टावयववान् भवति अंगेन करादिना न विहूर्छति न कुटिलो भवति संवत्सरमेकवर्षं यावत् मज्ज्ञ विज्ञाय मज्जाम् नाश्नीयात् न भुञ्जीत तदेव यज्ञायज्ञीयसामोपासना व्रतम्।।श्रीः।।

इति छान्दोग्योपनिषदि द्वितीयाध्याये एकोनविंशे खण्डे श्रीराघवकृपाभाष्यम् सम्पूर्णम्।।

।। श्रीराघवः शन्तनोतु ।।

।। अथ विंशः खण्डः ।।

साम्प्रतं राजनसामोपासनं प्रस्तूयते राजन्ते देवाः येन तद्राजनं राजृदीप्तौ इत्यस्माद्धातोः, करणाधिकरणयोश्च इत्यनेन करणे ल्युट् राजृ हि दीप्त्यर्थः दीप्तिश्च जयोतिष्मत्स्वायत्ता ज्योतींषि च अग्न्यादित्यनक्षत्रचन्द्रमोमयानि वायुश्च पावकसखित्वेन मन्त्रेऽस्मिन् संनिवेशितः अग्निदीपने वायोः सहायकत्वात्—

अग्निर्हिंकारो वायुः प्रस्ताव आदित्य उद्गीथो ।
नक्षत्राणि प्रतिहारश्चन्द्रमा निधनमेतद्राजनं देवतासु प्रोतम्।।१।।

अग्निः अंजति गच्छति सर्वत्र तथाभूतः अज्यते आज्येनाभिषिच्यते यस्तथाभूतः अच्यते पूज्यते सुरासुरैपि यस्तथाविधः देवानां पुरोहितत्वात् ऋक्त्विक्त्वात् होतृत्वात् च अत एव प्रथमा श्रुतिः **'अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजं होतारं रत्नधातवं'** (ऋग्वेद-१-१-१) अग्रे नीयते श्रेष्ठत्वात् सोप्यग्निः स एव हिंकारः प्राथमिकत्वात् वायुः वाति सूचयति सुरभिमसुरभिञ्च यः स वायुः वाति सर्वत्र गच्छति यस्तथाभूतः वापयति अग्निं समिद्धं गमयति इति वायुः स एव प्रस्तावप्रकर्षेण स्तूयमात्वात् नमस्ते वायो **'त्वमेव प्रत्यक्षं ब्रह्मासि'** (तै. उ. शि. अ. अ. १) गन्धस्य च प्रस्तुतीकरणादपि प्रस्तावः आदित्यस्य च ज्योतिषां पतित्वात् उद्गीथता सिद्धा न क्षरन्ति न क्षीयन्ते वा नक्षत्राणि प्रतिहारः प्रतिहरणात् ज्योतिषां चन्द्रमाः चन्दयति जीवानाह्लादयति यस्तथाभूतः स एव निधनं सुधा रश्मयः ज्योतींषि च तत्रैव निधीयते इदं राजनं साम देवतासु दीप्तिमत्सु सुरेषु प्रोतम् समानधर्मत्वात्।

फलश्रुतिमाह—

स य एवमेतद्राजनं देवता सु प्रोतं वेदैता-
सामेव देवतानाँ सलोकताँ सार्ष्टिताँ सायुज्यं गच्छति ।
सर्वमायुरेति ज्योग्जीवति महान् प्रजया
पशुभिर्भवति महान् कीर्त्या ब्राह्मणान्न निन्देत्तद्व्रतम्।।२।।

देवतासु द्योतनप्रधानविबुधेषु वेदैता ज्ञाता अत्र क्तिन्प्रत्ययान्तत्वात् कृतिप्राप्ताया: अपि षष्ठ्या: न लोकाव्ययनिष्ठा खलर्थतृनाम् इति निषेधात् सामिति द्वितीयान्तं सलोकतां समानलोकत्वं सलोकताशब्द: सामीप्यस्योपलक्षणं सार्ष्ट्यं सरूपता गच्छति प्राप्नोति ब्राह्मणान् तप: श्रुतयोनि संपन्नत्वे सति विहितवैदिककर्मानुष्ठानान् द्विजान् न निन्देत न गर्हेत। ननु तर्हि कथं रावणादेर्निन्दा तस्यापि ब्राह्मणकुलप्रसूततत्वस्य रामायणादौ ज्ञापितत्वात् इति चेन्न दत्तोत्तरत्वेऽपि सुस्पष्टयते ब्राह्मणत्वे हि तप: श्रुत-योनय: कारणं तप: श्रुतयोनि संम्पन्नो हि ब्रह्मवेदानधीते इति ब्राह्मण: वेदानधीयमानोऽपि पूर्वोक्तगुणवर्जितत्वे ब्राह्मो न तु ब्राह्मण: ब्राह्मोऽजातौ ब्रह्मजात्यतिरिक्तस्य वेदध्येतृत्वेऽपि ब्राह्मसंज्ञा यथाकश्चन क्षत्रियो वेदानधीते चेत् ब्राह्मणो युधिष्ठिर: यदि चेत् ब्राह्मणकुल प्रसूतोऽपि वेदविरुद्धाचरणस्तदाऽसौ ब्रह्मराक्षस: सैव दशा रावणादीनामिमे पुलस्त्यकुलप्रसूता अपि वेदविरुद्धाचरणतया ब्रह्मराक्षसा: यथोक्तं प्राचेतसेन—

षडङ्गवेदविदुषां क्रतुप्रवरयाजिनाम् ।
शुश्राव ब्रह्मघोषांश्च विरात्रे ब्रह्मरक्षसाम् ।।

(वा. सु.)

यो वै ब्राह्मणो भवन्नपि पञ्चमकारसेवी वृषलीगामी स नैव पूर्णतया ब्राह्मण: किं बहुना त्रिदिवससंध्याविहीन: शूद्रवदेव सर्वस्माद्द्विजकर्मणो बहिष्कार्य: तथाप्राह मनु:—

नानुतिष्ठति य: पूर्वां नानुतिष्ठति य: परां ।
स शूद्रवद्बहिष्कार्य: सर्वस्माद्द्विजकर्मण: ।।

(मनुस्मृति)

गुणत्रयसमायुक्तान् सदाचाररतान् बुधान् ।
ब्राह्मणान् भगवद्भक्तान् न निन्देदिति तद्व्रतम् ।।

(वैष्णव शिक्षा. १.२५)

इति छान्दोग्योपनिषदि द्वितीयाध्याये विंशे खण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।

।। श्रीराघव: शन्तनोतु ।।

।। अथ एकविंशः खण्डः ।।

अथ सर्वविषयकसामोपासनामाह,

त्रयी विद्या हिंकारस्त्रय इमे लोकाः
प्रस्तावोऽग्निर्वायुरादित्यः स उद्गीथो ।
नक्षत्राणि वायाँसि मरीचयः स प्रतिहारः सर्पा गन्धर्वाः
पितरस्तन्निधनमेतत् साम सर्वस्मिन् प्रोतम् ।।१।।

अस्मिन् साम्ने त्रयी विद्या तिसृणां ऋग्यजु:सामख्यानां विद्यानां समाहारः त्रिविद्या एव त्रयीविद्यां प्रसऽदित्वात् स्वार्थेण्प्रत्ययः अत्राणन्तत्वेऽपि अजातिगणपठितत्वान्ननीप् स एव हिंकारः इमे भूर्भुवः स्वराख्याः त्रयः लोकाः प्रस्तावः एभिरेव जीवः परलोकाय प्रस्तूयते अग्निः वायुः आदित्यः सूर्यः इमे त्रयोऽपि श्रेष्ठत्वेनोद्गीथ एवमेव नक्षत्राणि वयांसि पक्षिणः प्रसिद्धहरणात् प्रतिहा संज्ञा एवमेव मणीनां निधीयमानत्वात् सर्पाः गानविद्याया आधारतया गन्धर्वाचित्रसेनादयः पितरः पिण्डक्रियाया निलयभूतत्वात् अर्यमादयः तन्निधनं तस्य साम्नः निधनं सर्वलोकेषु चतुर्दशसु भुवनेषु। यत्तु सर्पादीनां धकारसामान्यान्निधनत्वम् इति कैश्चिदुक्तं तत् प्रहेलिका प्रलपितमिव। सर्पशब्दे धकराभावात् तत्पर्यायवाचि विषधरफणधरादिधकारघटितशब्दघटकधकारस्य निधनघटकधकारसाम्येन साम्यं बलादालपति तन्न युक्तियुक्तं, पर्यायवाचिशब्देषु गौरवलाघवचर्या नाद्रियते शास्त्रकारैः इति पर्यायवाचिनां प्रामाण्योपेक्षणात्। किञ्च सर्पेषु कथञ्चित् प्रहेलिकापद्धत्या तत्पर्यायवाचिघटितसाम्यधिया निधनत्वं कथञ्चित् संगमयन्तु परन्तु पितर इत्यत्र तु नहि कोऽपि तत् पर्यायवाचिधकारघटितः तस्मात् सर्पादीनामिति प्राचीनोक्तशब्दोऽपि खपुष्पमिवार्थहीनः।

अथ त्रिभिर्मन्त्रैः सर्वविषयकसामोपासनायाः फलानि निर्दिशति—

स य एवमेतत्साम सर्वस्मिन्प्रोतं वेद सर्वँ ह भवति ।।२।।

यः सर्वविषयकसामोपासकः एतत् पूर्वोक्तं साम सर्वस्मिन् सकलजगति प्रोतं वेद उपासस्ते सः सर्वं भवति सः साधक सर्वं जगत् प्राप्तो भवति। अत्र प्राप्त इति शब्दोऽध्याहार्यः यत्तु सर्वमित्यस्य सर्वेश्वरः भवति इति प्राहुः तच्छ्रुतिविरुद्धं समधिकप्रलपितं नहि उपासक उपास्यो भवति कथञ्चित् ब्रह्मसाष्टर्यमेति यथा अत्रैव विंशे खण्डे **'देवतनाँ सलोकताँ सार्ष्टिताँ सायुज्यं गच्छति'** अत्र दर्शितासु चतुर्षु मुक्तिषु सामीप्यसालोक्यसायुज्यसार्ष्टियष्वपि नहि कुत्रचित् ब्रह्मीभावविधानम्। **जीवोऽपि नित्यः ब्रह्मापि नित्यं नित्यो नित्यानाम्** (कठ. १।३।१२) नहि नित्यः स्वसत्तां परिहर्तुं शक्नोति द्वावपि नित्यौ अविनाश्यसताकौ सत्ताविनाशमन्तरेण क्षुल्लको जीवः

कथं सर्वेश्वरो भविष्यति सरूपताप्राप्तौ नास्माकं विप्रतिपत्तिः परन्तु सरूपतानाम नाभिन्नता समानरूपतः सरूपता। समानता च भेदघटिता नाभेदसहिष्णुः तद्गतभूयो धर्मत्वे सति तदवच्छिन्नभेदवतिः समानता।

पुनः पूर्वकथितविषयवस्तु प्रशंसति,

तदेष श्लोको यानि पञ्चधा त्रीणि त्रीणि ।
तेभ्यो न ज्यायः परमन्यदस्ति ।।३।।

तत् तस्मादेव एषः श्लोकः अयं मन्त्रः वर्तते यत् यानि पुरा कथितानि त्रयो वेदाः त्रयो लोकाः अग्निवायुदिवाकराः तारकाविहगाश्च सर्पगन्धर्वपैतृकाः एभ्यः परम न किञ्चिद्वै प्रशस्यतरमीर्यते सर्वेषामत्र संकलनात् उपासीत हि पंच वै।

भूयः फलश्रुतिंप्रशंसति—

यस्तद्वेद स वेद सर्वं सर्वा दिशो बलिमस्मै ।
हरन्ति सर्वमस्मीत्युपासीत तद्व्रतं तद्व्रतम् ।।४।।

एवं रूपेण तत् साम वेद सः सर्वं वेद चराचरं जानाति। सर्वादिशः प्राच्यादि दिग्देवताः अस्मै सर्वज्ञाय बलिं भोग्यवस्तुजातं हरन्ति प्रापयन्ति सर्वं सर्वस्मै सर्वस्वरूपाय भगवते तदर्थभूतोऽहमस्मि इति इत्थं धारयन् उपासीत् निखिलजगन्नाथं रघुनाथं सेवेत तद्व्रतम्। सर्वविषयकसामोपासनाया इति शेषः।

इति छान्दोग्योपनिषदि द्वितीयाध्याये एकविंशे खण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।२१।।
।। श्रीराघवः शन्तनोतु ।।

।। द्वाविंशः खण्डः ।।

एकविंशातिखण्डं यावत् तत्सामोपासनं सविस्तरंवर्णितम् अथम् तस्य विविधफलकस्य नैकदैवतस्य साम्नः पारम्परामुच्चारणस्य शिक्षयितुं सकलोऽयमारभ्यते। स्वरतो वर्णतश्च दुष्टः शब्दः नैव श्रेयसे प्रभवति वज्रीभूय हिनस्ति यजमानं तथोक्तम्—

मन्त्रो दुष्टः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह ।
स वाग् वज्रं यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोपराधात् ।।

प्रतिस्वरस्य तत् तत् देवता ह्यधिष्ठात्र्यः तासां तत् तदुच्चारणमनाश्रित्यैव सामोच्चारणपरम्परा कस्याः देवतायाः कीदृगुच्चारणम् इदं सर्वं स्पष्टयितुमाह—

विनर्दिसाम्नो वृणे पशव्यमित्यग्नेरुद्गीथोऽनिरुक्तः प्रजापतेर्निरुक्तः सोमस्य मृदुः श्लक्ष्णं वायोः श्लक्ष्णं बलवदिन्द्रस्य क्रौंचं बृहस्पतेरपध्वान्तं वरुणस्य तान्सर्वानेवोपसेवेत वारुणं त्वेव वर्जयेत्।।१।।

यजमानेनैवं वक्तव्यं यत् अहं साम्नः सामवेदस्तवनस्य समुच्चारणे विनर्दि विशिष्टं नर्दयितुं तच्छीलं सुस्पष्टध्वन्यक्षरं स्वरस्वरूपं वृणे परमेश्वरं याचे अथवा वृणे इत्यस्य वृणीतेत्यर्थः व्यत्ययेन तस्य स्थाने इट् उद्गाता साम्नः विशेषनर्दनशीलस्वर-स्वरूपं वृणीत परमेश्वरं याचेत विधिलिङ्लकारप्रत्ययात् विधिरत्र स चात्यन्ता-प्राप्तिमूलकः। कीदृशाः स्वरा किं किं दैवतका इत्यत आह अग्नेः अग्नि दैवतकमग्नि उच्चारणस्वरस्वरूपं वा पशव्यं पशुभ्यो हितम् उकारान्तत्वात् यत् प्रत्ययः अग्नेः स्वरः अनिरुक्तः न निःशेषेण वक्तुं शक्य इति भावः प्रजापतेः कश्यपस्य स्वरः निरुक्तः निःशेषेण वक्तुमर्हः सोमस्य चन्द्रस्वरस्वरूपं श्लक्ष्णं कोमलविस्पष्टाक्षरं वायूच्चारण-परम्पराकं स्वरस्वरूपं तु श्लक्ष्णं सुस्पष्टाक्षरं कर्णसुखमिति भावः। इन्द्रस्य देवराजस्य बलवत् प्रशस्तबलयुक्तं वृहस्पतेः देवगुरोराङ्गिरसस्य क्रौञ्चं क्रौञ्चपक्षि स्वरसदृशं स्वस्वरूपं वरुणस्य जलाधिनाथस्य अपध्वान्तं स्खलिताक्षरं स्फटितदुन्दुभिः स्वरसदृशं एवं तान् अग्निप्रजापतिसोमेन्द्रबृहस्पतिस्वरान् सेवेत लब्धुंवृणीत परन्तु वरुणस्य अपध्वान्तत्वात् वर्जयेत् परिहरेत तदुच्चारणे पुण्यजनकता हानिसंभवात्।

अमृतत्वं देवेभ्य आगायानीत्यागायेत्स्वधां पितृभ्य आशां मनुष्येभ्यस्तृणोदकं पशुभ्यः।स्वर्गं लोकं यजमानायान्नमात्मन आगायानीत्येतानि मनसा ध्यायन्नप्रमत्तः स्तुवीत।।२।।

स्तवनकाले उद्गाता किं कुर्यात् इति निर्दिशति श्रुतिः देवेभ्यः सुरेभ्यः अथवा दैवीं सम्पदमुपासीनेभ्यः सात्विकेभ्यः प्राणिभ्यः अमृतं सुधामथवामृतं मरणं तदभावोऽमृतं अथवा अमृतं भगवद्भक्तिं यद्वा अं परब्रह्म वासुदेवसंज्ञं ऋतं सत्यात्मकमागायानि आदरेण गायन् उत्पादयानि अत्रेच्छार्थे लोट् इति इत्थं धारयन् आगयेत पितृभ्यः अर्यमादिनिजपूर्वपुरुषपर्यन्तेभ्यः स्वधां तत्तुष्टिहेतुभूतकव्यं मनुष्येभ्यः मनुपारम्परी मनुसरद्भ्यः आशां मनोभिलषितपदार्थान् अथवा अशमेवाशा तां आशाम्। जीवनोपभोगसामग्री यद्वा आशां मङ्लमयीं दिशामथवा आशां भगवद्दर्शनमनोरथरूपां पशुभ्य चतुष्पदेभ्यः तृणोदकं तदभक्ष्यम् उपलक्षणतया अन्येभ्योऽपि पक्षिपतंगकीटसरीसृपप्रभृतिप्राणिभ्यः तत्तज्जीवनोपयोगिसामग्रीम् आगायानि सामोद्गीथानि समादरेण गायन् प्रस्तुतीकरवाणि इति प्रकारेणानेन ध्यायन् चिन्तयन् सामानिस्तुवीत स्तोत्रविषयीकुर्वीत।

इदानीं स्वरादिवर्णानां दैवात्ममाह—

सर्वे स्वरा इन्द्रस्यात्मानः सर्व ऊष्माणः प्रजापतेरात्मानः सर्वे स्पर्शा मृत्योरात्मानस्तं । यदि स्वरेषूपालभेतेन्द्रँ् शरणं प्रपन्नोऽभूवं स त्वा प्रतिवक्ष्यतीत्येनं ब्रूयात् ।।३।।

सर्वे स्वरा अकारादयः इन्द्रस्य देवपतेः आत्मानः स्वरूपाः शरीराणि वा एवम् ऊष्माणः शल् प्रत्याहारीयाः प्रजापतेः कश्यपस्य आत्मानः स्वरूपभूताः स्पर्शा कादयोमाऽवसानाः मृत्योः निरितेः आत्मानः स्वरूपाः यदि कोऽपि स्वरेषु स्वरोच्चारणविषये तं सामगायकमुपालभेत् आक्षिपत् तदा उद्गाता इत्थं ब्रूयात् यत् इन्द्रमेव स्वरात्मानं शरणं प्रपन्नः शरणागतः अभूवमासम् स एव त्वां प्रति वक्ष्यति प्रत्युत्वरयिष्यति इति शब्दः वाक्यानुवादरूपः।

परिशेषमाह—

अथ यद्येनमूष्मसूपालभेत प्रजापतिँ् शरणं प्रपन्नोऽभूवं स त्वा प्रतिपेक्ष्यतीत्येनं ब्रूयादथ यद्येनस्पर्शेषूपालभेत मृत्युँ् शरणं प्रपन्नोऽभूवं स त्वा प्रतिधक्ष्यतीत्येनं ब्रूयात्।।४।।

अथ एनमुष्मषु उष्मविषयकोच्चारणे प्रजापतिं कश्यपं स्पर्शेषु वर्णपंचकोच्चारणे प्रतिधक्ष्यति निरपराधं यद्युपालभसे तदा मृत्युः त्वां भस्मासात् करिष्यतीति भावः।

स्वरोच्चारणे चिन्तनीयानिनि दिशति—

सर्वे स्वरा घोषवन्तो बलवन्तो वक्तव्याः इन्द्रे बलं ददानीति सर्वे उष्माणोऽग्रस्ता अनिरस्ता विवृताः । वक्तव्याः प्रजापतेरात्मानं परिददानीति सर्वे स्पर्शा लेशेनानभिनिहिता वक्तव्या मृत्योरात्मानं परिहराणीति ।।५।।

सर्वे स्वराः अकाराद्याः घोषवन्तः घोषः परश्रवणगोचरता नैव वैयाकरणसम्मताः प्रशस्तझंकारयुक्ता इत्यर्थः बलं प्राणनं तदवन्तः नैव शिथिलस्वासाः। इन्द्रे दवपतौ बलं आददानि निजबलं समर्पयाणि इति संकल्पयता वक्तव्या ऊष्माणः यकारादिहकार-पर्यन्ताः अग्रस्ताः नैव जिह्वया रुद्धाः इति भावः अनिरस्ताः नैव केनाप्यक्षरेणाभिभूताविरुताः विस्पष्टं रुतमुच्चारणध्वनिः येषां तथाभूताः आत्मानं स्वमेव प्रजापतेः कश्यपस्य स्वस्वत्वनिवर्तनाभावादत्र षष्ठी ददानि अर्पयाणि स्पर्शाकादयः लेशेन लेशः सम्बन्धे गन्धे च लेशेन वर्णान्तरसम्बन्धेन अनभिनिहिता असम्बद्धाः वक्तव्या आत्मानं स्वं मृत्योः परिहराणि मृत्योस्त्रायै इति चिन्तयन् सामस्वरोच्चारणं विदधीत इति हार्दम्।

इति छान्दोग्योपनिषदि द्वितीयाध्याये द्वाविंशे खण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।

।।श्रीराघवः शन्तनोतु।।

।। अथ त्रयोविंशः खण्डः ।।

अथ प्रथमाध्यायमारभ्य द्वितीयाध्यायस्य यावद्द्वाविंशखण्डं तत्तत् सामवायवेषु प्रतीकबुद्ध्या प्रणवोपासना निरूपिता। तत्रेयं विचिकित्सासम्भवा यत् किं सामावयवेष्वेव पारतन्त्रेण प्रणवोपासनं फलावहम् उतवा स्वातन्त्रेण फलं दातुं क्षमं किम्वैलक्षण्यमुभयोरिति चेत् ब्रूमहे। यदि सामावयवेषु प्रतीकतया प्रणवो विनियुज्येत तर्हि पतन्त्र्यस्ततया नैव तस्मिन्परमेश्वरता यदि च स्वातन्त्रेण तस्य परिकल्पना तदा किं रूपमुपासनमेतस्य इत्यत आह—

त्रयो धर्मस्कन्धा यज्ञोऽध्ययनं दानमिति प्रथमस्तप एव द्वितीयो ब्रह्मचार्याचार्यकुलवासी तृतीयोऽत्यन्तमात्मानमाचार्यकुलेऽवसादयन्सर्व एते पुण्यलोका भवन्ति ब्रह्मसँ्स्थोऽमृतत्वमेति।।१।।

प्रणवोपासनायाः सार्वभौमतां वदन्ती श्रुतिः त्रीन् धर्मस्कन्धान् वर्णयति धर्मस्य वेदप्रणहितकर्मजनितापूर्वविशेषस्य त्रयः स्कन्धाः प्रविभागाः शाखाः। प्रथमं निरूपयति यज्ञः पञ्चविधः ब्रह्मयज्ञान्तः अथवा द्रव्यतपोयोगस्वाध्यायज्ञानाख्यः पञ्चविधः। अध्ययनं आर्षवाङ्मयाभ्यासः दानं निष्कामभावनया सततं दीनेभ्यः यथाशक्ति स्वातिसर्जनं इति एव प्रथमस्कन्धः प्रारम्भिकीशाखा प्रारम्भिकत्वं चास्य बुद्धिविशुद्धरूपं एभिरेव बुद्धौ शुद्धायाम् प्राणी द्वितीयतृतीयाभ्याम् क्रमशः साधनासोपानं निस्तीर्य परमात्मभावाय प्रभवति तपः श्रीगीतोक्तं शरीरवाङ्मयमानसभेदम् सात्विकं कृच्छ्रसाध्यम् अयमेव द्वितीयधर्मस्कन्धः अनेन कनक इव तप्ते मनसि मरकतमणेरिव परमात्मनःस्फूर्तिः तपसा किल्विषं हन्ति इति निगमात्।

आचार्यकुलवासी आचार्यस्य कुले आश्रमे वस्तुतं-तच्छीलः ब्रह्मचारी वसुमैथुनवर्जितः ऊर्ध्वरेता धर्मस्य तृतीयस्कन्धः अनेन नाचिरात् ब्रह्मलब्धुं शक्यते कीदृशाचार्यः सः इत्यत आह यः खलु आचार्यकुले गुरुकुले देहं शरीरमत्यन्तं प्रकाममअवसादयन् सकलभोगवर्जिततया ग्लपयन् तत्रैव तिष्ठति प्रतीक्षमाणो ब्रह्मज्ञानभगवतस्वरूपसाक्षात्कारो हनुमानिव। एते सर्वे धर्मस्य प्रथमद्वितीयतृतीय-स्कन्धानुवर्तिनः यज्ञाध्ययनदानशीलतापसब्रह्मचारिणः पुण्यलोका पुण्यश्लोक-शिखामणयः अथवा पुण्यः पुण्यप्रापकः लोकः समालोकनं दर्शनमेषां तथाविद्या अथवा पुण्यानां लोकः समूहः एषु ते पुण्यलोकाः भवन्ति किन्तु ब्रह्मसंस्थः ब्रह्मणि श्रीरामख्ये परब्रह्मणि **''इति रामपदेनासौ परब्रह्माभिधीयते''** पूर्व रामतापनीयोपनिषद् इति श्रुतेः सन्तिष्ठते शरणागतीभूत्वा तिष्ठति यः सः ब्रह्मसंस्थः अमृत्वं मरणाभावं ब्रह्मसुखं वा श्रीवत्सलाञ्छनादि विहाय ब्रह्मगुणान् वा एति सामीप्यसालोक्यसाष्ट्र्य-सारूप्यादीनि गच्छति आशयो यं यत् सर्वेऽपि धर्मस्कन्धत्रितयपरायणापुण्यलोकाः

भवन्ति परन्तु ब्रह्मसंस्थ: भवन्नपि ब्रह्मसंस्थो अमृतत्वं यातीति विशेष: ब्रह्मसंस्था **धर्मस्कन्धत्रितयवर्तिसमाना:** यदुक्तं त्रयो धर्मस्कन्धा: गृहस्थवानप्रस्थब्रह्मचारिषु तात्पर्यग्राहका: ब्रह्मसंस्थपदं तु आश्रमतृतय विलक्षणपरिव्राजितात्पर्यमर्पयतीति तत्सर्वथा निजकल्पितसम्प्रदायपोषणैकलक्ष्यपक्षपातसन्निपातवशम्वदमलीमसमान-समलजनितकल्पाजल्पनविलसितमेव। वस्तुतस्त्वत्र मन्त्रे आश्रमधर्मनिरूपणं न विवक्षितम्। अन्यथा प्राथम्यानुरोधेन ब्रह्मचार्यधर्ममेव प्रथममवक्ष्यत् यश्चात्र तृतीयधर्मस्कन्धरूपेणो स्त: यद्याश्रमधर्मस्यादि तर्हि कथं— तावत् चतुर्थ: त्यक्त: स्यात् यदि चतुर्थाश्रमिष्वेव कस्यचिद् राजाज्ञा ब्रह्मसंस्थ: सर्वथा सुरक्षित: स्यात् तर्हि प्रथमाश्रमे हनुमदादौ द्वितीयाश्रमे श्रीदशरथजनकदौ तृतीयाश्रमसेविने श्रीवसिष्ठ-स्वायम्भुवमनुप्रभृति परमभागवतनिचये ब्रह्मसंस्थाप्रतिपादकानि श्रौतस्मार्त-पौराणिकवचांसि विच्छिन्नप्रामाण्यमूलानि कलितवैतथ्यशूलानि सतां प्रतिकूलान्येव वर्तेरन् तस्मात् य: कोऽपि ब्रह्मचारीगृहस्थो वानप्रस्थो विरक्त: संयासी वा भगवत्पदवद्मपरागरसपान पेशलपरमभागवतशिखामणि: अमृतत्वं भगवदीयं सुखमेति श्रुतेरिदं हार्दम्।।श्री:।।

यदुक्तं परिव्राडेव निरस्तमिथ्यात्वप्रतीतिर्भवति तदपि न जगन्निमथ्यात्वं हि ज्ञानेनावगम्यते ज्ञानं न केवले परिव्राजि इदं तुभगवत्कृपासाध्यम् बाल्यकालेव ध्रुवप्रह्लादनारदादौ ज्ञानसद्भावश्रवणात् ज्ञानं हि भक्तिलब्धं **'यस्य देवेभक्तिर्यथा देवे तथा गुरौ तस्यैते कथितांह्यर्था प्रकाशन्ते महात्मना:'** श्वे. उ. ६-२५ इति श्रुते: **'भक्त्यामामभिजानाति'** गी. १८.५५ इति स्मृते: आबालं हरिभक्ति: इति लोकवादाच्च न केवलं परिव्राजिभक्ति सा तु सर्वसामान्या बाल इव जरठसमवेता तत्रापि नारी हृदयेषु विशेषता नारीहृदयत्वञ्च त्रिलिङ्गसाधारणं तस्मात् शक्तिज्ञानमध्ये जननीजनकभावसम्बन्धनिश्चयात् यत्र यत्र भक्ति तत्र तत्र ज्ञानमिति राधान्त:। सकललक्षणसम्पन्नमातृसद्भावे पितरि चोपस्थिते शास्वतपौरुषे सुतजन्मप्रतिबन्धकम् किमपि कारणं पश्याम: तस्मात् शक्तिसद्भावे ज्ञानसद्भावस्य निश्चप्रचत्वात् भक्तेष्वपि सहजसुलभज्ञानं मह्यमना सकलकर्मबीजा विनाश: शोच्यएव। ब्रह्मणि ब्रह्मपदाभिधेये योगिध्येये सकलसाधकविज्ञेये श्री सीतारामे, संस्था शरणागतिरूपं सम्यक्स्थानं यस्य स ब्रह्मसंस्थ:, यस्यानन्यचेतस: परमात्मन्येव प्रपन्ने षड्विधा तथाभूत इति भाव:। अथवा ब्रह्मणीत्यत्र **'निमित्तात् कर्मयोगे'** इत्यनेन चर्मणिद्वीपिनमितिवत् निमित्तार्थे सप्तमी इत्थं ब्रह्मणि ब्रह्मनिमित्तं श्रीसीतारामचरण-कमलामलपरागमकरन्दपानाय सन्तिष्ठन्ति निखिलप्रपञ्चं दूरोज्झितं विधाय शारङ्गा इव स्वातिघनं परमेश्वरकृपाकादम्बिनीं प्रतीक्षमाणास्तिष्ठन्तीति ये तेषामेव वर्ग: समुज्झित चतुर्वर्ग: ब्रह्मसंस्थ:, स एव अमृतत्वम् अमृतरूपस्य परमात्मनो गुणविशेषं सौशील्यादिकम् एति यत्किञ्चिदंशतया

गच्छति प्राप्नोतीति श्रुतिसकलपदार्थ:। यदुक्तं परिव्राज एव ब्रह्मसंस्थत्वं तत्तु सम्प्रदायपक्षपातग्रस्ततया श्रुत्यर्तमिहत्यमविगणस्य जल्पितम्। परिव्राडेव निवृत्तनि:शेषकर्मा नैवैषा राजाज्ञा, कतमोऽपि चतुर्ष्वाश्रमेषु भगवति कर्माणि समर्प्य कर्मबन्धनमुक्तो भवति। बाल्य एव ध्रुवादौ, यौवन एव गणिकादौ तृतीये च ययात्यादौ चतुर्थे चाजामिलादौ पारिव्राज्याभावेऽपि महापुरुषपदपद्मपरागनिषेवया भवबन्धनमुक्ते: पुराणेषु बहुश: समाम्नातत्वात्। एवमेव ब्रह्मचर्ये हनुमदादौ गार्हस्थ्ये दशरथकौसल्यादौ वैखानसे सुतीक्ष्णादौ चापि ब्रह्मसंस्थत्वस्य तत्र तत्र श्रुतिस्मृतिपुराणादिषु दृष्टत्वात्।

यदुक्तं परिव्राड्व्यतिरिक्त: कश्चिन्नोपमर्दितभेदप्रत्ययतया न ब्रह्मसंस्थ: तदप्यलीकम् भेदप्रत्यय: परिव्राजैवोपमृद्यते नैवेतादृक् कश्चित् पारम्परीविशेष: भगवत् कृपानुभावो बालकोऽपि निरस्तभेदप्रत्ययो भवितुं शक्नोति। तद् यथा—

प्रहलाद:,

न्यस्तक्रीडनको बालो जडवत्तन्मनस्तया ।
कृष्णग्रहगृहीतात्मा न वेद जगदीदृशम् ।। (भागवत ७।४।३७)

किञ्च निरस्तभेदप्रत्यय एव मुच्यत इत्यपि वक्तुं न शक्यते, **भक्त्या विमुच्येन्नर:** (भागवत १२।१३।१८) इति स्मृते: । ननु **ज्ञानादेव हि कैवल्यम् ऋते ज्ञानान्न मुक्ति:** इत्यादि श्रुतीनां प्रामाण्यविरोधानुरोधेन स्वत: प्रमाणत्वाच्छ्रुति वचनस्य स्मृतेर्बलवत्तरत्वा-भिसन्देहे भक्त्या विमुच्येन्नर: इति स्मार्तवचनं ज्ञानहेतुकमुक्तिप्रतिपादकश्रौतवचनपूगेन बाध्येत? इति चेन्न, उत्सर्गापवादयो: समानदेश एव प्रवृत्तिनियमेन विषयभेदादिह तद्बाधकानवकाशात्। अथ कस्तावत् विषयभेद इहत्येव श्रौतस्मार्तवचनयोरितिचेच्छृणु, **ज्ञानादेव हि कैवल्यं ऋते ज्ञानान्न मुक्ति:** इत्यादि श्रुतिर्हि मुक्तिप्रतिपादनविषया **भक्त्याविमुच्येन्नर:** इति स्मार्तवचनं च विमुक्तिविषयकं तर्हि कोऽत्र भेदो मुक्तिविमुक्त्यो:? हन्त! एतावदपि न जानासि, विशिष्टामुक्ति: विमुक्ति: सा चात्यन्तिकीमुक्तिर्द्विधा क्रमिकमुक्तिसद्योमुक्तिश्च:, क्रमिकमुक्तिर्हि ज्ञानेन, तथा च **आत्मा वा अरे दृष्टव्य:** इत्यादि श्रुत्यनुशासनेन पूर्वं पश्वादिशरीराणि समतिक्रम्य प्राप्य च मानवशरीराणि तत्रापि च क्रमश: शूद्रवैश्यक्षत्रियशरीराण्यतिक्रम्य पुनरेत्यब्राह्मणदेहं तत्रापि शास्त्रनिर्दिष्टे वसुवर्षात्मके वयस्येव विहितोपनयन संस्कार:, व्रात्यादिदोषवर्जित: सावित्रंव्रतमास्थित: क्रमेणनैष्ठिकब्रह्मचर्यं बिभ्रत् सद्गुरो: सकाशात् प्राप्तब्रह्मोपदेश: सकलाविद्याप्रपञ्चं निरस्य ऐक्यप्रत्ययवान् मुच्यते एषैव क्रमिकमुक्ति:। सद्यो मुक्तिस्तु निरपेक्षसकलसाधना भगवत्कृपैकधना। असंस्कृतानामपि गजेन्द्राजामिलप्रभृतीनां

तत्प्राप्तिश्रवणात्। ज्ञानं च क्रमेण पञ्चकोषान् जरयति, भक्तिस्तु सद्य एवेति विशेषः। तथोक्तं श्रीकपिलेन श्रीभागवते—

अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसी ।
जरयत्याशु या कोशं निगीर्णमनलो यथा ।। (भागवत ३।२५।३३)

यदप्युक्तं परिव्राजो व्यतिरिक्तो भग्नभेदप्रत्ययोऽपि न कर्मभ्यो निवर्तते, इत्यपि नोचितं, तथात्वे ऐक्यप्रतिपादकश्रुतीनामेव त्वन्मतेऽपि प्रामाण्यानुपपत्तेः। महावाक्योपदेश-जनिताभेदमत्युपमर्दितभेदप्रतीतिर्हि मोक्षदायिनीति तव मतम्। मोक्षश्च कर्मबन्धनविलापनपुरःसरमैक्यभावनमिति त्वदीयो राद्धान्तः। भेदबुद्ध्यभाव एव कर्मबन्धनोपरमो वह्निसद्भावे दाहकत्वमिव। हन्त! तदेवापलप्यले? को नाम सुधीरग्नीन्धनसंयोगे दाहनक्रियां निरोद्धुमलं व्यतिरिच्य तावकीं कुमनीषाम्। मम मते तु भदेबुद्ध्यभावो नैव कर्मोपरमे हेतुः, प्रत्युत निजवर्णाश्रममर्यादानुकूलशास्त्रीयकर्मानुष्ठान-जनितापूर्वमेव कर्मबन्धनोपमर्दने कारणम्। यथोक्तं गोस्वामिचरणैः—

प्रथमहि विप्रचरन अति प्रीति ।
निज निज धरम निरत श्रुति नीति ।।
एहि कर फल पुनि विषय विरागा ।
तब ममधरम उपज अनुरागा ।। (मानस ३।१६।७)

यदप्युच्यते निवृत्तकर्मा परिव्राडेव ब्रह्मसंस्थः तदप्यसङ्गतम्। यस्मिन् कस्मिन्नप्याश्रमे यत्र क्वापि वावरणे यत्र क्वचिदपि शरीरे साधकः ब्रह्मसंस्थो भवितुं शक्नोति, अन्यथा तत्तत्पौराणिक परमभागवताख्यानानां प्रामाण्यं नोपपद्येत। तस्मात् ब्रह्मसंस्थम् इत्येतत् सर्वसामान्यम्। अत्रैवोपनिषदि तत्तत् गृहस्था राजानः ताँस्तान् परिप्राट्च्छिखामणीनपि ब्रह्मसमुपदिदिशुरिति तत्र तत्र प्रसङ्गेषु द्रष्टव्यम्।

मन्त्रार्थस्तु एतादृक्-यज्ञः स्वाध्यायः दानम् इति धर्मस्य प्रथमस्कन्धः, इयं धर्मस्य प्राथमिकी शाखा। अनन्तरं तपः इष्टप्राप्तये क्लेशसहनं द्वितीयः। अथ नैष्ठिकब्रह्मचर्यविधिना यः आत्मानम् आचार्यकुले ग्लपयन् जीवनपर्यन्तं यो वसुमैथुनवर्जितः ब्रह्मचारी स तृतीयः। अत्रेदमवगन्तव्यं यत् आश्रमयुजां गृहस्थानां पूर्वं यज्ञाध्ययनदानैः मलावरण विक्षेपनिरसनं द्वितीयकक्षायां तपः, किन्तु ये जीवनपर्यन्तं परमात्मप्राप्तये नैष्ठिकब्रह्मचर्यविधिना यतन्ते पूर्वोक्तविलक्षणोऽयं तृतीयधर्मस्कन्धः। एवं प्रवृत्तिलक्षणधर्मस्य द्वौ, निवृत्तिधर्मलक्षणस्य एकः, इमे

सर्वेऽपि पुण्यलोकं गच्छन्ति परन्तु च्यवन्ति पुण्यस्य क्षयशीलत्वात्। येषु कतमोऽपि धर्मस्कन्धवान् ब्रह्मचारी गृहस्थो वानप्रस्थश्चतुर्थोवा यदि ब्रह्मसंस्थः भगवति समर्पितस्वचतुष्टयः तदा अमृतत्वं परमात्मपदपङ्कजं प्राप्नोति। यदप्युक्तं तपोशब्दः नैव सन्यासिषु युज्यते तपसो कर्माङ्गत्वेन ततस्तेषां निवृत्तेर्विज्ञानात् तदपि नोचितम् श्रुतौ तपः शब्दस्य ज्ञानपरकतया कीर्तित्वात्। तथा च **यस्य ज्ञानमयं तपः** (मुण्डक १।१।९) तप आलोचने इत्यस्मान्निष्पन्नस्तपः शब्दः आलोचनपरोऽपि। यदि कोऽपि सन्यासी तपोव्यतिरिक्तस्तर्हि ब्रह्मचिन्तनबहिर्भूतत्वात् अलं तस्य सन्यासेन। यदपि ब्रह्मसंस्थशब्दः रूढतया प्रत्यपादि तदप्यनभिज्ञत्वं शब्दशास्त्रस्य, ब्रह्मणि संतिष्ठते इति ब्रह्मसंस्थः, इति व्युत्पत्तेः सर्वाश्रमिणाञ्च ब्रह्मसंस्थत्वे श्रुतावेव प्रामाण्यप्राचुर्यात्। वस्तुतस्तु सेवकसेव्यभावसम्बन्धेन परमेश्वरं श्रीसीताराममुपासीनः सुदृढीकृतदास्यभावो ब्रह्मसंस्थः इति विरम्यते।।श्रीः।।

अथ केन माध्यमेन साधको ब्रह्मणि संतिष्ठेत भजनस्य मुख्यसाधनभगवन्नाम सत्स्वप्यनेकेषु नामसु प्रणवस्य प्रामुख्यम् अतस्तदुत्पत्तिवर्णनमुपक्रमते—

प्रजापतिर्लोकानभ्यतपत्तेभ्योऽभितप्तेभ्यस्त्रयी विद्या संप्रास्रवत्तामभ्यतपत्तस्या अभितप्ताया एतान्यक्षराणि संप्रासवन्त भूर्भुवः स्वरिति ।।२।।

प्रजापतिः प्रजानां रक्षकः पिता कश्यपः लोकान् परमात्मनिर्मितानि चतुर्धशभुवनानि अभ्यतपत् समाधिना समालोचयत् अध्यायेदिति भावः। एवम् अभितप्तेभ्यः कश्यपध्यानविषयीभूतेभ्यः तेभ्यः लोकेभ्यः सकाशाद् त्रयीं विद्यामृग्यजुःसामनाम्नीम् अभ्यतपत् आलोचितवान्। पुनः तस्य अभितप्तायाः ध्यातायाः त्रयीतः भूः भुवः स्वः एतानि अक्षराणि व्याहृतिरूपाणि अभ्यतपत् ध्यानेनाधिगतवान्। सारांशोऽयं यल्लोकेषु त्रयीविद्या निगूढा तत् सारभूता तस्यां च भूर्भवः स्वः इति तिस्रो व्याहृतयो निहिताः एवं तेभ्यस्तां तस्या इमाश्च ध्यानेनैवाधिगतवान् कश्यपः इति श्रौतो भावः। अत्र प्रास्रवत् इत्यस्य प्रादुर्भूता प्रास्रवन्ति इत्यस्य प्रादुर्भूतानीति शब्दार्थोऽवगन्त्यः।।श्रीः।।

अथोङ्कारोत्पत्तिमाह—

तान्यश्यतपत्तेभ्योऽभिताप्तेभ्य ॐकारः संप्रास्रवत्तद्यथा शङ्कुना सर्वाणि पर्णानि संतृण्णान्येवमोङ्कारेण सर्वा वाक् संतृण्णोङ्कार एवेदꣳसर्वमोङ्कार एवेदꣳसर्वम् ।।३।।

तानि भूर्भुवः स्वः इति अक्षराणि अभ्यतपत् परमेणसमाधिना ध्यातवान्। तेभ्यः अभितप्तेभ्यः आलोचितेभ्यः व्याहृतिभूतेभ्यः ओङ्कारः ॐ इति प्रणवः प्रास्रवत्

साक्षात् कृतो भवत्। अनेन ॐकारेण सर्वं वाङ्मयं कथं व्यवस्थापितमिति वक्तुमुपमामाह— यथा शङ्कुना पर्णनसेन तद् व्यवस्थापकबन्धनतन्तुनेति भावः, सर्वाणि पर्णानि छदानि संतृणानि व्यवस्थापितानि तथैव इयं सर्वा वाक् ओङ्कारेण संतृण्णा व्याप्य संबद्धा, इदं सर्वं वाङ्मयम् ओङ्कार एव ओङ्काराधिकरणकमेव। ओङ्कार एव इत्यत्र ओङ्कारे एव इति पदच्छेदः आदरार्थाद्विरुक्तः।।श्रीः।।

इतिच्छान्दोग्योपनिषदि द्वितीयाध्याये त्रयोविंशखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।
।। श्रीराघवः शन्तनोतु ।।

।। अथ चतुर्विंशखण्डः ।।

एवं प्रणवस्य सामोपासनायाः प्रामुख्येनोपास्यत्वं परमेश्वर प्रतीकतां व्यवस्थाप्य प्रसङ्गतः सामसवनानि निरूपयति खण्डेऽस्मिन्।

ब्रह्मवादिनो वदन्ति यद्वसूनां प्रातःसवन ꣳ रुद्राणां। माध्यान्दिन ꣳ सवनमादित्यानां च विश्वेषां च देवानां तृतीयसवनम्।।१।।

ब्रह्म परमात्मानं वदन्ति निजमनोमन्दिरे स्थिरयन्ति तच्छीलाः इति ब्रह्मवादिनः। वसूनां द्रोणादीनां प्रातःसवनं रुद्राणां शंकरादीनां माध्यन्दिनं मध्याह्निकम्, आदित्यानां द्वादशानां विवस्वदादीनां विश्वेदेवानां च तृतीयं सायंकालिकम्। एवं त्रीण्यपि सवनानि यथाक्रमं देवविभागत्रयाधिष्ठितानि।।श्रीः।।

सवनज्ञानमाहात्म्यमाह—

क्व तर्हि यजमानस्य लोक इति स यस्तं न विद्यात्कथं कुर्यादथ विद्वान्कुर्यात् ।।२।।

एवं यदि त्रिषु सवनेषु वस्वादयः समधिश्रिताः तर्हि यजमानस्य यज्ञकर्तुः क्व लोकः कुत्रस्थानं प्रातःसवनं कुर्वन् वसुलोकं गच्छति, मध्याह्ने सिन्वन् रुद्रलोकं याति सायं सिन्वन् आदित्यान् विश्वेदेवांश्च प्राप्नोति। किन्तु एतज्ज्ञानस्य आवश्यकता स यः साधकः तं न विद्यात् स कथं कुर्यात् सवनं, यः विद्यात् जानाति स एव कुर्यात्। अत्र लडर्थे लिङ् सवनं ज्ञात्वैव कर्तव्यम् इत्युपदेशः।।श्रीः।।

अथ वसुदैवथसामगानं निर्दिशति—

पुरा प्रातरनुवाकस्योपाकरणाज्जघनेन । गार्हपत्यस्योदङ्मुख उपविश्य स वासवꣳसामाभिगायति ।।३।।

पुरा पूर्वं प्रातः अनुवाकस्य अनुच्चारणीयमन्त्रस्य जपयोग्यस्य प्रथममितिभावः उपक्रमणं प्रारंभः, तस्मात् पुरा प्रातरनुवाकस्य प्रारम्भात्पूर्वमिति भावः। गार्हपत्यस्य अग्नेः जघनेन पृष्ठतः आसीनः उदङ्मुखः उत्तराभिमुखः स वासवं वसुर्देवताभ्य इति वासवं **सास्यदेवता** इत्यनेन अण् प्रत्ययः। तेन सहितं सवासवं साम अभिगायति अभीष्टगानं करोति॥श्रीः॥

साममंत्रमाह—

लोकद्वारमवापा ३ र्ण ३ ३ पश्येम त्वा वयꣳरा ३ ३ ३ ३ ३ हु ३ म आ ३ ३ ज्या ३ यो ३ आ ३ २ १ १ १ इति॥४॥

हे अग्ने! त्वं लोकस्य भूर्लोकस्य द्वारं पन्थानम् अपावृणु अपावर्तय तेन वयं साधकाः राज्याय दीप्तये त्वा भवन्तं पश्येम। अथवा हे अग्ने! सर्वेषाम् अग्रे नीयमानराघवलोकस्य साकेतलोकस्य द्वारं पन्थानमपावृणु, अथवा द्वारं पिधानभूतं कपाटं मायानामकम् अपावृणु अपसारय येन राज्याय श्रीरामराज्याय स्वाराज्याय तव चरणकमलसामीप्यरूपाय परमपदाय त्वा भवन्तं साकेताधिपतिं सीताभिरामं श्रीरामं पश्येम नयनपथं नययेम॥श्रीः॥

अथ हवनप्रकारमाह—

अथ जुहोति नमोऽग्नये पृथिवीक्षिते लोकक्षिते लोकं मे । यजमानाय विन्दैष वे यजमानस्य लोक एतास्मि ॥५॥

अथ अनन्तरं सामगानं विधाय जुहोति हवनं कुर्यात्। जुहोतीति व्यत्ययेन जुह्वीत इत्यर्थे लट्। नमस्कार प्रकारमाह-अग्नये पावकाय तुभ्यं नमः नमस्करोमि नमोऽस्तु वा, अग्नेर्विशेषणद्वयं पृथिवीं क्षियति रक्षति इति पृथिवीक्षितः तस्मै पृथिवीक्षिते, लोकं क्षियति रक्षति इति लोकक्षितः तस्मै लोकक्षिते तादृशाय तुभ्यं नमः। मे यह्वं मजमानाय भवन्तमर्चयते लोकं दिव्यं साकेतलोकं विदं देहि। धातूनामनेकार्थत्वात् लाभार्थकस्यापि विद्लेर्दानार्थः। एष यजमानोऽहं तादृशे लोके एतास्मि गन्तास्मि॥श्रीः॥

इदानीं पूज्यपूजकयोः प्रतिक्रियां दर्शयति—

अत्र यजमानः परस्तादायुषः स्वाहापजहिपरिघमित्युक्त्वोत्तिष्ठतितस्मै। वसवः प्रातः सवनꣳ संप्रयच्छन्ति ॥६॥

अत्र अस्मिमल्लोके अहं यजमानः आयुषः आयुष्यस्य परस्तात् पश्चात् शरीरत्यगानन्तरमिति भावः। स्वाहा स्वस्य आसमन्तात् हानं त्यागः इति स्वाहा भगवते सर्वसमर्पणमिति भावः करिष्यामि इति शेषः। परिघं भजनप्रत्यवायम् अर्गलाम् अपजहि विनाशय इति इत्थम् उक्त्वा कथयित्वा तस्मै उत्तिष्ठति, पूजार्थमुत्थानं करोति, वसवः द्रोणादयः तस्मै प्रातःसवनं तत्फलं संप्रयच्छन्ति समर्पयन्ति।।श्रीः।।

अथ रुद्रसामगानं वर्णयति—

पुरा माध्यन्दिनस्य सवनस्योपाकरणाज्जघनेनाग्नी-
ध्रीयस्योदङ्भुख उपविश्य स रौद्रꣳसामाभिगायति।।७।।

दिनस्य मध्यं मध्यन्दिनं मध्यन्दिने भवं माध्यन्दिनं तस्य माध्यन्दिनस्य मध्याह्न संभवस्य सवनस्य उपाकरणात् प्रारंभात् पुरा आग्नीध्रीयस्य दक्षिणाग्नेः जघने पृष्ठेन उदङ्मुखः उत्तराभिमुखः उपविश्य सरुद्रं रुद्रदैवत सहितं साम अभिगायति गानविषयं करोति।।श्रीः।।

प्रार्थनाप्रकारमाह—

लो ३ क द्वारमपावा ३ र्णू ३ ३ पश्येम त्वा वयं वैरा ३ ३ ३ ३ ३
हु ३ म आ ३ ३ ज्या ३ यो ३ आ ३ २ १ १ १ इति।।८।।

हे वायो! लोकद्वारम् अन्तरिक्षलोकस्य द्वारम् अपावृणु, येन त्वां राज्याय पश्येम विलोकयेम। मन्त्रेऽस्मिन् वायुरूपेण भगवतः वर्णनं **त्वमेव प्रत्यक्षं ब्रह्मासि** (तै.उ. शिक्षावल्ली)।।श्रीः।।

अथ वायुरूपस्य भगवतो हवनविधानं प्राह—

अथ जुहोति नमो वायवेऽन्तरिक्षक्षिते लोकक्षिते लोकं मे।
यजमानाय विन्दैष वै यजमानस्य लोक एतास्मि।।९।।

अथ साम्ना प्रार्थनानन्तरम् अग्निं जुहोति, प्रार्थना प्रकारमाह—अन्तरिक्षक्षिते नभोलोकपालकाय लोकक्षिते लोकरक्षकाय ते तुभ्यं वायवे पवनदेवाय नमः प्रह्वीभावः मम इति शेषः। हे वायो! मे मह्यम् यजानाय लोकं विद प्रापय। अहं यजमानस्य लोके एतास्मि यातास्मि।।श्रीः।।

देवताफलदानप्रकामाह—

अत्र यजमानः परस्तादायुषः स्वाहापजहि परिधमित्युक्तवोत्तिष्ठति।
तस्मैरुद्रा माध्यान्दिनꣳ सवनꣳ सम्प्रयच्छन्ति।।१०।।

हवानन्तरं यजमानः किं करोति? इति विशिष्टि, अत्र अस्मिन्देवाराधने जीवनपर्यन्तम् अग्निहोत्रं विधाय आयुषः परस्तात् जीवनादनन्तरं वायवे वाक्यद्वयं निवेदयति। स्वाहा इति प्रथमं वाक्यम् अर्थात् हे वायो! यावज्जीवनं त्वं मया अनेकशः समिधाविधानेन यवतिलधान्यर्पिर्भि हुतः स्वाहाकारैः, अद्यत निजदेहं विसृजन् चत्वार्यपि स्वानि त्वयि समादरेण आजह्वाणो समाजुहोमि। किन्तु त्वमपि मत्कृते किमपि प्रत्युपकुरु। उपकाराकारमाह-परिधं भजनप्रत्यवायभूतां मोहमायाम् अर्गलाम्अपजहि अपकृष्टतया छिन्धि इति इदं वाक्यद्वयम् उक्त्वा कथयित्वा तस्मै वायुमनुकूलयितुं प्रसादयितुं वा उत्तिष्ठति आदरेण समुत्थितो भवति। रुद्रा उत्तिष्ठते तस्मै माध्यमन्दिनं मध्याह्नकालिकं सवनं संप्रयच्छति ददति।।श्रीः।।

भूयस्तार्तीयकसवनसामगानमाह—

पुरा तृतीयसवनस्योपाकरणाज्जघनेनाहवनीयस्योदङ्मुख उपविश्य स आदित्यꣳस वैश्वदेव सामाभिगायति ।।११।।

आदित्यैः सहवर्तमानं सादित्यं, रुद्रैः सह भूतं सरुद्रं विश्वेदेवैः सहितं सविश्वेदेवं शेषं पूर्ववत्।

अथ मन्त्रद्वयेन प्रार्थनाप्रकारं होमप्रकारं च निर्दिशति—

लो ३ कद्वारमपावा ३ र्णू ३ ३ पश्यम त्वा वयꣳस्वारा ३ ३ ३ ३ ३ हु ३ म् आ ३ ३ ज्या ३ यो ३ आ ३ २ १ १ १ इति।।१२।।

हे आदित्य! लोकस्य दिवलोकस्यद्वारं मायाच्छन्नं मार्गम् अपावृणु, मायाजवनिकाम् अपसार्य समुद्घाटय वयं साधकाः हुम भजनरवं कुर्वन्तः हुंकाराख्यं त्वां पश्येम। कथं स्वाराज्याय तव परम पदलाभाय।।श्रीः।।

अथवैश्वदेव प्रार्थनाप्रकारमाह—

आदियमथ वैश्वदेवं लो ३ कद्वारमपावा ३ र्णू ३ ३ पश्येम त्वा वयꣳसाम्रा ३ ३ ३ ३ ३ हु ३ म् आ ३ ३ यो ३ आ ३ २ १ १ १ इति।।१३।।

आदित्यमिति पूर्वान्वयि अथ अनन्तरं वैश्वदेवं विश्वेदेवा देवता अस्य इति वैश्वदेवं प्रार्थनं वर्ण्यते। हे विश्वेदेवाः। लोकस्य स्वर्ग लोकस्य द्वारम् अपावृणु व्यत्ययेन अपावृणुत अपसारयत इति बहुववचनस्पार्थे अपावृणु इति प्रयोगः। एवमेव वः इत्यस्य अर्थे त्वा इति एकवचनं प्रयुक्तं शेषं पूर्ववत्।।श्रीः।।

हवन प्रकारमाह—

अथ जुहोति नम आदित्येभ्यश्च विश्वेभ्यश्च देवेभ्यो ।
दिविक्षिद्भ्यो लोकक्षिद्भ्यो लोकं मे यजमानाय विन्दत ।।१४।।

अथ आदित्यान्विश्वेदेवाँश्च समुद्दिश्य जुहोति अग्नावाहुतिं प्रक्षिपति-आदित्येभ्यः विश्वे-देवेभ्यश्च दिविक्षिद्भ्य स्वर्गरक्षकेभ्यः नमः, मे यजमानाय लोकं दिवं विन्दत विन्दयत।।श्रीः।।

प्रार्थनाप्रकारमाह—

एष वै यजमानस्य लोक एतस्म्यत्र यजमानः परस्मा दायुषः स्वाहापहत परिधमित्युक्त्वोत्तिष्ठति।।१५।।

अपहत विनाशयत शेषं सरलम्।।श्रीः।।

देवतायाः फलदानप्रकारं फलश्रुत्याकारं च निरुपयति—

तस्मा आदित्याश्च विश्वे च देवास्तृतीयसवन ँसम्प्रयच्छन्त्येष ।
वै यज्ञस्य मात्रां वेद य ह एवं वेद य एवं वेद ।।१६।।

एवं प्रार्थयमानाय तस्मै आदित्याः विश्वेदेवाश्च तृतीयसवनं फलं संप्रयच्छन्ति संप्रददति। यः एवम् उक्तरीत्या सवनत्रितयं सदैवतं वेद जानाति सः यज्ञस्य मात्रां रहस्यं वेद द्विरुक्तिरादरार्था अध्यायसमारप्त्यर्था च इति।।श्रीः।।

इतिच्छान्दोग्योपनिषदि द्वितीयाध्याये चतुर्विंश खण्डः द्वितीयायश्चसंम्पूर्णः।

इति श्रीचित्रकूटनिवासि सर्वाम्नायश्रीतुलसीपीठाधीश्वर जगद्गुरुश्रीरामानन्दचार्य श्रीरामभद्राचार्यमहाराजकृतौ छान्दोग्योपनिषदि द्वितीयाध्याये श्रीराधवकृपाभाष्यंसंपूर्णम्।

श्रीराघवः शन्तनोतु।

।। श्रीराघवोविजयतेतराम् ।।

।। श्रीमते रामानन्दाचार्याय नमः ।।

तृतीयोध्यायः

प्रथमखण्डः

वन्देवन्दारुवृन्दानां मन्दार चरणाम्बुजम् ।
नीलपीतं महोब्रह्म सीतारामाभिधं नतः ।।

सम्बन्धभाष्यं श्री:-द्वितीयाध्याये तत्तत्प्रतीकच्छलेन सविस्तरं सामोपासनं तन्वतस्तु प्रणवमेव सर्वोपास्यत्वेन विनिश्चित्य यज्ञाङ्गभूतसाम्नां सरहस्यमुच्चारणविधिः यज्ञीयसाम्नां गानं तद्दैवतोत्थानम् इति सर्वं सविस्तरं प्रतिपादितम्। अनुपदमेव द्वितीयाध्याये चरममन्त्रे य एवं वेद स यज्ञमात्रां वेद इति श्रुतिः कण्ठरवेण यज्ञस्वरूपनिर्धारणं गेयत्वेन प्रत्यजानात्। अस्य यज्ञस्य प्रत्यक्षगोचरतया कर्माङ्गभूतः प्रमुखसाक्षी भगवान्सूर्यः अस्मिन्नस्तमिते नाहुतयो दीयन्ते नवा कानिचित् यज्ञकर्माणि अनुष्ठीयन्ते, तस्मात् यज्ञमात्राज्ञानात् प्राक् आदित्यज्ञानमपेक्षते। अतस्तत् विबोधयिषुः श्रुतिः **असौवा आदित्य** इति सूर्यमहिमानं वर्णयितुमुपक्रमते। हेत्वन्तरञ्च समस्तश्रुतिसारस्य सकलजगदाधारस्य श्री कौसल्याकुमारस्य जन्मापि सूर्यवंशे सकलभुवश्रेयसे तस्मात् सूर्यमंडलसंस्थस्य श्रीरामस्य महिमानुवर्णनात्पूर्वं सूर्यमहिमवर्णनमनुप्राप्तं तदर्थमयमारंभ असाविति।

ॐ असौ वा आदित्यो देवमधु तस्य द्यौ रेव ।
तिरश्चीनव ꣳ शोऽन्तरिक्षमपूपो मरीचयः पुत्राः।।१।।

ॐ इति परमात्मनो नाम अध्यात्मविद्याविशेषमधुविद्याप्रकरणमङ्गलार्थं प्रयुक्तम्। मधुरूपकविद्यया सूर्यं वर्णयन्ती श्रुतिरूपक्रमते, वा निश्चयेन असौ प्रत्यक्षं दृश्यमानः आदित्यः अदितिनन्दनसूर्यः, अथवा दितिः खण्डः स नास्ति यस्यां सा अदितिः, अखण्डा विराट्पुरुषदृष्टिः तस्यां भवः आदित्यः। सूर्यो हि विराट्चक्षुषः प्रादुर्बभूव **चक्षोः सूर्यो अजायत** इति श्रुतेः। स एव विराट्पुरुषचक्षुर्जन्मा वैराजः सूर्यः देवमधुः देवानां द्योतनप्रधानानां सुराणां मधु इव मोदनावहः। माद्यन्ति प्रहृष्टा भवन्ति येन तन्मधुः, हर्षार्थकमदिधातोः औणादिक उण् प्रत्यये दकारस्य च धकारे मध्विति निष्पाद्यते। तस्य दैवीसम्पदमुपासीनानां परमरसभूतस्य मधुन आदित्यस्य द्यौः स्वर्गलोक एव तिरश्चीनवंशः तिरश्चीनो वक्रः वंशः वेणुदण्डः कीचको वा यस्मिन्

मधुलम्बते। अन्तरिक्षम् आकाशमेव अपूपः वंशमाश्रित्य समवलम्बमानम् अपूपभक्षाकारं मधुच्छत्राकं क्षौद्रं यन्मक्षिका निर्मायन्ते भाषायां मधुछत्ता इति व्यवह्रियते। एवं तस्मिन् वर्तमाने मधुनीव अन्तरिक्षेऽवलम्बमाने सूर्ये ये मरीचयः किरणाः त एव पुत्राः त इव हितैषिणः लघुमाक्षिकाः।।श्रीः।। अथ रूपकपरिशिष्टमाह, मधुनिर्माणे कान्यन्यानि समुपकरणानि तान्यपि रूपकविधानेन दर्श्यन्ते—

तस्य ये प्राञ्चो रश्मयस्ता एवास्य प्राच्योमधुनाड्यः । ऋच एव मधुकृत ऋग्वेद एव पुष्पं ता अमृता आपस्ता वा एता ऋचः ।।२।।

एतमृग्वेदमभ्यतपꣳस्तस्याभितप्तस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्यꣳरसोऽजायत।।३।।

अर्थोऽयं मन्त्रद्वयान्वयी। तस्य सूर्यस्य ये प्राञ्चः पूर्वदिग्वर्तिनः पूजनीयाः रश्मयः किरणाः ता एवं मधुभूतस्यास्य प्राच्यः मधुनाड्यः पूर्वस्थाः मधुनालिकाः। ऋचः कर्मफलप्रतिपादिकाः ऋग्वेद श्रुतयः मधुकृत मधुकुर्वन्ति इति मधुकृतः मक्षिकास्थानाः एवम् ऋग्वेद एव पुष्पं यथा पुष्पेभ्यः रसं गृहीत्वा मधुनिर्मीयते तथैव ऋग्वेदात् सूर्यतत्वरूपरसं ग्रहीत्वा ऋचः कर्मफलदातृत्वेन मधुरूपं तमादित्यं मधुकरा इव प्रस्तुवन्त्यनुष्ठातुः पुरः। एवम् अमृताः अमृतमिवान्दवहाः फलक्रिया एव आपः मधुद्रवभूताः ताःऋचः कर्मप्रयुक्ताः ऋग्वेदम् अभ्यतपन् फलदानाय विवशमकुर्वन्। तदा तस्य अभितप्तस्य फलदानाय ध्यायमानस्य ऋग्वेदस्य सकाशादेव यशः, कीर्ति तेजः, शरीरकान्तिः इन्द्रियम्, चक्षुरादिषु भगवद्भजनप्रत्यवायनिरसनसामर्थ्यं वीर्यं षड्विकारजयसामर्थ्यं रसः, निरतिशयभजनानन्दरूपः अजायत वैदिकानुष्ठानादेव निरपद्रवभगवद्भजनरसो निष्पद्यते इति हार्दम्।।श्रीः।।

अथ रसपरिणामं व्याचष्टे—

तद्व्यक्षरत्तदादित्यमभितोऽश्रयत्तद्वा ।
एतद्यदेतदादित्यस्य रोहितꣳ रूपम् ।।४।।

तदेव वैदिकं रसरूप वस्तु व्यक्षरत् ऋग्वेदात् फलं सत् विशेषेणक्षरितं श्रुतं तत् अभितः लोकपरलोकमाध्यमेन सूर्यमेव आदित्यम् अश्रयत् आधारमकरोत्। यदेतत् फलरूपं वेदनिस्न्दभूतं तदेव सूर्यस्य रोहितम् अरुणं रूपम् यत् प्रातः सायं च स्पष्टं विलोक्यते।।श्रीः।।

इतिच्छान्दोग्योपनिषदि तृतीयाध्याये प्रथमखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।
श्रीराघवः शन्तनोतु

।। अथ द्वितीयखण्डः ।।

अस्मिन् आदित्यदक्षिणाकिरणरूपकवर्णनेन सूर्यस्य शुक्लरूपं वर्ण्यते।

अथ येऽस्य दक्षिणा रश्मयस्ता एवास्य दक्षिणा मधुनाड्यो ।
यजूꣳष्येव मधुकृतो यजुर्वेद एव पुष्पं ता अमृता आपः ।।१।।

सूर्यस्य दक्षिणा एव किरणाः दक्षिणमधुनाड्यः यजूंषि यजुर्वेदमन्त्राः अमृताः सोमरसभूताः दक्षिण हि किरणाः यजुर्वेदमया इत्यर्थः।।श्रीः।।

तानि वा एतानि यजूष्येतं यजुर्वेदमभ्यतपꣳस्तस्याभितप्तस्य
यशस्तेज इन्द्रियं वीर्यमन्नाद्यꣳ रसोऽजायत ।।२।।

तद्व्यक्षरत्तदादित्यमभितोऽश्रयन्तद्वा
एतद्यदेतदादित्यस्य शुक्लꣳरूपम् ।।३।।

उभयान्वयमिदम्, यजुर्वेदादेव यशस्तेजइन्द्रियसामर्थ्यात्मकं क्षरितं सूर्योऽङ्यकरोत् दक्षिणतस्तदेवास्य शुक्लं रूपं दृश्यमानमास्त इत्याशयः।।श्रीः।।

इतिच्छान्दोग्योपनिषदि तृतीयाध्याये द्वितीयखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।२।।

।। अथ तृतीय खण्डः ।।

अथ तृतीये खण्डे सूर्यस्य कृष्णरूपं निरूपयति—

अथ येऽस्य प्रत्यञ्चो रश्मयस्ता एवास्य प्रतीच्चो मधुनाड्यः ।
सामान्येव मधुकृतः सामवेद एव पुष्पं ता अमृता आपः ।।१।।

तानि वा एतानि सामान्येत ꣳ सामवेदमभ्यतपꣳस्तस्याभितप्तस्य ।
यशस्तेज इन्द्रियं वीर्यमन्नाद्यꣳरसोऽजायत ।।२।।

तद्व्यक्षरत्तदादित्यमभितोऽश्रयत्ताद्वा ।
एतद्यदेवदादित्यस्य कृष्णꣳरूपम् ।।३।।

सूर्यस्य रश्मयः प्रत्यक् मधुनाड्यस्तु पश्चिमाः। सामानि भ्रमरा पुष्पं सामवेदस्तथैव हि।

तस्य तप्तस्य यशइन्द्रियतेजोवीर्यरसं रविः। जगृहे कृष्णरूपं तत् खण्डार्थोऽयं समासतः।।श्रीः।।

इतिच्छान्दोग्योपनिषदि तृतीयाध्याये तृतीयखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।

।। अथ चतुर्थखण्डः ।।

अस्मिन् खण्डे सूर्यस्य परकृष्णरूपं निरूपयति—

अथ योऽस्योदञ्चो रश्मयस्ता एवास्योदीच्यो मधुनाड्योऽथर्वाङ्गिरस एव मधुकृत इतिहासपुराणं पुष्पं ता अमृता आपः ।।१।।

ते वा एतेऽर्वाङ्गिरस एतदितिहासपुराणमभ्यतप । स्तस्याभितापतस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्यरसोऽजायत ।।२।।

तद्व्यक्षस्तदादित्यमभितोऽश्रयत्तद्वा एतद्यदेतदादित्यस्य परं कृष्ण ँ रूपम् ।।३।।

उदीच्यो मधुनाड्यश्च उदीच्यो रविरश्मयः ।
अथर्वशीर्षो भ्रमरा सुमनांसि तथैव हि ।।
तस्य तप्तस्य यश आदि रसं तज्जगृह रविः।
परः कृष्णं हि तद् रूपं शकलोऽर्थोऽयमीरितः।।श्रीः।।

इतिच्छान्दोग्योपनिषदि तृतीयाध्याये चतुर्थ खण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।

।। अथ पञ्चम खण्डः ।।

पञ्चमखण्डे सूर्योस्योर्ध्वकिरणेषु मधुदृष्टिं निरूपयति—

अथ येऽस्योर्ध्वारश्मयस्ता एवास्योर्ध्वा मधुनाड्यो गुह्या । एवादेशा मधुकृतो ब्रह्मैव पुष्पं ता अमृता आपः ।।१।।

ते वा एते गुह्या आदेशा एतद्ब्रह्माभ्यतपँस्तस्याभितप्तस्य। यशस्तेज इन्द्रियं वीर्यमन्नाद्यँरसोऽजायत ।।२।।

तद्व्यक्षस्तदादित्यमभितोऽश्रयत्तद्वा । एतद्यदेतदादित्यस्य मध्ये क्षोभत इव ।।३।।

ते वा एते रसानाँरसा वेदा हि रसास्तेषामेते रसास्तानि । वा एतान्यमृतानामृतानि वेदाह्यमृतास्तेषामेतान्यमृतानि ।।४।।

गुह्या आदेशा श्रुतिनिहिताः साधकवेद्यतया गोपनीयाः औपनिषदाः ब्रह्मोपासनानिर्देशा एव गुह्या आदेशाः। इदमेव गीतायाम् **राजविद्या राजगुह्यम्** (गीता ९/२) इति व्याजहार भगवान् वासुदेवः। इमे एव भ्रमररूपाः। कस्माद् रसं गृह्णन्ति? इत्य आह, ब्रह्मैव पुष्पमिति ब्रह्म प्रणवः **ओमित्येकाक्षरं ब्रह्म** (कठ उप. १/२/१६) इति श्रुतेः। तदेव पुष्पम् ओंकारादेव पुष्परूपाद् औपनिषदा आदेशा ब्रह्मानन्दरूपं रसं गृह्णन्ति। तस्यैवाभितस्य यश आदि रसो जायते तदेव विक्षरितं सूर्यः समश्रयत तदेव सूर्यस्य मध्ये क्षोभमाणं श्रीसीतारामात्मकं चञ्चलन्महः पश्यन्ति साधकाः। अमृताः अमृतलोकदायिन्यः आपः इमे एव वेदरसानां रसाः सारभूताः भजनानन्दसिद्धान्ताः, इमानि एव अमृतानां क्षोभनानामपि फलानाम् अमृतानि फलानि शोभनतमानि, भक्तिर्हि समस्तसाधनानां फलभूता तथैवाह भगवान्नारदः, **फलरूपत्वात्** (नारद भ. सूत्र २/३) मानसकारोऽपि कथयति—

संजम नियम फूल फल ज्ञाना ।
हरिपद इति रस बेद बखाना ।।

(मानस (१।३७।१४)

इतिच्छान्दोग्योपनिषदि तृतीयाध्याये पञ्चमेखण्डे श्रीराघवकृपाभाष्यमं सम्पूर्णम्।।५।।

।। अथ षष्ठखण्डः ।।

प्रथमामृतोपभोगमहिमानं वर्णयति—

तद्यत्प्रथमममृतं तद्वसव उपजीवन्त्यग्निना मुखेन न वै देवा । अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति ।।१।।

तत् यत्प्रथम् अमृतम् ऋग्वेदतः समुपलब्धं प्रभातकालिकं सूर्यस्य रोहितं रूपं तदेव वसवः द्रोणादयः अग्निना मुखेन माध्यमेन सवनविधिना उपजीवन्ति उपभुञ्जते। किमश्नन्? इति शङ्कां निराचष्टे न वै इति देवाः अश्नन्ति नैव पिबन्त्यपि नहि ते अशनपिपासारहिता एतद् दृष्टैव चक्षुषा उपभुज्य तृप्यन्ति तृप्ता भवन्ति।।श्रीः।।

परिणाममाह—

त एतदेव रूपमभिसंविशन्त्येतस्माद्रूपादुद्यन्ति ।।२।।

ते वसव एतद् सूर्यस्य शुक्लं रूपम् अभिसंविशन्ति प्रविशन्ति, एतस्मादेव सूर्यस्य शुक्लरूपात् उद्यन्ति उपरि गच्छन्ति हविषां जिघृक्षवः।।श्रीः।।

रूपदर्शनफलमाह—

स य एतदेवममृतं वेद वशूनामेवैको भूत्वाग्निनैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति स एतदेव रूपमभिसंविशत्येतस्माद्रूपादुदेति ।।३।।

यः एवंवेद जानाति सः वसूनाम् एकः प्रधानः भूत्वा अग्निा अग्निमाध्यमेन एतदमृतं दृष्ट्वा तृप्यति देवसमानगुणत्वात् एतदेवरूपं प्रविशति, एतस्मादेव उदेति सूर्यमण्डलभेदसामर्थ्यो भवतीति भावः।।श्रीः।।

अग्रे फलमाह—

स यावदादित्यः पुरस्तादुदेता पश्चादस्तमता ।
वसूनामेव तावदाधिपत्यꣳ स्वाराज्यं पर्येता ।।४।।

सः एतदमृतरहस्यवेत्ता देवसमानगुणकः यावद् सूर्यः तावदेव तेन सह उदेता बालखिल्या इव सूर्येण सह उद्गन्ता पश्चाद् अस्तमेता वसूनां द्रोणादीनामाधिपत्यं साम्राज्यं स्वराज्यं परमं पदं च पर्येता परितो अत्र उदेता इत्यादिषु चतुर्षु अपि तृन् प्रत्ययान्तया नलोक इत्यादिना षष्ठीनिषेधः।।श्रीः।।

इतिच्छान्दोग्योपनिषदि तृतीयाध्याये षष्ठेखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।

।। अथ सप्तमखण्डः ।।

एवं रुद्राणां जीवनाश्रयभूतं द्वितीयामृतोपासनं खण्डेऽस्मिन् प्रस्तौति। अथेत्यादिना—

अथ यद् द्वितीयममृतं तद्रुद्रा उपजीवन्तीन्द्रेण मुखेन ।
न वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यति ।।१।।

अथ एतदनन्तरं यत् पूर्वोक्तं द्वितीयमणृतं मधुरूपं सूर्ये वर्तमानं माध्यन्दिन स्थं तत् रुद्राः शङ्करप्रमुखाः उपजीवन्ति आश्रित्य प्राणन्ति। किं कृत्वा, तत् अश्नन्तो पिबन्तो वा? यदि उभयं कुर्वन्तस्तर्हि तदस्थमानं पीयमानं वा कथं न क्षीयते?

निश्चयेन न अश्नन्ति न भुञ्जते, न पिबन्ति न वा द्रवतया पानविषयं कुर्वन्ति। कथमुपजीवन्ति तर्हि? तद् दृष्ट्वा चाक्षुषविषयं कृत्वा तृप्यन्ति तृप्तिं लभन्ते।।श्रीः।।

अग्र आह—

त एतदेव रूपमभिसंविशन्त्येतस्माद्रूपादुद्यन्ति ।।२।।

ते रुद्राः एतद् एव रूपं माध्यन्दिनम् अभिसंविशन्ति प्रविष्टा भवन्ति। यत्तु उदासीना भवन्तीति व्याख्यायते तत्तु शब्दशास्त्रमनालोच्यैव। एतस्मादेवरूपाद् एतद् सकाशादेव उद्यन्ति उदयं प्राप्नुवन्ति।।श्रीः।।

रूपज्ञानफलमाह—

स य एतदेवममृतं वेद
रुद्राणामेवैको भूत्वेन्द्रेणैव मुखेनैतदेवामृतं
दृष्ट्वा तृप्यति स एतदेव
रूपमभिसंविशत्येतस्माद्रूपादुदेति ।।३।।

एतद् रूपज्ञाता रुद्रसमानधर्मा भवतीति मन्त्रतात्पर्यम्। यः एतद्रूपं वेद सोऽपि रुद्रा इव इन्द्रमुखेन इन्द्रप्राधान्येन एतद्रूपमभिसंविशति प्रविशति, एतस्मादेव उदेति अभ्युदयं गच्छति। इत्यनेन ज्ञाने समानधर्मता वर्णिता न त्वेकरूपता।।श्रीः।।

अपरमपि फलमाह—

स यावदादित्यः पुरसतादुदेता
पश्चादस्तमेता द्विस्तावद् दक्षिणत
उदेतोत्तरतोऽस्तमेता रुद्राणामेव
तावदाधिपत्यꣳ स्वाराज्यं पर्येता ।।४।।

सः आदित्यः यावत्कालपर्यन्तं पुरस्तात् पूर्वदिशि उदेता उद्गच्छति, पश्चात् पश्चात् पश्चिमतश्च अस्तमेता अस्तं गच्छति, तावत् परिमाणकात् कालात् द्विः द्विगुणित कालपर्यन्तं दक्षिणतः उदेता दक्षिणदिग्विभागमाश्रित्य उद्गच्छति, उत्तरतश्च उदीच्यामेता अस्तं गच्छति। रुद्राणां मध्ये एकोभूत्वा प्रधानो भूत्वा स्वाराज्यं रुद्रानुशासनातिगामित्वं पर्येता परितः प्राप्नोति तृनन्तं सर्वम्।।श्रीः।।

इतिच्छान्दोग्योपनिषदि तृतीयाध्याये सप्तमखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।

।। अथाष्टमखण्डः ।।

अथादित्योपजीव्यं तृतीयममृतोपासनं वर्णयति—

अथ यत्तृतीयममृतं तदादित्या उपजीवन्ति वरुणेन मुखेन न वै देवा । अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति ।।१।।

अथ द्वितीयामृतोपासनानन्तरं तृतीयामृतोपासम् प्रस्तूयते। यत्तृतीयम् अपराह्णे सूर्यमण्डलस्थं तदेव आदित्यः विवस्वदादयः। शेषं पूर्ववत्।।श्रीः।।

त एतदेव रूपमभिसंविशन्त्येतस्माद्रूपादुद्यन्ति ।।२।।

ते आदित्याः एतदेव अपराह्णकालिकम्।।श्रीः।। एतद्रूपविज्ञानफलमाह—

स य एतदेवममृतं वेदादित्यानामेवैको भूत्वा वरुणेनैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति स एतदेव रूपमभिसंविशत्ये-तस्माद्रूपादुदेति ।।३।।

वरुणेन मुखेन मुखशब्दप्रधानवाची वरुणेन प्रधानीभूतेन द्वादशादित्येषु दशमेन सहेति तात्पर्यम्।।श्रीः।।

शेषं फलमाह—

स यावदादित्या दक्षिणत उदेतोत्तरतोऽस्तमेताद्विस्तावत् पश्चादुदेता । पुरस्तादस्तमेतादित्यानामेव तावदाधिपत्य ँ स्वाराज्यं पर्येता ।।४।।

एतदक्षरार्थः सरलः, भावार्थस्तु–आदित्यो यावदुकालं दक्षिणस्यामुदीयमानः पश्चिमायामस्तमेति ततो द्विगुणितकालपर्यन्तमयं पश्चिमायामुदीयमान उत्तरस्यामस्तमेति आदित्यानामपि स्वामित्वं स्वाराज्यं चाधिगच्छति।।श्रीः।।

इतिच्छान्दोग्योपनिषदि तृतीयाध्याये अष्टमखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।

।। अथ नवमखण्डः ।।

अथ नवमखण्डे मरुद्गणोपजीव्यस्य चतुर्थामृतस्योपासनं वर्णयति,

अथ यच्चतुर्थममृतं तन्मरुत उपजीवन्ति सोमेन मुखेन न वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति ।।१।।

अथ तृतीयामृतोपासनानन्तरम्, मरुतः ऊनपंचाशत् संख्याकाः दितिगर्भजाः पवनाधिष्ठातृदेवाः सोमेन चन्द्रेण मुखेन माध्यमेन।।श्रीः।।

त एतदेव रूपमभिसंविशन्त्येतस्माद्रूपादुद्यन्ति ।।२।।

ते मरुतः एतदेव अपराह्णोत्तरकालिकं रूपं सवितुरिति शेषः।।श्रीः।।

फलमाह मन्त्रद्वयेन—

स य एतदेवममृतं वेद
मरूतामेवैको भूत्वा सोमेनैव
मुखेनैतदेवामृतं दृष्ट्वा तृप्यति स
एतदेव रूपमभिसंविशत्येतस्माद्रूपादुदेति ।।३।।

स यावदादित्यः पश्चादुदेता
पुरस्तादस्तमेता द्विस्तावदुत्तरत उदेता
दक्षिणतोऽस्तमेता मरुतामेव
तावदाधिपत्यꣳ स्वाराज्य पर्येता ।।४।।

अक्षरार्थस्तु पूर्ववत्, भावार्थोऽयं यदेतद्रूपं विज्ञाय साधको मरुत्समधर्मा भवति यावत्कालम् आदित्यः पश्चिम उदीय पूर्वेऽस्तमेति ततो द्विगुणितकालमाश्रित्य साधकोऽयम् उत्तरत उदीय दक्षिणस्तोऽस्तमेति।।श्रीः।।

इतिच्छान्दोग्योपनिषदि तृतीयाध्याये नवमेखण्डे श्रीराघवकृपाभिष्यं सम्पूर्णम्।।

।। अथ दशमखण्डः ।।

इदानीं साध्योपजीव्यपञ्चमामृतोपासनं वर्णयति—

अथ यत्पञ्चमममृतं तत्साध्या
उपजीवन्ति ब्रह्मणा मुखेन न वै
देवा अश्नन्ति न पिबन्त्ये
तदेवामृतं दृष्ट्वा तृप्यन्ति ।।१।।

अथ चतुर्थामृतोपासनानन्तरं पञ्चमं प्रस्तूयते-इत्यथपदार्थः। ब्रह्मणा मुखेन हिरण्यगर्भेण माध्यमेन इत्थं मधुविद्याप्रकरणे सूर्यस्य पञ्चसु प्रातःकालिक मध्याह्नकालिका-पराह्णकालिकापराह्णोत्तरकालिकास्तगमनकालिकेषु अरुणशुक्लकृष्णकृष्णतरपरःकृष्णेषु रूपेषु पञ्चामृतानां वर्णनम्, तत्र प्रथमममृतं वसवः अग्निमाध्यमेन समुपजीवन्ति। द्वितीयं रुद्रा इन्द्रमाध्यमेन तृतीयमादित्याः वरुणमाध्यमेन, चतुर्थं मरुतः सोममाध्यमेन,

पञ्चमं साध्याः ब्रह्ममाध्यमेन यथाक्रमम् अमृतमुपजीवन्ति। अत्र पञ्चस्वपि खण्डेषु न वै देवा अशनन्ति न वा पिबन्ति तद् दृष्ट्वा तृप्यन्ति इति पञ्चकृत्वः श्रुत्यैव समभ्यस्तम्। इत्यनेन देवानां क्षुत्पिपासे निरस्ते। कथमथ तर्हि कर्मकाण्डिनः देवपूजने नैवेद्यं पानीयमिति उपकल्पयन्ति? तदुच्यते, तत्रैव दत्तोत्तरोऽयं प्रश्नः। तददृष्ट्वा तृप्यन्ति ययास्मदादयः प्रत्येकपदर्थं तत्तद्ग्राहकशक्तिमदिन्द्रियेण समास्वादयन्ति न तथा देवाः। नैवेद्यं ते चक्षुषैव गृह्णान्ति परन्तु देवाधिदेवः भगवान् भक्तभावनामनुगृह्णानो रामकृष्णादिमानवाकारो भक्तदत्तनैवेद्यम् अश्नाति जलं च पिबति। यथोक्तं गीतायाम्।

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ।।

(गीता ९।२६)

ननु विरुद्धेयं गीतोक्तिः श्रुतितः **न वै देवा अशनन्ति** इत्यादितः? इति चेन्न, तत्र प्रकरणे पञ्चानामेव वसुरुद्रादिदित्यमरुत्साध्याना चर्चा श्रवणात् परमात्मनश्च तेभ्यो बहिर्भूतत्वात् **सर्वाध्यक्ष** इत्यादिश्रुतेः। तत्र परतन्त्राणां चर्चा श्रवणेन अत्र भगवति तन्नियमाप्रसक्तेः। ते हि पावकेन्द्रवरुणसोमब्रह्मादयो दत्तानि माश्नन्तु मा पिबन्तु वा परन्तु मम भगवाँस्तु भक्तदत्तं पत्रपुष्फफलं जलं भुङ्क्त एवेति ब्रूमः। न च निर्मूलेयं पत्रं पुष्पम् इत्यादि स्मृतिरिति वाच्यम्? **सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा पिपश्चिताः** (तैत्तरीय ब्रह्मा. १) इति श्रुतौ। तन्मूलप्रामाण्यप्रधर्शनेनोक्तभ्रमनिराकरण मितिदिक्।।श्रीः।।

तेसाध्याः एतदेव सूर्यास्तमनकालिकमेव फलमाह मन्त्रद्वयेन—

य एतदेव रूपमभिसंविशन्त्येतस्माद्रूपादुद्यन्ति।।२।।

स य एतदेवममृतं वेद
साध्यानामेवैको भूत्वा ब्रह्मणैव
मुखेनैतदेवामृतं दृष्ट्वा तृप्यति स
एतदेव रूपमभिसंविशत्येतस्माद्रूपादुदेति।।३।।

ब्रह्मणामुखेन हिरण्यगर्भेण माध्यमेन शेषं पूर्ववत्।।श्रीः।।

परिशेषमाह—

स यावदादित्य उत्तरत् उदेता दक्षिणतोस्तमेताद्विस्तावदूर्ध्व उदेतार्वाङ्स्तमेता साध्यानामेव तावदाधिपत्य ॅ स्वाराज्यं पर्येता।।४।।

आदित्य: सूर्य: स: श्रुतिप्रसिद्ध: यावत्काल परिणामम् उत्तरत: उदीच्या: दक्षिणत: दक्षिणस्याम् अत्रसर्वत्र सार्वविभक्तिकस्तसि:। ततो द्वि: द्विगुणीकृत्यकालम् ऊर्ध्वम् उपरि उदेता अर्वाङ् नीचै: पातालादौ अस्तमेता अस्तङ्गमनशीलो भवति उदेता अस्तमेता पर्येता इति प्रयुक्तेषु त्रिषुताच्छील्ये तृनन्तता। यद्यपि सूर्य: सर्वेषामपिपूर्वत: उदेति पश्चिमतश्चास्तमेति वस्तुत: तथापि दक्षिणादि दिक्तस्तु सूर्यो निरन्तरं चलति तस्योदयास्तमयत्वंतु प्राणिनां चक्षुर्ग्रहणाग्रहण विपरिणमनरूपमितिगेयम्।।श्री:।।

इतिच्छान्दोग्योपनिषदि तृतीयाध्याये दशम:खण्डे श्रीराघवकृपाभाष्यं संपूर्णम्।।

।। अथैकादश: खण्ड: ।।

एवं यावत् पुण्यसाधकोऽयं यथाक्रमं वसुरुद्रादित्यं मरूत् साध्य श्रेणीमभिक्रमाण: सूर्यसमानधर्मा पुरस्तात् पश्यति दक्षिणत: उत्तरत: ऊर्ध्वं चोद्गच्छति विपर्यये चास्तमेति परन्तु **कर्मचितोहि लोक: क्षीयते** इति श्रुते:। क्षयिष्णुतया पुण्यचितलोकानां क्षयवत्सु शुभाशुभेषु, सूर्य: क्वचिदपि नैवोदयारत्तमयौ कुरुते तेन समानधर्मतया साधकोऽपि तथैव तिष्ठति अत आह—

अत तव ऊर्ध्व उदेत्य नैवोदेता नास्तमेततैकल
एव मध्ये स्थाता तदेष श्लोक: ।।१।।

अथ प्राणिनामुपरिनिजकृपारश्मिभिर्दिव्यमनुग्रहं विधाय अयं सूर्य: तत: तस्मात् वसुरुद्रादित्यमरुत्साध्येभ्य: मध्वमृतवितरणादनन्तरम् ऊर्ध्व सर्वेभ्य: ऊपरि उदेत्य उदितो भूत्वा भगवान् भास्कर:, वस्तुत: भूय: नैवोदेति नैवोद्गच्छति, उदयो हि तदनुग्रह: अनुग्राह्याश्च प्राणिन: तत्सत्ता च भोगधीना। तेषु निमित्तभूतेषु क्षीणेषुं नैमित्तिकस्यापि प्राणिजातस्या सद्भावे तदानर्थक्यात्। एवं यद्युदयो नहि तर्ह्यस्तमनस्य का चर्चा? उदितो ह्यस्तो भवति यर्हि नोदितेति तर्हि नास्तमेति। एवमुदयास्तमेव वर्णित: सन् किं करोत्यादित्य इत्यपेक्षमाणं प्रत्याह— अयं न उदेता नोद्गमनशील: नास्तमेता अनस्तमयशील: सन् मध्ये अपरिच्छिन्ने परमे व्योमनि परमात्मनि निजस्वरूपे ब्रह्मचिन्तने ताटस्थभावे वा स्थाता तिष्ठति तच्छील:, ताच्छील्यतृनन्तत्वं हि तत्स्वभाव व्यक्तीकरणार्थम्।।श्री:।।

एतद् प्रतिपादनार्थं तत: तस्मादेव हेतो: एष: अयं श्लोक: तद्गुणगणस्तवनरूपो मन्त्र:। मन्त्राकारमाह—

न वै तत्र न निम्लोच नोदियाय कदाचन ।
देवास्तेनाहꣳ सत्येन मा विराधिषि ब्रह्मणेति।।२।।

कश्चन समधिकृतब्रह्मसाक्षात्कार: देवानां समक्षं सत्येन प्रतिजानान: प्राह— हे देवा:, द्योतनशीला:! भगवत्स्तवनशीला: वा भगवद्भजनसुधया मोदमाना वा भगवद्भक्तिरोचिषा कान्तिमन्तो वा देवा: प्रतियन्तु। प्रतीते: किं प्रमाणमित्यत आह— अहं कृतपरमेश्वरसाक्षात्कार: तेन तच्छब्दवाच्येन सत्येन सत्स्वरूपेण त्रिकालाबाध्य-परमार्थरूपेण वा परमेश्वरेण शपित्वा ब्रवीमि। अथवा सतां हितेन सत्येन शपित्वा ब्रवीमि। यद्यहम सत्यं ब्रूयां तर्हि ब्रह्मणा तेन परमेश्वरेण सह मा विरोधिषि मा आविराधिषि अविरुद्धो न भवेयम्। अर्थात् विरुद्धो भूत्वा तत्कृपापात्रतां न ब्रजेयम्। अतोऽहं सत्यं कथयामि विश्वस्यतां भूतार्थवादाकारमाह, तत्र परेश्वरे परमेश्वरलोके साकेते वा अयं सूर्य: कदाचन कस्मिंश्चिदपि काले न निम्लोचं नास्तमगच्छत कदाचन च नोदियाय नोदितो बभूव। तात्पर्यमेतद् यत्, तत्र चेत् वैराजः सूर्योऽभविष्यत् तदायमुदयास्तमयतामगमिष्यत्। तत्र तु परमप्रकाशरूपो भगवत्तेजोराशिरेव लोकोत्तर-सूर्यधर्मतां भजमानो भजनरसिककोककोकनदनिकुरम्बकाणि समुद्भासयति। यथोक्तं कठोपनिषदि, **न तत्र सूर्यो भाति न चन्द्रतारकम्। नेमा विद्युतो भान्ति कुतोऽयमग्निः** (कठ. १-३-१३) गीतायामपि प्राह भगवान्—

न तद्भासयत्ते सूर्यो न शशांको न पावकः ।
यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ।।

(गीता १५-६)

एवं सततमखण्डज्योतिषि तस्मिन् विशुद्धबोधघने परमव्योमभूते श्रीसीतारामनिकेते साकेते किमनेन वैराजसूर्योदयास्तभावेन।।श्री:।।

एवमेकादशखण्डेषु सूर्यायत्तमधुविद्यां निरूप्य तदुपदेशपात्रतां निरूपयति, तदेवार्थं द्रढयति—

न ह वा अस्मा उदेति न निम्लोचति सकृद्दिवा ।
हैवास्मै भवति य एतामेवं ब्रह्मोपनिषदं वेद ।।३।।

य:, कश्चन मधुविद्यासम्प्रदायत: एवं पूर्वोक्तप्रकारेण एतम् एकादशखण्डैर्निरूपितां ब्रह्मोपनिषदं, ब्रह्मप्रापिका उपनिषद् ब्रह्मोपनिषद् तां, ब्रह्मोपनिषदं वेद जानाति समुपास्ते च ह वा निश्चयवाचकौ निपातौ सुनिश्चितमेतदिति भाव:।

अस्मै भगवत्सन्निकृष्टाय साधकाय तादर्थेऽत्र चतुर्थी। सूर्यः न वा उदेति न वा निम्लोचति अर्थात् तत्कृतेऽपि निरस्तोदयास्तमयभावः। कोटिसूर्यसम प्रभो भगवान् श्रीसीताराम एव सततं प्रकाशते।।श्रीः।।

इदानीं मधुविधासम्प्रदायपरम्परामाह—

तद्धैतद्ब्रह्मा प्रजापतय उवाच प्रजापतिर्मनवे मनुः प्रजाभ्यसतद्धैतदुद्दालकायारुणये ज्येष्ठाय पुत्राय पिता ब्रह्म प्रोवाच ।।४।।

ब्रह्मा तत् मधुविद्यारहस्यं परमेश्वरात् प्राप्य प्रजापतये निजपौत्राय कश्यपाय उवाच। प्रजापत्तिः कश्यपः मनवे निजपौत्राय वैवस्वताय स च मनुः प्रजाभ्यः इति परम्पराक्रमः तासु अरुणः पिता निज पुत्राय उद्दालकाय उवाच।।श्रीः।।

इदं वाव तज्ज्येष्ठाय पुत्राय पिता
ब्रह्म प्रब्रूयात् प्रणाय्याय वान्तेवासिने ।।५।।

वाव इति निश्चार्थो निपातः। तत् वैदिक वाङ्मयव्याप्तं प्रसिद्धमिदम् अनुपदमेव प्रोक्तम्। भगवद् विरुद्ध कामस्य दं खण्डकं ब्रह्म मधुविद्यानिरूपकं वेदराशिं पिता ज्येष्ठाय पुत्राय प्रथमसूनवे प्रब्रूयात् प्रकृष्टतया, समुपदिशेत् गृही सन्। विरक्तश्चेत् प्रणम्याय निजचरितप्रणताय अन्तेवासिने सेवारताय शिष्याय प्रब्रूयात् इति योज्यम्।।श्रीः।।

इतरस्या उपदेशो निषिध्यते—

नान्यस्मै कस्मैचन यद्यप्यस्मा इमामद्भिः परिगृहीतां धनस्य पूर्णां दधादेतदेव ततो भूय इत्येतदेव ततो भूय इति ।।६।।

गृहस्थः ज्येष्ठपुत्रात् अन्यस्मै, विरक्तः प्रणतशिष्यात् अन्यस्मै कस्मैचन इमां मधुविद्यां न दधात्। कदाचित् धनलोभसमापतेत्, तत्प्रतिषेधमाह-ज्येष्ठ पुत्रशिष्यव्यतिरिक्तः कोऽपि मधुविद्याजिघृक्षुः अस्मै मधुविद्यारस्यज्ञाय यद्यपि अद्भिः परिगृहीतां जलोपलक्षित- समुद्रमेखलां धनस्य पूर्णाम् धनधाम्यसम्पन्नाम् इमां पृथ्वीम् अपि दधात्, समुद्रमेखलायाः पृथिव्या अपि लोभेन प्रलोभितो भूत्वा न दद्यादिति हार्दम्। हेतुमाह, यतो हि ततः समुद्रमेखला पृथिवीतोऽपि एतद्देवमधुविद्यारहस्यमेव भूयः अधिकगुणवत्तरम् आदरार्था द्विरुक्तिः।।श्रीः।।

इतिच्छान्दोग्योपनिषदि तृतीयाध्याये एकादशखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।

अथ द्वादशखण्डः

अथ निरतिशयफला ब्रह्मविद्या प्रकारान्तरैरपि प्रतिपादनीयेति गायत्रीदृष्ट्या सा निरूप्यते।

छन्दसांप्रथमत्वाच्च सोमाहरणतस्तथा।
इतराक्षरेषु व्याप्तत्वात् गानात् त्राणात् च देहिनः।।
जननीत्वाच्चमन्त्राणां द्विजानां पूज्यभाक्तया।
द्वारत्वात् ब्रह्मविद्यायाः विभूतित्वाद्गदाभृतः।।
अन्वितत्वाच्च वेदेषु पुण्यातिशयकारणात्।
तन्मयत्वात् भगवतो निरूप्या प्रथमं हि सा।।

गायत्री वा इदꣳ सर्वंभूतं यदिदं किं च वाग्वै।
गायत्री वाग्वा इदꣳ सर्वं भूतं गायति च त्रायते च ।।१।।

वै इदम् इति पदच्छेदः। यलोपस्वरसन्धिः, वै निश्चयेन इदं दृश्यमानं यत्किचित् चराचरं भूतं सत्तामयं प्रपञ्चजातं तत् सर्वं गायत्री गायत्र्याः संभूतं **सुपां सुलुक्** इत्यनेन ङसेः पूर्वसवर्णदीर्घः। समस्तं जगदिदं ब्रह्मभूतायाः गायत्र्याः संभूतमितितात्पर्यम्। ननु गायत्र्याः ब्रह्मभूतत्वे किं प्रमाणम्? इत्युच्यते **गायत्री छन्दसामहं** (गीता. १७-३५)

कथमिदं गायत्रीमयमिति शंकां समादधाना श्रुतिः प्राह-वाक् गायत्री तस्या वाग्रूपत्वात् अथवा वागिति लुप्तपञ्चमीकं पदं, यतोहि चराचरमिदं वाचोविकारभूतमेव यथोक्तं हरिणा बाक्यपदीये—

अनादिनिधनं ब्रह्म शब्दतत्वं यदक्षरं।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः।।

(वाक्य ब्र. काण्ड-१)

वा एवं वाङ्मयत्वात् तस्याः जगतश्च वाक्प्रसूतत्वात् तदभिन्नाभिन्नस्य तदभिन्नत्व नियमः इति सिद्धान्तानुरोधेन गायत्र्यभिन्नवागभिन्नजगतो गायत्र्यभिन्नत्वं सुसिद्धम्। अत आह— वाग्वा इदं सर्वं वाचः वै इदं सर्वं भूतम् इति पदार्थः व्युत्पत्तिमाह— गायति च त्रायते च, परमात्मानं गायति स्तौति तं गायन्तं जीवं त्रायते रक्षति भवभीतेः। अत्र चकारद्वयप्रयोगात् व्युत्पत्तियुगलमपरमपि ध्वन्यते। तथा च गायन्तं त्रायते इति गायत्री गीयते इति गायः गायः परमात्मा स त्रायते यया स्मर्यमाणो जीवान् सा गायत्री।।श्रीः।।

अथ गायत्रीपृथिव्योरभेदमाह—

या वै सा गायत्रीयं वावा सा येयं पृथिव्यस्याꣳहीदꣳ ।
सर्वं भूतं प्रतिष्ठितमेतामेव नातिशीयते ।।२।।

वै निश्चयेन सा ब्रह्मविद्यया अभिन्ना या पूर्वोक्ता वाव निश्चयत: सा इयं गायत्री शब्दरूपा या इयं शब्दात्मिका सैव पृथिवी, अस्यां पृथिव्याम् इदं सर्वं दृश्यमानं प्राणिजातं प्रतिष्ठितम्। यथा वाङ्मयत्वात् पृथिव्या: वाण्या: संबन्ध: तथैव गायत्र्या अपि प्रत्येक- व्यवहार: घटपटात्मक: शब्दानुगमनिरपेक्षो न भवति। यथोक्तं भर्तृहरिणा—

न सोऽस्ति प्रत्ययो लोके य: शब्दानुगमादृते।
अनुविद्धभिवज्ञानं सर्वं शब्देनभासते।।

(वाक्यपदी १-९६)

वस्तुतस्तु पृथिव्यामपि वाचि इव गानत्राणसंबन्धानुरोधेन गायत्र्यास्तन्मयत्वेऽभ्युपगतेऽपि वैयाकरणरीत्या जगत्या: वाङ्मयत्वेन तदभिन्नगायत्र्या अपि जगन्मयत्वं सुवचमेव।।श्री:।।

पृथिवीशरीरयोरभेदमाह—

या वै सा पृथिवीयं वाव सा यदिमस्मिन्पुरुषे
शरीरमस्मिन्हीमे प्राणा: प्रतिष्ठिता एतदेव नातिशीयन्ते ।।३।।

वै निश्चयेन या पूर्वोक्ता सा गायत्र्यभिन्ना इयं पृथिवी एषैव पुरुषे, अत्रौपश्लेषिकी सप्तमी पुरुषे शरीरमित्यस्य पुरि शयनशीलपुरुषसंज्ञकजीवात्मानमुपश्लिष्टमित्यर्थ:। तस्मिन्नेव शरीरे हि इमे प्राणा: प्रतिष्ठिता: व्यवस्थयाविराजिता: अतो नातिशीयन्ते नातिक्रामन्ति इति भाव:। निष्कृष्टन्तु गायत्र्यभिन्ना वाक् वागभिन्ना पृथिवी पृथिव्यभिन्नं पुरुषशरीरं तदभिन्नाश्च प्राणा: इत्यभेददर्शनेन संबन्धनिबन्धनेन गायत्र्यैव ब्रह्मोपासितव्यम्।।श्री:।।

शरीरहृदययोरभेदमाह—

यद्वै तत्परुषे शरीरमिदं वाव तद्यदिदमस्मिन्नन्त: पुरुषे
हृदयमस्मिन्हीमे प्राणा: प्रतिष्ठिता एतदेव नातिशीयन्ते ।।४।।

निश्चयेन पुरुषे यत् शरीरम् इदमेव इदमभिन्नं पुरुषस्य अन्त:वर्तमानं हृदयम् अन्त: करणं हृदयाकाशो वा अस्मिन्नेव प्राणा: प्रतिष्ठिता: नातिक्रामन्ति।।श्री:।।

तदभेदमाह—

सैषा चतुष्पदा षड्विधा गायत्री तदेतदृचाभ्यनूक्तम् ।।५।।

सा एषा ब्रह्मरूपिणी गायत्री चतुष्पदा चत्वारि वाक्पृथिवीशरीरहृदयाख्यानि यस्याः सा चतुश्चरणात्मिका, वा अथवा चतुर्व्यूहं ब्रह्म चतुष्पादविभूतिमयं वा ब्रह्म पद्यते गच्छति या सा चतुष्पदा एव षड्विधा वाक्भूतपृथिवीशरीरहृदयप्राणरूपा तदेव ऋचा ऋक्विशेषेण मन्त्रेण अभ्यनूक्तम् अभीष्टमनुत्तमुक्तम्।।श्रीः।।

ऋचमनुवदति—

तावानस्य महिमा ततो ज्यायाँश्च पुरुषः ।
पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवीति ।।६।।

अस्य परमव्यापिनः परमेश्वरस्य ब्रह्मणः महिमा ऐश्वर्यं तावान् जाग्रत्स्वप्नसुषुप्तितुरीय-चतुष्पादप्रमाणकः, च किन्तु नासौ पुरुषः, कस्तर्हि? अत आह तत इत्यादिना—पुरुषः परिपूर्णतमः सर्वभावेन अपूर्यत इति पूरुषः कर्मणि **औणादिक उषस्प्रत्ययः।** पूर्णकामः परमात्मनः ततः तेभ्यः चतुर्भ्योऽपि पादेभ्यः ज्यायान् प्रशस्यः अस्य परमात्मनः पादः पादादेव अत्र **सुपांसुलुक्** इत्यनेनैवङसिविभक्तौ स्वादेशे रुत्वे विसर्गे पादः। तस्यैकांशत एव सर्वाभूतानि सर्वाणिभूतानि इति भावः। सर्वाणि इति स्थिते '**सुपांसुलुक्**' इत्यनेनैव जस् विभक्तेः पूर्वसवर्णदीर्घः सर्वा। अस्य त्रिपात् अंशत्रयममृतं मृतधर्म प्राप्तिवहिर्भूतं, दिवि साकेतलोके विराजति इति भावः। एवं प्राणाभिन्नहृदयं हृदयाभिन्नपुरुषशरीरं तदभिन्नापृथ्वी तदभिन्नावाक् तदभिन्नभूतं तदभिन्नागायत्रीति निश्चित्याभेदमेतम्। गायत्रीदृष्ट्यैव ब्रह्मोपासनीयमिति प्रकरणार्थः।।श्रीः।।

अथ तस्यैव त्रिपादविभूतिब्रह्मणः शुद्धब्रह्मणः तस्य च बाह्याकाशेन तस्य चान्तराकाशेन तस्य च हृदयाकाशेन सहाभेदं दर्शयति मन्त्रत्रितयेन।

यद्वै तद्ब्रह्मेतीदं बाव तद्योऽयं बहिर्धा
पुरुषादाकाशो यो वै स बहिर्धा पुरुषादाकाशः।।७।।

अयं स योऽयमन्तः पुरुष आकाशो
यो वै सोऽन्तः पुरुष आकाशः।।८।।

अयं स योऽयमन्तर्हृदय आकाशस्तदेतत्पूर्णमप्रवर्ति
पूर्णमप्रवर्तिनी श्रियं लभते य एवं वेद।।९।।

मन्त्रत्रयमेकार्थम् अभिप्रायोऽयं यत् दिवि वर्तमानं त्रिपादविभूतिमद्ब्रह्म इदं शुद्धं तद् ब्रह्म अंशांशिनोरभेदात्। अयं परमेश्वरः आकाशः '**आकाशस्तल्लिङ्गात्।।** (१-१-२३ ब्र.सू.) पुरुषात् बहिर्देशे यः आकाशः रिक्तस्थानविशेषः सोऽपि ब्रह्मरूपएव यः बाह्याकाशो ब्रह्मरूपः स एव पुरुषस्य अन्तराकाशः शरीरेऽवकाशरूपः, यः शरीरावकाशरूपोऽन्तराकाशः सोऽपि ब्रह्मभूत एव, यश्च अन्तराकाशः स एव तदभिन्न एव हृदयाकाशः अयमेव पूर्णब्रह्मान्तरङ्गत्वात् पूर्णम्, अप्रवर्ति शरण्यम् शरणागतान् न प्रवर्तयति तच्छीलं। यः एवं वेद स अप्रवर्तिनीं भक्तपुनरावर्तभंगकारिणीं श्रियं शोभां लभते प्राप्नोति।।श्रीः।।

इतिच्छान्दोग्योपनिषदि तृतीयाध्याये द्वादशखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।

अथ त्रयोदशखण्डः

पूर्वस्मिन् खण्डे गायत्रीद्वारकं ब्रह्मोपासनं प्रतिपादितं तद्ब्रह्म हृदयसिंहासनमधितिष्ठतिमहाराज इव यथा महाराजदर्शनाय प्रतिहाराणाम् आनुकूल्यम् नहि दौवारिकान् विरुध्य तैर्वा प्रतिषिध्यमानः कोऽपि राजानं द्रष्टुं क्षमः। तथैवात्रापि हृदयं सर्वतः पञ्चचक्षुःश्रोत्रवाङ्मनोहृदयरूपाणि तत्र प्राणव्यानअपानसमानोदानाः पञ्चवायवः समधिश्रिताः, यथाक्रममादित्ययमोऽग्निचन्द्रपर्जन्यचैत्याः देवाः समधितिष्ठन्ति। इम एव हृदयरूपपिण्डस्वर्गलोकमंगलमयमंदिराधिष्ठितपरमात्ममहाराजप्रतिहारा उपासिताः परमेश्वरविभूतित्वेन तत्प्राप्तिसहायकाः नोपासिताश्चेत् व्यवधायकाः। नहि भक्तविरोधे भगवत्परितोष इति परमात्माङ्गत्वेन पञ्चसुषिहृदयस्थब्रह्मोपासनं निर्देष्टुं तस्येत्यादिना मन्त्राष्टकेन खण्डोऽयमारभ्यते—

तस्य ह वा एतस्य हृदयस्य
पञ्चदेवसुषयः स योऽस्य प्राङ्सुषिः ।
स प्राणस्तच्चक्षुः स आदित्यस्तदेतत्तेजोऽन्नाद्य-
मित्युपासीत तेजस्व्यन्नादो भवति य एवं वेद।।१।।

तस्य पूर्वं प्रतिपादितस्य गायत्र्यासमुपासनीयस्य ब्रह्मणः एतस्य अत्यन्त संनिधीयमानस्य अनन्तरं तदङ्गोपासनं वर्ण्यते। हृदयस्य परमेश्वरमंदिररूपस्य द्वारपाला

इव पञ्चदेवसुषय: पञ्चसंख्याका: चक्षु:श्रोत्रमनोवाक्हृदयरूपा: देवै: अधिष्ठिता: सुषय: रन्ध्रविशेषा: **सुषि: छिद्रं च रन्ध्रं च** इति वैष्णवकोष:। अस्य हृदयस्य य: प्राङ्सुषि: पूर्वाभिमुखं छिद्रं स: प्राण: तच्छिद्रसंसारी मुखनासिकाभ्यां निर्गमनशीलोवायुविशेष:। प्राक् अनिति नि:श्वशिति इति प्राण:। तच्छिद्रं चक्षूरूपं भौतिकं स एव आदित्य: सूर्य: इदम् आधिदैविकं रूपं तत् एतत् शरीरस्थं तेज:। अन्नाद्यम् अन्नादि पाचकं शरीरधारकं च। य: एवं वेद प्राक्द्वारपालभूतं चक्षुर्गतप्राणमयमादित्यं तेजोरूपं भगवत् प्राप्तिसहायतयैतद्विभूतितयासमुपास्ते **ज्योतिषांरविरंशुमान्**(गीता १०-२२) इतिस्मृते:। उपासीत भजते स एव तेजस्वी भजन् तेज:समन्वित:, अन्वाद: अन्नभोक्ता भवतीति गौणे फले मुख्यं तु परमेश्वरप्राप्तिरेव अतोऽस्मत्पूज्यचरणतुलसीदासमहाराज: सूर्यं समुपास्य श्रीरामभक्तिमेव याचते—

दीनदयाल दिवाकर देवा ।
कर मुनिमनुजसुरासुर सेवा ।।

हिमतमकारि केहरिकर माली ।
दहनदोष दु:खदुरितरूजाली ।।

कोककोकनद लोक प्रकाशी ।
तेज प्रतापरूपरस रासी ।।

सारथि पंगु दिव्यरथगामी ।
बिधिसंकर हरिमूरतिस्वामी ।।

वेद पुरान प्रगट जस जागे ।
तुलसी रामभक्ति वरमांगे ।।श्री ।।

(विनयपत्रिका-२)

अथ दक्षिणसुषिसमुपासनं निर्दिशति अथेत्यादिना—

अथ योस्य दक्षिण:
सुषि: स व्यानस्तच्छोत्रꣳ स
चन्द्रमास्तदेतच्छ्रीश्च यशश्चेत्युपासीत्
श्रीमान्यशस्वी भवति य एवं वेद ।।२।।

अथ पूर्वशुष्युपासनानन्तरमस्य परमात्मनः धामभूतस्य हृदयस्य यः दक्षिणः सुषिः दक्षिणादिक् विभागे छिद्रं सः व्ययानः तत्र स्थितः व्यानवायुः विशेषणः। अनिति कर्मभ्यो जीवान्प्रेरयति तथाभूतः, तत् श्रोत्रं श्रवणनामकं रन्ध्रं स चन्द्रमा तदभिन्नतया चन्द्रमोऽधिष्ठिता तत्र श्री भगवद्भक्तिरूपा य सः भागवतेषु कीर्तिः। यः इत्थं धारयन्नुपास्ते स श्रीमान् प्रशस्तश्रीसंपन्नः यशस्वी कीर्तिमांश्च भवति। चन्द्रमसो भगवद्दासभूतत्वात् तदुपासने सति भगवत्प्रीतिजननेन साधकाय भगवत्प्राप्तिसौकर्यमिति भावः। यथोक्तं मानसे हनुमता—

कह हनुमतं सुनहु प्रभु ससि तुम्हार प्रियदास।
प्रभुमूरति बिधु उर बसति सोइ स्यामता अभास।।श्रीः।।

(मा. ६.१२ क)

अथ पश्चिमसुष्युपासनं वर्णयति—

अत योऽस्य प्रत्यङ् सुषिः
सोऽपानः सा वाक्सोऽग्नि-।
स्तदेतद्ब्रह्मवर्चसमन्नाद्यमित्युपासीत
ब्रह्मवर्चस्यन्नादो भवति य एवं वेद।।३।।

अथ अस्य भगवल्लोकद्वारभूतस्य हृदयस्य यः प्रत्यङ् सुषिः पश्चिमरन्ध्रविशेषः स अपानः तत्र अपानवायुः संचरति, अपकृष्य अन्नादीन् अनिति इत्यपानः। सा वाक् तच्छिद्रपरिणमनभूतावाणी सः अग्निः हुतशनः आध्यात्मिकरूपमेतस्य। तत् ब्रह्मवर्चसं ब्रह्मणः वर्चः ब्रह्मवर्चसं **ब्रह्महस्तिभ्यां वर्चसः** इत्यनेनाऽच्प्रत्ययः। ब्राह्मणतेज इति भावः। अत्तुं योग्यम् आद्यमन्नमेवाद्यम् अन्नाद्यं भक्षणर्हमन्नम् इति धारणामिमां मत्वा उपासीत भजेत। यः एवं वेद यथोक्तमुपासते सः ब्रह्मवर्चसी अतिसयेन ब्रह्मवर्चोयुक्तः अन्नाद्यः श्रेष्ठान्नयुक्तो भवति, अग्नेरेव द्वयोः निदानभूतत्वात्।।श्रीः।।

अथोत्तरसुष्युपासनं वर्णयति—

अथ योऽस्योदङ् सुषिः
स समानस्तन्मनः स पर्जन्यस्तत-
देतत्कीर्तिश्च व्युष्टिश्चेत्युपासीत्
कीर्तिमान्व्युष्टिमान् भवति य एवं वेद ।।४।।

अस्य भगवत्पर्वमस्य हृदयस्य यः उदङ्सुषिः उत्तरछिद्रं स समानः तत्राधिष्ठितः समानवायुः समं यथास्यात्तथा विषमभोजनं समीकृत्य अनिति जीवतीति समानः, तन्मनः तत् परिणामभूतं स्वान्तमाधिभौतिकं रूपं, स पर्जन्यः स एवाधिदैविको वर्षामेघः अत्र कीर्तिः व्युष्टिः कान्तिः विशिष्टा कान्तिः तथा च वशकान्तौ इत्यस्मात् वशनम् उष्टिः इति विग्रहे भावे क्तिन् प्रत्यये सम्प्रसारणे पूर्वरूपे एत्वे ष्टुत्वे उष्टिः कान्तिः विशेषा उष्टिः व्युष्टिः, य एवं वेद उपास्ते स प्रशस्तकीर्तिः नित्यकान्तिसम्पन्नो भवति इति मन्त्रर्थः।।श्रीः।।

अथोर्ध्वसुष्युपासनं प्राह—

अथ योऽस्योर्ध्वः सुषिः
सु उदानः स वायुः स ।
आकाशस्तदेतदोजश्च महश्चेत्युपा-
सीतौजस्वी महस्वान्भवति य एवं वेद ।।५।।

अस्य भगवदालयस्य हृदयस्य यः ऊर्ध्वसुषिः उपरितनोरन्ध्रभागः स उदानः तदभिन्न उदानवायुः, ऊर्ध्वम् अनतीत्युदानः स एव आकाशः तदभिन्नोवायुः। यद्यपि अन्यत्र तच्छोत्रं तच्चक्षुः सा वाक् तन्मनः इति चतुर्ष्वपि स्थानेषु पूर्वं सुष्याकाराः निर्दिष्टाः पश्चात् यथाक्रमम् आदित्यचन्द्राग्निपर्जन्याः देवाः निर्दिष्टाः अत्र पाठव्यतिक्रमः पूर्वं देवनिर्देशः पश्चात् रन्ध्रस्थानं तथापि शब्दक्रमात् अर्थक्रमोबलीयान् इति निमेयेन पूर्वशरणिमनुसरतैव मया व्याख्यातम्। नहि स्थानमतिरिच्यदेवास्तिष्ठन्ति अत्राकाशपदं हृदयकुहरपरम् एवम् ओजः शारीरिकं बलं महः आध्यात्मिकशक्तिः द्वयोरपि प्रापकं मत्वा उपासीत्, एवमुपासीनः ओजोमहोयुक्तोभवतीति शब्दार्थः। इत्थं नेत्रश्रवणवाङ्मनोहृदयकुहरेषु प्राणव्यानापानसमानोदानसंयुक्तेषु सूर्यचन्द्राग्निपर्जन्यवायुसमधिष्ठितेषु यथोक्तमाध्यात्मिक-शक्तीः संकलयन् प्रसाध्य पञ्चापिदेवान् भगवति पञ्चविभूतिमये निरतिशयभजनरसमनुभवन् भवभयमतितितीर्षति जीवः।

ना प्रसाद्यसुरानेतान् हरेर्मायामहानदीम् ।
अतितर्त्तुं कदापीष्टे विना नौकामिवापगाम् ।।

यतोक्तं श्रीमानसे—

इन्द्रियद्वारझरोखे नाना। जहँतहँ सुर वैठेकरिथाना।।
आवतदेखहिं विषयबयारी। ते हठि देहि कपाट उघारी।।श्रीः।।

(मा.. ७-११८-११-१२)

ते वा एते पञ्च ब्रह्मपुरुषाः स्वर्गस्य लोकस्य द्वारपाः स य एतानेवं पञ्चब्रह्मपुरुषान्स्वर्गस्य लोकस्य द्वारपान्वेदास्य कुलेवीरो जयते प्रतिपद्यते, स्वर्गं लोकं य एतानेवं पञ्चब्रह्मपुरुषान्स्वर्गस्य लोकस्य द्वारपान्वेद।।६।।

एते इमे ते श्रुतिप्रसिद्धाः पञ्चदेवपुरुषाः देवस्य परमात्मनः अनुचराः पुरुषाः देवपुरुषाः सूर्यचन्द्रपावकपर्जन्यवायवः भगवतः परिकराः तथाहि सूर्यः प्रकाशस्य, चन्द्रमा ओषधिपोषणस्य, अग्निर्दहनकर्मणः पर्जन्यो वर्षायाः। वायुश्च संजीवनस्य इमे भगवद्विभूतयोऽपि यथा सूर्यः **'ज्योतिषां रविरंशुमान्'** (गता. १०-२०) चन्द्रं **नक्षत्रोणमहं शशी** (गी. १०-२३) अग्निः **वसूनां पावकश्चास्मि** (गी. १०-२३) मनः **इन्द्रियाणां मनश्चास्मि** (गी. १०-३२१) वायु पवनः पवतामस्मि (गी. १०-३१) स्वर्गस्य लोकस्य साकेतस्य लोकस्य स्वः स्वर्गादिदेवलोकेषु गायते इति स्वर्गः, तस्य स्वर्गस्य साकेतस्य भगवल्लोको हि स्व र्गीयैरपि देवैर्गीयते। द्वारं पान्तीति द्वारपाः जयविजयाविव प्रतिहाराः एवम् एतान् आदित्यादीन् स्वर्गलोकस्य द्वारपालकत्वेन य उपास्ते तस्य कुले वीरः जायते षड़विकारजेता संभवति, स्वर्गं लोकं च प्रतिपद्यते। अमीषामप्यनुग्रहेण निरस्तभजनप्रत्यवायो भगवल्लोकमाप्नोतीति श्रौताशयः।।श्रीः।।

हार्दब्रह्मव्यापकब्रह्मणोः पिण्डब्रह्माण्डगतब्राह्मणोर्वा व्याकरोत्येकताम्—

अथ यदतः परो दिवो
ज्योतिर्दीप्यते विश्वतः पृष्ठेषु
सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेष्विदं
वाव तद्यदिदमस्मिन्नन्तः पुरुषे ज्योतिः ।।७।।

अथ पञ्चाद्वारपालदेवपुरुषोपासनानन्तरं सकलकारणभूतसर्वाराध्यसर्वाध्यक्षसर्वेश्वर-श्रीसीताराममयब्रह्मोपास्यत्वेन विविच्यते। अतः अस्याः दिवः द्योतनशीलायाः अपराजितायाः साकेतपुर्याः परः उत्कृष्टः परीभूतस्तत्स्वामी साकेताधिपतिः श्रीसीताभिरामो रामः स एव इदम् अकारो वासुदेव। तस्य अपत्यं पुमान् इः—

भत्वेनाकारलोपेऽपि प्रत्यये ह्युभयार्थता ।
वर्ण्यते शब्दरसिकैर्वैयाकरणसम्मता ।।

इति वैष्णवस्मृतिः। तम् इं कामं द्यति खण्डयति इतीदं संसारवासनाखण्डनशीलं, ज्योतिः भाः विश्वतः पृष्ठेषु विश्वेषामुपरि तत्स्थानां प्राणिनां सूचनार्थमाह-सर्वतः पृष्ठेषु सर्वतः सर्वेषाम् अत्र तसिः षष्ठ्यर्थेः। सकलाजीवानामपि पृष्ठेषु ब्रह्मदीनामपि महत्तमानामप्युपरितनभागेष्वित्यर्थः। यत्तु विश्वतः पृष्ठेषु इत्यस्य सर्वतः पृष्ठेषु इत्यनुवादः इति प्राहुः प्राञ्चस्तन्मतिदौर्बल्यजनितसमाधानाभावप्रसूतधारणया। वस्तुतस्तु भगवल्लोकः विश्वेषां लोकानामुपरि एतद् सूचनाय विश्वतःपृष्ठेषु चतुर्दशभुवनातीतोऽयमित्यर्थः। किमिमं ध्रुवादयो महत्तमास्प्रष्टुं शक्ताः इति निषिद्धयन्ती प्राह— सर्वतः पृष्ठेषु सर्वेषां ध्रुवादीनामप्युपरितनभागेषु, उत्तमेषु उच्छ्रितं तमं उत्खातं वा तमविद्यातत्कारिरूपं ध्वान्तं यैस्ते उत्तमाः तेषु उत्तमेषु निरस्तान्धकारेषु। तथोक्ततं श्रीभागवत्ते प्रथमे **धाम्ना स्वेन सदा निरस्तकुहकम्** (भागवत १/१/१)।

किम् एतेभ्यः केचनापरेप्युत्तमाः? इति शङ्कां परिहरति, अनुत्तमेषु न सन्त्यन्ये ब्रह्मलोकदयः उत्तमाः येभ्यस्ते अनुत्तमाः तेषु अनुत्तमेषु लोकेषु आदरार्थे बहुवचनं, श्री साकतेलोके यद् ज्योतिः दीप्यते तदेव साधकस्य अस्मिन् हृदयरूपेऽपि अन्तःपुरुषे अन्तः स्थितः पुरुषः यस्मिन् तदन्तः पुरुषः तस्मिन् हृदये ज्योतिर्दीप्यते हृदयस्य साकेतस्थज्योतिषोर्मध्ये न किञ्चिदन्तरमिति श्रुतिविवक्षितम्।।श्रीः।।

अथ एतस्मिन् ज्योतिषि दर्शनश्रवणे सापेक्षं प्रत्यक्ष्यं प्रमाणमाह—

तस्यैषा दृष्टिर्यत्रैतदस्मिञ्छरीरे सः स्पर्शेनोष्णिमानं
विजानाति तस्यैषा श्रुतिर्यत्रैतत्कर्णावपिगृह्यनिनदमिव ।
नदथुरिवाग्नेरिव ज्वलत उपशृणोति तदेतद्दृष्टं च श्रुतं
चेत्युपासीत् चक्षुष्यः श्रुतो भवति य एवं वेद च एवं वेद ।।८।।

तस्य हृदयस्थस्य ज्योतिषः एषा दृष्टिः इदं दर्शनं इदं ज्ञानं वा प्रमाणं यद् अस्मिन् शरीरे संस्पर्शेण उष्णिमानम् उष्णतां विजानाति, कस्य चित् शरीरस्पर्शेनैव तस्य उष्णतया अयं जीवतीति तर्कयति, शीतलतया च मृतज्ञ इत्यवधारयति। उष्णता च ज्योतिः परिणामः येन जीवसत्तानिश्चीयते। एषा दृष्टिः एवमेव एषा श्रुतिः। श्रवणप्रमाणमाह यत् कोऽपि कर्णौ पिधाय अंगुल्याततद्द्वारं रुद्ध्वा नदथुः वृषभस्वर इव किमपि निनदं

शब्दं शृणोति, ज्वलतः दन्दह्यमानस्य तृणादिकं दहतः अग्नेः धम् धम् इव किमपि उपशृणोति, य एवं वेद सः चक्षुष्यः भगवद्दर्शनसामर्थ्ययुक्तनेत्रः श्रुतः भगवत्कथा-श्रवणपाटवसम्पन्नः भवति।

इतिच्छान्दोग्योपनिषदि तृतीयाध्याये त्रयोदशखण्डे श्री राघवकृपाभाष्यं सम्पूर्णम्।।

अथ चतुर्दशःखण्डः

चतुर्वक्त्रसुताराध्यं चतुर्वर्गफलप्रदम्।
चतुश्शत्रुविनाशाय चतुर्थं ब्रह्म भावये।।१।।

चतुर्भिश्च चतुर्भिश्च चतुर्भिश्च त्रिभिस्त्रिभिः।
चतुर्भिर्भावितो रामश्चतुर्यो मे हरिर्गतिः।।२।।

चतुर्दशसमारण्य शरण्यः सीतयाव्रत-।
श्चातुर्दशवधाभ्यासी चतुरश्चतुरो द्यतु।।३।।

चतुर्दशेऽस्मिन् शकले चतुर्थं ब्रह्मनिष्कलम्।
चातुरी त्वरया रीत्या चतुर्भिर्मन्त्रकैर्नुतम्।।४।।

भक्त्याचार्यस्तु शाण्डिल्यः, शाण्डिल्यं स्थाण्डिलेशयम्।
सर्वभावनयोपास्यं ब्रह्मरामाभिधं जगौ।।५।।

तत्र हि प्रथमे मन्त्रे सर्वव्यापकतां विभोः।
प्रतिपाद्य यथाशास्त्रं तदुपास्तिर्विधीयते।।६।।

त्रिभिर्मन्त्रैः पुनस्तस्य ताटस्थ्येन स्वरूपतः।
लक्षणेनाथ संल्लक्ष्य ब्रह्मोपास्यत्वमीरितम्।।७।।

परमार्थस्तु न ज्ञानं श्रेयसां भक्तिरित्यतः।
ज्ञानानन्तरमप्यस्मात् श्रुतिर्गायत्युपासनाम्।।८।।

उपासना तु भेदे स्यात् नैवाभेदे कथंचन।
तद्विधित्वादिहानेन ध्वस्तमद्वैतमञ्जसा ।।९।।

अद्वैतवाददुर्मर्षकालकूटार्दनं बुधैः।
श्रीराघवकृपाभाष्यपीयूषं पीयतामिह ।।१०।।

नैवद्वेषो विरोधो मे नैव पूर्वाग्रहो मम।
श्रुत्यक्षरविचारोऽत्र विवेकेन विविच्यते ।।११।।

सर्व खल्विदं ब्रह्म तज्जलानीति शान्त उपासीत
अथ खलु क्रतुमयः पुरुषो यथाक्रतुरस्मिंल्लोके ।
पुरुषो भवति तथेतः पुरुषो यथाक्रतुरस्मिल्लोके
पुरुषो भवति तथेतः प्रेत्यः भवति स क्रतुं कुर्वीत ।।१।।

इदम् सर्वम् ब्रह्म खलु तज्जलानि इति शान्तः उपासीत एषः मन्त्रपूर्वार्धान्वयः। इदं प्रत्यक्षीभूतम् चराचरं जगत् ब्रह्म ब्रह्मात्मकम्, अथवा इदम् एः कामस्य खण्डकं ब्रह्म सर्वसर्वेश्वरं श्रीरामाभिधं परतत्वं सकलब्राह्मणशीलं ब्रह्म सर्वं सर्वत्र। ननु सर्वमित्यस्य सर्वत्रेति कथमर्थः? अत्र सुस्पष्टं ब्रह्मसमानाधिकरणारूपसर्वमिति प्रथमाविभक्तिश्रवणात्। तस्याश्च क्वाप्यधिकरणवाचकत्वाश्रवणादिति चेत् सत्यं सर्वमिति सप्तम्यन्तमेव कथमिति चेत् सर्वेषु इति सप्तमीबहुवचनान्तस्य छान्दसं रूपमेतत् सुपः **सुपां सुलुक्** पा. अ. ३-३ इत्यनेन स्वादेशे तस्य 'अतोऽम्' इत्यमि पूर्वरूपे सर्वमिति। न च 'अतोऽम्' इत्यस्य प्रथमाद्वितीयायामेव प्रवृत्तेस्त्वत् साधितं रूपं सप्तम्यन्ते नोपपद्यत इति वाच्यम्? 'स्वमोर्नपुंसकात्' इत्यस्मात् अम् विधायके स्वमोरनुवृत्तो शास्त्रसम्मतायां सत्यामपि तत्र प्रथमा द्वितीययोरेव प्रवृतौ मानाभावात्। सोश्च ततोऽपीतरविभक्तिषु दर्शनादेशतया त्वच्छङ्कानिर्मूला। एवं **सर्वं खल्विदं ब्रह्म** इति श्रुतिशकलस्य सर्वेषु प्राणिषु विषयतया उपश्लिष्टतया च विराजमानम् इदं श्रुतिप्रसिद्धं ब्रह्म खलु, निश्चयेन विभाति इति फलितार्थः। प्रमाणं चास्मिन् व्याख्याने भगवद्वाक्यमेव—

विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ।।

(गीता ५-१८)

ननु परतः प्रामाण्यसूचकस्मार्तवाक्यं दुर्बलं श्रुत्यपेक्षया? सत्यं श्रुत्यन्तराण्यपि प्रमाणानि तद्यथा एष सर्वेषु **भूतेषु गूढोऽत्मा न प्रकाशते दृश्यते त्वग्र्यया सूक्ष्मया सूक्ष्मदर्शिभिः** (कठ, १-३-१२) तिलेषु तैलं दधिनीव सर्पि (श्वेता. ६-१९) **सर्वव्यापी सर्वभूतान्तरात्मा** (श्वेत. ६-१२) इत्यादीनि। तथा प्राह मानसकारोऽपि

ज्ञान मान जहँ एकउ नाही।
दीख ब्रह्म समान सब माही।।

(मानस ३/१५/७)

तत्सर्वत्रवर्तमानं सर्वात्मकं वा ब्रह्म कथमुपासनीयमिति जिज्ञासायामाह—तदित्यादि शान्तः, शान्तभजनप्रत्यवायरूपबहिरङ्गवृत्तिसमुदायः नित्यशान्तियुक्तो वा, कथमुपासीत? ज्ञात्वा, किं प्रकरकं तज्ज्ञानम्? इति स्पष्टयति—तज्ज्लानि तच्छब्देन पूर्वं चर्चितः सर्वम् इति शब्दः परामृश्यते तस्मात् ब्रह्मणः सकाशादजायत इति तज्जं तस्मिन् ब्रह्ममण्येव महाप्रलये लीयते श्लिष्यते इति तल्लं तेन ब्रह्मणा करणीभूतेन पात्यमानं सत् अनिति जीवति इति तदन् तथा च तज्जं च तल्लं च तदनंचेति तज्जलान् त्रयाणां समाहारे एकवद्भावे बाहुलकात् तच्छब्दद्वयलोपे तज्जलानि सर्वमिदं जगत्। अत एव ब्रह्मात्मकं, यतोहि तस्मात् जायते तस्मिंल्लीयते तेनानति च एवं जगत्प्रतिजन्मस्थितिभंगहेतुतया ब्रह्मणस्तदात्मकता सुवचैव **यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति।** (तै.उ.ब्र.ब. १) इति श्रुतेः। एवं सर्वमिदं ब्रह्महेतुतयैव जन्मस्थितिसंहरणवत्तया ब्रह्मबुद्ध्यैवसमुपास्यमिति श्रुतेर्हार्दम्। इति शब्दोत्र समवधारणपरः, एवं रूपेण समवधार्येतिभावः। उपासीत उपासनाविषयं विदधीत सेवकसेव्यभावसंबन्धेन चराचरमपि ब्रह्मबुध्यैव भजेत इत्याशयः। सर्वमिदं ब्रह्मात्मकतया ज्ञात्वा ततो भगवन्तं भजनविषयं कुर्यात्। इत्यनेन ज्ञानस्य चरमलक्ष्यतापरास्ता। वस्तुतस्तु भगवद्भजनानन्द एव। जीवस्य चरमतलक्ष्यमिति राद्धान्तः।

उपासनं भेदबुद्धिसापेक्ष्यं तच्च शरीरनिर्भरं शरीरं च संकल्पजन्यं पूर्वजन्मसंकल्पभवा हि भावः शरीरग्रहणे हेतुः तस्मात् सत्संकल्पप्रभवशरीरं नभगवद् भजनोपयोगि तस्मात् सत्संकल्पकरणाय विधिमुखेन श्रुतिर्निर्दिशति, अथेत्यादिना-खलुशब्दोऽत्रवक्तव्ये निःसंदेहसूचकः पुरुषः पुरुषार्थपथपान्थः जीवः क्रतुमयः संकल्परूपः अस्मिँल्लोके पुरुषः जीवः यथाक्रतुः यादृक्संकल्पवान् भवति यथासंकल्पेन कलेवरं जहाति इति भावः। इतः प्रारब्धक्षये अस्माँल्लोकात् तथा क्रतुः तादृक्संकल्पानुरूपशरीरवान्

शरीरवान् भवति सत्संकल्पकारी हि: गृहीतसच्छरीर: सत्सङ्गगङ्गातरङ्गनिरस्त भगवद्भजनप्रत्यवायपादप: प्रभुपदपल्लवं प्रपद्यते। असत्संकल्प: सूकरकूकरादि-योनिषु चिरं भ्राम्यन् भीषणभवदवाग्निना दन्दह्यते। अत: स साधक: क्रतुं कुर्वीत् भगवद्भजनानुरूपसंकल्पं विदधीत इतिविधि:। अयमेवार्थो भगवता श्रीगीताषूप बृंहित:—

अन्तकाले च मामेव स्मरन्मुक्त्वा कलेवरम्।
यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः।।
यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम्।
तं तमेवैति कौन्तेय सदा तद्भावभावितः।।श्रीः।।

(गीता. ८।५।६)

भूय: परमेश्वरस्वरूपं यत्किंचित्तया विवृणोति—

मनोमयः प्राणशरीरो भारूपः
सत्यसंकल्प आकाशात्मा सर्वकर्मा
सर्वकामः सर्वगन्धः सर्वरसः
सर्वमिदमभ्यात्तोऽवाक्यनादरः ।।२।।

अथ य: निखिलचराचरव्यपक: स: सर्वविश्रुतपौरुष:, किं रूप इति द्वादशविशेषणै: स्वरूपं लक्षयति— स: परमेश्वर: मनोमय:, ननु विरुद्ध एष निर्देश: काठके अयमेव परमात्मा मनोरहित इति पठित:। तथा च अप्राणोह्यमनाशुभ्र: (कठ. १-३-१) अप्राण: अमना: कथं मनोमय: प्राणशरीरो भवेत्? इतिचेन्न तस्य सकलासंभवमयत्वात् तथा चाह श्रुति: **अपाणिपादोजवनोगृहीतां** (श्वे.उ. ५.१९) भगवतश्च एककालावच्छेदेन एकाधिकरणनिष्ठसकलविरुद्धधर्माश्रयतावच्छेदकता स्वीकारात्। अथवा अप्राण: अमना इत्यत्र प्रयुक्तो नञ् समाससूचकाकारो न निषेधपर:, प्रत्युत अनुपमाव्यक्तार्थवाची। एवम् अनुपमा: अव्यक्ता: वा प्राणा: यस्य सोऽप्राण: एवमेव अनुपमम् अव्यक्तं वा मनो यस्य सोऽमना: भगवतोमनस: वैलक्षण्यं मानसकारोऽपि आह—

कुलिसहु चाहिकठोर अति कोमलकुसुमहि चाहि।
चित्तखगेस रामकर समुझि परइ कहु काहि।।

(मा.उ. १९ ख)

अनया व्युत्पत्या विरोधपरिहारः। अथवा मनोमयः इत्यत्र मयट् प्रत्ययः, स्वरूपार्थे पुल्लिंगता च विशेष्यानुरोधिनी, एवं मन एव मनोमयः मनोऽपि भगवद्विभूतित्वात् तत्स्वरूपमेव तद्यथा—इन्द्रियाणां मनश्चास्मि (गीता. १०-२१) एवं भगवतो मनोरूपत्वे तन्मनोऽभाववत्वे च न विरोधः। अथवा अपूपमय इत्यादिवत् **तत् प्रकृतिवचनेमपट्** इत्यनेन सप्तम्यर्थे मयट्। तथाहि मनांसि तच्चरणकमलसमुपासकानां कोटिकोटि मनोभ्रमराः सन्ति यस्मिन् प्राचुर्येण इतिमनोमयः, भगवतः स्वनिरूपितमनोभाव-सूचनाय अमनाः इति। परन्तु तत्र शत् शत् भागवत परमहंस मनोभृंगसद्भावसूचनाय मनोमय इति। तथोक्तं केनचिद्भक्तेन—

रत्नाकरस्तवगृहं गृहिणी च पद्मा
किं देयमस्ति भवते जगदीश्वराय ।
आभीरवामनयनाहृतमानसाय
दत्तं मनो यदुपते कृपया गृहाण ।।

अथवा भक्तभावनापरिपालनाय निरस्तनिखिलदूषणं भूषणभूषणं निरतिशय-सकलकल्याणगुणगणनिलयं सगुणसाकारं वपुर्दधानो भगवान् निजलीलोपकरणार्थं नूतनं मनोऽपि विदधाति।

तद्यथा रिरंशुर्गोपीभिः प्रभुः नूतनं मनोरचयति— अतः प्राह भागवते वीक्ष्यरन्तुं मनश्चक्रेयोगमायामुपासितः ।

(भागवत १०-२९-१)

अमना अपि भगवान् शरदोत्फुल्लमल्लिकाः स्वस्मै सर्वस्वं समर्पयन्ती श्री व्रजाङ्गनाः विलोक्य ताभिः सह रन्तुं मनः चक्रे रचयामासे। कथं रचितवान्? इत्यत आह— योगमायामुपाश्रितः। यतोहि स परमात्मा अघटितघटनापटीयसीयोगमायाम् उपाश्रितः तया सह समन्वयेन लब्धरचनासामर्थ्यो निजरमणानुकूलं मनो व्यधात्। चक्रे इति आत्मनेपद प्रयोगस्य तात्पर्यमेवैतत् ञकारानुवन्धकोहि डुकृञ्धातुः निर्माणानुकूलव्यापारार्थोऽपि, कुम्भकारो घटं करोतिवत्। अथवा गत्यर्था ज्ञानार्था इति नियमात् मनसा निजसंकल्पेन मयति चराचरं जानाति इति मनोमयः। भगवान् हि स्वसंकल्पेन चराचरं जानाति **'सर्वज्ञः सर्वविद् यस्यज्ञानमयं तपः'** इति श्रुतेः। **'उत्पत्तिं च विनाशञ्च भूतानामगतिं गतिं वेत्ति विद्यामविद्याञ्च स वाच्यो भगवान् इति'**। इति

स्मृतेः। अथवा मनसा निजसंकल्पबलेनैव छन्दोमयेन गरुडेन मर्याति गच्छतीति मनोमयः भगवान हि भक्तेन स्मृतमात्रः समातुरः तत्र गच्छति। यथोक्तं श्री भागवते गजेन्द्र- मोक्ष प्रकरणे—

तं तद्वदार्त्तमुपलभ्य जगन्निवासः
स्तोत्रं निशम्य दिविजैः सहसंस्तुवद्भिः ।
छन्दोमयेन गरुडेन समुह्यमानश्
चक्रायुधोऽभ्यगमदासु यतो गजेन्द्रः ।।

(भगवत ८-३-३१)

अथवा मनसा निर्मलशान्तेन स्वान्तेन मीयते दृश्यते अवगम्यते इति मनोमयः 'मनसैवानु द्रष्टव्यम्' इति श्रुतेः।

निर्मल मन जन सो महि पावा।
मोहि कपट छल छिद्र न भावा।।

मानस ५-४४-५

इति मानसात्। प्राणशरीरः प्राणः सकलप्राणिनामुपजीव्यः शरीरः श्रीविग्रहः यस्य स प्राणशरीरः **स उ प्राणस्यप्राणः** केन उपनिषद १-२। अथवा प्राणः विशुद्धचेतनघनशरीरं यस्य तथाभूतः जीवात्मा **'यस्मात्मा शरीरम्'** इति शतपथब्राह्मणात्। **जगत्सर्वं शरीरं ते** इति श्रीमद्रामायणे ब्रह्मसम्बन्धः साधित। चिदचिती प्रत्यगात्मप्रकृती, शरीरे विशेषणे च भगवतः ताभ्यां चिदचिद्भ्यां विशिष्टमद्वैतं विशिष्टाद्वैतमित्येव नो राद्धान्तः। अथवा प्राणः ओंकारः वाचकतया शरीरः अक्षराकारः यस्य स प्राणशरीरः 'प्राणस्तु प्रणवे प्राणेइति कोशात्। प्रणवो हि प्राणः सोऽपि भगवद्विग्रहश्रीरामश्रुतौ तस्मादेव चतुर्णां भ्रातृणां श्रीरामभरतलक्ष्मणशत्रुघ्नानां सम्भवनिदर्शनात्। **अकाराक्षरसम्भूतः सौमित्रिर्विश्वभावनः। उकाराक्षरसम्भूतः शत्रुघ्नस्तैजसः स्मृतः। प्राज्ञात्मकस्तु भरतो** मकाराक्षरसम्भवः अर्धमात्रास्थितोरामः सच्चिदानन्दविग्रहः। भारूपः भा ज्ञानं तदेवरूपं यस्य स भारूपः विशुद्धज्ञानघन इति भावः। अथवा भाति परमेश्वरप्रेम-रविरश्मिरोचिषा कौमुदीव भक्तहृदयगगने या सा भा भगवद्भक्तिः तया भया भक्तिरूपया रूप्यते बोध्यते यः सः भारूपः। भक्त्या हि भगवान् सामग्र्येण ज्ञातुं शक्यते। **भक्त्या त्वनन्यया शक्य** अहमेवंविधोऽर्जुन। ज्ञातुं द्रष्टुं च तत्वेन वेष्टुं च परंतप।। गी. ११-

५४ **भक्त्यामामभिजानाति यावान्यश्चाश्मि तत्वतः** गी. १८-५५ इति स्मृति प्रामाण्ययुगलनिदर्शनात्। सत्यसंकल्पः लीलाचिकीर्षाव्यापारः यस्य स सत्यसंकल्पः, अथवा सद्भ्यो महात्मभ्यो हितः कल्याणकारीसंकल्पः लीलाकरणनिश्चयो यस्य स सत्यसंकल्पः। आकाशात्मा नीलो गम्भीरो निर्लेपः व्यापकः करुणाकादम्विनीमण्डितः दीनानुग्रहनभस्वता समुपेतः आत्मा स्वरूपं यस्य स आकाशात्मा। यथा आकाशे समवकाशदातृत्वं तथैव अनन्तकोटिब्रह्माण्डनिलयभूतं भगवतः श्रीरामस्य प्रत्येकं रोम। यथा आकाशे उषायां सायं च भास्करकिरणाः पीताः तथैव भगवति विराजमानं कट्यवच्छेदेन बालदिवाकरसौदामिनीद्युतिविनिन्दकं पीताम्बरम्। यथाकाशे नक्षत्रापि तथैव भगवत्याभूषणानि, यथा नभसि चन्द्रमाः तर्थवात्र कोहि कोटि शरच्छशांक विनिन्दकं भगवदाननम्। एवमेव बहवः पक्षाः ऊह्याः। सर्वकर्मा— सर्वाणि श्रुति विहितानि नित्यनैमित्तिकप्रायश्चितोपासनानि कर्माणि यस्मै यदर्थं निर्दिष्टानि स सर्वकर्मा। सर्वकामः-सर्वे कामाः मनोरथाः यस्य यस्मै वा स सर्वकामः, अथवा सर्वैरपि सुरासुरैरपि काम्यते दर्शनेच्छाविषयः क्रियते स सर्वकामः, भगवान् हि चराचर दिदृच्छाश्रयः। किं बहुना अचेतना अपिं सरोवरसरितः भगवन्तं परिचित्य मार्गं ददति। दण्डकविपिन-विहारिणः श्रीहरेः चण्डातपस्य घर्मवारणाय मेघोऽपि स्ववपुश्छत्रेन छायां करोति रघुपतेः। यथा—

सर सरिता बन अवघट घाटा।
पति पहिचानदेहि बर बादा।।
जहँ जहँ जाहिं देव रघुराया।
करहिं मेघ तहँ तहँ नभ छाया।।

मानस ३।४-५

सर्वगन्धः— गन्धशब्दोऽत्र सुगन्धवाची, सर्वे गन्धाः सुगन्धाः उपभोग्यतया सन्ति यस्य य सर्वगन्धः, अथवा सर्वेषाम् उपासकानां पूजनार्थं प्रयुक्तः गन्धः यस्मै स सर्वगन्धः, अथवा गन्धो **रसे च सम्बन्धं इति कोशात्।** गन्धशब्दः सम्बन्धवाची, एवं सर्वैः चराचर—प्राणिभिः सहः गन्धः सम्बन्धः। यथोक्तं कैकेयीं प्रति भरतेन—

अस को जीव जन्तु जग माही।
जेहि रघुनाथ प्रान प्रिय नाही।।

मानस २-१६३-६

सर्वरसः— सर्वे रसाः स्वादाः यस्मै यस्मिन् वा सन्धाः सर्वरसः, वस्तु-तस्तु सर्वे गन्धाः यस्मात् स सर्व गन्धः सर्वेरसाः यस्मात् स सर्वरसः रसोऽहमप्सु थोन्तेय गीता ७-८ पुण्यो गन्धः पृथिव्याञ्च। इत्यादि स्मृतेः। एवं नवविशेषणविशिष्टो भगवान् सर्वं चराचर- मेतज्जगत् अभ्यात्तः अभिमुखी कृत्य तस्मिन् व्याप्तः उच्यते इति। अवाकं न विद्यामानं पूर्णतया प्रतिपादनार्हम् वाकं जीववाङ्मयं यस्मिन् स अवाकः। अनादरः नपरितोषकः आदरः यस्य सोऽनादरः भगवान् विशुद्ध प्रेम्णा परितुष्यति नैव प्रेमरहितेन आदरोपचारणेन। विदुरग्रहे भगवतः कदलीफलशाकस्वीकार एव एतच्छ्रुति सिद्धान्त-प्रयोगः। अथवा दरः भयं ईषद् दरः आदरः न विद्यते महाकालादपि आदरः ईषन्मात्रं भयं यस्मिन् सोऽनादरः **अभयं निर्जरं ब्रह्म** इति श्रुतेः। अत एव साक्षाद् ब्रह्ममयोहरिः श्री रामः सकलभीषणमपि विभीषणमभयेन योजयन् प्राह सागरोत्तरतटे—

सकृदेव प्रपन्नाय तवास्मीति याचते।
अभयं सर्वभूतेभ्यो ददाम्येतद् व्रतं मम ।।

(वा.रा. ६-१८-३३)

एवं अनादरः निर्भयः इति वयं, यत्तु अनादरः संभ्रम रहितः तत्तु चिन्त्यम्, संभ्रमार्थस्यादरशब्दस्य कुत्रापि कोषेष्वदृष्टत्वात्।।श्रीः।। अथ परमात्मनोऽणुत्वं ज्यायश्त्वं विरुद्धधर्मद्वयाधिकरणत्वं निदर्शयति शाण्डिल्यः—

एष म आत्मान्तर्हृदयेऽणीयान्व्रीहेर्वा यवाद्वा
सर्षपाद्वा श्यामाकाद्वा श्यामाकतम्डुलाद्वैष
म आत्मान्तर्हृदये ज्यायान्पृथिव्या ज्यायानन्तरि-
क्षाज्ज्यायान्दिवो ज्यायानेभ्यो लोकेभ्यः ।।३।।

मे मम शाण्डिल्यस्य ब्रह्मसाक्षात्कर्तुर्हृदये हृद्देशे अन्तः विराजमानः एषः मयाकृत-साक्षात्कारः आत्मापरमात्मा, ब्रीहेः धान्यात्, यवात्, सर्षपात्, श्यामाकात् पृथुकात्, श्यामकतण्डुलात्, पृथुक् तण्डुलादपि अणीयान् सूक्ष्मतरः, अत्र पञ्चधाप्रयुक्तो वा शब्दः अप्यर्थः, स चाधिक्ये। एवमेव मम हृदयान्तर्वर्तमानः एषः आत्मा सर्वव्याप्तिमान् पृथिव्याः भूमेः ज्यायान् श्रेष्ठतरः, अन्तरिक्षात् भुवर्लोकात्, दिवः स्वर्गलोकात् एभ्यः भूर्भवःस्वराख्येभ्यः लोकेभ्यो ज्यायान् प्रशस्यतरः। एवं भक्तानां कृते **अणोरणीयान्** ज्ञानिनाम च कृते **महतोमहीयान्** इति विवेकः। एवमेव श्रुत्यन्तरम् **अणोरणीयान् महतोमहीयान्** कठ.उ. १-२-२०।।श्रीः।।

पुनः सगुणब्रह्मोपासनामेव संस्तौति—

सर्वकर्मा सर्वकामा सर्वगन्धः सर्वरसः सर्वमदिमभ्यात्तोऽवाक्यनादर एष म आत्मान्तर्हृदय एतद्ब्रह्मैतमितः प्रेत्याभिसंभवितास्मि यस्य स्यादद्धा न विचिकित्सास्तीति ह स्माह शाण्डिल्यः।।४।।

सर्वकर्मा सकलकर्माश्रयः सर्वकामत्वसर्वगन्धत्वसर्वरसत्वादियुक्तः सर्वव्यापकः वागगोचरो निर्भयो मे हृदयान्तरवर्तमानः एषः आत्मा अन्तर्यामी परमात्मा एतद् ब्रह्म इदमेव श्रुति प्रतिपादितं परतत्वम्। इतः संसारात् प्रेत्य शरीरविसर्जनेन सह गत्वा तं तमेव परमात्मानं संभवितास्मि प्राप्तास्मि, यस्य साधकस्य अद्धा आश्चर्येऽस्मिन् न विचिकित्सा स्यात् तस्यापि सन्देहरहितस्य एवमस्ति इत्थं ब्रह्मानुभवो भवति। इति अनेन प्रकारेण शाण्डिल्यः भक्तिशास्त्राचार्यः आह विज्ञापयत् द्विरुक्तिः आदरार्थः।।श्रीः।।

इतिच्छान्दोग्योपनिषदि तृतीयाध्याये चतुर्दशखण्डे श्रीराघवकृपाभाष्यम् सम्पूर्णम्।।

अथ पंचदशखण्डः

इत्थं चतुर्दशे खण्डे सर्वकाम इत्यादिभिः भगवति सकलकल्याणगुणगणनिलयत्वं तस्य सर्वात्मकतया जगज्जन्मस्थितिभंगकारणतया चोपास्यत्त्वं शाण्डिल्यमुखेन विधित्वेन निर्दिष्टं कारयित्वा पुनस्तस्यैव विराट्तयोपासनां निरूपयति। एतज्ज्ञानेन यथास्य कुले जायमानो वीरपुत्रो दीर्घायुष्ट्वाय कल्पयति। विराड्ब्रह्मणः समुपासनं हि लोकद्वयसमृद्धिं साधयति। भगवदुपासनेन लब्ध्या सा नक्षयं गम्यते अत आह वैराजं स्वरूपम्—

अन्तरिक्षोदरः कोशो भूमिबुध्नो न जीर्यति दिशो ह्यस्य स्रक्तयो द्यौरस्योत्तरं बिलꣳस एष कोशो वसुधानस्तस्मिन्विश्वमिदꣳश्रितम् ।।१।।

अयं सर्वकामः सर्वकर्मा सर्वगन्धः सर्वरसः सर्वरूपः सगुणसाकारः स्निग्धाकारः कौशल्याकुमारः ब्रह्माभिधेयो रामः वामनोऽपि विराट् तथोक्तं काठके **मध्ये वामनमासीनं विश्वे देवा उपासते** (कठ. १-३-५) सः कीदृशः? इत्यत आह, कोषाकारः सकलभुवनानां निखिलकल्याणगुणगणानाञ्च भाण्डागाररूपत्वात् कोषोपमेयता समुचितैव, अतस्तद्रूपकविधया विशिनष्टि। अन्तरिक्षोदरः अन्तर्भूतानि रिक्षाणि नक्षत्राणि यस्मिन् तत् अन्तरिक्षम्। रिकारे रेफश्रवणात् 'रोरि' इत्यनेन अन्तर्घटकरेफ लोपः व्यत्ययात् ढ्रलोपकार्याभावः। तत् अन्तरिक्षं नभः उदरं मध्यरन्ध्रं यस्य स अन्तरिक्षोदरः नाभ्या आसीदन्तरिक्षम्। इति श्रुत्यन्तरात्।

एवमेव आकाशमध्यो भगवान् विराट् भूमिबुघ्नः भूमिः पृथ्वी बुघ्नः मूलं चरणरूपं यस्य स भूमिबुघ्नः **बुघ्नोमूलं पदं चादिः** इति श्रीवैष्णवकोषात्। **पद्भ्यां भूमिः** इति मन्त्रार्णवाः। एवं नभो मध्यो भूमिपादः प्रभुः कोशः कारः सन् विराडाकारोऽपि नाशमेति नवेति संशयं छिन्दन्ती श्रुतिप्राह— सामान्याः खल्वाकारवन्तो नश्यन्ति किन्तु नायं तथा अत आह— न जीर्यति, न जीर्णो भवति नैव वयोहान्या युज्यते। स तु सदैव स्निग्धसरोजसम्मितसान्द्रपयोदसौभगनिखिलसौन्दर्य सारसर्वस्वसुन्दरश्यामलशरीर-भग्नकोटिकोटिकन्दर्पदर्पः तथा चाह ब्रह्मापि **नित्यं किशोर वयसम्** (बृहद् ब्रह्मसंहिता) न जीर्यति नैव नष्टो भवति। तथोक्तं श्रीगीतासु अजोऽपि सन्नव्ययात्मा (गीता ४-६) यस्य कोशाकारस्य विराजो भगवतः दिशः पूर्वादयः स्रक्तयः कोणानि कोशपक्षे विराट्पक्षे तु पार्श्वस्थानानि श्रोत्रादिरन्ध्राणि वा दिशः श्रोत्रात् इति मन्त्रात् **स्रक्ति स्त्रीकोणरन्ध्रयोः** इति वैष्णवकोषात्। एवमस्य उत्तरं बिलं ब्रह्मरन्ध्रं शीर्षभागः द्यौः स्वर्गलोकः **शीर्ष्णो द्यौः समवर्तत** इति श्रुतेः।

पद पाताल सीस अज धामा।
अखिल लोक अंग विश्रामा।।

(मानस २।१५।१)

एवं भूतः सकलविश्वमयः सः श्रुतिप्रसिद्ध एषः अयं भक्तिसम्बलितदिव्यदृष्टिगोचरः कोषः सौन्दर्यैश्वर्यमाधुर्यलावण्यकारुण्यतारुण्यसौशील्यसौलभ्यसौजन्यदयादाक्षिण्य प्रणतपालकत्वभक्तवात्सल्याद्यपरिमितकल्याणगुणगणभाण्डागाररूपः भगवान् कीदृशः? इत्यत आह— वसुधानः, वसूनि सकलधनानि धीयन्ते सन्निधीयन्ते यस्मिन् इति वसुधानः अत्र **करणाधिकरणयोश्च** इत्यनेन अधिकरणे ल्युट्। धीयते अस्मिन्निति धानः पुनश्च सम्बन्धविवक्षायां वसूनां धानः वसुधानः इति षष्ठी समासः अयं प्राचीनानुसारी पन्था। नव्यास्तु— वसु निजपदपद्मप्रणतजनप्रेमभक्तिधनं दधाति परमाश्रयतया बिभर्ति अकारणकरुणतया च पुष्णाति इति वसुधानः। अत्र बाहुलकात् कर्तरि ल्युट्। पुनश्च वसु-शब्दश्च शेषषष्ठीसमासः, अथवा वसुधां पृथिवीं आनयति जीवयति भूभारावतरणेन स वसुधानः, यद्वा वसुधां बलेराछिद्य इन्द्राय आनयति अर्पयति इति वसुधानः, अथवा वसुधां पृथिवीं हिरण्याक्षेण पातालं नीताम् आनयति उद्धरति निजदन्तकोट्या वाराहरूपो भगवान् स वसुधानः, अथवा वसुधायाः भूमेः सुता इति वसुधासुता तामपि धनुर्भङ्गेन मिथिलापुरात् रावणवधेन लंकापुरात् आनयति स वसुधानः। एवमेव वसुधासुताम्

आनयति जीवयति निजनामघटकवर्णप्रहरीद्वयेन यः स वसुधानः, उभयत्र सुता शब्दस्य लुप्तत्वेऽपि पूर्वपदस्य लुप्यमानार्थाभिधायित्वादर्थसंगतिः। वसुधासुता हि रामनाम्नैव अशोकवाटिकायाममनायि। तथोक्तं श्रीहनुमता मानसे—

नाम पाहरु दिवसनिशि, ध्यान तुम्हार कपाट।
लोचन निज पद जन्त्रित, प्रान जाहि केहिबाट।।

(मानस ५.३०)

तस्मिन् विराजि इदं विश्वं प्रत्यक्षं जगत् विश्वं सम्पूर्णं श्रितम्, आधारीकृत्य स्थितम्।।श्रीः।।

भगवतः स्त्रक्तिरूपाणां दिशां विभागं दर्शयति—

तस्य प्राची दिगजुहूर्नाम सहमाना दक्षिणा
राज्ञीनाम प्रतीची सुभूता नामोदीची तासां वायुर्वत्सः
स य एतमेवं वायुं दिशां वत्सं वेद न पुत्ररोदꣳ रोदिति
सोऽहमेतमेवं वायुं दिशां वत्सं वेद मा पुत्ररोदꣳ रुदम् ।।२।।

तस्य भगवतः स्त्रक्तिभूता प्राचीदिक् पूर्वादिशा जुहूः हूयते आहूयते ब्रह्म यामभिमुखीकृत्य सा जुहुः, जुह्वति अग्निहोत्रं यदभिमुखं वा यासा जुहूः अत्राधिकरणे उण्प्रत्ययः, श्लुभावः। तदनुगुणकार्यं च पूर्वदिश्येव ब्रह्मणः समाह्वान् जायते। अतएव वेदव्यासो देवकीं तुलसीदासश्च कौशल्यां प्राचीदिशैवोपमिमीते तद्यथा—

देवक्यां देवरूपिण्यां विष्णुः सर्वगुहाशयः।
आविशसीत् यथाप्राच्यां दिशीन्दुरिव पुष्कलः।।

(भा. १०.३.९)

मानसेच—

बंदउ कौशल्या दिसि प्राची।
कीरति जासु सकल जगमाची।।
प्रगटेउ जहँ रघुपतिससि चारु।
विस्वसुखद खलकमलतुषारु।।

(मा. १।१६।४।५)

दक्षिणा अवाची सहमाना सहन्ते चण्डातपं ग्रीष्मे मध्येह्नि सूर्यस्य यस्यां सा यथार्थनामा। प्रतीची पश्चिमादिक् राज्ञी वरुणस्य राज्ञः तत्रपत्नीवोपचारात् तथाभूता, अथवा राजते सायन्तनसूर्यारुणिम्ना, अथवा रज्यते नक्षत्रज्योतिषा राजते च सायन्तने स्वामभिमुखीकृत्यसन्ध्यामुखद्विजैः, उदीची उत्तरादिक् तद् विभूतिमयी, अथवा सुः परब्रह्माभिधानः श्रीरामः भूतः पुत्ररूपेणाविर्भूतः दशरथगृहेयस्यां सा सुभूत। यथोक्तं मानसे—

जन्मभूमि मम पुरी सुहावनि।
उत्तरदिसि बह सरयूपावनि।।

(मा.उ. ३.४.५)

आसां दिशां जुहुः सहमानाराज्ञीसुभूतानाम्नीनां वायुः समीरणो वत्सः शिशुरिव यथा शिशुरङ्के खेलति मातुः तथैव वायुर्वाति दिशि दिशि। यथा वत्सः मातृस्तन्यं धयति तथैवायं दिगमृतं पिबति। एवं यः दिशां वत्सरूपं वेद जानाति सः पुत्ररोदं पुत्रविषयकक्रन्दनं न रोदिति नैव विलपति, तस्यसमक्षं पुत्रो न म्रियते। स्वानुभवमाह सोऽहम् एतं वायुं दिशां वत्सरूपं वेद जानामि अत एव पुत्ररोदं मा रुदम्, न पुत्र विषये रोदनं कृतवान् जीवित्पुत्रोऽभवमिति भावः।।श्रीः।।

अथ पञ्चभिर्मन्त्रैः प्राणादिप्रपत्तिप्रकारमाह—

अरिष्टं कोशं प्रपद्येऽमुनामुनामुना प्राणं प्रपद्येऽमुनामुनामुना भूः प्रपद्येऽमुनामुनामुना भुवः प्रपद्येऽमुनामुनामुना स्वः प्रपद्येऽमुनामुनामुना।।३।।

अरिष्टं सकलमंगलमयं कोशं करुणाकोशपरमात्मानम् अमुना पुत्रेण हेतुना प्रपद्ये, त्रिरुक्तिः जाग्रत्स्वप्नसुषुप्तिस्थहेतुकप्रपत्तिद्योतिका एवं प्राणं भूः भुवः स्वः इति चत्वारि भगवतो नामरूपलीलाधामप्रतीकानि तिसृषु अवस्थाषु पुत्रजीवातवे प्रपद्ये।।श्रीः।।

अथ न चतुर्भिर्मन्त्रैः चतुर्णां प्रपत्तिकर्मणां स्वयमेव श्रुतिर्व्याख्यानं करोति—

स यदवोचं प्राणं प्रपद्य इति प्राणो वा इद१ं।
सर्वं भूतं यदिदं किञ्च तमेव तत्प्रापत्सि।।४।।

प्राणप्रपत्तिमुत्पादयति, 'सः प्रपत्ताहं प्राणं प्रपद्ये 'इति पूर्वमन्त्रे यत् अवोचम् अकथयं तस्यायं हेतुः यत्किंच भूतं सत्तामात्रम् इदं सर्वं प्राणएव प्राणपरिणामः तत्

तस्मात् कारणात् तं प्राणमेव प्रापत्सि शरणमगमं प्राण एवभगवन्नामप्रतीकं प्राणरक्षकत्वात्।।श्रीः।।

अथभूः प्रपत्तिं सोपपत्तिमाह—

अथ यदवोचं भूः प्रपद्य इति पृथिवीं ।
प्रपद्येऽन्तरिक्षं प्रपद्येदिवं प्रपद्य इत्येव तदवोचम् ।।५।।

अथ यत् भूः प्रपद्ये इति अवोचं तत्र भूपदेन पृथिवीमुपलक्षणतया अन्तरिक्षं दिवं एवं लोकतत्रयं भगवद्रूपं प्रपद्ये इति अवोचम् इत्युपादिशम्। अथ भुवः प्रपत्तिं साधयति—

अथ यदवोचं भुवः प्रपद्य इत्यग्निं प्रपद्ये।
वायुं प्रपद्य आदित्यं प्रपद्य इत्येव तदवोचम्।।६।।

अथ भुवः अन्तरिक्षं प्रपद्ये इति यदहमवोचं तदुपलक्षणतया अग्निं वायुम् आदित्यम् इति, त्रीनपि भगवद्विभूतिरूपान् लीलोपकरणविशेषान् प्रपद्ये प्रपन्नो भवामि। इति एतदभिप्रायेण अवोचं प्रपत्तिं प्रत्यशृण्ववम्।।श्रीः।।

अथ स्वः प्रपत्तिं सोपपत्तिं निरूपयति—

अथ यदवोचँ्स्वः प्रपद्य इत्यृग्वेदं प्रपद्ये यजुर्वेदं प्रपद्ये।
सामवेदं प्रपद्य इत्येव तदवोचं तदवोचम्।।७।।

अथ यत् स्वः प्रपद्ये इति तृतीये मन्त्रे अवोचम् अकथयं तत् उपलक्षणतया ऋग्वेदं यजुर्वेदं सामवेदं प्रपद्ये भगवद्धाम् रूपं प्रपत्तिविषयीकरोमि इति अनेनाभिप्रायेण तत् अवोचम् अकथयम्। द्विरुक्तिः समाप्तिसूचिका।।श्रीः।।

इति छान्दोग्योपनिषदि तृतीयाध्याये पञ्चदशेखण्डे श्रीराघवकृपाभाष्यं सपूंर्णं।।

।। श्रीराघवोः शन्तनोतु ।।

अथ षोडशः खण्डः

इदानीं निजदीर्घायुष्याय आत्मानमेव यज्ञप्रतीकत्वेन समुपासितुं श्रुतिर्निर्दिशति। दीर्घायुष्ट्वं हि नैरुद्ध सहितं भगवत्भजनाय परमेश्वरकैंकर्याय च सदुपयोगं भजते। जीवो हि परमात्मदासः स च सरोगोऽल्पायुः सन् न पूर्णतया भगवत्कैङ्कर्यकरणे घटते। तस्मात्

महीदासानुभववर्णनेन श्रुतिः सुस्पष्टं षोडशाधिकशतवर्षजीवनाय जपादिप्रक्रियामुपदिशति। अत्रायुषो विभागास्त्रयः, प्रथमश्चतुर्विंशतिवर्षात्मकः स च प्रातःकालिकगायत्र्यसवनसमः। यतो हि गायत्रीछन्दसि चतुर्विंशतिरक्षराणि वयसः प्रथमभागत्वात् प्रातःकालिक सवनतुल्यता। इदं हि वसुदेवताकम्। मध्यावस्थाचतुश्चत्वारिंशद्वर्षात्मिका, सा च मध्यत्वात् माध्यन्दिनसवनतुल्या अत्र संख्यापि त्रिष्टुभा तुल्या त्रिष्टुप्छन्दसि चतुश्चत्वारिंशदक्षराणि अत्र रुद्रादेवता। एवं तृतीयो विभागः अष्टचत्वारिंशत् वर्षात्मिकः चरमत्वात् तृतीयसवनसमत्वं जगतीछन्दसः अष्टचत्वारिंशदक्षराणाम् एतद्वर्षसंख्यया सादृश्यम् अत्रादित्या देवता। एवं यथाक्रमं वसुरुद्रादित्यानां समाराधनेन तेषां कृपया लब्धनैरुज्यसहितशताधिकषोडशवर्षायुः भगवन्तं सुखेनसमाराधितुं पारयतीति खण्डार्थः। अक्षरार्थस्तु संक्षेपतोऽनुपदं व्याख्यायते।

पुरुषो वाव यज्ञस्तस्य यानि चतुर्विँ्शतिवर्षाणि
तत्प्रातःसवनं चतुर्विँ्शत्यक्षरा गायत्री गायत्रं
प्रातःसवनं तदस्य वसवोऽन्वायत्ताः प्राणा
वाव वसवं एते हीदँ् सर्वं वासयन्ति ।।१।।

पुरुषः, परमार्थसाधनरूपपुरुषार्थसम्बन्धः पुरि शरीरे निश्चयेन शयनशीलः, वाव निश्चयार्थो निपातः, यज्ञः यजनशीलः इज्यमानश्च यजते इज्यते इति यज्ञः। इत्थं व्युत्पत्तिद्वयदर्शनात् तस्य यज्ञरूपस्य पुरुषस्य प्रत्यगात्मनः जीवनस्य प्रारम्भिकाणि चतुर्विंशति वर्षाणि तानि एव प्रातःसवनं गायत्रं सा च चतुर्विंशत्यक्षरा चतुर्विंशतिः अक्षराणि यस्याम् इति बहुव्रीहिः। अत्र वसवः प्राणाः प्राणाधिष्ठितृदेवताः वसन्त्यस्मिन्शरीरे वासयन्ति च इदम् इति व्युत्पत्तिद्वयात्।।श्रीः।।

अथ प्रार्थनाप्रकारमाह—

तं चेदेतस्मिन्वयसि किञ्चिदपतपेत्स ब्रूयात्प्राणा
वसव इदं मे प्रातःसवनं माध्यन्दिन सवन
मनुसंतनुतेति माहं प्राणानां वसूनां मध्ये यज्ञो
विलोप्सीयेत्युद्धव तत एत्यगदो ह भवति ।।२।।

तम् आत्मानं यज्ञं यजन्तम् एतस्मिन् प्रातः सवनरूपे प्रथमे वयसि चेत् यदि किञ्चित् मृत्यरूपं व्याधिरूपं वा उपतपेत् रोगग्रस्तं कुर्यात् तदा स ब्रूयात् यष्टा मन्त्रमिमं

ऽतेन्— हे प्राणा:! वसव: प्राणदेवता: मे मम यष्टु: इदं प्रात:सवनं प्रथमवयोरूपं माध्यान्दिनम् अनु अत्र तृतीयार्थे इत्यनेन द्वितीया। मध्यवयोरूपेण सवनेनेत्यर्थ:। संतनुत संयोजयत। अहं यज्ञ: यज्ञकारी जीवात्मा प्राणानां वसूनां प्राणाधिष्ठातृदेवतानां युष्माकं मध्ये मा विलोप्सीय न नष्टो भवेयम्। अथवा अत्रभावलक्षणषष्ठी। युष्माकं रक्षकत्वे सति न विलुप्तो भवेयम् इत्युक्त्वैव मन्त्रं जप्त्वा तत: एत्य तस्माद्रोगान् मुक्त्वोभूत्वा अगदो भवति मुक्तो भवति॥श्री:॥

अथ मध्यमवय: मध्यसवनेन सह संमितयति—

अथ यानि चतुश्चत्वरिꣳशद्वर्षाणि तन्माध्यन्दिनꣳ
सवनं चतुश्चत्वारिꣳशदक्षरा जिष्टुप्त्रैष्टुभं
माध्यनन्दिनꣳसवनं तदस्य रुद्रा अन्वायत्ता:
प्राणा वाव रुद्रा एते हीदꣳसवꣳरोदयन्ति ॥३॥

यानि चतुर्विंशतेरनन्तरभाविनि माध्यन्दिनं मध्येदिने संपादनीयं त्रैष्टुभं त्रिष्टुप्संबन्धि अन्वायत्ता: अनुगता:, एते रुद्रा: रोदयन्ति रुदन्ति च ये ते रुद्रा: इति व्युत्पत्ते: तेषां निसर्गसिद्धक्रूरस्वभावात्॥श्री:॥

अथ रुद्रप्रार्थनाप्रकारमाह—

तं चेदेतस्मिन्वयसि किञ्चिदुपतपेत्स ब्रूयात्प्राणा
रुद्रा इदं मे माध्यन्दिनꣳ सवनं तृतीयसवन-
मनुसंतनुतेति माहं प्राणानां रुद्राणां मध्ये
यज्ञो विलोप्सीयेत्युद्धैव एत्यगदो ह भवति ॥४॥

ब्रूयात् रुद्रान् प्रार्थयेत् तृतीयं सवनमनु तृतीयेन सवनेन सह ह एव निश्चयेन तत: तस्मात् परितापकात् उत एत्य उपरिगत्वा उद्धव इत्यस्य उत्ह एव इति विग्रह:॥श्री:॥

अथ तृतीयं व्याचष्टे—

अथ यान्यष्टाचत्वारिꣳ शद्वर्षाणि
तत्तृतीयसवनमष्टाचत्वारिꣳ शदक्षरा जगती
जागतं तृतीयसवनं तदस्यादित्या अन्वायत्ता:
प्राणा वावादित्या एतेहीदꣳ सर्वमाददते ॥५॥

यानि अष्टषष्टिवर्षादनन्तरभावीनि अष्टाचत्वारिंशत् अक्षराणि यस्यां तथा भूता जगत्या इदं जागतम् इदं दृश्यमानम् आदित्याः विवश्वदादयः आददते गृहणन्ति।।श्रीः।।

अथादित्यप्रार्थनाप्रकारमाह—

तं चेदेतस्मिन्वयसि किञ्चिदुपतपेत्स ब्रूयात्
प्राणा आदित्या इदं मे तृतीयसवनमायुरनु-
संतनुतेति माहं प्राणानामादित्यानां मध्ये यज्ञो
विलोप्सीयेत्युद्धैत तत एत्यगदो हैव भवथि ।।६।।

स ब्रूयात् यज्ञकर्त्ता आदित्यान्प्रार्थयेत् आयुरनु आयुषा सह मा विलोप्सीय न लुप्तो भवेयं लुप्सधातुश्छान्दसः आत्मनेपदी लोपार्थः एतत् प्रयोगः, गदो रोगः न विद्यते यस्मिन् सोऽगदः।।श्रीः।।

अथ प्रकरणमुपसंहरति—

एतद्ध स्म वै तद्विद्वानाह महिदास ऐतरेयः स किं म एतदुपतपसि योऽहमनेन न प्रेष्यामीति स ह षोडशं वर्षशातमजीवत्प्र ह षोडशं वर्षशतं जीवति य एवं वेद ।।७।।

ह निश्चयार्थः स्म प्रसिद्ध्यर्थः एतत् इदं रहस्यं तद्विद्वान् सिद्धान्तज्ञाता ऐतरेयः इं जगतकामकेलिं तरति स्वपुत्रमपि तारयति या सा इतरा कापि ऋिषिपत्नी, इतरायाः अपत्यं पुमान् ऐतरेयः महिदासः महीसुतायाः सीतायाः दासः इति महिदासः उत्तरपदलोपो बाहुलकादीकारह्रस्वश्च। कथनप्रकारमाह— किं याम् उपतपसि कथं मां क्लेशयति, अनेन त्वत्कृतत्रितापेन नाहं प्रेष्यामि नाहं मरिष्यामि, इति इत्थं निषेध्य षोडशं षोडस सन्ति यस्मिन् तथा भूतं षोडशाधिकमिति भावः वर्षशतं शताब्दं जीवति सुखं प्राणिति।।श्रीः।।

इतिच्छान्दोग्योपनिषदि तृतीयाध्याये षोडशेखण्डे श्रीराघवकृपाभाष्यं संपूर्णम्।

अथ सप्तदशखण्डः

भूयस्तमेव पुरुषयज्ञं पारिशेष्यतः रूपकविधिना निरूपयति—

स यदशिशिषति यत्पिपासति यन्न रमते ता अस्य दीक्षाः ।।१।।

न खलु दीक्षामन्तरा यज्ञः प्रभवति स्थातुम् अतस्तत् दीक्षां रूपयति— पुरुषमनोवृत्तित्रयेण यज्ञे दीक्षा खलु क्षुत्पिपासा क्रीडाभावसमन्विता भवति, यज्ञेदीक्षितः क्षुत्पिपासे सहते भोगेषु न रिरंसते, तथैवात्र सामान्येन दीक्षागुणधरयावत्तया मानसवृत्तित्रितयमेव पुंसो दीक्षात्वेन व्यपिदिशति, शैत्यादि सह पुरुषरूपयज्ञः यत् **क्रियाविशेषणमेतत्** वृत्तित्रयं विशिनष्टि अशिशिषति अशितुमिच्छति बुभुक्षत इति भावः। **यच्च पिपासति** जलं पातुमिच्छति यच्च न रमते ताटस्थ्येन न क्रीडति तदेव **क्षुत्तृट्क्रीडाभ्यो** विरतिरेवास्य दीक्षा।।श्रीः।।

यज्ञेषु उपषदनियमो भवति येषु ईषत् पयांसि स्वल्पान्यशनानि च दीयन्ते याजकाय तत् सामान्यात् पुरुषाशनपानरमणानि औपसदैः संदृश्यन्ते यदिति—

अथ यदश्नाति यत्पिबति यद्रमते तदुपसदैरेति ।।२।।

यदिति पूर्ववत् क्रियाविशेषणं धात्वर्थत्रयं प्रकरोति—सः पुरुषः यदश्नाति भुङ्क्ते, यत पिबति पानं कुरुते, यद्रमते उपलब्धैरिष्टवस्तुभिः क्रीडति, तत् उपसदैः पयोव्रतलब्धनियमसुखावहभोजनपानैः एति सादृश्यं गच्छति इति भावः। यथोपसदेषु यज्ञव्रतकर्षितो ह्यल्पमपि समभ्यवहारं लब्ध्वा प्रसीदति तथैवात्र क्रियात्रये द्वयोरित्थं साम्यम्।।श्रीः।।

भूयः क्रियात्रयं स्तुतशस्त्रैःरूपयति स्तुतशस्त्राणि यज्ञे मखविश्रामप्रसन्नता व्यंजकानि वैदिकानि स्तोत्राणि—

अथ यद्धसति यज्जक्षति यन्मैथुनं चरति स्तुतशस्त्रैरेव तदेति ।।३।।

एवं यद्धसति हासं करोति, यद् जक्षति दानंकरोति यन्मैथुनमाचरति पाणिगृहीत्याभार्यया सवर्णया धर्मेण द्वन्द्वभावेन युज्यते तदेव ह्यस्य स्तुतशस्त्रैः प्रसन्नतासूचकवैदिकस्तोत्रैः एति सादृश्यं गच्छति। आशुक्रिया स्तुतशस्त्रजन्यप्रसन्नता साम्यात्।।श्रीः।।

अथदक्षिणां रूपयति—

अथ यत्तपो दानमार्जवमहिंसा ।
सत्यवचनमिति ता अस्य दक्षिणाः ।।४।।

दक्षिणासु पुण्यजनकतावच्छेदकता तत्साम्यं च पुरुषनिष्ठेषु तपोदानार्जवहिंसासत्यवचनेषु तथा हि तपः गीतोक्तं सात्विकं तपस्त्रयं कृच्छ्रचान्द्रायणादि व्रतम् इष्टदिदृक्षाजनितविरहतापो वा, दानं निस्वार्थमतिसर्जनं, यथावर्णं यथाश्रमम्

आर्जवं सारल्यम् इन्द्रियवृत्तिकौटिल्याभावो वा, अहिंसा श्रुतिविहितत्वे सति परपीडनप्रतियोगिकाभावः '**मा हिंस्या सर्वाभूतानि**' इति श्रुतेः सत्यवचनं भूतार्थवाद एवं पुण्योत्पादनतुल्यतया दक्षिणासाम्यम्।।श्रीः।।

एवं यज्ञसवनं यज्ञावभृथमपि पुरुषजन्ममरणाभ्यां तुलयति—

तस्मादाहुः सोष्यत्यसोष्टेति
पुनरुत्पादनमेवास्य तन्मरणमेवावभृथः।।५।।

तस्मात् अतएव शोष्यति सूतवती भविष्यति अशोष्ट इयं बालकं जनित्तवती इति सवनसमान एव व्यवहारो भवति। पुनः उत्पादनं जन्ममरणम् अयम् अवभृथः यज्ञान्ताभिषेकः अवभृथेन यथा यज्ञसमाप्तिः तथैवमरणेनापि प्राक्तनजन्मकार्यकालसमाप्तिः ।।श्रीः।।

यज्ञदर्शनाचार्यपरम्परामाह—

तद्धैतद्घोर आङ्गिरसः कृष्णाय
देवकीपुत्रायोकूत्वोवाचापिपास एव स बभूव
सोऽन्तवेलायामेतत्रयं प्रतिपद्ये ताक्षितमस्यच्युतमसि
प्राणसꣳ शितमसीति तत्रैते द्वे ऋचौ भवतः।।६।।

ह निश्चययेन तत् एतत् प्रसिद्धं त्रयं यज्ञे विद्या गृस्यसूचकं घोरः घोरनामा घोरतपस्वान् उग्रस्वभावाच्च मध्ये तस्य घोरनाम। आङ्गिरसः अङ्गिरोगोत्रः, अङ्गिरसः गोत्रापत्यं पुमान् आङ्गिरसः देवकी पुत्राय कृष्णाय यद्यपि मत्तः पूर्वभाष्यकृतः सर्वेऽपि अस्य वाक्यखण्डस्य सामान्यजिज्ञासुपरकतया व्याचक्षते। किन्त्वहम् इदं मन्त्रखण्डं वसुदेवनन्दनं परब्रह्मपरमात्मकृष्णपरकमेव मन्ये तथैव च व्याचक्षे। ननु निरतिशय-ज्ञानसम्पन्नस्य सदैकरसस्य भगवतोज्ञानानुपत्तिरिति चेत्, सत्यम्। लोकलीलायां गृहीतमानवतनुः परमात्मनः सम्पूर्णमर्यादितमानवचरित्राणां सर्वथैवोपपत्तेः। तथोक्तं भागवते—

नृणां निःश्रेयसार्थय मानुषीं तनुमास्थितः।
भजते तादृशीः क्रीडाः या श्रुत्वा तन्मयो भवेत्।।

(भागवत १०।३३।३७)

अत एव भगवतः कृष्णस्य विद्यध्ययनशत्रुदलनपार्थसाहाय्यकूटनीति-व्यापारदारक्रियासन्तानोत्पत्त्यादिकं सर्वं संगच्छते। तस्मात् सर्वज्ञोऽपि गुरुकुलमर्यादां मिमण्डयिषुः यज्ञविद्याम् आङ्गिरसादधिगच्छतीति सूपपन्नम्। एवं देवकीपुत्राय कंसपितृव्यपुत्रीदेवकीसुताय कृष्णाय वासुदेवाय उक्त्वा निवेद्य उवाच। किमुवाच? इत्यत आह— भो कृष्ण! अन्तकाले निजलीलासंवरणसमये एतत्त्रयं वक्ष्यमाणं मन्त्रित्रितयं प्रतिपद्यत अत्र 'व्यत्ययेन प्रथमपुरुषः। प्रतिपद्येथा कुत? इत्यत आह, स त्वम् अन्तवेलायाम् अन्तः सलिलान्तः सागरः तस्य वेलातटम् इति अन्तवेला तस्याम् अन्तवेलायां समुद्रतटे प्रभासक्षेत्र इति भावः। एतत्त्रयं प्रतिपद्यथाः। त्रिकालावाधितज्ञानमपि श्रेष्ठचरितप्रामाण्यदर्शनाय श्रुतिरुपदिशति। ननु श्रुतेरपौरुषेयत्वे कृष्णस्य च द्वापरीयत्वे नैतत् संगच्छेतेति चेन्न, त्रिकालदर्शित्वादृषीणां तत्र घटनासु कालपरिच्छेदत्वावच्छिन्न-प्रतियोगिकाभाव एव अत एव श्रुतौ समग्ररामचरितस्य समग्रकृष्णचरितस्य प्रत्येक कथायाः सुस्पष्टं मन्त्रेषूपलभ्यत इति स्वतन्त्रप्रबन्धे निरूयिष्यामः। किं प्रतिपद्ये? इति चेदाह, लोकलीलामिमां संवृण्वानो लोकाभिरामतनुं सोपसमुपसंहरन् इत्थं संभावयेथाः, यत् अक्षितमसि न क्षितं नाशः यस्य तत् अक्षितम् असि व्यत्ययेन मध्यमपुरुषः। वस्तुतस्तूत्तमपुरुषार्थः कर्ता प्रतिपद्यमानस्तूत्तमपुरुषत्वात्। एवम् अक्षितमसीत्यस्य अक्षीणं यदुवंश्याणां युध्येऽपि प्राह्रियमाणमपि न कैश्चित्च्छेत्तुं शक्यम्। अतः कञ्चिदपि प्रहर्तारं प्रति निर्वैरबुद्ध्या अक्षितमसीति भावना। द्वितीयम् अच्युतमसि गृहस्थाश्रमे अष्टोत्ततरषोडशसहस्रवल्लभासु विपुलसंततिपरम्पराम् उत्पाद्यापि आत्मनो रेतश्च्युतिं मा विभावयेथाः अतः अच्युतमसि। अखण्ड-ब्रह्मचर्यं ब्रह्मतत्वमस्मीति भावः। प्राणसंशितमसि, '**प्राणस्तुप्रणवे प्राणे** इति कोषात्। प्राणे सूक्ष्मतमे परब्रह्मतत्वे संस्थितं स्थितिमते नास्ति मे विशालसाम्राज्यद्वारावती कनकभवन पुत्रकलत्रादिषुरर्वहनिन्धः। एतच्छ्रुत्वा स कृष्णः इतरवधातः अपिपासः बभूव अतृष्णः? समभवत्। तयैव विदित विवित्सितत्वात् गोलोके भगवतो देवक्यादीनां च तल्लीलानां नित्यसत्वात् नैतत् विद्योपदेशस्य कदाप्यर्वाचीनत्वमवधेयं तदेतद् यज्ञविद्याफलप्रतिपादिके ऋचौ मन्त्रौ भवतः विद्येते।।श्रीः।।

मन्त्रद्वयमाह, तत्र च सूर्यज्योतिनिरूपणम्,—

आदित्प्रत्नस्य रेतसः। उद्वयं

तमसस्परि ज्योतिः पश्यन्त उत्तर॑ँस्वः

पश्यन्त उत्तरं देवं देवत्रा सूर्यमगन्म
ज्योतिरुत्तममिति ज्योतिरुत्तममिति ।।७।।

पूर्वमन्त्रे व्याख्यातं तदेतद् ऋचौ भवतः किन्त्वत्र मूले प्रथमा यो ऋचः तृतीयांशो दृश्यते तत्र अंसद्वयं नोपलभ्यते लिपिप्रमादात् वा संक्षेपी करणात्, वा जानकीजानिर्जानातु। परन्तु वयं वेदादुधृतामिमां सम्पूर्णां समुपस्थाप्य व्यांचक्ष्महे। आदित्प्रत्नस्य रेतसो ज्योतिः पश्यन्ति वासरम्। परो यदीध्यते दिवि इति प्रथमाऋक् एतदन्वितार्थः। प्रत्नस्य चतुर्मुखादपि प्राचीनस्य रेतसः जगत्कारणस्य प्राणिनां बीजभूतस्य् भगवतः **'बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम्।** (गीता ७।१०) इति गीतोक्तेः। तादृशं तस्य सम्बन्धिज्योतिः परमं प्रकाशम् ईदृशं वासरं दिनम् इव यत् दिवेव देदीप्यमानम् अन्धकाराभावात्। अथरा वासं प्रणतेभ्यः परमात्मनि निवासं राति तदातीति वासरं सर्वभूतनिवासप्रदं यच्च परः व्यत्तयात् पुस्त्वं ब्रह्मादितोऽपि परिभूतमिति भावः। **'न तत्र सूर्यो भाति न चन्द्रतारकम् नेमा विद्युतो भान्ति कुतो यमग्निः इति श्रुतेः** (कठ. १-३-१३) यत् दिवि परमप्रकाशमाने साकेतलोकेऽपि इध्यते देदीप्यमानमास्ते। तज्ज्योतिः एतद्यज्ञरहस्यविदः पश्यन्ति एषः प्रथमर्चार्थः। अथ द्वितीयायाः आ शब्दस्य च आदरार्थः, तकारः इच्छब्दस्य प्रसन्नार्थकनिपातौ। वयं यज्ञरहस्यविदः तमसः अन्धकारादपि परि परस्ताद्वर्तमानम् उत्तरम् उत्कृष्टम् आदित्यमण्डले वर्तमानम् एवंभूतः ज्योतिः पश्यन्तः साक्षात् कुर्वाणाः अथ च तदेव सूर्यमण्डलस्य ज्योतिर्भूतसीताराममयं ब्रह्म स्वः अत्रापि व्यत्ययेन पुल्लिंगता। वस्तुतस्तु ज्योतिर्विशेषणत्तया तृतीयत्वमेव, स्वम् आत्मीयम् अन्तर्यामिणम् उत्तमं क्षराक्षराभ्यामुत्कृष्टम् उद्गतं तमं येन वा तदुत्तमं क्षराक्षरपरमात्मश्रेष्ठं ज्योतिः पश्यन्तः आ उद्गम आदरेण भगवत् सामीप्यं प्राप्तवन्तः ज्योतिरुत्तममिति द्विरुक्तिस्तु आदरार्था। शकलसमाप्तिसूचिका च।।श्रीः।।

इतिच्छान्दोग्योपनिषदि तृतीयाध्याये सप्तदशेखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।

अथाष्टादशखण्डः

इदानीं यज्ञपुरुषहृदयाकाशवर्तिनः सगुणसाकारस्य सकलनिष्कल्याणगुणगणागारस्य कौसल्याकुमारस्य ब्रह्मणः शुभनिवासस्थलभूतेहृदयाकाशे मनस्त्वाकाशत्वो-भयधर्णाविच्छिन्नत्वात् प्रत्येकमवच्छेदकदृष्ट्या ब्रह्मोपासनां निरूपयति। सा च द्वेधा

आध्यात्मिकी । आधिदैविकी चसू तत्र मनोमयी आध्यात्मिकी आत्मपदार्थशरीरसुक्ष्मान्तः करणमनःसम्बन्धत्वात् आकाशमयी चाधिदैविकी तत्रस्थदेवताविषयत्वात्,

मनो ब्रह्मेत्युपासीतेत्यध्यात्ममथाधिदैवतमाकाशो-
ब्रह्मेत्युभयमादिष्ट भवत्यध्यात्मं चाधिदैवतं च ।।१।।

मनः मनुते अवबुध्यते सर्वं व्यवहारं परब्रह्म वा समनुभूयते येन तन्मनः स्वान्तम्। ब्रह्म परब्रह्मविभूतिः इति अवधारणास्वरूपनिर्देशः उपासीत् भगवत् विभूतितया मनो भजेत इति भावः। नैवेदं विगर्हेत तत्र ब्रह्मभावव्यतिरेकेणानिष्टफलकत्वम् इति, इत्थम् अध्यात्मम् अव्ययीभावेनाव्ययोऽयम्, आत्मनीत्यध्यात्मम् आत्मविषयकमुपासनमित्यर्थः। अथ आकाशः ब्रह्म तद्वत सौक्ष्म्यव्यापकत्वसर्वापरिच्छिन्नत्वनीलत्वादिसाम्यात् उपासीत इति अनुषज्जते इत्यधिदैवतं दैवविषयकमुपासनम्। एवम् अध्यात्ममधिदैवतम् इति उभयम् उपासनद्वयं मनःआकाशदृष्ट्या आदिष्टम् उपदिष्टं श्रुत्या इति शेषम्।।श्रीः।।

अथ मनो दृष्टावाकाशदृष्टौ च ब्रह्मणश्चतुष्पादोपचारं प्रपञ्चयति। मन्त्रत्रितयेन,—

तदेतच्चतुष्पाद्ब्रह्म। वाक्पादः प्राणः पादश्चक्षुः
पादः क्षोत्रं पाद इत्यध्यात्मम्। अथाधिदैवतमग्निः
पादो वायुः पाद आदित्यः पादो दिशः पाद
इत्युभयमेवादिष्टं भवत्यध्यात्मं चैवाधिदैवतं च ।।२।।

तत् एतत् मनोमयं ब्रह्म उपासनीयं परमेश्वरतत्वं चतुष्पाद यथा विशुद्धं श्रीसाकतेनिलयं ब्रह्म पादचतुष्टयसम्पन्नं भवति, तथैव प्रतीकभूतं मनोमयमाकाशमयं च ब्रह्मेति भावः । वाक् पादः मनो ब्रह्मणो विचारव्यक्तीकरणात् प्राणः घ्राणः प्रकर्षेण अनिति सितीति व्यत्पत्तेः । गन्धमाध्यमत्वात् चक्षुः पादः रूप साक्षात्कारकरणत्वात् श्रोत्रं पादः शब्दग्राहकत्वात् । अथ अधिदैवतं वर्णयति, आकाशरूपब्रह्मणोऽपि अग्निवाय्वादित्यदिशः पशूदरलग्नपादा इव आकाशसम्बन्धत्वात् पादः इति उभयं मनो नभो रूपं ब्रह्म चतुष्पाददः वदिति आदिष्टं भवति श्रुत्या निर्दिष्टं विद्यते सार्वकालिकतया तस्या अपौरुषेयत्वात्।।श्रीः।।

भूयस्तमेवार्थं प्रपञ्चयति— **वागेव ब्रह्मणश्चतुर्थः पादः ।**
सोऽग्निना ज्योतिषा भाति च तपति च ।
भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद ।।३।।

अथ अध्यात्मब्रह्मणः मनसः अधिदैवतब्रह्मणाकाशेन सम्बन्धनिबन्धनामेकतां दर्शयति- मनोब्रह्मणः चतुर्थः वागभिधानः पादः आकशपादेनाग्निना करणीभूतेन पादेन भाति प्रकाशते। तपति तापं गच्छति। अतएव वाग्दैवतमग्निरुच्यते य एवं वेद सोऽपि भासा तपसा यशसा तेजसा च सम्पृच्यते इति फलम्।।श्रीः।।

एवं मन्त्रत्रयेण मनो ब्रह्मणः पादत्रयस्य आकाशब्रह्मणः पादत्रयेण प्रकाशकत्वं तापकत्वं च तद्वेतुः तत्समानफलकत्वं निर्दिश्यते त्रिभिः—

प्राणाः एव ब्रह्मणश्चतुर्थः पादः
स वायुना ज्योतिषा भाति च तपति च ।
भाति च तपति च कीर्त्या
यशसा ब्रह्मवर्चसेन च एवं वेद ।।४।।

चक्षुरेव ब्रह्मणश्चातुर्थः पादः
स आदित्येन ज्योतिषा भाति च ।
तपति च। भाति च तपति च कीर्त्या
यशसा ब्रह्मवर्चसेन य एवं वेद ।।५।।

श्रोत्रमेव ब्रह्मणश्चतुर्थः पादः
स दिग्भिर्ज्योतिषा भाति च तपति च ।
भात्ति च तपत्ति च कीर्त्या यशसा
ब्रह्मवर्चसेन य एवं वेद य एवं वेद ।।६।।

प्राणश्च वायुना चक्षुरादित्येन श्रुतिर्दिशाज्योतिषा भात्ति तपति तज्ज्ञातुश्च तथा फलं दिरुक्तिरादरार्थाः।।श्रीः।।

इतिच्छान्दोग्योपनिषदि तृतीयाध्यायेऽष्टादशखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।

अथैकोनविंशः खण्डः

इदानीं प्रत्यक्षब्रह्मणः भगवत आदित्यस्य आदित्यमण्डलस्थस्य वा सीतारामम्यब्रह्मणो वा समुपासनं विधित्वेनोपदिशति—

आदित्यो ब्रह्मेत्यादेशस्तस्योपव्याख्यानमसदेवेदमग्र आसीत् तत्सदासीत्तत्समभवत्तदाण्डं निरवर्तत सत्संवत्सरस्य मात्रामशयत तन्निरभिद्यत ते आण्डकपाले रजतं च सुवर्णं चाभवताम् ।।१।।

आदित्यः, ब्रह्म आदित्यः सूर्यः तन्मण्डलस्थ श्रीसीतारामब्रह्मधामभूत्वा-दाधाराधययोरेकरूपत्वेनादित्येऽपि ब्रह्मव्युपदेशः इति इत्थम् आदेशः श्रुतेर्निर्देशः। आदेश इति पदेन श्रुतिरादित्ये कदापि ब्रह्मव्यतिरिक्तभावं निराकरोति, तस्य आदित्यस्य उपव्याख्यानम् अन्तरंगरहस्यव्याख्या क्रियते इति शेषः। इदं नामरूपात्मकं जगत् अग्रे सृष्टेः प्रारम्भे असत् अस्तित्वहीनमेव अव्यापितनामरूपम् आसीत् अभूत् इदं प्राचीनानुरोधेन। मम तु सत्ता एव सत् भावे क्विप् एवम् अव्यक्तं निवासाभावात् अस्फुटं सत् स्थिरता यस्य तत् असत्, अथवा अकारः वासुदेवो भगवान् रामः तस्मिन् ए अस्तीति असत् '**यत् प्रयन्त्यभिसंविशन्ति**' (तैत्तिरैय २-१) इति श्रुतेः। इदं जीवजातम् आसीत् एव केवलं भगवतिस्थितं नत्वन्यत्रेति अन्याधिकरणतां व्यवच्छिनत्ति असदित्यनेन जीवस्य सत्तानिराकरणं कोऽपि न शङ्केत अतस्तत्सत्ता प्रतिपादयितुमाह अव्यक्तसत्वेति सत्यपि भगवदधीनसत्वे तत् जीवरूपं वस्तु सत् आसीत् अखण्डसत्ताकमासीत् इत्यनेन जीवसत्कार्यवादः सूचितः। अथवा अकारोवासुदेवाख्यं ब्रह्म तम् अं सीदति गच्छतीत्यसत् '**तत् प्रयन्ति**' इति श्रुतेः। जीवः खलु प्रलयकाले परमात्मानमेव गच्छति सामस्त्येन दासभूतो नित्यजीवस्तु परिकर्तुं गच्छति भगवन्तम् इदं जीवजातम् असत् एवं भगवच्चरणकमलानुगमेवेति तात्पर्यम् आसीत् अभवत्। इत्थं तत् सत् भगवदनुगं जीवतत्वं सत् नित्यसत्ताकं '**सदेवसोम्य इदमग्र आसीत्**' इति श्रुतेः। ननु '**असदेवेदमग्र आसीत्**' इति श्रुतिखण्डेन विविध-व्युत्पत्तिवैचित्र्या जीवस्य नित्यसत्तावत्वं भगवन्निष्ठसत्ताकत्वं परमेश्वरानुगत्वञ्च सूचितं तर्हि किमर्थं पुनः तत् सदित्याद्यारंभः? इति चेत् असदित्यस्य सद्भावाभावमूलक-व्युत्पत्तिर्माभूत् जीवस्य च नित्यसत्ता सिद्धा यथा स्यात् अथवा तदिति पृथक्पदं जीवपरामर्शकं सदिति लुप्तपंचमीकं परमात्मवाचकम् इत्थं तत् जीवतत्वं सतः परमात्मनः सकाशात् आसीत् सृष्टिकाले समभूत् '**अव्यक्तात् व्यक्तयः सर्वा प्रभवन्त्यहरागमे**' (गीता ८/१७) इति स्मृतेः। इत्थं ब्रह्मशक्तिसमन्वितं तत् जीवतत्वं समभवत् जगतीतले प्रादुर्भूत्। परमात्मसाहित्येन तस्य सम्यक् भवनं तत् आण्डम् अण्डस्येदम् अण्डमेव वा निरवर्तयत् ब्रह्माण्डमुत्पादयामास। परमात्मा तत् संवत्सरस्य मात्रां परमात्मा वर्षणरिमाणम् असयत् गणकार्याणाम् अनियतत्वात् असेत इत्यस्य स्थाने असयति इति शप् विशिष्टप्रयोगः सुप्तमिति भावः। पश्चात् तन्निरभिद्यत्

खगानाम् अण्डमिव निर्भिन्नं ते निर्भिन्ने अण्डकपाले कपालाकृती अण्डखण्डौ राजतं पार्थिवत्वात् सुवर्णं स्वरमयत्वात् तेजोविशेषेण अभवताम् अजायेताम्।।श्रीः।।

भूयस्तेन सृष्टिं प्रपञ्चयति—

तद्यद्रजतꣳ सेयं पृथिवी यत्सुवर्णꣳ
सा द्यौर्यज्जरायु ते पर्वता
यदुल्बꣳ स मेघो नीहारो या धमनयस्ता
नद्यो यद्वास्तेयमुदकꣳ स समुद्रः ।।२।।

यद्रजतं रजतमिव पूर्वभागः सैव पृथिवी भूमिः अभवत्, यत् सुवर्णं स्वर्णमिव तेजोमयमुत्तरार्धं सा द्यौः स्वर्गम् अत्र पृथिवी अधोलोकानां द्यौरुर्ध्वलोकानां चोपलक्षणं, यज्जरायुः स्थूलगर्भावरणं त एव पर्वताः यच्च उल्वं सूक्ष्मगर्भावरणं तदेव समेघः घनसहितः नीहारो तुहिनं द्रवत्वात् आवरकत्वाच्च, यः धमनयः शिराः ता एव नद्यः वास्तेयम् उदकं वस्तिभवं जलं तदेव समुद्रः एवं विराट् पुरुषाण्डपरिणामभूतं जगत्।

भूयस्तस्मादादित्यजन्म वर्णयति—

अथ यत्तदजायत सोऽसावादित्यस्तं जायमानं
घोषा उलूलवोऽनूदतिष्ठन्त सर्वाणि च भूतानि
सर्वे च कामास्तस्मात्तस्योदयं प्रति प्रत्यायनं प्रति घोषा
उलूलवोऽनूत्तिष्ठन्ति सर्वाणि च भूतानि सर्वे च कामाः ।।३।।

अथ यत्तत् अण्डं अजायत् असौ आदित्यः अत एवेमं खगं मार्तण्डं च व्याचक्षते। तं जायमानम् उलूलवः उरवः उरवः उरुरवः आधिक्यविवक्षायां द्वित्वं पुनर्लत्वं लकारस्य इति उलूलवः, अधिकाधिका इति भावः। घोषाः शब्दाः सर्वाणि भूतानि प्राणिनः सर्वे कामाः काम्यपदार्थाः उदतिष्ठन्त अत एव अधुनापि सूर्यस्य उदयं प्रति प्रत्यायनम् अस्तं गमनं प्रतिशब्दाः प्राणिनः कामाश्च उत्तिष्ठन्ति।।श्रीः।।

फलश्रुत्या प्रकरणमुपसंहरति—

स य एतमेवं विद्वानादित्यं
ब्रह्मेत्युपास्तेऽभ्याशो ह यदेनꣳ साधवो
घोषा आ च गच्छेयुरुप
च निम्रेडेरन् निम्रेडेरन् ।।४।।

एवं विद्वान् जानन् यः अभ्यारसः अभ्यासशीलः एतम् आदित्यं सूर्यं ब्रह्म ब्रह्म बुद्ध्या उपास्ते परमेश्वररूपेण चिन्तयति। ह निश्चयेन एनं साधवः श्रेष्ठाः शब्दाः कामाश्च आगच्छेयुः समागच्छेयुः प्राप्नुयुः मृडेरन् सुखेयुः सुखयेयुः द्विरुक्तिरादरार्था अध्यायसमाप्तिसूचिका च॥श्रीः॥

इति च्छान्दोग्योपनिषदि तृतीयाध्याये सर्वाम्नायश्रीतुलसीपीठाधीश्वरजगद्गुरुश्रीरामानन्दाचार्य श्रीरामभद्राचार्यकृतौ श्रीराघवकृपाभाष्ये तृतीयः अध्यायः सम्पूर्णः।।

।।श्री राघवः शन्तनोतु।।

।।श्रीराघवो विजयते।।

।।श्रीरामानन्दा चार्याय नमः।।

चतुर्थोऽध्यायः

प्रथमः खण्डः

तूर्ये तूर्यतुरङ्गतूर्णहृदयैरापूर्यमाणं पदे,
देवैर्दीव्यदमन्दभावपटलैर्लालाल्यमानं मुहुः ।
मुह्यन्मुग्धमनुष्यमानसमधुव्रातानि राजद्रसै-
श्चारित्र्यैर्मृडयन्तमीड्यमृगयुं रामं तुरीयं श्रये ।।

अथतृतीयाध्याये प्रतीकतया वर्णिते वायुप्राणोपासने पुनर्ब्रह्मतया वर्णयितुं साम्प्रतमध्यायस्तूर्यः प्रारभ्यते।

उपासनया खलु वासनानस्यतीति तस्यां विनष्टायां निरुपाधिः प्रीतिः पारमेश्वरी पल्लविता भवतीति कृत्वा विभूतिविभूतिमतोरभेदधिया जानश्रुतेराख्यानच्छलेन वायु-प्राणोपासनवर्णनपुरःसरं संवर्गविद्या विविच्यते, आख्यायिका सुखावबोधविद्यामहत्वातिशय-सूचिका।

तत्र प्रथमः मन्त्रः—

ॐ जानश्रुतिर्ह प्रौत्रायणः श्रद्धादेयो बहुदायी बहुपाक्य आस। स ह सर्वत आवसथान्मापयाञ्चक्रे सर्वत एव मेऽत्स्यन्तीति ।।१।।

ॐ इति निखिलमंगलमयं परमेश्वरनामस्मरणं, श्रुतं जनः यस्य स जनश्रुतः आहिताग्न्यादित्वात् पूर्वनिपातेनः जनश्रुतः विख्यातजन्मा तस्य जनश्रुतस्य गोत्रापत्यं पुमान् जानश्रुतिः तस्य जानश्रुतेः पौत्रायणः पुत्रस्य पौत्रः ह निश्चयेन श्रद्धादेयः श्रद्धया देयं यस्य स श्रद्धादेयः आस्तिकबुद्धिदानार्हः बहुदातुं शीलः यस्य स बहुदायी, एवं बहु अन्नं पक्तुं शीलं यस्य स बहुपाकी अत्र ताच्छील्ये णिनिः आस अभूत्। सर्वतः सर्वाभ्योदिग्भ्यः आगत्य अत्स्यन्ति इति इत्थं विचार्य सर्वतः आवसथान् निवासभूमिः मापयामास निर्मापितवान्। **आवसथं गृहं सद्म मन्दिरं भवनं** तथा इति वैष्णवकोशे।

कथम् आवस्थान् निर्मापितवान्? इत्यत आह मे अत्स्यन्ति यतोहि येषु आवसथेषु निवसन्तो जनाः मे मत्सम्बन्धिभोजनमेव अत्स्यन्ति भोक्ष्यन्ते आवसथमन्तरेण अन्यात्रापि ते भुञ्जीरन्। ह इति प्रसिद्ध्यर्थम्।।श्रीः।।

घटनाक्रमं विस्तारयति—

अथ ह हँ् सा निशायामतिपेतुस्तद्धैवँ् हँ् सो
ह समभ्युवाद हो होऽयि भल्लाक्ष भल्लाक्ष
जानश्रुतेः पौत्रायणस्य समं दिवा ज्योतिराततं
तन्माप्रसाङ्क्षीस्त त्वा मा प्रधाक्षीरिति ।।२।।

अथ कस्मिंश्चिद्दिने ह इति प्रसिद्धिद्योतकोनिपातः, निशायां रात्रौ राज्ञि शयनमुपगते साँ् हंसा इति भावः। अनुस्वारस्य उच्चारणं वेद परम्परायां हंसरूपधारणो महर्षयः अतिपेतुः आपतितवन्तः। रात्रौ पक्षिणो नोड्डीयन्ते, किन्तु राग्यो हितचिकीर्षयाः इमे महर्षयः अस्वाभाविकतया हंसायमाना आगता इति अतिपेतुरिति क्रियाघटकोपसर्गस्य तात्पर्यम्। तदन्तरं हंसः अपरमरालः हंसम् अतिपतन्तम् एवम् अनेन रूपेण अभ्युवाद राजानं श्रावयन् अभ्यवदत होऽपि इति सम्बोधन परं निपातद्वयं, भल्लाक्ष भल्लवत् तीक्ष्णे ब्रह्मदर्शनसमर्थे यस्य स भल्लाक्षः तत्सम्बुद्धौ हे भल्लाक्ष! मनसः ऐकाग्रयार्थं द्विर्वचनं, पौत्रायणस्य जानुश्रुतेः पूर्वोक्तस्य विख्यात यशसः दिवा द्योतनलोकेन ब्रह्मधाम्ना समं सदृशं यथा द्विलोकः प्रकाशमान उपरि राजते, तथैव राज्ञोऽपि ब्रह्मज्ञान ज्योतिरिति भावः। आततं व्याप्तं तत् पतनकाले माप्रसाक्षीः निरादरबुद्ध्या माप्रश्नं कुरु, तथा कृते सति त्वां दग्धन् करिष्यति। अतः यथा त्वां माधाक्षीः अत्र व्यत्ययेन मध्यम-पुरुषः, एवं माधाक्षीरित्यस्य मा भस्म करोति इति भावः।।श्रीः।।

प्रति प्रश्नं निरूपयति।

तमु ह परः प्रत्युवाच कम्बर एनमेतत्सन्तँ् सयुग्वानमिव।
रैक्वमात्थेति यो नु कथँ् सयुग्वा रैक्व इति ।।३।।

निषेधवचनं श्रुत्वा परः श्रेष्ठः अग्रगामी तं निषिद्धं कुर्वाणं हंसं प्रत्युवाच, प्रतिपप्रच्छ। अरे! उपेक्षार्थोऽयं निपातः कं किं गुणकं सन्तं वर्तमानमेनं राजानं विद्याभिमानरतमपि वराकं स युग्वानं युग्वा शकटीतया सह वर्तमानं सशकटिकं रैक्वम् एतदभिमानं ब्रह्मविद् वरिष्ठम् इव यथा आत्थ कथयसि। आशयोऽयं यत् शकटयुक्तो रैक्वः महान् ब्रह्मवेत्ता तस्य ज्योतिषो भेतव्यम् अयं राजा तु विद्यादानाभिमानमत्ततया

नाल्पमपि ज्ञानं कलयति। एतद् वाक्यं श्रुत्वा पूर्वः प्रत्याह यो नो यः रैक्वः भवतः प्रशस्तः स कथं किं प्रकारकः, सयुग्वा युग्वना सहितोऽपि स्थूल वस्तु विभ्रत् कथं सूक्ष्मं ज्ञानं कलयतीति साश्चर्यप्रश्नः।।श्रीः।। अथ पर आह—

यथा कृतायो विजितायाधरेयाः संयन्त्येवमेनँ्
सर्वं तदभिसमेति यत्किञ्च प्रजाः
साधु कुर्वन्ति यस्तद्वेद यत्स
वेद स मयैतदुक्त इति ।।४।।

इदानीं रैक्वस्य माहात्म्यं वर्णयति—

यथा येन प्रकारेण कृतायः कृतस्य कृतयुगस्य प्रथमस्य सत्ययुगस्य इति भावः। अयः द्यूतपाशः स एव विजितः द्यूतक्रीडायां प्रतिपक्षिणः जितः तं कृतायं विजितायम् आधरेयाः त्रेताद्वापरकलियुगद्यूतपाशाः संयन्ति। एवं प्रजाः यत् साधु कुर्वन्ति श्रेष्ठ-कर्माचरन्ति तत् सर्वं रैक्वमेव समेति आविर्भवति तत् यः प्रजावर्गः वेद स रैक्वः सर्वं वेद स एव ब्रह्मविद् वरिष्ठः ज्योतिष्मान् नावज्ञातुं मया उक्त प्रतिषिद्धः इति अयंभावः द्यूतक्रीडायां प्रतियुगक्रमानुरोधेन चत्वारः भवन्ति पाशाः तत्र सत्ययुगस्य प्रथमः कृतायनामा चतुरङ्कः तत्र धर्मस्य चतुष्पादयुक्तत्वात्। एवं द्वितीयः पाशः त्रयङ्कः त्रेताया नामा तत्र धर्मस्य त्रिचरणत्वात्। एवं तृतीयः द्वापरायनामा द्वयङ्कः, तत्र धर्मस्य द्विचरणत्वात्। चतुर्थः कलियुगाय नामा एकाङ्कः तत्र धर्मस्य एकचरणत्वात् प्रथमे चतुरङ्के विजिते त्रयः विजिता भवन्ति तत्रैव तेषां समाहारात्। एवं प्रजानां साधुकर्मणां तत्रैव रैक्वे समाहारः, इत्येव रैक्वं माहात्म्यम्। अत्र कृताय विजिताय शब्दयोः द्वितीयायाःछान्दसो लुक् एवमेव यस्तद्वेद इत्यत्रापि जातिविवक्षायाम् एकवचनं, छान्दसां वा अधरेषु चतुरङ्कात् कृतायतः न्यूनेषु भवाः इति आधरेयाः।।श्रीः।।

राज्ञः प्रतिक्रियां सूचयति—

तदु ह जानश्रुतिः पौत्रायण उपशुश्राव
स ह संजिहान एव क्षत्तारमुवाचाङ्गारे
ह सयुग्वानमिव रैक्वमात्थेति यो
कथँ् सयुग्वा रैक्व इति।।५।।

एवं हंसयोःविवदमानयोः संवादं पौत्रायणः जानश्रुतिः राजा तत् रैक्वप्रशंसावचनम्, उ सतर्कः ह निश्चयेन उपशुश्राव समीपतः आकर्णयामास। रैक्वं जिज्ञासामाना रात्रौ निद्रां

न लब्धवान् प्रभाते वन्दिभिर्गीतिविरुद्धैः प्रबुध्यमानः क्षत्तारं राजसूचनाप्रसारकं सेवकम् उवाच अरे इति उपेक्षा वचनो निपातः, अङ्गं माम् राजानां सयुग्वानं रैक्वम् इव यथा अंगप्रिय आत्थ प्रशंससि, अहं तद्योग्योनास्मि एतद्वाक्यं श्रुत्वा क्षत्राजिज्ञासाञ्चक्रे, यः रैक्वः भवतः प्रशस्तः स सयुग्वा कथं कीदृग् प्रभावः।।श्रीः।।

जानश्रुतिः हंसवाक्यमनुवदति—

यथा कृतायविजितायाधरेयाः
संयन्त्येवमेनँ् सर्वं तदभिसमेति
यत्किञ्च प्रजाः साधु कुर्वन्ति यस्तद्वेद
यत्स वेद स मयैतदुक्त इति ।।६।।

चतुरङ्गी यथापाशे इतरेऽतन्तर भवन्ति हि एवं प्रजा कृतं साधु रैक्वे सम्प्रलीयते व्याख्या सुगमा। एतावत् गुणगणसम्पन्नं रैक्वमहं दिदृक्षुरिति राज्ञो हार्दम्।।श्रीः।।

क्षत्तुप्रयासं निरूपयति—

स ह क्षत्तान्विष्य नाविदमिति प्रत्येयाय तँ् ।
होवाच यत्रारे ब्राह्मणस्यान्वेषणा तदेनमार्च्छेति ।।७।।

अनन्तरं सः क्षत्ता राजसूचानाधिकारी रैक्वम् अन्वेष्य मृगयित्वा नोपलभमानो निराशः प्रत्यययाय परावव‍ृते, उवाच च एवं यत् अहं नाविदम् न ज्ञातवान्। तदा राज्ञा कथितं यत्र ब्राह्मणस्य विप्रकुलोत्पन्नस्य ब्रह्मज्ञानिनः रैक्वस्य अन्वेषणः परिमार्गणं सम्भवं तत्र पृच्छ गच्छ इति शब्दोऽयं कथनप्रकारवाची।।श्रीः।।

रैक्वान्वेषणं वर्णयति—

सोऽधस्ताच्छकटस्य पामानं कर्षमाणमुपोपविवेश
तषँ् हाभ्युवाद त्वं नु भगवः सयुग्वा
रैक्व इत्यहँ् राह्य३ इति ह प्रतियज्ञे
स ह क्षत्ताविदमिति प्रत्येयाय।।८।।

इत्थं राज्ञः निर्दिष्टं स ब्राह्मणान्वेषणगत्वा शकटस्य युगस्य अधस्तात् नीचैः पामानं खर्जूम् शरीरप्रारब्धभवाम् कषमाणं कण्डूयमाणं उपोपविवेश समीपमुपविष्टः। तमुवाच

भगवः हे भगवन् त्वमेव रैक्वः एतन्नामसाधकः असि रैक्वः प्राह अरे अहम् अस्मि इति प्रतिजज्ञे प्रतिज्ञां कृतवान् सः क्षत्ता प्रत्येयाय प्रत्याजगाम।।श्रीः।।

इति छान्दोग्योपनिषदि चतुर्थाध्याये प्रथमे खण्डे श्रीराघवकृपाभाष्यम् सम्पूर्णम्।।

।। श्रीराघवः शन्तनोतु ।।

द्वितीयः खण्डः

क्षत्तरिदत्तसमाचारे विज्ञाते रैक्वे तस्मात् ब्रह्मविद्यां जिघ्रिक्षुः, **'गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा, अथवा विद्यया विद्या चतुर्थीन्नैव कारणम्'** इति वचनात् ऋषि-सुश्रूषणे राज्यकार्यव्यस्ततया जानश्रुतिरसमर्थः। मध्यममेव माध्यममंगीकृत्य पुष्कलेनधनेन रैक्वं तोषयितु कामो ब्रह्मविद्या जिघृक्षन् समुपससाद। तदेवाह तदित्यादिना—

तदु ह जानश्रुतिः पौत्रायणः षट्शतानि गवां । निष्कमश्वतरीरथं तदादाय प्रतिचक्रमे तँ हाभ्युवाद ।।१।।

तत् क्षत्तुः सूचनानन्तरं पौत्रायणः पौत्रपौत्रः जानश्रुति राजा 'उ' तर्कयित्वा 'ह' दृढ़तरं विनिश्चित्य ऋषेरर्थार्थित्वं गार्हस्थ्यञ्च विज्ञाय गवां धेनूनाम् षट्शतानि अश्वतरीभिः चतसृभिः युक्तं रथम् इति अश्वतरीरथं, 'निष्कम्' सुन्दरं स्वर्णसूत्रपिनद्धं तत्तन्मणिमाणिक्यमौक्तिकमयं हारम् तत्सर्वं धनम् आदाय रैक्वं प्रतिचक्रमे विद्यार्थिरूपेण समुपाषदत्। ह निश्चयेन रैक्वम् अभ्युवाद विज्ञापयामास।।श्रीः।।

वाक्यमनुवदति—

रैक्वेमानि षट्शतानि गवामयं निष्कोऽयमश्वतरीरथो नु म । एतां भगवो देवताँ शाधि यां देवतामुपास्स इति ।।२।।

हे रैक्व! महर्षे इमानि मया समानीतानि भवत्पुरोवर्तमानानि गवां षट्शतानि षट्शतसंख्याकाः धेनवः, ननु रैक्व शब्दः सम्बोधनान्तः, सम्बोधने प्रथमालुकिति सति 'दूराद्धूते च' इति पाणिनीय सूत्रेण वाक्यास्य इह प्लुत उदात्ते, 'प्लुत प्रगृह्या अचि नित्यम्' इत्यनेन प्रकृति भावे रैक्वेमान् इति कथम्, छान्दसत्वादिति चेत् अगतिकगतिरेषा, सत्यं जानश्रुतेः रैक्वं निकटतयोपसन्नतया दूराद्धूतत्वाभावात् तत्र पूर्वोदितसूत्रप्रवृत्यभावेन नैष दोषः। अयम् एषः निष्कः रत्नहारः अयं च अश्वतरीरथः। हयतरीभिरुह्यमान् स्यन्दनः इदं सर्वं गृहाण कृपया यां देवताम् उपास्ये हे भगवः हे भगवन्! तां देवतां मे जानश्रुतये पौत्रायणाय जिज्ञासवे मह्यम् साधि उपदिश। भवत् सेवां कर्त्तुमक्षमोऽहं शास्त्रोक्तेन मध्यमेनैव भवन्तमनकूलयितुं यते इति जानश्रुतेर्हार्दम्।।श्रीः।।

ऋषेः प्रतिक्रियां स्फुटयति—

तमु ह परः प्रत्युवाचाह हारे त्वा शूद्र तवैव
सह गोभिरस्त्विति तदु ह पुनरेव जानश्रुतिः
पौत्रायणः सहस्रं गवां निष्कमश्वतरीरथं
दुहितरं तदादाय प्रतिचक्रमे ।।३।।

परः ब्रह्मविद्या परायणरैक्वः उ वितर्क्य, ह विपुलधनस्वीकरणस्य निश्चयं कृत्वा तं जानश्रुतिं उवाच— प्रत्ययाख्यानमुद्रया प्रतिसिद्धवान् नन्वसंगतमेतत्। निष्क्रियस्य ब्राह्मणस्य यदृक्षालाभसंतुष्टस्य महदनुचितं जानश्रुति दीयमानधनप्रत्याख्यानम्। नाऽयं दोषः जानश्रुतिः नैव दक्षिणादाता दक्षिणायां यादृक्षको नियमः एष तु विद्या प्राप्ति माध्यमः धनपुष्कलत्वञ्च विद्यादातृपरिस्थित्यावश्यकताधीनं तस्मात् सुसंगतमेतत्। अह अरे इति तिरष्कारसूचकौ निपातौ, अरे शूद्र! हारेत्वा हारयुक्ता ह्यतरी शकटिः, गोभिः षट्शत धेनुभिः सह तवैवास्तु तव पार्श्वे तिष्ठतु, नैव त्वादृशस्य राज्ञोऽनुरूपं धनमिदम्। अथ कथं क्षत्रियं वंश्याय जानश्रुतये रैक्वेण शूद्र इति शब्दसम्बोधनं कृतम्। क्षूद्रं शब्दोऽत्र गौणवृत्तिः ब्राह्मणः क्षत्रियश्च आचार्यान् शुश्रूषेते अयं क्षत्रियाचारहीनतया द्विजसेवा बहिर्मुखः शूद्रः। अथवा महतीं विद्याम् अल्पीयसा धनेन जिघृक्षते इति तदवमूलनं कुर्वन् अविवेकतया शूद्रः। अथवा। पूर्वेद्युः रात्रौ हंसेन गीयमानां रैक्वकीर्तितोमहीयषीं श्रुत्वा रैक्वेर्ष्याजनितशोकेन त्वं द्रुतचित्तोभवः अतस्त्वं शूद्रः। शुचा द्रवतीति शूद्रः इति व्युत्पत्तेः शूद्र इति सम्बोधनं ऋषेस्त्रिकालज्ञत्वसूचनाय इति समञ्जसं सर्वमिति इत्थमृषेः प्रत्याख्यानं श्रुत्वा पूर्वस्मादपि भूयोधनं दीत्सन् गवां सहस्रं दशशतम् निष्कः अश्वतरीरथः दुहितरं निजां विवाहार्हां रूपवतीं कन्याम्। कन्यायाश्च सन्ततिदातृत्वेन श्रेष्ठरत्नतया परिगणतत्वात् 'स्त्रीरत्नं दुष्कुलादपि' इति नीतेः तत् एतत् विपुलं धनम् आदाय प्रतिचक्रमे रैक्वमुपससाद।।श्रीः।।

जानश्रुतिवाक्यमनुवदति—

तँ् हाभ्युवाद रैक्वेदँ् सहस्रं गवामयं निष्कोयमश्वतरीरथ इयं।
जायाऽयं ग्रामो यस्मिन्नास्सेऽन्वेव मा भगवः शाधीति ।।४।।

ततो भूयो धनं संकीर्तयति, रैक्व इदं गवां सहस्रम् अयं हारः अयम् अश्वतरीरथः इयं च रूढयौवना मम दुहिता तव जाया तद् गृहलक्ष्मीत्वेन परिकल्पिता राजकन्या यस्मिन् ग्रामे त्वम् अनु अनुकूलतया आस्से जलस्थलनीरवपर्यावरणप्रकृति शान्तिः

इत्यादि महर्षिनिवासार्ह सकलसामग्रीसमवधानेन सानन्दं तिष्ठसि अयं ग्रामः रैक्वपर्ण इति। त्वन्नामतः ख्यातिं गमिष्यन् इत्येतत् सर्वं धनं मया समानीतं स्वीकृत्य निजोपास्य देवतां शाधि इति उभयत्र 'प्रार्थनायां लोट्' नत्वाज्ञायायाम्।।श्रीः।।

अनेन धनेन सामान्यतः संतोषं प्रकट्यन्नाहनिरादरशब्दावल्या—

तस्या ह मुखमुपोद्गृहणन्नुवाचाजहारेमाः
शूद्रानेनैव मुखेनालापयिष्यथा इति
ते हैते रैक्वपर्णानाम महावृषेषु
यत्रास्मा उवास तस्मै होवाच।।५।।

ऋषिः प्राह! ह निश्चयेन तस्याः कन्यायाः मुखं वदनम् उपोद्गृह्णन् उपकृतः उत्कृष्टतया स्वीकुर्वन् अथवा तस्याः राजकन्यायाः स्वीकारमेव मुखं विद्याप्राप्तिद्वारम् उपोद्गृह्णन् स्वीकुर्वन् रैक्वः जानश्रुतिः उवाच उदतीतरत् शूद्रः धनमाध्यमतो विद्याकाक्षिन् इमाः अश्वथरीरथयुक्तकन्यासमन्वितदशशतधेनूः। अथवा आदरार्थे इदं पदार्थमूलकन्यायां बहुवचनम् आजहार आहर देहि इति भावः। लकारवृत्तेन 'लोडर्थेलिट्' पुरुषव्यत्ययोऽपि आजहार इत्यस्य आहर इत्यर्थः, शूद्र चिन्ताद्रवीभूतचित्त, अनेन कन्यामुखेनैव श्रद्धावपुषा विद्यां आलापयिष्यथा वक्तुं प्रेरयिष्यसि, किमेतेन धनेन, इति कथयित्वा सर्वं स्वीचक्रे। यो ग्रामोदत्तः तस्य नाम कथयति यत्र येषु आदरणीयेषु सह ऋषिः उवास स्म निवासं चकार तेषां रैक्वपर्णा इति नाम अतः रैक्वपर्णाः रैक्वेण विकीर्णाः इति नाम अतः रैक्वपर्णाः रैक्वेण विकीर्णा वृक्षपर्णाः येषु तथाभूताः, अथवा रैक्वस्य पर्णकुटी येषु ते रैक्वपर्णाः तत्र विनापि प्रत्ययं पूर्वोत्तरपदलोपः इति नियमात् कुटीशब्दलोपेन रैक्वपर्णा इति। अथ तस्मै जानश्रुतये सः रैक्वः निजोपास्यदेवताम् उवाच उपदिदेश।।श्रीः।।

इति छान्दोग्योपनिषदि चतुर्थेऽध्याये द्वितीये खण्डे श्रीराघवकृपाभाष्यम् सम्पूर्णम्।।
।। श्रीराघवः शन्तनोतु ।।

तृतीयः खण्डः

अथ जानश्रुतये रैक्वः संवर्गविद्यामाह संवृञ्जते सर्वे आग्नेयाः यस्मिन् स संवर्गः वायुः प्रत्यक्षं ब्रह्म यथोक्तं तैतिरीयशान्तिपाठे **'त्वमेव ब्रह्मासि'** मन्ये रैक्वः वायुस्वरूपतया सकलगुणसम्वर्गभूतं वायुपुत्रं हनुमन्तमुपास्ते।

वायुर्वाव संवर्गो यदा वा
अग्निरुद्वायति वायुमेवाप्येति यदा
सूर्योऽस्तमेति वायुमेवाप्येति यदा
चन्द्रोऽस्तमेति वायुमेवाप्येति ।।१।।

वाव इति निश्चयनिपातौ, वायुः निश्चयेन संवर्गः अत्र सर्वे संवृञ्जते तदेव स्पष्टयति। यदा अग्निः उद्वायति निर्वाणमेति तदा वायु एव अप्येति गच्छति, एवं सूर्यः यदास्तमेति अस्तमितो भवथि तदा वायुं गच्छति एवं चन्द्रमा अपि अस्तंगतो वायौलीयते अग्निवायुचन्द्रमसां तेजसत्वात् तेजसश्च वायुप्रसवत्वात् तस्य लयो न्याय्यः।।श्रीः।।

अधिदैवतं वर्णयति—

यदाप उच्छुष्यन्ति वायुमेवापियन्ति ।
वायुर्ह्येवैतान् सर्वान्संवृङ्क्त इत्यधिदैवतम् ।।२।।

यदा यस्मिन्काले आपः जलानि उच्छुष्यन्ति शुष्काः भवन्ति तदा वायुमेव अपियन्ति निलीना भवन्ति वारः उद्वायमाणाः वायुं गच्छन्ति। अथ अनन्तरम् एष वायुः एतान् वायुरुपभूतान् संवृङ्क्ते धारयति इदमर्वाचीनविज्ञानं समर्थयति। आक्सीजन-हाईड्रोजन्नामक वारूपाभ्यां जलमुत्पद्यते। पुनः शुष्कं तत्र याति।।श्रीः।।

अथाध्यात्मं निरूपयति—

अथाध्यात्मं प्राणो वाव संवर्गः
स यदा स्वपिति प्राणमेव वागप्येति
प्राणं चक्षुः प्राणँश्रोत्रं प्राणं मनः
प्राणो ह्येवैतान् सर्वान्संवृङ्क्त इति ।।३।।

अथ अनन्तरम् अध्यात्मम् आत्मनि स्थितं संवर्गं व्याचक्षे। वाव निश्चयेन प्राणः संवर्गः स च—

यदा स्वपिति तदा तं प्राणं वाक् अपि अप्येति गच्छति। एवं चक्षुनेत्रश्रोत्रमनांसि तत्रैव विलीयन्ते प्राणश्च एतान् सर्वान् संवृङ्क्ते संचित्य धारयति इत्येव तस्य संवर्गम्।।श्रीः।।

उपसंहरन्नाह—

तौ वा एतौ द्वौ संवर्गौ वायुरेव देवेषु प्राणः प्राणेषु ।।४।।

वा निश्चयेन तौ पूर्वोक्तौ एतौ दृश्यमानो वायुप्राणौ संवर्गो देवेषु दैवीसंपद-मुपगतेषु वायुः संवर्गः प्राणेषु प्राणापानव्यानोदानसमानेषु प्राणः मुखनासिकानिर्गमन-शीलौ मुख्यः संवर्गः।।श्रीः।।

संवर्गस्तुतये अन्यामाख्यायिकामवतारयति—

अथ ह शौनकं च कापेयमभिप्रतारिणं च काक्षसेनिं ।
परिविष्यमाणौ ब्रह्मचारी बिभिक्षे तस्मा उ ह न ददतुः ।।५।।

संवर्गस्य महत्वम्—

अथ अनन्तरं कापेयं कपिगोत्रोत्पन्नं शौनकं एतन्नामकं गृहस्थं काक्षिसेनिं कक्षिसेनस्य अपत्यं पुमांसम् अविप्रतारिणं न विप्रतारयति इति अविप्रतारी एतन्नामकः ब्राह्मणः यः कमपि न वञ्चयति एतादृक् तम् उभावपि एकस्मिन्काले एकस्मिन्स्थाने परिविष्यमाणौ भोजनार्थं परिवेषणविषयीकृतौ यदा शौनकः अविप्रतारी च भोजनायामन्त्रितौ तयोः समक्षं परिवेषितञ्च भोजनं तदा इति भावः। कश्चिन् ब्रह्मचारी आगत्य तौ विभिक्षे भिक्षाविषयौ कृतवान् परिवेष्यमाणौ विभिक्षे इत्यत्र 'अकथितञ्च' इत्यनेन द्वितीया। 'दुहयाचपचदण्डरुधिप्रक्षचीब्रुशासजिमथ्मुषां कर्मयुत्स्यादकथितं तथास्यान्नीहि कृष्वहां इति कारिकायां पठितानां दुहादीनां द्वादशानां निप्रभृतीनां चतुर्णां मध्ये भिक्षधातोः परिगणनाभावात्। कथमत्र द्वितीया? इति चेच्छृणु संज्ञायाः अर्थनिबन्धनत्वात् कारिकापरिगणितयाच्आर्थकस्यापि भिक्षेस्तथात्वेनादोषात्। यथोक्तं तत्रैव (अर्थनिबन्ध नेयं संज्ञा) बलिं भिक्षते वसुधाम् अनन्तरम् उभयोः का प्रतिक्रिया? इत्यत् आह ह निश्चयेन उ वितर्क्य उभावपि शौनकाविप्रतारिणौ तस्मै ब्रह्मचारिणे न ददतुः भिक्षामिति शेषः तेन वाच्यमानावपि भिक्षां नार्पितवन्तौ तस्मै उ इति पदच्छेदः आयादेशे यकारलोपे तस्मात उ इति सिद्धम्।।श्रीः।।

गृहस्थयोरुपेक्षां दृष्ट्वा ब्रह्मचारी तौ परिप्रश्नयाम्बभूव—

स होवाच महात्मनश्चतुरो देव एकः
कः स जगार भुवनस्य गोपास्तं
कापेय नाभिपश्यन्ति मर्त्या अभिप्रतारिन्बहुधा
वसन्तं यस्मै वा एतदन्नं तस्मा एतन्न दत्तमिति ।।६।।

ह निश्चयेन सः भिक्षुब्रह्मचारी द्वावपि उवाच पप्रच्छ, हे कापेय कपिगोत्रोत्पन्नशौनक हे अभिप्रतारिन्काक्षिसेने! कः एकः देवः अद्वितीयः प्रकाशवान् यः चतुरः संख्याकान् महात्मनः महानुभावान् जगार अग्रसत् अग्न्यादीनि वायौ चक्षुरादीन् प्राण इति भावः। इमौ द्वावेन संवर्गौ अधिदैवतो वायुः अध्यात्मः प्राणः, भवन्ति भूतानि यस्मिन् तद्भुवनं तस्य भुवनस्य निखिललोकस्य गोपा गोपायति इति गोपा रक्षक इति भावः, तं भुवने लोके बहुधा अनेकप्रकारेण अध्यात्मादिरूपेण वसन्तं निवसन्तं मर्त्याः मरणशीलाः न अभिपश्यन्ति न जानन्ति न वा साक्षात्कुर्वन्ति। यस्मै इदमन्नं यदर्थं सम्पूर्णमदनीयमिति भावः तस्मै न दत्तं नार्पितं भिक्षितं तात्पर्यमेतत् यश्चराचरग्रसनशीलः रक्षकः घटघटनिवासी तस्मै भगवते वायुरूपाय प्राणरूपाय युवाभ्याम् अन्नं न दत्तम्।।श्रीः।।

ब्रह्मचारिणः प्रश्नमाकर्ण्य शौनकः कथं प्रतिचकारेति वर्णयति—

तदु ह शौनकः कापेयः प्रतिमन्वानः प्रत्येयायात्मा देवानां जनिता प्रजानाँ्हिरण्यदँ्ष्ट्रो बभसोऽनसूरिर्महान्तमस्य महिमानमाहुरनद्यमानो यदनन्नमत्तीति वै यं ब्रह्मचारिन्नेदमुपास्महे दत्तास्मै भिक्षामिति।।७।।

तद्वचनं श्रुत्वा कापेयः शौनकः प्रतिमन्वानः ब्रह्मचारिप्रश्नं समीक्ष्य प्रत्येयाय परिविष्टभोजनं त्यक्त्वा ब्रह्मचारिणं प्रति प्रश्नमुत्तरयितुं जगाम ब्रह्मचारिन् उत्तरं चतुर्णां महात्मनां भक्षणकर्त्ता भुवनरक्षकः स एव आत्मा सर्वव्यापकः, अग्न्यादीनां देवानां चक्षुरादीनां प्रजानां जनिता जन्मदाता हिरण्यदंष्ट्रः हिरण्यवत् प्रकाशमानाः दंष्ट्राः यस्य तथाभूतः बभसः पुनः पुनः अतिशयेन भक्षयति इति बभसः अत्र अच्प्रत्यये यङ् लुङन्तात् अभ्यासलोपे संयोगादिसलारलोपे बभसः, सकललोकान् भक्षयति। अतो ब्रह्मसूत्रे 'अत्ताचराचर ग्रहणात्' (ब्र.सू. १.२.७) अनसूरिः सूरिर्विद्वान् सूरिर्मनीषी विद्वान् इति वैष्णवकोशात्। न सूरिः असूरिः न असूरिः अनसूरिः अवैदुष्याभाववान्। ननु सूरिरित्यनुक्त्वा तमेवार्थं प्रतिपादयितुं कथं नञ्द्वयघटितद्रविणप्राणायामविधिराश्रितः नञ्द्वयं प्रतियोगिनं दृढयति अतस्तत्रसूरौ दृढत्वप्रतिपादनायैतत् अस्य महान्तं महनीयं महिमानं महत्वमाहुः वदन्ति। यद्वा महान्तमघरितघटना पटीयसीं भगवन्मायाम् अस्य परमेश्वरस्य महिमानं विभूतिम् आहुः माहन्तं वा जीवात्मानम् अस्य अकारो वासुदेवः तस्य वासुदेवस्य महिमानं विभूतिमाहुः अतो विभूतियोगवर्णने भगवताप्रथमत आत्मैव विभूतिवर्णयत **'अहमात्मा गुडाकेश सर्वभूताशयस्थितः'** (गीता. १०-२०) अन्यैः जनैः अनद्यमानः अनश्मानः अन्नम् अन्नभिन्नमपि अत्ति खादति **यस्य ब्रह्म च क्षत्रञ्च उभे भवत ओदन मृत्युर्यस्योपषेचनं क इत्थावेद यत्र सः'** (कठ. उ. १.२.२५)

एतादृशं ब्रह्म किन्तु हे ब्रह्मचारिन्। वयं कापेयाः इदं न उपास्य हे एतस्मात् जीवात्मनोऽपि परतरं सीतावरं धनुर्धरं रामं उपास्महे इति तात्पर्यम्। इत्थं प्रश्नं समाधाय भृत्यमादिष्टमाह अस्मै ब्रह्मचारिणे भिक्षां दत्त भिक्षां प्रयच्छत इतिशब्दः आदेशानुवादसूचकः।।श्रीः।।

अथ भिक्षादानप्रकारं फलश्रुतिं चाह—

तस्मा उह ददुस्ते वा एते पञ्चान्ये पञ्चान्ये दश
सन्तस्तत्कृतं तस्मात्सर्वासु दिक्ष्वन्नमेव दशकृतँ्
सैषा विराडन्नादी तयेदँ् सर्वं दृष्टँ् सर्वमस्येदं
दृष्टं भवत्यन्नादो भवति य एवं वेद य एवं वेद ।।८।।

उ ह निश्चयेन तस्मै ब्रह्मचारिणे ते परिकराः ददुः भिक्षां दत्तवन्तः, अधिदैवताः पञ्च आध्यात्मिकाः च पञ्च उभये मिलित्वा दशसंख्याकाः सन्तः एभिरेव दशदिक्षु अन्न कृतम् एवं विराट् दशान्नमयः विराडन्नमितिश्रुतेः। यः एवं वेद जानाति सः अन्नादः भवति य एवं वेद इति आदरार्थं द्विर्वचनं ग्रन्थसमाप्तिसूचकञ्च।।श्रीः।।

इति छान्दोग्योपनिषदि चतुर्थोध्याये तृतीये खण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।
।। श्रीराघवः शन्तनोतु ।।

चतुर्थः खण्डः

स जयति षोडशकलको जानक्यानन्दवर्द्धनो रामः।
श्रुतयोऽपि यस्य च चरितं गायन्त्यो न ययुः पारम्।।१।।

तूर्यमारभ्य शकलं यावन्नवममद्भुतम्।
मन्त्रैः षोडश वै कलाश्चतुष्पादैर्निरूपिता।।२।।

षोडशैव कलाः पुंसः सामान्यं श्रुतिभिः श्रुताः।
विशिष्टास्तु कलास्तस्य अनन्ता जानकीपतेः।।३।।

प्रतिपादं चतस्रो हि वर्णिताः ब्रह्मवादिभिः।
वृषाग्निहंसमौद्गैश्च सत्यकामाय धीमते।।४।।

प्रकाशवांश्च प्रथमोऽनन्तवांश्च तथापरः।
विद्युत्वान् आयतनवान् पादाश्चत्वार एव हि।।५।।

प्रकाशाज्जानकीजानेरन्वर्थस्तु प्रकाशवान्।
प्राच्यवाची प्रतीची च उदीचीति चतुष्कलाः ।।६।।

अनन्तमहिमाविष्टोऽनन्तवान् वै द्वितीयकः।
पृथव्यन्तरिक्षो द्यौः सिन्धुश्चतस्रस्तत्र वै कलाः ।।७।।

विद्युत्तेजोमयत्वाच्च विद्युत्वान् वै तृतीयकः।
कलास्तत्र चतस्रो वै अग्निसूर्येन्दुः विद्युतः ।।८।।

आयतनवान् चतुर्थो ब्रह्मपादः प्रकीर्तितः।
चक्षुः श्रोत्रं मनः प्राणश्चतस्रस्तत्र वै कलाः ।।९।।

चत्वार्यायतनान्येव कलात्वेन प्रचक्षते।
आयतनं तवान्वर्थो ब्रह्मपादश्चतुर्थकः ।।१०।।

वृषाग्निहंसमद्‌गुभ्यः श्रुत्वाप्याचार्यवक्त्रतः।
शुश्राव सत्यकामोऽपि जाबालो नौन्यहानये ।।११।।

एवं ब्रह्म चतुष्पादं कलाद्व्यष्टसमन्वितम्।
वर्णयितुं श्रुतिः प्राह छान्दोग्ये पञ्चखण्डकम् ।।१२।।

अथ प्रकृतं व्याख्यायते—

विषयं स्पष्टयितुम् आख्यायिकाम् अवतारयति—

सत्यकामो ह जाबालो जबालां मातरमामन्त्रयाञ्चक्रे ब्रह्मचर्यं भवति विवत्स्यामि किंगोत्रोन्वहमस्मीति ।।१।।

ह शब्दः आख्यायिकायाः ऐतिह्य प्रसिद्धिद्योतकः। घटनेयमिति इतिहास-प्रसिद्धेति भावः। अजेन भगवता प्रसूताबाला 'अजबाला' सैव जबाला 'जकार' पूर्वाकारस्य लोपः वगाहादिवत्, भागुर्मतेऽपि अकारपकारलोपविकल्पः। यथोक्तं वैयाकरणसिद्धान्त कौमुद्याम् अव्ययप्रकरणे—**'वष्टिभागुरिरल्लोप' 'प' कारस्य विकल्पनम् आपं चैव हलन्तानां, तथा वाचा निशा दिशा।** अतएव ''विभाषासुरासेनाशालानिशायानां'' इति पाणिनी प्रयुक्तः निशाशब्दो मानम्। तेन

'पूर्वापरौ तोयनिधीवगाह्य' इति कालिदास प्रयोगोऽपि संगच्छते, अन्यथा अवगाह्य इति ब्रूयात्। तस्या: जबालाया अपत्यं पुमान् जाबाल: 'तस्यापत्तम्' इति अण्। ननु 'स्त्रीभ्यो 'ढक्' इति सूत्रेण ढक् ए आदेशे कौन्तेयादिवत् जाबालेय इति कथं नहि? इति चेत् शृणु जाबालाया: स्वपुत्रं प्रति संकटकालेऽपि सत्यवादिताया अग्रे श्रुत्यैव वक्ष्यमाणत्वात् तस्या: सामान्यस्त्रिभ्यो वैलक्षण्यसूचनाय सामान्य स्त्रीषु प्रयुतस्य 'ढक्' विधायक इति शास्त्रस्य विशिष्ट- प्रसरासम्भवात्। स्त्रियो हि प्राय: अनृतं वदन्ति। यथोक्तं मानसे—

नारि स्वभाव सत्य कबि कहहीं।
अवगुन आठ सदा उर रहहीं।।

साहस अनृत चपलता माया।
भय अविवेक अशौच अदाया।।

(मानस ६।१६।२,३)

परन्तु इयं जबाला विसंकटे संकटेऽपि पुत्रपृष्टा निजसेवाव्यस्तमेव गोत्राज्ञानकारणं स्वीचकार। एवं भूतो जाबाल: जबालां मातरं निजजननी आमन्त्रयाञ्चक्रे स्वाभिप्रायं निवेदितवान्। भवति मातृप्रभृतिमान्या स्त्रीणां सम्बोधनमेतत् केचन "भा दीप्तौ" इत्यस्मात् 'भातिर्डवतु:' इति सूत्रेण भत्वादिलोपं विधाय साधयन्ति, हे दीप्तिमतीति भाव:। अहं ब्रह्मचर्यं ब्रह्मणे चर्या ब्रह्मचर्यं भगवत्प्राप्तिसाधनभूतवसुद्वन्द्वधर्म-व्यवायपरिहारस्वरूपं भगवत् साधनं विवत्स्यामि विदेशं गत्वा प्रवत्स्यामि। किन्तु अहं जाबाल: किं गोत्र: किमभिधानगोत्र: अहं जाबाल: अस्मि इति माम् निर्दिश। न खलु अज्ञातवगोत्रवटु: आचार्यमुपनयीत इति। प्रश्नाकारोऽयम्।।श्री:।।

एवं पृष्टा सती ऋजुबुद्धि: जबालापुत्रप्रश्नमुत्तरयति--

सा हैनमुवाच नाहमेतद्वेद तात यद्गोत्रस्त्वमसि बह्वहं चरन्ती परिचारिणी यौवने त्वामलभे साहमेतन्न वेद यद्गोत्रस्त्वमसि जबाला तु नामाहमस्मि सत्यकामो नाम त्वमसि स सत्यकाम एव जाबालो ब्रुवीथा इति ।।२।।

सा सत्यकाममाता ह निश्चित्य एनं पुत्रम् उवाच अवदत्। तात! तनोति विस्तारयति वात्सल्य भावलतां य: सतात: तत् संबुद्धौ हे तात हे मद् वत्सलरसालंबन पुत्र! अहं त्वन् माता एतत् इदं न वेद न जानामि यद् गोत्र: यदभिधानं गोत्रं यस्य स यद् गोत्र: इति समासाकार:। तव गोत्रस्य यन् नाम तद् अहं न जानामि इत्याशय:। तर्हि मम पितरं

कथं न पृष्टवती? इति जिज्ञासमानं पुत्रं प्रति शंकानिराचिकीर्षुः हेतुमाह-यतोहि अहं यदा तव पितृगेहमागता तदा बहुचरन्ती बहुसेवमाना क्षणमपि समयं न प्राप्तवती। पितृ विश्रामकाले कथं न पृष्टवती? इति गीप्समानं प्रति प्रश्नाभावकारणमाह-परिचारिणी अतिथीनाम् इति शेषः। परिचरति तच्छीला इति परिचारिणी स्वभावतोऽहं समागतानां अतिथीनामतिथिदेवो भव इति धर्मबुद्ध्यापरिचरणं कुर्वेस्म तेषां पाद्यार्घभोजनादि व्यस्तक्षणतया मया निमिषमात्रमपि नावसरो लब्धः। पश्चात् कथं न पृष्टम्? इति शङ्कां निराकरोति, यौवने एवं व्यस्ते यौवने तारुण्यभावे सन्तानैकलक्ष्ये त्वाम् एकमात्रं पुत्रम् अलभे प्राप्तवती। अनन्तरं ते पितामृतः, ननु श्रुतौ सत्यकामपितुर्मरणेऽनुक्तेऽपि तल्लापनं किमाधारमिति जबालां मातरमामन्त्रयाञ्चक्रे इति प्रथममन्त्रशकलमेव प्रमाणम्। यदि सत्यकाम पिता अजीविष्य तर्हि स निजगोत्रं कथं मातरमेवापृच्छत् इति मातुरुत्तरेऽपि जबाला तु नामाहमस्मि त्वं सत्यकामो नामासि इति मातृपुत्रमातृचर्चापि तत्र पितुरुपशमं ध्वनयति। सा उपरतपतिका अहं जबाला त्वं सत्यकामः यद्गोत्रः असि भवसि इति इदं न वेद। तर्हि अहं कथमाचार्यमुत्तरयेयम्? इत जिज्ञासमानं पुत्रं शिक्षयति अज्ञातपतिगोत्राऽपि निजं त्वदीयञ्च नाम जानामि अहं तव माता जबाला नाम एतदाख्यया प्रसिद्धा अस्मि त्वं च सत्यकामः सत्यं सद्धितैषिणं सद्भ्यो हितं सत्यामिति व्युत्पत्तेः। एवं सज्जनमनोभृङ्गसरोरुहश्रीचरणं मैथिली हृदयाभरणं समरुणमसरणशरणं परब्रह्मश्रीरामं कामयते नयनपथपान्थं चिकीर्षति इत्यन्वर्थः। सत्यकामः त्वम् असि इति आचार्यं प्रति मम परिस्थितिवर्णनपूर्वकं सुस्पष्टं सत्यं ब्रुवीथाः, अत्र ब्रुवीथा इति विधिलिङ् प्रयोगात् यथोक्तानुवादमेव दृढयति। तवोपनयनं भवतु वा न भवतु वा परं त्वया कदाप्यसत्यं न वक्तव्यमिति दृढ़ीयान् मातुर्निर्देशः।।श्रीः।।

घटनामवतारयति—

स ह हारिद्रुमतं गौतममेत्योवाच ब्रह्मचर्यं ।
भगवति वत्स्याम्युपेयां भगवन्तमिति ।।३।।

इत्थं मातुरादेशमाकर्ण्य ह निश्चयेन सः सत्यकामः हारिद्रुमतं हरितः द्रुमाः वृक्षाः सन्त्यस्य इति हरिद्रुमतः मतुबर्थे छान्दसस्तस्प्रत्ययः। तपसः प्रभावेण यस्माश्रमे नैव कोऽपि वृक्षः शुष्कः सर्वेहरिताः द्रुमाः तथाभूतस्य हरिद्रुमतस्य पुत्रः हारिद्रुमतः, अथवा मतुप्यपिसाधीयान्। हरिद्रुमवतः पुत्रः हारिद्रुमतः वकारलोपो व्यत्ययात् हारिद्रुमतं गौतमं गौतमगोत्रमुपेत्य समित्पाणिरुपगम्य 'समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं' (मुण्डक १.२.११) इति श्रुतेः। आह—न्यवेदयत् भगवति हारिद्रुमते अत्र गुरौ वसीत्यवत् सामीप्यसप्तमी,

हारिद्रुमतसमीप इति भावः। ब्रह्मचर्यं क्रियाविशेषणमेतत् वत्स्यामि ब्रह्मचर्यपूर्वक-निवासं करिष्यामि भगवन्तं तत्र भवन्तमाचार्यम् उपेयां समुपगतोऽस्मि।।श्रीः।।

अथ आत्मानं उपनिनायिषन्तं पञ्च वर्षं सन्तं सत्यकामं हारिद्रुमतोऽपृच्छत्।

तँ होवाच किं गोत्रो नु सोम्यासीति स होवाच नाहमेतद्वेद भो यद्गोत्रोऽहमस्म्यपृच्छं मातरँ सा मा प्रत्यब्रवीद्बह्वहं चरन्ती परिचारिणी यौवने त्वामलभे साहमेतन्न वेद यद्गोत्रस्त्वमसि जबाला तु नामाहमस्मि सत्यकामो नाम त्वमसीति सोऽहँ सत्यकामो जाबालोऽस्मि भो इति ।।४।।

तम् आत्मानमुपनाययितुमिच्छन्तं ह निश्चयेन उवाच ब्राह्मणः पृष्टवान्। सौम्य सोमरसार्ह किं गोत्रः किं गोत्रं यस्य तथाभूतः कस्मिन् गोत्रे जातोऽसि? सत्यकामोऽब्रवीत् यद्गोत्रोऽस्मि तन्न वेद अजानन् गोत्रं कथं पितरौ नापृच्छः? इति जिज्ञासामने सोऽब्रवीत् अहं मातरम् अपृच्छम् अग्रिमो मन्त्रसकलः जबालावाक्यानुवादः सोऽहं अज्ञातगोत्रः जाबालः जबालापुत्रः भो इति सम्बोधनम्।।श्रीः।।

अनन्तरं किमभूदित्याह—

तँ होवाच नैतदब्राह्मणो विवक्तुमर्हति समिधँ सोम्याहरोप त्वा नेष्ये न सत्यादगा इति तमुपनीय कृशानामबलानां चतुःशता गा निराकृत्योवाचेमाः सोम्यानुसंव्रजेति ता अभिप्रस्थापयन्नुवाच नासहस्रेणावर्तेयेति स ह वर्षगणं प्रोवास, ता यदा सहस्रँ संपेदुः ।।५।।

सत्यकामस्य सत्यवादितां दृष्ट्वा प्रसीदन् तम् आचार्यः उवाच प्रत्युत्तरयामास। एतत् इत्थं छलशून्यं स्पष्टवाक्यं अब्राह्मणः ब्राह्मणेतरः न विवक्तुमर्हति न वक्तुं शक्नोति, अतस्त्वां निःसंदिग्धं ब्राह्मणं मत्वा उपनेष्ये सोपवीतं करिष्ये। यतोहि कठिनबेलायामपि सत्यात् न अगाः भूतार्थवादात् न व्यचलः। सोम्य समिधमाहर उपवीतार्थमिति शेषः। अनन्तरं तं सत्यकामम् उपनीय व्रतबन्धयुक्तं कृत्वा अबलानां दुर्बलानां कृशानां क्षीणानां चतुःशता चत्वारिशतानि संख्यात्वेन सन्ति यासु ताः चतुःशताः गाः धेनुः उपानीय उवाच— सोम्य इमाः समनुव्रज अनुगच्छ, इति स आचार्यनिर्देशं पालितवान्। भूयः प्राह ताः धेनुः सत्यकामेन सः अभिप्रस्थापयन् वनान्तरं गमयन् उवाच वत्स असहस्रेण सहस्रंसंख्यां विना ना वर्तयेत् वनान्तरादत्रेति शेषः। स वर्षगणं बहुवर्षानि यावत् उवास

वर्षगणमित्यत्र अत्यन्तसंयोगे द्वितीया इत्थं सत्यकामे पालयति सन्तान समृद्धिपरम्परया यदा सहस्त्र संपेदुः सहस्त्रसंख्या संपन्ना जाता:।।श्री:।।

इति छान्दोग्योपनिषदि चतुर्थाध्याये चतुर्थखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।
।। श्रीराघवः शंतनोतु ।।

पञ्चमः खण्डः

अथ पञ्चमे खण्डे सत्यकामाय ऋषभः ब्रह्मणः प्रथमं पादमुपदिशति, मन्ये वर्षपूगं सत्यकामस्य गोसेवया संतुष्टो भगवान् धर्म एव ऋषभवेषः ब्रह्मोपदिशति वृषो हि भगवान् धर्मः इति सूक्तात्।

अथ हैनमृषभोऽभ्युवाद सत्यकाम३ इति भगव इति ह प्रतिशुश्राव प्राप्ताः सोम्य सहस्त्रँ स्मः प्रापय न आचार्यकुलम् ।।१।।

अथ गवां सहस्त्रसंख्या संपन्नतानन्तरम् एनं निजसेवापरं सत्यकामम् ऋषभः महावृषः शण्डः साक्षाद्धर्मः अभ्युवाद अभ्येत्यवदत्। सत्यकाम नामग्राहमभिमुखीकरोति भगव हे भगवन् इति सत्यकामोऽपि प्रतिशुश्राव प्रत्यजानात्। सोम्य वयं सहस्त्रं सहस्त्रसंख्यां प्राप्ता नः अस्मान् गाः आचार्यकुलं हारिद्रुमताश्रमं नय गमय।।श्री:।।

अथ द्वितीये धर्मर्षभः तं ब्रह्मोपदेष्टुं सावधानं करोति—

ब्रह्मणश्च ते पादं ब्रवाणीति ब्रवीतु मे भगवानिति तस्मै होवाच प्राची दिक्कला प्रतीची दिक्कला दक्षिणा दिक्कलोदीची दिक्कलैष वैसोम्य चतुष्कलः पादो ब्रह्मणः प्रकाशवान्नाम ।।२।।

ऋषभः प्रसीदन् प्राह सत्यकाम गुरुशुश्रूषणपरेण त्वया सम्यगहं संतोषितः गुरुशुश्रूषणतः स्वयमेव विद्या आगच्छति। तथोक्तं मनुना—यथा खनन् खनित्रेण नरोवार्यधिगच्छति, एवं गुरुगतां विद्यां शुश्रूशुरधिगच्छति। 'गुरुशुश्रूषयाविद्या' इत्यपि अतः ते तुभ्यं ब्रह्मणः एकं पादं ब्रवाणि उपदिशानि प्रश्नार्थे लोट्। इति पृष्टः सत्यकामोऽवदत् भगवान् षडैश्वर्यसंपन्नः पशुशरीरोऽपि मनुष्यवाचाऽवदन् महाप्रभावशालीतिभावः। मह्यं ब्रवीतु वदतु तस्मै सत्यकामाय स उवाच उपदिदेश साम्य प्रतिपादं ब्रह्मणः चतस्त्रस्चतस्त्रः कलाः भवन्ति। तत्र ब्रह्मणः प्रथमः पादः प्रकाशवान्नाम प्रकाशः अस्ति अस्मिन् इति प्रकाशावान् अत्र परमेश्वरस्य प्रकाशः अस्मिन् प्रकाशवत् चतस्त्रः

कलाः प्राचीदिक्कला पूर्वादिशापि कला परमेश्वरस्य प्रतीची दिक्कला पश्चिमदिशापि ईश्वरस्य कला दक्षिणदिक् दक्षिणदिशाऽपि कला भगवतः उदीचीदिक्कला उत्तरदिशाऽपि परमात्मनः कला एवं चतुष्फलचतस्रः कलाः यस्मिन् तथा भूतः प्रकाशवान्नाम।।श्रीः।।

फलश्रुतिमाह—

स य एतमेवं विद्वाँश्चतुष्कलं पादं ब्रह्मणः प्रकाशवानित्युपास्ते प्रकाशवास्मिँल्लोके भवति प्रकाशवतो ह लोकाञ्जयति य एतमेवं विद्वाँश्चतुष्कलं पादं ब्रह्मणः प्रकाशवानित्युपास्ते ।।३।।

एवं यथोक्तरीत्या यः कश्चन एनं कलाचतुष्टयरूपदिक्चतुष्टयाकारं ब्रह्मणः पादं प्रकाशवानिति प्रकाशवानित्याकारकबुद्ध्या उपास्ते परमात्मपादत्वेन भजते सोऽपि लोके प्रकाशवान् भवति प्रकाशवतः ज्योतिष्मतः महदादीन् लोकान् जयति। द्विरुक्तिरादरार्था-सकलसमाप्तिसूचनार्था च।।श्रीः।।

इति छान्दोग्योपनिषदि चतुर्थाध्याये पंचमे खण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।

।। श्रीराघवः शन्तनोतु ।।

षष्ठः खण्डः

अथ ब्रह्मणो द्वितीयपादोपदेशमुपक्रामति—

अग्निष्टे पादं वक्तेति स ह श्वोभूते गा अभिप्रस्थापयाञ्चकार। ता यत्राभि सायं बभूवस्तत्राग्निमुपसमाधाय गा उपरुध्य समिधमाधाय पश्चादग्नेः प्राङुपोपविवेश ।।१।।

ते सत्यकामाय पादं द्वितीयं वक्ति, अत्र वर्तमानसामीप्ये भविष्यति लट् न चिराद् वक्ष्यतीति भावः। इति मौनीभूते ऋषभे सः सत्यकामः श्वोभूते अन्येद्युः गाः आचार्यकुलाय उपस्थाञ्चकार। बभूव ताः यत्र स्थाने अभिसायं बभूवुः सायंकालाभिमुत्राजाता तत्रैव उपरोध्य साद्वलेषु रोधयित्वा अग्निं प्रज्वलिनं विधाय समिधमाधाय अग्नेः पश्चात् पृष्ठभागे प्राङ्मुखः उपविवेश अग्न्युपदेशं प्रतीक्षमाणो उपविष्टः।।श्रीः।।

अथा अग्निप्राकट्यं वर्णयति—

तमग्निरभ्युवाद सत्यकाम३ इति भगव इति ह प्रतिशुश्राव ।।२।।

अभ्युवाद अभिमुखो भूत्वा वदति स्म शेषं स्पष्टम्।।श्री।।

द्वितीयपादोपदेशप्रतिज्ञां करोति—

ब्रह्मणः सोम्य ते पादं ब्रवाणीति ब्रवीतु मे भगव निति तस्मै होवाच पृथिवी कलान्तरिक्षं कला द्यौः कला समुद्रः कलैष वै सोम्य चतुष्कलः पादो ब्रह्मणोऽनन्तवान्नाम ।।३।।

अग्निराह हे सोम्य! ते तुभ्यं ब्रह्मणः द्वितायं पादं ब्रवाणी शेषं पूर्ववत्। अस्मिन् अनन्तवति पूर्ववत्। पृथ्वी अन्तरिक्षं द्यौः स्वर्गलोकाः समुद्रः सागर इति चतस्रः कलाः चतस्रृणां कलानां नास्ति अन्तः इत्यनन्तवान्।।श्रीः।।

फलश्रुति निरूपयाति—

स य एतमेवं विद्वाँश्चतुष्कलं पादं ब्रह्मणोऽनन्तवानित्यु-पास्तेऽनन्वा नस्मिल्लोके भवत्यनन्तवतो ह लोकाञ्जँ य एतमेवं विद्वाँश्चतुष्कलं पादं ब्रह्मणोऽनन्तवानित्युपास्ते ।।४।।

उपास्यगुणा उपासकं गच्छन्तीति एवं विद्वान् जानन् यः उपास्ते भजते शेषं पूर्ववत्।।श्रीः।।

इति छान्दोग्योपनिषदि चतुर्थाध्याये षष्टेखण्डे श्रीराघवकृपा भाष्ये सम्पूर्णम्।।

।। श्रीराघवः शन्तनोतु ।।

सप्तमः खण्डः

अथ ब्रह्मणः तृतीयपादोपक्रमः—

हँसस्ते पादं वक्तेति सः श्वोभूते सा अभिप्रस्थापयाञ्चकार ता यत्राभि सायं बभूवुस्तत्राग्निमुपसमाधाय गा उपरुध्य समिधमादाय पश्चादग्नेः प्राङुपोपविवेश ।।१।।

हंसः सूर्यः मरालवेषः ते तुभ्यं तृतीयपादं वक्ति। शेषं पूर्ववत्।।श्रीः।।

हंसागमनं सूचयति—

तँ् हस उप निपत्याभ्युवाद सत्यकाम३ इति ।
भगव इति ह प्रतिशुश्राव ।।२।।

तं सत्यकामम् उपनिपत्य हंसः हंसवेशः सूर्यः सत्यकाम इति अभ्युवाद। शेषं सुगमम्।।श्रीः।।

अथ तृतीयपादोपदेशः प्रारभ्यते—

ब्रह्मणः सोम्य ते पादं ब्रवाणीति ब्रवीतु मे भगवानिति तस्मै होवाचाग्निः कलां सूर्यः कला चन्द्रः कला विद्युत्कलैष वै सोम्य चतुष्कलः पादो ब्रह्मणो ज्योतिष्मान्नाम ।।३।।

ब्रह्मणस्तृतीयो यः पादः ज्योतिष्मान् अत्र अग्निसूर्यचन्द्रविद्युतः कलाः ज्योतीरूपाः अतः ज्योतिष्मान् पादः "तसौ मत्वर्थे" पा.अ. १-१-१९ इति भसञ्ज्ञेन पदत्ववाधात् रुत्वाभावे इदूदुपधात् षत्वम्।।श्रीः।।

फलश्रुतिं निरूपयति—

स च एतमेवं विद्वाँश्चतुष्कलं पादं ब्रह्मणो ज्योतिष्मानित्युपास्ते ज्योतिष्मानस्मिंल्लोके भवति ज्योतिष्मतो ह लोकाञ्जयति य एतमेवं विद्वाँश्चतुष्कलं पादं ब्रह्मणो ज्योतिष्मानित्युपास्ते।।४।।

एवं ज्योतिष्मान् इति ज्ञात्वा अग्निचन्द्र-सूर्य-विद्युतकलात्मकं तृतीयं पादमुपासीनो ज्योतिष्मान् भूत्वा ज्योतिष्मतो लोकाञ्जयति इति मन्त्रार्थः।।श्रीः।।

इति छान्दोग्योपनिषदि चतुर्थोऽध्याये सप्तमखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।
।।श्रीराघवः शन्तनोतु।।

अष्टमः खण्डः

अथ चतुर्थपादोपदेशोपक्रमः—

मद्गुष्टे पादं वक्तेति स ह श्वोभूते गा अभिप्रस्थापयाञ्चकार ता यत्राभिसायं बभूवुस्तत्राग्निमुपसमाधाय गा उपरुध्य समिधमाधाय पश्चादग्नेः प्राङुपोपविवेश ।।१।।

हंसोऽपि तृतीयपादमुपदिश्य ते मद्गुजलचरपक्षी चतुर्थपामुपदेशयतीति खं गत:। पूर्ववत् सायमग्निमुपसमाधाय सत्यकामेन मद्गु: प्रतिशत: मन्ये मद्गु विवेशो वरुण: जलदैवतत्वात्।।श्री:।।

अथ मद्गुरागत्य चतुर्थपादोपदेशार्थं तमुद्बोधयति—

तं मद्गुरुपनिपत्याभ्युवाद सत्यकाम३ इति ।
भगव इति तं प्रतिशुश्राव ।।२।।

उपनिपत्य समीपं गत्वा।।श्री:।।

अथ चतुर्थपादं ब्रूते—

ब्रह्मण: सोम्य ते पादं ब्रवाणीति ब्रवीतु मे भगवानिति तस्मै होवाच प्राण: कला चक्षु: कला श्रोत्रं कला मन: कलैष वै सोम्य चतुष्कला: पादो ब्रह्मण आयतनवान्नाम् ।।३।।

चतुर्थोऽयम् पाद: आयतनम् आयतनंन्नाम निवासस्थानम् एवम् अस्मिन् आयतनवति प्राण-चक्षु-श्रोत्रमनसां कलानाम् आयतनभूतत्वात्।।श्री:।।

फलश्रुतिं निरूपयाति—

स य एतमेवं विद्वँश्चतुष्कलं पादं ब्रह्मण आयतनवानित्युपास्त आयतनवानस्मिंल्लोके भवत्यातनवतो ह लोकञ्जयति य एतेवं विद्वाश्चतुष्कलं पादं ब्रह्मण आयतनवा नित्युपास्ते।।४।।

एवम् आयतनवान् इति दृष्ट्या चतुष्कलं पादमुपासीनो आयतनवान् भूत्वा आयतनवतो लोकाञ्जयति।।श्री:।।

इति छान्दोग्योपनिषदि चतुर्थाध्याये अष्टमे खण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।
।।श्रीराघव: शन्तनोतु।।

नवम: खण्ड:

अथ असकृदुपदिष्टोऽपि गुरुमुखमन्तरेण विद्यायां नैव पूर्णतां भजते इति शिक्षयितुं नवमं शकलमारभ्यते स एवं ब्रह्मवित्सन्—

प्राप हाचार्यकुलं तमाचार्योऽभ्युवाद सत्यकाम३ इति ।
भगव इति ह प्रतिशुश्राव ।।१।।

एवम् ऋषभाग्निहंसमद्गुभिः समुपदिष्टः ब्रह्मवेत्ता सन् तृतीयदिवसे गवां सहस्रेण सह आचार्यकुलं प्राप तं हारिद्रुमतः सत्यकाम इत्यभ्युवाद सोऽपि भगवन् इति प्रतिजज्ञे।।श्रीः।।

आचार्यः शिष्यविद्यापूरणार्थं तदुपदेष्टारमपृच्छत्—

ब्रह्मविदिव वै सोम्य भासि को नु
त्वानुशशासेत्यन्ये मनुष्येभ्य इति ह
प्रतिजज्ञे भगवाँस्त्वेव मे कामे ब्रूयात् ।।२।।

आचार्यः प्राह सोम्य ब्रह्मविद् ब्रह्मवेत्ति ब्रह्मविन्दति वा इति ब्रह्मविद् स इव भासि प्रतीयसे दीप्से वा त्वां कः अनुशशास उपदिदेश सत्यकामोऽब्रवीत् मनुष्येभ्यः अन्ये पशवः पक्षिणः देवाश्च ऋषभाग्निहंसमद्गवः। तु किन्तु मे मह्यं भगवान् तत्र भवान् एव कामं यथेच्छं ब्रूयात् निगदेत्।।श्रीः।।

गुरोः सम्मानार्थी आचार्यदेवसत्यकामः भूयश्च तमनुरुन्धे—

श्रुतँ ह्येव मे भगवद्दृशेभ्यः आचार्याद्धैव
विद्या विदिता साधिष्ठं प्रापतीति तस्मै हैतदेवोवाचात्र
ह न किञ्चन वीयायेति वीयायेति।।३।।

स्वकमेव निश्चयं द्रढयति हि यतोहि भगवद्दृशेभ्यः भवादृशेभ्यः आचार्येभ्यः मे एवं श्रुतमावर्णितं यत् आचार्यात् निजगुरोरेव विदिता ज्ञाता आचार्यात् इत्यत्र 'आख्यातोपयोगे इति प्राणिनिसूत्रेण पञ्चमी। साधिष्ठं शोभनत्वं प्रापति प्राप्नोति 'गणकार्यमनित्यम्' इत्यनुशासनेन सौवादिकेऽपि भौवादिकार्यम्। इति निवेदितः सन् तस्मै सत्यकामाय आचार्यः तामेव ब्रह्मपादचतुष्टयविद्यासमुपदिदेश। यत्र किञ्चन् अपि न वीयाय न विगतं बभूव इत्यनेन गरुदेवेभ्योऽपि गुरुतत्वं गरीयस्त्वेन प्रतिपादितम् द्विरुक्तिः आदरार्थः प्रकरणसमाप्तिसूचिका च।।श्रीः।।

इति छान्दोग्योपनिषदि चतुर्थाध्याये नवमखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।
।। श्रीराघवः शन्तनोतु ।।

दशमः खण्डः

अथ निरतिशयगुणगणनिलयस्य परिकलितप्रणयस्य परमानन्दमूर्त्तये भगवतः परब्रह्मणोविभूम्नः कृत्स्नश आनन्दमयत्वात् पौनःपुण्येनाभ्यासार्थं मन्त्राणामालस्या-भावात् भगवतोऽसकृतस्मरणार्थं प्रकारान्तरेण ब्रह्मव्याचिख्यासया शकलमिदं प्रारभ्यते। आख्यायिका तु प्रतिपाद्यविषयतात्पर्यावबोधार्था—

उपकोसलो ह वै कामलायनः सत्यकामे जाबाले ब्रह्मचर्यमुवास तस्य ह द्वादशवर्षाण्यग्नीन्परिचचार स ह स्मान्यान्तेवासिनः समावर्तयँ्स्तँ्ह स्मैव न समावर्तयति ।।१।।

ह वै इति निपातद्वयम् घटनाया एतस्या ऐतिहासिकत्वसूचनाय, इतिहासप्रसिद्धेयं घटनेति भावः। का सा इत्यत आह— कामलायनः कं संसारसुखममपि निजब्रह्मविचारेण अमलयति यः स कमलः, कमल घटकारस्य ककारघटकारस्य च मध्ये स्कन्धादित्वात् पररूपम्। तथाभूतः कमलनामा कश्चित् ऋषिः तस्य गोत्रापत्यं पुमान् तस्यापत्यं पुमान् वा कामलायनः इत्यनेन ब्रह्मजज्ञोर्वंशपरिचयः। न खलु प्रशस्त मातृपित्राचार्यविहीनो ब्रह्मविद्यामधिगन्तुमर्हः। सर्वतोभावेन पतितस्य तु पतितपावनपार्वतीपतिपतिपाथोजचरण एव शरणमितिराद्धान्तः। विद्या ह वै ब्राह्मण माजगाम इति श्रुतेः। 'आचारहीनं न पुनन्ति वेदाः' इति स्मृतेश्च। किन्नामासौ इत्यत आह उपकोसलः— कोसलान् उपगतः इत्युपकोसलः मन्ये कोसलदेशे तस्य प्रादुर्भूतत्वात् तज्जनक उपकोसल इति नाम व्यधत्त। अथवा कोसलेषूपलब्धः इति उपकोसलः, अथवा उपकंठः कोसलः यस्य स उपकोसलः उपकृता कोसला वा येन मुनि दुश्चरतपश्चरणद्वारा स उपकोसलः। एवं गुणगणविशिष्ट उपकोसलो नाम कमलमहर्षिपुत्रः सदाचरपरायणो ब्राह्मणकुमारः जाबाले सत्यकामे अनुपदमेव पञ्चसु खण्डेषु व्याख्यातमहिम्नि सत्यकाम नामनि आचार्ये, अत्रत्या सप्तमी तु सामीप्ये सत्यकामचरणकमलसन्निधाविति भावः। ब्रह्मचर्यं ब्रह्मचर्यपूर्वकम्, उवाच निवासञ्चकार, ह निश्चयेन, 'सः' तस्य सत्यकामस्य द्वादशवर्षाणि यावत् अग्नीन् परिचचार, गार्हपत्यम् आहवनीयमन्वाहार्यपजनम् इमान् त्रीणि अग्नीन् परितः सिषेवे। किन्तु सः सत्यकामः अन्यान् उपकोसलतः इतरान् अन्तेवासिनः वटून् समावर्तयन् समावर्तनसंस्कारेण योजयन् विद्यासमाप्तौ समावर्तनपूर्वकं गृहान्प्रस्थापयन् अपि तम् उपकोसलं न समावर्तयति स्म 'ह' एव इति प्रसिद्धार्थम्।।श्रीः।।

अग्रे किमभूत इत्यतत् आह—

तं जायोवाच तप्तो ब्रह्मचारी कुशलमग्नीन्परिचचारीन्मा त्वाग्नयः परिप्रवोचन्प्रब्रूह्यस्मा इति तस्मै हाप्रोच्यैव प्रवासाञ्चक्रे ।।२।।

एवं द्वादशवर्षाणि परिचरतोऽग्निरपि यदोपकोसलस्य सत्यकामो समावर्तनं न चकार तदा जाया, जायते पतिरेव पुत्ररूपेण यस्यां तथाभूता तस्य पुत्रवती वल्लभा पत्नी करुणापरवशा वटौ तमुवाच—सत्यकामं न्यवेदयत्, अयम् एषः ब्रह्मचारी तप्तः उग्रं तपश्चचार तप आलोचने इत्यस्मात् कर्मणिभूतेक्तः ब्रह्मविचारार्थं मया समालोचितः। अथवा असकृत् परिचरणेन त्रयाणाम् अपि पावकानां स्फुल्लिंगमालया तप्ताङ्गः अथ च कुशलं यथा शास्त्रं कौशलेन अग्नीन् परिचचार असेवत् इति निश्चये एतावत्यपि भवानस्मै ब्रह्मविद्यां नोपदिशाति अस्याम् उपेक्षायां अग्नयस्त्वां निन्देयुः।

अतः यथा गार्हपत्यादयोग्न्यः त्वां भवन्तं मा प्रवोचन् मा परिवदन्तु। ततो भवान् अस्मै ब्रह्मविद्या ब्रवीतु। यतोहि ज्ञानं सम्प्रात्य संसारे यः परेभ्यो न यच्छति ज्ञानरूपी हरिस्तस्मै प्रसन्न इव नेक्षते। इति अस्मै ब्रह्मचारिणे ब्रूहि किमपि ब्रह्मरहस्यं वर्णय। इति प्रेरितोऽपि अप्रोच्य अनिगद्यैव सत्यकामः प्रवासांचक्रे प्रावसत।।श्रीः।।

अथाग्निप्रशंसा वर्णयति—

स ह व्याधिनानशितुं दध्रे तमाचार्यजायोवाच ब्रह्मचारिन्नशान किं नु नश्नासीति स होवाच बहव इमेऽस्मिन्पुरुषे कामा नानात्यया व्याधिभिः प्रतिपूर्णोऽस्मि नाशिष्यामीति ।।३।।

एवं भग्नोद्दिश्य उपकोसलः व्याधिना मनस्तापेन अनशितुम् अनशनन् कर्त्तुं दध्रे निश्चितं कृतवान्। तमश्नन्तमाचार्यस्य सत्यकामस्य जाया आचार्यजाया तद्गुरुपत्नी उवाच भो ब्रह्मचारिन्! अशान् भोजनं गृहण किं नु कस्माद्धेतोः नाश्नासि न भुङ्क्षे सोऽवदत् अस्मिन् पुरुषे शरीधारिणे जीवे नानात्ययाः नानापरिणामवन्तः बहवा कामा इच्छाः कामानाम् आनन्तेन संजन्त व्याधिभिः प्रतिपूर्णोऽस्मि प्रतिस्पर्धितया पूर्णोऽस्मि अतः न अशिष्याभि न भोजनं करिष्यामि इति इत्थम् उदतीतरत् गुरुपत्नीम्।।श्रीः।।

अथाग्नीनां प्राकट्यपूर्वकम् उपदेशं वर्णयति अथ हाग्नयः समूदिरे तप्तो ब्रह्मचारी कुशलं नः पर्यचारीद्धन्तास्मै प्रब्रवामेति तस्मै होचुः प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति ।।४।।

अथ आसन्नमरणमुपकोसलं वीक्ष्य अग्नयः त्रयोऽपि समुदिरे प्रकटय्य निगदितवन्तः। तप्तो ब्रह्मचारी तपस्यया अस्मज्ज्वालया च नः अस्मान्त्रीनपि कुशलं विधिकौशलपूर्वकं पर्यचारीत् असेविष्ट। हन्त विस्मयाश्चर्यवाचकोऽयम् अव्ययः। अस्मै ब्रह्मचारिणे प्रब्रवाम प्राकर्षेण ब्रह्मतत्व निगदेम इति निश्चित्य त्रयोऽपि एकैकशः प्राणः ब्रह्म कं ब्रह्म, खं

ब्रह्म इति प्रकारत्रयेण त्रिभिर्विभूतिभिर्वा ब्रह्म ऊचुः। प्राण इत्येनन सत्, कम् इत्यनेन चित्, खम् इत्यनेन आनन्दम् इति सच्चिदानन्द ब्रह्म स्मारयामासुः।।श्रीः।।

उपकोसल-जिज्ञासां प्रस्तौति प्राणो ब्रह्मेति गार्हपत्ये उक्तवती प्राणानां प्रसिद्धत्वात् अवजगामुपकोसलः कं ब्रह्मेति दक्षिणाग्नौ कथिते, खं ब्रह्मेति तृतीये समुपदिष्टवती सहसा जिज्ञासा जाताकिमेतत् कं खमिति अतः जिज्ञासते—

स होवाच विजानाम्यहं यत्प्राणो ब्रह्म कं च तु खं च न विजानामीति ते होचुर्यद्वाव कं तदेव खं यदेव खं तदेव कमिति प्राणं च हास्मै तदाकाशं चोचुः ।।५।।

अग्नीन् उपकोशलोऽपृच्छत् भगवन्तः प्रसिद्धपदार्थत्वात् प्राणं विजानामि तस्मिन् ब्रह्मभावानां चिकर्षामि। तु किन्तु कं, खं च न विजानामि। ननु यथा लोके प्रसिद्धार्थतया प्राणं ब्रह्मत्वेन जानासि तथैव क शब्दः लोके सुखवाची, खं शब्दश्चाकाशवाची इमौ कथन्न जानासि? इत्यान्तरं प्रच्छत्सु पावकेषु तत्समाहितिः। कं लौकिकं सुखं तद्ब्रह्म भवितुं शक्नोति नहि, खं आकाशं तस्मिन्न चेतने कथं चिद्घन ब्रह्मणो भावना अतः अग्नयः ऊचुः उत्तरयामासुः। वत्स—क ख योर्मध्ये न किञ्चित् विभेदः वाव निश्चयेन यत् कं तदेव खमर्थात् यद्ब्रह्मसुखस्वरूपं तदेवाकाशवन्नीलं गंभीरं समनन्तावकाशञ्च। ननु अन्यतरेणैव लाभः स्यात् अलं द्वाभ्याम् इति चेन्न। लौकिकसुखनिराशार्थं खमित्याकाशता, लौकिकाकाशत्वनिराशनार्थम्, कमिति लोकोत्तरसुखता सामानाधिकरण्यञ्च सुखस्वरूपत्वबोधानाय मानसेऽपि—

सुख स्वरूप रघुवंशमनि मंगलमोदनिधान।

(मानस २।२००)

मम तु कं सर्वेषां श्रुतीनां शिरोभूतं ब्रह्म। यथोक्तं श्रीमानसे—

जहँ रह श्रीनिवास श्रुतिमाथा।

(मानस १।१२७।३)

खमाकाशं शिरोभूतमपि आकाशवत् सर्वव्याप्तम्, अथवा कं जलरूपं, खं जलाधाराकाशरूपं, कं निर्गुणं ब्रह्म कीयते श्रुतिभिरनिर्वचनीयतया गीयते। खं—खनति भक्तानां संकटतरुमूलं राक्षसानां गर्वतरुमूलं यत्तत् खं सगुणं ब्रह्म श्रीरामाभिधम् एवं तस्मै प्राणं ब्रह्म सुखस्वरूप सर्वत्रव्यापितया आकाशं च ब्रह्म इत्यूचुः।।श्रीः।।

इति छान्दोग्योपनिषदि चतुर्थेऽध्याये दशमे खण्डे श्रीराघवकृपाभाष्यम् सम्पूर्णम्।।

।। श्रीराघवः शन्तनोतु ।।

एकादशः खण्डः

भूयोऽपि गार्हपत्यः अन्वाहार्य्यपचनः (दक्षिणाग्निः) आहवनीयश्चेति त्रयोऽप्यग्न्यः सम्भूय तमुपदेष्टुमारेभिरे—

अथ हैनं गार्हपत्योऽनुशशास पृथिव्यग्निरन्नमादित्य इति ।
य एष आदित्ये पुरुषो दृश्यते सोऽहमस्मि स एवाहमस्मीति ।।१।।

पूर्वस्मिन् खण्डे उपकोसलं प्राणो ब्रह्म इति गार्हपत्यः, कं ब्रह्म इति अन्वाहारपचनः, खं ब्रह्म इति च आहवनीयः इत्थं यथाक्रमम् अग्नित्रयम् त्रेधा ब्रह्मोपदिदेश। उपदेष्टुः स्वरूपजिज्ञासायां पुनरिमे यथाक्रमम् त्रिभिः कण्डैः स्वं स्वं स्वरूपमुपदिशन्ति। तत्रैकादशे प्रथमं गार्हपत्योपदेशोपक्रमः अथ इत्यादिना। अथ शब्दोऽयम् आनन्तर्यवाची प्रस्ताववाची च। अध्यात्मविद्योपदेशाव्यवहितोत्तरकालमेव। आत्मविद्योपदेशः प्रस्तूयते इत्यथ पदार्थः। ह निश्चयेन, एनम् उपकोसलं, गार्हपत्यः— ग्रहपतिनानीतोऽग्निः गृहपतिसेवितो वा, गृहपतिसम्बन्धिभूतो वा। अनुशशास ननु शासधातोः स्वयमेवानुशासनमर्थः तर्हि किमनेनानूपसर्गेण इति चेन्नैष दोषः। शासधातु-वाच्यमनुशासनरूपमर्थं विसर्ग एव द्योतयति, प्रहाराद्यर्थक 'हृ' धातोः प्राद्युपसर्गवत्, यद्वा शास धातोरनुशासनमर्थः अनूपसर्गस्य चानुकूल्यम् एवमनुशशासेत्यास्य गार्हपत्याभिन्नैककर्तृकपरोक्षत्वावच्छिन्नभूतकलावच्छिन्नोपकोसलकर्मकतदानुकूल्य-प्रकारकेच्छाविशिष्टशास्त्रोपदेशानुकूलव्यापारः पदार्थः। किमनुशासनमित्यत आह पृथिवी, अग्निः, अन्नम् आदित्यश्च इत्येव मे चत्वारि स्वरूपाणि। अत्र पृथिव्या अन्नेन सम्बन्धः अग्नेश्चादित्येन द्वन्द्वघटितस्यैव पूर्वोच्चरितत्वेऽपि अर्थानुरोधिनीयं व्यवस्था, एवम्, आदित्ये सूर्यनारायणे यः पुरुषः दृश्यते मानवाकारतया विलोक्यते सः अहं गार्हपत्याग्निः दृढयितुं परिवर्त्य प्राह— स एव आदित्यमण्डलगतपुरुष एव इत्येव गार्हपत्योपदेशप्रकारः आशयोऽयं यत् पृथिवी, अग्निः अन्नं, सूर्यः इमे मम चत्वारो देहाः, आत्मा तु सूर्यमण्डलगतपुरुष एव।।श्रीः।।

फलश्रुतिं निर्दिशति—

स य एतमेवं विद्वानुपास्तेऽपहते पापकृत्यां लोकीभवति
सर्वमायुरेति जयोग्जीवति नास्यावरपुरुषाः क्षीयन्त उप वयं तं
भुञ्जामोऽस्मिँश्च लोकेऽमुष्मिंश्च य एतमेवं विद्वानुपास्ते ।।२।।

एवं पूर्वोक्तरूपेण विद्वान् जानन् एतं पृथिव्यादिरूपचतुष्टयसम्पन्नम् एतं गार्हपत्याग्निं यः कश्चनापि उपास्ते उपासनविषयं करोति। पापानां विकर्मविपाकानां

कृत्यां कृत्यारूपिणीं कृतिम् अपहते हिनस्ति आत्मनेपदत्वात् अपि तस्तकारस्य नित्वात् "सार्वधातुकमपित्" इति पाणिनीयानुरोधेन अनुनासिकलोपः सर्वमायुः शतवर्षात्मकम् एति कर्म कुर्वन् जीवनपथ्यायां गच्छति। ज्योक् उज्ज्वलार्थोऽयं क्रियाविशेषाणरूपोऽव्ययः ज्योग्जीवति समुज्ज्वलं जीवनं वर्तयतीति भावः। अस्य अवरपुरुषाः भावि संततयः न क्षीयन्ते नैव नष्टा भवन्ति। वयं त्रयोऽग्नयः अस्मिंल्लोके मर्त्यलोके जीवनकाले अमुष्मिन् परलोके च उपभुञ्जामः पालयामः 'भुजोऽनवने' इति पाणिनीयानुशासनेन अवन-भिन्नस्यैव आत्मनेपदविधानात् य एवमिति दुरुक्तिस्तु आदरार्था।।श्रीः।।

इति छान्दोग्योपनिषदि चतुर्थाध्याये एकादशे खण्डे श्रीराघवकृपाभाष्यम् सम्पूर्णम्।।
।। श्रीराघवः शन्तनोतु ।।

द्वादशः खण्डः

इदानीं दक्षिणाग्नेरुपदेशं प्रस्तौति—

अथ हैनमन्वाहार्यपचनोऽनुशशासापो दिशो नक्षत्राणि चन्द्रमा इति। य एष चन्द्रमसि पुरुषो दृश्यते सोऽहमस्मि स एवाहमस्मीति।।१।।

अथ गार्हपत्योपदेशानन्तरं ह निश्चयेन उपकोसलं समनुग्रहीतुं निश्चित्य एनं जिज्ञासुं कमलपुत्रमन्वाहार्यपचनः दक्षिणाग्निः सशरीरः अनुशशास अनुशिष्टवान्। अनुशासनप्रकारमाह, आपः जलं, दिशः पूर्वादयः, नक्षत्राणि उडुगमाः चन्द्रमाः पार्वण, शशी, इमानि चत्वारि मे रूपाणि त्वं कः? इत्यत आह, एषः सर्वसाधारणगोचरः चन्द्रमसि इन्दुबिम्बमध्ये यः कश्चन् कदापि विलोकनार्ह दृश्यते चाक्षुस् साक्षात्कारविषयः क्रियते। दृशेर्ज्ञानार्थकत्वे अनुभूयते सः अहं दक्षिणाग्निरश्मि तमेव सिद्धान्तं दृढयति स एवास्मि एवकारः इतरयोगं व्यवच्छिनत्ति इति उपदेशप्रकारसूचकोऽयम्।।श्रीः।।

फलश्रुतिं निर्दिशति—

स य एतमेवं विद्वानुपास्तेऽपहते पापकृत्यां लोकीभवति सर्वमायुरेति ज्योग्जीवति नास्यावरपुरुषाः क्षीयन्त उप वयं तं भुञ्जामोऽस्मिँश्च लोकेऽमुष्मिँश्च य एतमेवं विद्वानुपास्ते ।।२।।

एतत् ज्ञात्वा उपासीनः पालितो दक्षिणाग्निना आयुषा धनसम्पत्या जीवत्येष श्रुतेर्मतः।।श्रीः।।

इति छान्दोग्योपनिषदि चतुर्थेऽध्याये द्वादशखण्डे श्रीराघवकृपाभाष्यम् सम्पूर्णम्।
।। श्रीराघवः शन्तनोतु ।।

त्रयोदशः खण्डः

अथाहवनीयविद्योपदेशं वर्णयति—

अथ हैनमाहवनीयोऽनुशशास
प्राण आकाशो द्यौर्विद्युदिति ।
एष विद्युति पुरुषो दृश्यते
सोऽहमस्मि स एवाहमस्मीति ।।१।।

अथ तूष्णींभूते दक्षिणाग्नौ आहवनीयः तृतीयोऽग्निः अनुशशास, यत् प्राणः आकाशः नभो मण्डलं द्यौः स्वर्गलोकः, विद्युत् चपला इमे चत्वारो मे देहाः। विद्युति चपलायां य एषः पुरुषः दृश्यते अनुभूयते सः तादृशः अहम् अस्मि आहवनीयो भवामि स एवास्मि नान्यदतो व्यतिरिक्त इति भावः।।श्रीः।।

फलश्रुतिमाह—

स य एतमेवं विद्वानुपास्तेऽपहते पापकृत्यां लोकीभवति सर्वमायुरेति ज्योग्जीवति नास्यावरपुरुषाः क्षीयन्त उप वयं तं भुञ्जामोऽस्मिँश्च लोकेऽमुष्मिँश्च य एतमेवं विद्वानुपास्ते ।।२।।

लोकीभवति विद्युल्लोकं याति शेषं सुगमम्।।श्रीः।।

इति छान्दोग्योपनिषदि चतुर्थाध्याये त्रयोदशखण्डे श्रीराघवकृपाभाष्यम् सम्पूर्णम्।।
।। श्रीराघवः शन्तनोतु ।।

चतुर्दशः खण्डः

उपदेशोपसंहाराय गुरुगौरवाय च खण्डोऽयं प्रारभ्यते सर्वज्ञाः सन्तोऽप्यग्नयः आचार्यमहत्वं वर्णयितुं अग्निविद्यात्मविद्ययोः गतिं नावगमयन्ति अत आहुः ते इत्यादि—

ते होचुरुपकोसलैषा सोम्य
तेऽस्मद्विद्यात्मविद्या चाचार्यस्तु
ते गतिं वक्तेत्याजगाम हास्याचार्य-
स्तमाचार्योऽभ्युवादोपकोसल ३ इति।।१।।

एवम् उपदेशं दत्त्वा ते गार्हपत्यान्वाहारपचनाहवनीयाः प्रोचुः निजगदुः— उपकोसल एषा तुभ्यम् अस्मद्विद्या अग्निविद्या आत्मविद्या ब्रह्मविद्या च निगदितेऽस्माभिः। हे सोम्य! सोमोत्पादनसमर्थ तव आचार्यः गतिम् उभयोर्विद्ययोर्लक्षं वक्ति वर्तमानसामीप्ये लट् विधानात् शीघ्रं वदिष्यतीत्यर्थः। तावत् अस्य आचार्यः विदेशतः आजगाम तम् अभ्युवाद आजुहाव उपकोसलसम्बोधने वाक्य टेः प्लुत उदात्तः।।श्रीः।।

अथाचार्योपकोसलसम्वादं समुपस्थापयति—

भगव इति ह प्रतिशुश्राव ब्रह्मविद इव सोम्य ते मुखं भाति को नु त्वानुशशासेति को नु मानुशिष्याद्भो इतीहापेव निह्नुत इमे नूनमीदृशा अन्यदृशा इतीहाग्नीनभ्यूदे किं नु सोम्य किल तेऽवोचन्निति ।।२।।

आचार्याह्वानानन्तरं भगव इति सम्मानवाक्येन प्रतिशुश्राव आत्मानं निवेदयाञ्चक्रे। आचार्यः सविस्मयं पप्रच्छ सोम्य! ते उपकोसलस्य मुखं ब्रह्मविद इव ब्रह्मवेत्तुरिव भाति परं प्रसन्नं दीप्यते। मयि प्रवसति त्वाम् उपकोसलं कः अनुशशास कोपादिदेश। आचार्य-प्रश्नं श्रुत्वा प्रेमसंरम्भविह्वलः ईषत् गोपनीयम् इव प्राह— भवति प्रवसति मां कः अनुशिष्यात् उपदिशेत् इह अस्मिन् बुधशून्ये गुरुपत्नीमात्रद्वितीये। अपि एव शब्दौ अत्यन्तगोपनपरौ इति निह्नुते गोपायति परम् आचार्यो जानन् न संतुष्यति तदा कथयति इमे ईदृशाः एतत् प्रकाराः तेजसा भवत्सदृशाः अन्यथादृशा वा वा शब्दः समुच्चयार्थः न तु विकल्पार्थः अन्यादृशाश्च इत्यर्थः। अभिप्रायोऽयं भवत्सादृश्येऽपि दैवतत्वात् ते अन्यदृशाः भवतो विलक्षणाः इति भावः। अथ स्पष्टयति तर्हि इमे अग्नयः आचार्यः प्राह ते किम् अवोचन् किमुपादिशन् इति।।श्रीः।।

अथोपकोसलः विद्याद्वयं तदुपदेशं प्राह अनन्तरम् आचार्यः ततो विलक्षणं ब्रह्म प्रावोचत्—

इदमिति ह प्रतिजज्ञे लोकान्वाव किल सोम्य तेऽवोचन्नहं तु ते तद्वक्ष्यामि यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यत इति ब्रवीतु मे भगवानिति तस्मै होवाच ।।३।।

आचार्ये पृच्छति उपकोसलः इदम् अग्न्यात्मविद्याद्वयम् उपादिशन् इति प्रतिजज्ञे सत्यापयामास। आचार्यः प्राह सोम्य! ते लोकान् प्रावोचन् अर्थात् तैस्ते विद्ये उपदिष्टे याभ्यां त्वया ब्रह्मलोकान्ताः क्षणभङ्गुराः लोकाः तेषां क्षणभङ्गुरञ्च सुखं समधिगन्तु शक्यते न तु सकललोकविलक्षणं श्रीकौशल्यानन्दवर्दनपदपाथोजपरागमकरन्दपानरूपम्।

एतस्मात् विलक्षणम् अहं ते वक्ष्यामि। कीदृशं तत्? अत आह बन्धनानां दु:खामय-मूलकत्वात् यथा पुष्करपलाशे कमलपत्रे विराजमाना अपि आप: जलानि न श्लिष्यन्ते न सम्बन्द्ध्यन्ते एवम् अनेन प्रकारेण एवं विदि ब्रह्मवेत्तरि पापं विकर्मपरिणाम: कर्म सत्कर्मफलञ्च श्लिष्यन्ते न सम्बद्ध्यन्ते, ज्ञाने हि कर्मफलानि विलीयन्ते। यथोक्तं गीतायाम्—

सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते।

(गीता ४।३३)

इति उपकोसल: प्राह ब्रवीतु भगवान् इत्थं प्रार्थ्यमाने आचार्य: तस्मै उवाच अवदत्।।श्री:।।

इति छान्दोग्योपनिषदि चतुर्थाध्याये चतुर्दशे खण्डे श्रीराघवकृपाभाष्यम् सम्पूर्णम्।।
।। श्रीराघवः शन्तनोतु ।।

पंचदश: खण्ड:

अथ साम्प्रतमुपकोसलं सत्यकाम: प्राह ब्रह्मरहस्यं, नन्विदमनुपपन्नं ब्रह्मण: सर्वेषां याथातथ्येन बुद्ध्यारूढत्वाभावात् 'यस्यामतं तस्य मतं' (केन. १.२.५) 'यमेवैष वृणुते तेन लभ्य:' (कठ. १.२.२३) 'कस्तं मदामदं देवं मदन्योज्ञातुमर्हति' (कठ. १.२.२०) 'न च तस्यास्ति वेत्ता' (श्वेताश्वता उ. ५.२०) इत्यादिश्रुत्यन्तरेभ्य: 'स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम' (गीता १०.१५) इत्यदिस्मृतेश्च नैष दोष: ब्रह्मणो वृत्यारूढत्वस्य एकदेशीयै: सिद्धान्तितत्वात्। सत्यकामश्च स्वयं भगवद्रूपत्वाच्च, 'सत्यकाम: सत्यसंकल्प:' इत्यादिश्रुते: 'गुरु: साक्षाद् परब्रह्म' इति गुरुगीतोक्तेश्च। सत्यकामे ब्रह्मत्वव्यपदेशे तस्मिन्नल्पज्ञत्वरूपशंकापंकप्रच्छालनात्—

य एषोऽक्षिणि पुरुषो दृश्यत एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति । तद्यद्यप्यस्मिन्सर्पिर्वोदकं वा सिञ्चन्ति वर्त्मनी एव गच्छति।।१।।

अथ ब्रह्ममत्वत्तो न दविष्ठं कुत्र स इत्यत आह— एष: अयमित्याङ्गुल्यानिर्देश: कुत्रैतन्निवास:? अत आह य: सगुणसाकार: अक्षिणि प्रतिप्राणिनेत्रमधितिष्ठत् दृश्यते योगिभि: साक्षात् क्रियते। यथोक्तं श्रीभागवते—'ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनो' (भागवत १२.१३.१) मानसे च जटायुषोक्तं— पश्यन्ति यं योगी जतन करि करत मन गो बस सदा (मानस ३.३२.४) पुरुष: पु: शरीरे उ निश्चयेन शेते

तटस्थतया तिष्ठति तथाभूतः एष आत्मा एषः अतिसंन्निकृष्टः आत्मा परमात्मा आसमन्तात् आदरेण वा आहूतो वा सततम् अतति इत्यात्मा, प्रेमवसंवदत्वात्। यत्तु केचन आत्मपदेन जीवात्मानं व्याचक्षते तदनर्गलम् अत्रत्य प्रसंगविरोधात्। नहि खलु जीवात्मा अक्षि दृश्यते तस्य स्वयमेवावयवित्वात् दृश्यते इति क्रियापदेनापि दृश्यदृष्टोर्भेदस्य सुस्पष्टं सिद्धत्वात् कर्मकर्त्रोश्च एकस्मिन् पिण्डे सर्वथैव व्यपदेशासंभवात्, यथा रामो दृश्यते केन इति जिज्ञासायां सीतया इत्थं लोकेऽपि दृश्यदृष्टिभेदस्य दुर्निवारत्वात् तस्मन्मदुक्तः पन्थः ज्यायान्। एवम् आदत्ते भक्तानां भावान् यः स आत्मा, आप्नोति व्याप्नोति चराचरं यः स आत्मा, निरस्तसकलपंचक्लेशपरिणामो नर्मदगुणग्रामोसीताभिरामो श्रीरामः, तथा च आप्नोति सर्वांल्लोकान् यः आहूतोऽतिसर्वदा, आदत्ते भक्तभावान्यः स आत्मा परमेश्वरः इति वैष्णवस्मृतेः इति इत्थं ह निश्चयेन उवाच अवदत् सत्यकाम उपकोसल इति भावः। पुनर्विशिनष्टि जीवात्मत्ववारणाय विशेषणं हि विद्यामानं सदितरव्यावर्तकम् एतद् क्लीबेऽपि ब्रह्मकथ्यते ब्रह्मपदेन वेदप्रकृति ब्रह्म ब्राह्मणानामर्थबोधसंभवे तद्वारणाय विशेषणम् एतद् अमृतं मृतामरणधर्माणोमनुपयाः। तद्भिन्नम् अथवा मरणमेव मृतं भावे क्त प्रत्ययविधानात् न भवति मृतं ज्ञायमानेऽस्मिन् तदमृतं "तमेव विदित्वामृत्युमेति" (शुक्लयजुर्वेद ३१.१८) इति मन्त्रवर्णात्। अभयं भयवर्जितं स्वत एव निरस्तसकलकुहकत्वात् अत एव विभीषणाय प्रतिजानीते दातुमभयं यथा 'सकृदेवप्रपन्नाय तवास्मीति चयाचते, अभयं सर्वभूतेभ्यो ददाम्येतद् व्रतं मम (बा.रा.यु. १८.३३) एतदेव ब्रह्म बृह्मत्वलक्षणं यच्च भागवत्पादाः ब्रह्मणो निर्धर्मत्वं सिद्धान्तयामासुः तत्तु बौद्धसंस्कृतिसंवित् कारणत्वात् ब्रह्मत्वस्यापि धर्मत्वेन सार्वजनीनत्वात् कस्यापि पदार्थस्य धर्मत्वशून्यतायाः त्रिकालमपि लपितुमशक्यत्वात् कथं ज्ञायताम्? इत्यत आह— उपमाविधेया यथा उदकं सर्पिषं निक्षिप्यते परन्तु मथ्यमानं ततः पृथगेव तिष्ठति यथा च नेत्रे किमपि सिच्यते तत् परितो गच्छति नैतत् स्पृष्टुं प्रभवति। तथैव सर्वाणि प्रपञ्चानि समीपं गच्छन्त्यपि नैतद् विकर्तुं पारयन्ति इति भावः। एवं सिञ्चति निक्षिपति वर्त्मनि मार्ग एव गच्छति नैव तत् प्राप्नोति इति भावः।।श्रीः।।

भूयस्तन्महिमानं वर्णयति—

एतꣳ संयद्वाम इत्याचक्षत एत ꣳ हि सर्वाणि वामान्यभिसंयन्ति । सर्वाण्येनं वामान्यभि संयन्ति य एवं वेद ।।२।।

एतम् इममेव परमेश्वरं संयत्वामः संयत्ति संयक् गच्छन्ति वामानि सकलानि सौन्दर्ययुक्तानि वस्तूनि यं तथाभूतः सकलसौन्दर्यगुमगणनिलयः इति अनेन रूपेण आचक्षते वर्णयन्ति विद्वांसः। तदेव स्पष्टयति— हि यतो हेतोः सर्वाणि वामानि

मनोहराणि सौभाग्यानि अभिसंयन्ति अभिगच्छन्ति वामत्वसंपादनायेति भावः। भगवतोऽन्यत्र कुत्रापि वामत्वानुपपत्तेः, एनं यः कश्चन वेद सोऽपि कीदृक् भवति? इत्यत आह एनं सर्वाणि वामानि अभिगच्छन्ति। यथोक्तं मानसे—

राम सरिस बर दुलहिन सीता ।
समधी दशरथ जनक पुनीता ।।
सुनि अस ब्याह सगुन सब नाचे ।
अब कीन्हे बिरंचि हम साँचे ।।श्रीः।।

(मा.वा. ३.५.२.३)

भूयस्तमेव फलश्रावणेन शरणागतं कर्तुं जीवं प्रेरयति श्रुतिः—

एष एव वामनीरेष हि सर्वाणि वामानि।
नयति सर्वाणि वामानि नयति य एवं वेद ।।३।।

निश्चयेन एषः अयमेव अतिसिकुसुमसुकुमारः कौशल्याकुमारः एव नान्यः कश्चन एतद् व्यतिरिक्तः वामनिः सकलसौंदर्यभाजनम् अति सरलतया श्रुतिः स्वयमेव स्पष्टयत्यर्थं हि यतोहि एषः परमात्मा वामनिः वामानि नयति सर्वाणि सुभगानि स्वमेव प्रापयति यः एवं वेद जानाति सोऽपि सर्वाणि वामानि नयति प्राप्नोति कर्मकर्तृप्रयोगोऽयं स्वयमपि सौन्दर्याणि नीयमानो भवति।।श्रीः।।

भूयः भगवतोऽपरनाम्नो व्याख्यां करोति—

एष उ एव भामनीरेष हि सर्वेषु लोकेषु ।
भाति सर्वेषु लोकेषु भाति य एवं वेद ।।४।।

निश्चयेन एषः निखिलसौन्दर्यसागरः भामनिः दीप्तिमान् कथमित्यत् आह— एषहि निरस्तसमस्तदूषणो भूषितभूषणो जितखरदूषणो दिनकरकुलभूषणो रामः सर्वेषु लोकेषु आब्रह्मभुवनेषु नरकेषु स्वर्गेषु च भाति अप्रतिहताखण्डज्योतिष्तया दीप्यते एवं दीप्यमानं परात्मानं वेद जानाति सोऽपि भाति शोभते भामित निरिति भाति इति भामनिः इति विग्रहे भा धातोः औणादिके मनिचिप्रत्यये साधुः।।श्रीः।।

भूयः ब्रह्मसाक्षित्वे सत्कर्ममहिमानं वर्णयति सत्कर्मकृतेषु निर्मलमनस्तया परमार्थवर्त्मनि प्रगतिर्जायते अतआह—

अथ यदु चौवास्मिञ्छव्यं कुर्वन्ति यदि

च नार्चिषमेवाभिसंवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षडुदङ्ङेति मासाꣳस्तान्मासेभ्यः संवत्सरꣳ संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः स एनान्ब्रह्म गमयत्येष देवपथो ब्रह्मपथ एतेन प्रतिपद्यामाना इमं मानवमावर्तं नावर्तन्ते नावर्तन्ते ।।५।।

अथ वामनीत्वेन भामतीत्वेन च ब्रह्मोपासना यदि शरीरं त्यजन्ति तदा उ तान्प्रतितत्कौटुम्बिकाः किमपि तर्कयित्वा एभिरस्माकं कृते किं धनमर्जितम् अतो न वयं किमपि साम्परायिकमेषाम् चरिष्याम इत्याकारकम्।

यदि चैव कदाचिन्नास्तिकबुद्ध्या समुपेताः अस्मिन् शरीरपाते शव्यं शवोनाम प्राणवियुक्तशरीरं तस्मै शवाय हितं शव्यं प्रेत सद्गत्युपयोगीत्यर्थं, कुर्वन्ति लोकलज्जावशंवदाः पुत्रपौत्राः अन्त्येष्टिसंस्कारं समाचरन्ति। यदि चैव भौतिकवादचाकिचिक्यविलुप्तवैदिककर्मश्रद्धाः न कुर्वन्ति शव्यं तथाऽपि ब्रह्मज्ञानां सद्गतौ कोऽपि प्रत्यवायो न जायते। ब्रह्मवेत्तारस्तु स्वयमेव भगवद्भजनजाह्नवीजलनिरस्तसकल परमेश्वरप्रेमप्रतिबन्धकप्रत्यवायपङ्काः शशाङ्क इव निष्कलङ्का। यथोक्तं भागवते—

देवर्षिभूताप्तनृणामृषीणां न किङ्करो नायमृणि राजन्
सर्वात्मना यः शरणं शरण्यं गतो मुकुन्दं परिहृत्य कर्तम्।

इत्यनेन वेदविहितसाम्परायिकसंस्कारस्य निन्दा न विधीयते।

प्रत्युत्स्तूयते ब्रह्मज्ञानी (नहि निन्दा निद्यं निन्दितुं प्रभवति किं तर्हि विधेयं स्तोतुम् इति न्यायात्) कुत्र गच्छन्ति ब्रह्मविदः अर्चिसम् अग्निज्वालां पश्चात् अर्चिसः अग्नीज्वालामतीत्य अहः दिनाभिमानिदैवतम् अह्नःदिनाभिमानि दैवतात् आपूर्यमाणपक्षं चन्द्रकलाभिः आपूर्यमाणं पूर्णं क्रियमाणं पक्षं शुक्लपक्षं तदभिमानि देवतामिति भावः। आपूर्यमाण पक्षात् अत्र ल्यवलोपे पञ्चमी आपूर्यमाणपक्षं अतिक्रम्येति भावः।

यान् षण्मासान् अत्र (कालाध्वनोरत्यन्तसंयोगे) इति सूत्रेण द्वितीया। एवम् आमाघात् यवदाषाढमिति भावः उदङ्ङेति सूर्यः उत्तरां दिशं गच्छति मकरमारभ्यः मिथुनं यावद् तान् उत्तरायणमासान् तेभ्यः मासेभ्यः संवत्सरं वर्षं, संवत्सरात् वर्षमतीत्य आदित्यं सूर्यमादित्याद् सूर्यात् पृथक्भूता चन्द्रमसं शशिनं, चन्द्रमसः तस्माद् विधोः विभक्ताः विद्युतं चपलां तदभिमानिनीं देवतामिति भावः। अभिसंयन्ति अभिगच्छन्ति

निर्जैरेव निष्कामकर्मजनितादृष्टविशेषैरित्यर्थ:। तत्पुरुष: तस्माद् ब्रह्मलोकादागत: पुरुष: तस्य ब्रह्मण: परिकरविशेषोदूत: पुरुष:। स किं प्रकारक:? इत्यत आह अमानवमनोरयं मानव: तद् भिन्नोऽमानव: मनु सृष्टिविलक्षणो भगवद् पार्षदविशेषो हनुमदादिरिति भाव:। स विमानान्यधिरोप्य एनान् ब्रह्मवेतॄन् ब्रह्मसीताभिरामं श्रीरामं परेश्वरं गमयति प्रापयति। यत्तु गन्तव्यगन्तृगमयितृभेदाभावं सिषाधयिष्यन्ति तदनर्गलमेव। एषै: देवपथ: देवानां द्योतनशीलानाम् पथा मार्ग देवपथ अयमेव ब्रह्मपथ ब्रह्मप्रापक पन्था। ब्रह्म पथ शाकपार्थिवादित्वात् मध्यमपद लोप:। एतेन ब्रह्मपथेन हनुमदादिमानवेतरश्रीवैष्णव: पार्षदै: सहयोगिर्भिर्नीयमाना प्रतिपद्यमाना श्रीरामं शरणं ब्रजन्त: इमं दृश्यमानां मानवं मनुनिर्मितं, यद्वा मानं मानोपलक्षितविकारान् वयति इति मानव:, तां मानवम् आवर्तम् आवर्तो जलभ्रमणविशेष: यस्मिन् पतितो नीचैर्मज्यते एव आवर्तयति पुन: पुनरघो गमयतीत्यावर्त: घोर: संसारजननमरणचक्ररूप: नावर्तन्ते नैव परमात्मपार्श्वत समागच्छन्ति नावर्तन्ते द्विरुक्तिरेषा ऐकान्तिकात्यन्तिकसंसारचक्रो निराससूचिका।।श्री:।।

इति छान्दोग्योपनिषदि चतुर्थाऽध्याये पञ्चदशे खण्डे श्रीराघवकृपाभाष्यम् सम्पूर्णम्।।
।। श्रीराघव: शन्तनोतु ।।

षोडश: खण्ड:

यज्ञो दानं तप: कर्म पावनानि मनीषिणाम्। इति

(गीता १८ अ. ५)

इति गीतोक्त्या मनीषपावनत्वहेतुभूतस्य यज्ञस्य उपासत्वेन वर्णनमाह। न खल्वपूतमनीषे मनुष्ये ब्रह्मष्फुरणं सम्भवं अतो ब्रह्मसाक्षात्कारसहकारित्वेन यज्ञोपासनामाह—

एष ह वै यज्ञो योऽयं पवत
एष ह यन्निदꣳ सर्वं पुनाति यदेष
यन्निदꣳ सर्वं पुनाति तस्मादेष एव
यज्ञस्तस्य मनश्च वाक्च वर्तनी ।।१।।

एष: अयं समधिकसन्निकृष्ट: (त्वमेव प्रत्यक्षं ब्रह्माऽसि) तै.उ. शिक्षाध्याय १ इति श्रुते:। वायो: प्रत्यक्षब्रह्मतया निरतिशयसान्निकृष्टता एतच्छब्दाभिलप्या ह वै इति निपात-युगलं, सार्वजनत्वेन सूचकम्। वायोर्यज्ञत्वेन सार्वजनीनता यज्ञ: मख: इज्यते पूज्यते

परिमलेन सङ्गम्यते सर्वेभ्यो प्राणान्ददाति यस्तथाभूत:, यद्वा यज्ञस्य विष्णो: रूपतया प्रत्यक्षब्रह्मतया च वायो: परस्पदरं समानधर्मत्वमनयो: 'यज्ञो वै विष्णु: इति श्रुते:। उपपत्तिमाह— य: अयं वायु: पवते पवित्री करोति तथैव यज्ञोऽपि एवमेव महाविष्णु श्रीरामोऽपि पतितपावनतयैव प्रसिद्ध: एष: वायु: एति गच्छति इति यन्, इण् धातो शतृ प्रत्येय अनुबन्धलोपे नुमि ''इणो यण्'' इत्येनेन यणि यण गच्छन् इदं सर्वं दृश्यमानं जगत् पुनाति पावयति। तथैव यज्ञभूत: परमात्मा अपि भक्तै: स्मर्यमाणो यन् दण्डकादिकं गच्छन् जगदखिलं पवित्रयतीत्यर्थ:। हेतुमाह यज्ञत्वे यत् यतोहि एष: वायु: यन् सर्वमिदं पुनाति अत एव अयं यज्ञ: तत्तुल्यकार्यत्वात् तस्य यज्ञस्य मनो स्वान्तं वाक् वाणी च वर्तनी वर्तते गच्छति यया तादृशि पद्धतिरिति भाव:।।श्री:।।

अथ यज्ञे ब्रह्मणो मौनभङ्गेऽपरिहार्यसङ्कटमाह मन्त्रद्वयमेकान्वयि—

तयोरन्यतरां मनसा स\ꣳस्करोति ब्रह्मा वाचा होताध्वर्युरुद्गातान्यतर\ꣳ स यत्रोपाकृते प्रातरनुवाके पुरा परिधानीयाया ब्रह्मा व्यववदति ।।२।।

अन्यतरामेव वर्तनी\ꣳ स\ꣳस्करोति हीयतेऽन्यतरा स यथैकपाद् व्रजन रथो वैकेन चक्रेण वर्तमानो रिष्यत्येवमस्य यज्ञो रिष्यति यज्ञ\ꣳ रिष्यन्तं यजमानोऽनुरिष्यति स दृष्ट्वा पापीयान् भवति ।।३।।

तयो: वाङ्मनोवर्तिन्योर्मध्ये अन्यतरां मनोवर्तिनीं ब्रह्मा यज्ञकारक: मनसा विवेकेन संस्करोति शोधयति अन्यतरां वाक्रूपां वर्तिनीं होता अध्वर्यु: उद्गाता वाचा वाग्वैभवेन संस्कुर्वन्ति ब्रह्मा अपि कदा वाक् वर्तिनीमेव संस्करोति? तां परिस्थितिमाह यस्मिन् प्रातरनुवाके शस्त्रारण्ये उपाकृते प्रारब्धे सति ब्रह्मा परिधानीयाया: ऋच पुरा पूर्वं ब्रह्मा व्यववदति मौनं त्यजति तदान्यतरा मनोवर्तिनी हीयते नश्यते। तेन किमित्यत आह स यज्ञोऽपि यथा एकपाद पुरुष: व्रजन् एकेन चरणेन नरो गच्छन् रिष्यति नश्यति एवम् एकेन चक्रेण वर्तमानो रथ: यथा रिष्यति तथैव मनोमात्रवर्तनीको यज्ञोऽवगन्तव्य तं यज्ञं यष्यन्तं विनश्यन्तम् अनुलक्ष्य अत्र ''अनुर्लक्षेण'' इत्यनेन द्वितीया। यजमान: रिष्यति नष्टो जायते।।श्री:।।

अत मौनमाचरतो ब्रह्मणो यज्ञस्य समुत्कर्षमाह मन्त्रयुग्मेन—

अथ चक्राभ्यां यत्रोपाकृते प्रातरनुवाके न पुरा परिधानीयाया ब्रह्मा। व्यववदत्युभे एव वर्तनी स\ꣳस्कुर्वन्ति न हीयतेऽन्यतरा ।।४।।

स यथोभयापद्व्रजन्रथो वोभाभ्यां चक्राभ्यां वर्तमानः प्रतितिष्ठत्येवमस्य यज्ञः प्रतितिष्ठति यज्ञं प्रतितिष्ठन्तं यजमानोऽनुप्रतितिष्ठति स इष्ट्वा श्रेयान् भवति ॥५॥

अथ एतद्विपरितं यत्र प्रातरनुवाके प्रारब्धे परिधानीय ऋक्त: पूर्वं ब्रह्मा नो व्यववदति न मौनं त्यजति, तदा स: उभे मनो वाग्वर्तिन्यो संस्करोति अन्यतरमनोवर्तिनी न हीयते न नष्टा भवति। उदाहरणद्वयमाह यथा उभयपादयुगलचरण: ब्रजन् न पतति एवम् उभाभ्यां द्वाभ्यां चक्राभ्यां वर्तमान: स्यन्दनेव स यज्ञ: प्रतितिष्ठति प्रतिष्ठितो भवति। तं यज्ञं प्रतितिष्ठन्तं प्रतिष्ठां गच्छन्तम् अनुलक्ष्यैवयजमान:प्रतितिष्ठति प्रतिष्ठितो भवति। इष्ट्वा सविधियज्ञं कृत्वा श्रेयान् भवति औपनिषद् श्रेयो भजते॥श्री:॥

इति छान्दोग्योपनिषदि चतुर्थाऽध्याये षोडशे खण्डे श्रीराघवकृपाभाष्यम् सम्पूर्णम्॥
॥ श्रीराघवः शन्तनोतु ॥

सप्तदशः खण्डः

इदानीं ब्रह्म मौनप्रायश्चित्त निमित्तं व्याहृतिहोममनुशास्ति

प्रजापतिर्लोकानभ्यतपत्तेषां तप्यमानानाꣳरसान् प्रावृहदग्निं पृथिव्या वायुमन्तरिक्षादादित्यं दिवः ॥१॥

प्रजापति: प्रजानां निखिलप्राणभृतां पति: स्वामी ब्रह्मा परमात्मा वा। तथा च स्मर्यते भागवते (प्रजापतिर्लोकपतिर्धरापति:) भा.व. २.४.१६ लोकान् निजनिर्मितान् पृथिवीम् अन्तरिक्षं दिवम् इति त्रिभुवनम् अभ्यतपत् 'तप आलोचने' आलोचनं ध्यानम् अभ्यध्यायेत् इत्यर्थ:। तेषां तप्यमानानां ध्यानविषयक्रियमाणानां लोकानां रसान् सारान् रसस्वादसारानन्देषु जले तथा, गुणे काव्यरसे चापि तथा काष्ठौषधीषु च) इति वैष्णवकोषात्। प्रावृहत् उदाहवत् निरगमयदिति भाव:॥श्री:॥

भूयो वेदोत्पत्तिं वर्णयति—

स एतास्तिस्रो देवता अभ्यतपत्तासां तप्यमानानाꣳरसान्प्रावृहदग्नेर्ऋचोवायोर्यजूꣳषि सामान्यादित्यात् ॥२॥

एवं पृथिव्या: अग्निम् अन्तरिक्षात् वायुं दिवः सूर्यम् इति त्रयाणां लोकानां यथाक्रमं सारभूताम् एकैकां देवतां निगमय्य, स: प्रजापति: भूय: तिस्र: अग्निवाय्वादित्यसामाख्या: देवता: दैवसम्पन्मयी: शक्ती: अभ्यतपत् पौन:पुन्येनालोचितवान्। तासां तिसृणां देवतानाम् अभितप्यमानानां आलोच्यमानानां प्रसान् सारभूतान् त्रीन् विशेषान्

प्रावृहत्। काँस्तान्? अग्नेः अग्निदेवतातः ऋचः ऋक् प्रायवेदं वायुदैवतात् यजूँषि यजुः प्रायवेदमादित्यात् सूर्यदेवतातः सामानि सामवेदं निःसारितवान्।।श्रीः।।

अथ त्रयीविद्योत्पत्तिमाह—

स एतां त्रयी विद्यामभ्यतपत्तस्यास्तप्यमानाया रसान्प्रा-वृहद्भूरित्यृग्भ्यो भुवरिति यजुर्भ्यः स्वरिति सामभ्यः।।३।।

अथ अग्निवाय्वादित्येभ्यस्त्रयीं विद्यामुत्पाद्य तां पुनः अभ्यतपत ध्यानविषया-मकुरुत। तस्याः ध्यायमानायाः यथाक्रमं ऋचः ऋग्वेदात् सारभूतां भूरिति व्याहृतिं यजुर्भ्यः यजुर्वेदात् भुव इति व्याहृतिं सामभ्यः स्वरिति व्याहृतिं निर्गमयत् अत्र संग्रहः "प्रजापतिस्त्रिलोक्या वै ध्यात्वा रसमुदाहरत्"। भुव अग्निं च खाद्वायुं सहस्राशुं तथा दिवः। पुनस्तत् साररूपेण अग्नेः ऋग्वेदः उद्धृतः 'वायोश्चैव यजुर्वेदं सामवेदमथार्कतः'। व्याहृतीस्ताभ्यो भुर्भूवः स्वरुदाहरत्। ऋग्वेदाद्भूः यजुर्वेदात् भुवः स्वः सामवेदतः।।श्रीः।।

अथ ऋग्वेदन्यूनता प्रायश्चित्तमाह—

तद्यद्यृक्तो रिष्येद्भूः स्वाहेति गार्हपत्ये जुहुयादृचामेव तद्रसेनर्चां वीर्येणर्चां यज्ञस्य विरिष्टꣳ संदधाति।।४।।

यदि चेत् यत् किमपि विधानं ऋक्तः ऋक्वेदात् हेतुभूतात् ऋष्येत् न्यूनता भवेत् तदा भूः स्वाहा इति प्रथमव्याहृत्या गार्हपत्ये जुह्यात् प्रायश्चित्तहोमं कुर्यात्। उपपत्तिमाह यतो हि यज्ञस्य ऋचां च वृष्टं छिन्नं न्यूनमिति भावः ऋचां रसेन भूरूपेण ऋचामेव वीर्येण पराक्रमरूपेण भूरिति व्याहृतिविशेषेण संदधाति योजयति।।श्रीः।।

अथ यजुः प्रायश्चित्तमाह—

अथ यदि यजुष्टो रिष्येद्भुवः स्वाहेति दक्षिणाग्नौ जुहुयाद्यजुषामेव तद्रसेन यजुषां वीर्येण यजुषां यज्ञस्य विरिष्टꣳ संदधाति।।५।।

अथ अनन्तरं यदि यजुष्टः यजुर्वेदात् हेतोः रिष्येत् न्यूनं भवतु, तदा भुवः स्वाहा इति एवं चतुराक्षरं पठित्वा दक्षिणाग्नौ अन्वाहार्य पचने जुहुयात्। यतोहि तद्रसेन सारभूतेन यजुषां वीर्येण शक्तिरूपेण यजुषां यजुर्मन्त्राणां यज्ञस्य क्रतोः वृष्टं वृश्चुच्छेदने इत्यनेन भूते क्त प्रत्यये 'गृहज्या' इत्यनेन संप्रसारणे 'व्रश्चभ्रश्च' इत्यनेन सत्वेष्टुत्वे वृष्टं छिन्नमिति भावः। संदधाति द्विधाभूतमेकीकरोति। किम्? अत आह— तत् भुवः स्वाहा इति मन्त्रेणाहुतिकर्म।।श्रीः।।

अथ साम प्रायश्चित्तमाह—

अथ यदि सामतो रिष्येत्स्वः स्वाहेत्याहवनीये जुहुयात्साम्नामेव तद्रसेन साम्ना यज्ञस्य विरिष्टꣳ संदधाति।।६।।

अथ यदि सामतः सामवेदात् तत् न्यूनतां गच्छेत् तदा स्वः स्वाहा इत्यक्षरं पठित्वा सामसंभूतव्याहृत्या आहवनीये तृतीये जुह्यात्। तद्धवनकर्म साम्नां रसेन सारेण साम्नां वीर्येण आहुतिसमुद्भूता दृष्टिजनितेन बलेन साम्नां सामसंबन्धियज्ञस्य यज्ञसम्बन्धिभूतं वृष्टं छिन्नं संदधाति संघातयति।।श्रीः।।

अथ ब्रह्मणो बोधमहिमानं वर्णयति द्वाभ्यां मन्त्राभ्याभ्म्।

तद्यथा लवणेन सुवर्णꣳ संदध्यात्सुवर्णेन रजतꣳ रजतेन ।
त्रपु त्रपुमा सीसꣳसीसेन लोहं लोहेन दारु दारु चर्मणा ।।७।।
एवमेषां लोकानामासां देवतानामस्यास्त्रय्याविद्याया वीर्येण यज्ञस्य।
विरिष्टꣳ संदधाति भेषजकृतो ह वा एष यज्ञो यत्रैवं विद्ब्रह्मा भवति।।८।।

यथा क्षारेण कनकं तेन चान्द्री ततो ह्ययो।
लोहं च तेन वै काष्ठं चर्मणा संदधाति वै ।।
एवं यत्रास्ति ब्रह्मज्ञो सोऽपि लोकसुरश्रुतिः ।
यज्ञानां क्षतिमेवाशु संदधाति स्वकर्मणा ।।

इति मन्त्रद्वयंसारांशः।।श्रीः।।

अथ द्वाभ्यां मन्त्राभ्यां भूयो ब्रह्मऋत्विग्ज्ञानप्रशस्तिमाह—

एष ह वा उदक्प्रवणो यज्ञो यत्रैवंविद्ब्रह्मा भवत्येवंविदꣳ ह वा एषा ब्रह्माणमनु गाथा यतो यत आवर्तते तत्तद्गच्छति।।९।।

ह वा इति निपातद्वयं सुनिश्चयसूचकं निश्चप्रचममेवेदं यत् यत्र यज्ञे एवं विद् एवं प्रायश्चितं व्याहृतिहवनविज्ञः ब्रह्मा एतन्नामको भवतिऋत्विक् एष यज्ञः उदक्प्रवणः उदकं जलं प्रवाति निम्नं गच्छति अस्मिन् तथाभूतो जलनिम्नकः उत्तरपथासूचकः, एवं विदं ब्रह्माणम् उद्दिश्य एषा गाथा स्तुतिगीतिः भवति यतो यतः यस्माद् यस्माद् वेदात् हेतुभूतात् आवर्तते न्यूनता भवत्यावृत्तिविषय़ा ततस्ततः तत्तद् व्याहृत्यैव जुह्वत् गच्छति प्रायश्चित्तपारमिति भावः।।श्रीः।।

मानवो ब्रह्मैवैक ऋत्विक्कुरुनश्वाभिरक्षत्येवं विद्ध वै ब्रह्मा यज्ञं यजमानꣳ सर्वाश्चार्त्विजोऽभिरक्षति तस्मादेवं विदमेवं ब्रह्माणं कुर्वीत नानेवंविदं नानेवंविदम् ।।१०।।

एवं मानव: मनौ जात: मनुसंस्कृतिपरिपालक:, अथवा मनु: मन्त्र: तेन संस्कृत: मानव: मनवे मन्त्राय हितो वा मानव:, एक एव ब्रह्मा ऋत्विक् भवति। यत्तुमौनाचरणात् मननात् ज्ञानवत्वात् ब्रह्मा मानव: इति कैश्चिद्व्याख्यानतं तद् व्याकरणशून्यभाषितत्वात् उपेक्ष्यम्। यथा अश्वा बडवा अश्वानामपेक्षया तत्र वात्सल्याधिक्यात् कुरून् कुर्वन्ति युद्धमिति कुरव: भय: तान् कुरून् अभिरक्षति शत्रु शस्त्रतस्त्रायते एवमेव एतद्रहस्य-ज्ञाता ब्रह्मा यज्ञं यजमानं सर्वानृत्विज: रक्षति। अत: एवं विदं ब्रह्माणं कुर्वीत यज्ञे ब्रह्मत्वेन नियुञ्जीत अनेवं विदं एतद्रहस्यानभिज्ञं न नियुञ्जीत द्विरुक्ति दृढतरनिषेधाध्याय-समाप्तिसूचिका।।श्री:।।

इति श्रीचित्रकूटस्थसर्वाम्नाय श्रीतुलसीपीठाधीश्वरश्रीमज्जगद्गुरु श्रीरामानन्दाचार्य-श्रीरामभद्राचार्यमहाराजकृतौ श्रीराघवकृपाभाष्ये छान्दोग्योपनिषदि चतुर्थाध्याये ऋत्विग्विवरणे चतुर्थाध्याय: सम्पूर्ण:।।

।। श्रीराघव: शन्तनोतु ।।

।। श्रीराघवो विजयते तराम ।।
।। श्री रामान्दाचार्याय नमः ।।

पंचमोऽध्यायः

प्रथमः खण्डः

पंचेषुर्निजपंचमश्चविजहौ यं पंचवक्त्रार्चितम् ।
पश्यन्पञ्चमसिद्धगीतचरितं पञ्चार्दनं पंचमम् ।।

पंचम्येकनिषेवणीयमनिशं पञ्चम्युपालब्धिकम् ।
तं काष्ठेभमुखेभगण्डहतिकृत् पंचाननं विद्महे ।।

पंचमीश कृताऽशेषसेषताकमशेषपम् ।
पंचपंचकृतं पंचपंचमं पञ्चमं श्रये ।।

चतुर्थे तत्तत्प्रतीकैः निरस्तसकलदोषस्य निखिलकल्याणगुणगणकोशस्य कोशलेन्द्रैकनाम्नः श्रीसीतापते सगुणब्रह्मणः विविधोपासना; समुपबृंहिताः। तत्रैव संवर्गविद्याप्रकरणे प्राणोपासनमपि निरूपितम्। साम्प्रतं तस्यैव प्राणस्य श्रेष्ठत्व-ज्येष्ठत्व-वसिष्ठत्व-प्रतिष्ठात्व-सम्पत्वायतनत्वनिबन्धनिरूपणं विधाय संसारनिरासारताम् ऊर्ध्वरेतसां ब्रह्मचारिणां दक्षिणोत्तरवर्त्मवर्तिनीं गतिं तृतीयाञ्च दुर्गतिं भगवत्पादपद्मविमुखानामनीश्वराणां न स्वराणां केवलं कर्मबन्धननिगडितानां प्रपञ्चयितुं पञ्चम् आरभ्यते पञ्चमपुरुषार्थवर्णनैकलक्षः तत्र प्रथमं द्वाभ्यां शकलाभ्यां समाख्यायिकायुगलवर्णनच्छलेन प्राणस्यैव सर्वोत्कृष्टत्वं प्रतिपाद्यते। ननु सर्वथैवानुचितमेतत् ब्रह्म विद्याप्रकरणे किमनेन प्राणसर्वोत्कृष्टत्व वर्णनेनेति चेन्न तच्छद्मना निरस्तसकल प्रपञ्चस्य ब्रह्मण एव प्रतिपादनफलकत्वेनादोषात्। ऊर्जिततत्वप्रतिपादनं हि ब्रह्मत्वाभिला-पकमिति स्मृतेः। यथोक्तं श्रीगीतासु—

यद्यद्विभूतिमत्सत्वं श्रीमदूर्जितमेव वा ।
तत्तदेवावगच्छ त्वं मम तेजोऽशसंभवनोंम् ।।

गीता १०.४.९

ममेत्यात्र भेदषष्ठी एवम् अभेदत्वरूपप्रकारतावच्छिन्ना भेदसंसर्गावच्छिन्ना भेदसंसर्गेण मद्विशिष्टतेजोभिन्ना स संभवमिति पदार्थपरिष्क्रिया। तस्मात् सर्वमविरुद्धमेवेति विरम्यते ।

यो ह वै ज्येष्ठं च श्रेष्ठं च वेद ज्येष्ठश्च।
ह वै श्रेष्ठश्च भवति प्राणो वाव ज्येष्ठश्च श्रेष्ठश्च ।।१।।

पूर्वं ज्येष्ठत्वश्रेष्ठत्वविज्ञानफलश्रवणेन रोचयित्वा तत्तद्विवित्सन् प्राणस्यैव तत्वमुपपादयति । ह वा निश्चयेन कृपाचतुष्टयविशुद्धशान्तस्वान्तः गुरुदैवतो यः कश्चनापि ज्येष्ठं वयोऽधिकं श्रेष्ठं गुणाधिकं वेद जानन्नुपास्ते । सः लोके ज्येष्ठः वयोऽतिशयः श्रेष्ठः गुणातिशयश्च भवति । अतः तादृग्गुणेन बुभूषिता ज्येष्ठे श्रेष्ठे वेद्ये इति फलितम् । कौ तावित्यत आह प्राणः ज्येष्ठः वागादिभ्यो वयोऽधिकः गर्भधारणे वागादिभ्यः प्रागेव तस्योपलब्ध्यनुभवात् श्रेष्ठः गुणाधिकः तेनैवेतरेषां संचालकत्वसिद्धेः।।श्रीः।।

अथ प्राणस्य साक्षाद्वसिष्ठत्वप्रतिपादनाय पूर्वं पारम्परिकवसिष्ठतां प्रतिपादयति—

यो ह वै वसिष्ठं वेद वसिष्टो ।
ह स्वानां भवति वाग्वाव वसिष्ठः।।२।।

वै निश्चयेन यः कश्चनापि वसिष्ठम् अतिशयेन वसते आच्छादयति इति वसिष्ठः अतिशायन् इष्ठन् तम् अतिशयेन छादनशीलम् । यद्वा अतिशयेन वस्वस्त्यस्यिन् यः स वसुमान् अतिशयेन वसुमान इति वसिष्ठः, तं यः वेद ज्ञानाभिन्नोपासनेन योजयति सस्वानां निजज्ञातीनां स्वमज्ञातिधनाख्यायाम् इति पाणिनीयसूत्रेण ज्ञाति धनार्थभिन्नाभिधेयक-स्वशब्दस्य सर्वनाम संज्ञा, विधायकतया तन्मूलक सुडागमाभावः। बोधितसर्वनाम-संज्ञाव्यतिरेकस्य स्वानामिति प्रयोगस्य यथोक्तार्थध्वनितत्वोपपत्तेः, न च पूर्वादिभ्यो नवभ्यो वा इति सुडविकल्पतः सर्वनामसंज्ञात्यतिरेकविनिगमना भावे न तादृगर्थो-पपत्तिरिति वाच्यम्। पूर्वादिभ्यो नवभ्यो वा इति सूत्रस्य ङसिङ्योरेव विकल्पविधान-विषयत्वेन त्वदुक्तपक्षानुपपत्तेः। एवं स्वानां निजज्ञातीनां मध्ये वसिष्ठो भवति आच्छादकतमो वसुमत्तमश्च भवतीति फलितं, वा निश्चयेन वाग् वाणी वसिष्ठः अतिशयेन वसुमान्।।श्रीः।।

अथ प्रतिष्ठां व्याचण्टे—

यो ह वै प्रतिष्ठां वेद प्रति ह तिष्ठत्यस्मिंश्च
लोकेऽमुष्मिंश्च चक्षुर्वाव प्रतिष्ठा ।।३।।

यः प्रतिष्ठां वेद तत्परिभाषां ज्ञात्वा समुपास्ते सः प्रतितिष्ठति लभते, चक्षुः चष्टेः विलोकयति येन तच्चक्षुः करणे उणप्रत्ययः। तदेव प्रतिष्ठा तेनैव निखिलानां रूपाणां साक्षात्कारकरणात्। अतएव तच्चक्षुः प्रतिष्ठात्वेन ज्ञात्वा अमुष्मिंल्लोके स्वर्गे अस्मिंल्लोके भूतले च प्रतिष्ठितो भवतीति फलितम्।।श्रीः।।

अथ संपदं व्याचष्टे—

यो ह वै संपदं वेद सꣳ हास्मै कामाः।
पद्यन्ते दैवाश्च मानुषाश्च श्रोत्रं वाव संपत्।।४।।

वै निश्चयेन यः कोऽपि संपदं वेद तत्वेनोपास्ते अस्मै संपद्वेत्रे अस्मै इत्यत्र तादर्थ्ये चतुर्थी, एतदर्थमितिभावः। दैवाः देवोचिताः मानुषाः मनुष्यसमुचिताश्च कामाः मनोभिलषितपदार्थाः संपद्यन्ते सम्पन्नाः भवन्ति प्राप्तय इति शेषः। श्रोत्रमेव संपत् संपद्यन्ते श्रवणगोचराः भवन्ति शब्दाः यत् सा संपत् इति व्युत्पत्तेः।।श्रीः।।

अथायतनं व्याचष्टे—

यो ह वा आयतनं वेदायतनꣳ ह।
स्वानां भवति मनो ह वा आयतनम्।।५।।

यः ह वा निश्चितधिया आयतनम् आयतन्ते आश्रयन्ति यत्तदायतनम्। आयत्तते आश्रियते जनैः यत्तदायतनं वा आपूर्वकस्य प्रयासार्थकयति धातोः आङो बालत् आश्रयार्थकता अनेकार्था हि धातवः इत्यनुशासनात्। आङुपसृष्ट "यतेः यजयाचयति रुचि विक्षप्रक्षरक्षोनङ्" इत्येनन नङ् प्रत्ययः। लोकाश्रयत्वात् क्लीबत्वम् आयतनं गृहं सद्म धाम मंदिरवेश्म च, भवनं सदनं वासो निवासश्च निकेतनम् इति वैष्णवकोशात्। एवम् आयतनज्ञः स्वानाम् आत्मीयानाम् आयतनम् आश्रयो भवति। तर्हि किं नाम आयतनं यज्ज्ञातुं प्रयत्येत इत्यत आह वा निश्चयेन मन आयतनं समस्तानां सुःखदुःखादीनां मनस्यैव कृतिनिवासत्वात् न्यायनये मनः सुखाद्युपलब्धिकारणं बुद्धिसुखदुःखेच्छाद्वेषधर्माधर्म-प्रयत्नसंस्कारणामात्मनिष्ठत्वम्। औपनिषदनयेतु सुखदुःखादयोमनोधर्माः आत्मा तु विकारेभ्य एतेभ्यो स्पृष्टः इति विवेकः।।श्रीः।।

अथ प्राणश्रेयस्तुनिर्धारणाय आख्यायिकामवतारयति—

अथ ह प्राणा अहꣳ श्रेयसि व्यूदिरेऽहꣳ श्रेयानस्म्यहꣳ श्रेयानस्मीति।।६।।

एवं प्राणवाक् चक्षुः श्रोत्रमनसां यथाक्रमं निर्विवादतया ज्येष्ठत्ववसिष्ठत्व प्रतिष्ठात्व संपत्वायतनत्वानि निर्धारितानि। किन्तु श्रेष्ठत्वविषये पञ्चानां विवादः। यद्यपि

मुख्यवृत्या प्राणशब्दभाक् मुखनासिकानिर्गमनप्रवेषनव्यापारो वाय्याकारश्चेतन एव तथापि गौडवृत्या वाक्चक्षु: श्रोत्रमनष्वपि प्राणशब्द: व्यवहार; इति धेयं एवं प्राणा: प्राणवाक्चक्षु:श्रोत्रमनोरूपा: शरीरचालनसूत्रधारा: अहं श्रेयानस्मिन् तदहं श्रेय: तस्मिन् अहं श्रेयसि अहम् एतस्मान् श्रेयानस्मि। एवं रूपे विषये, यत्तु अहं श्रेयसि इति सप्तम्यन्तं निरीक्ष्य तस्मान्यपदार्थत्वमूलं विशेषणत्वं विभाव्य तद्विशेषतया प्रयोजनमित्याक्षिपन्ति, भगवत्पादातदनुचितम्। अहं श्रेयसीत्यत्र सप्तमी, सा च वैषयिकी एवं स्वत एव विभक्तिबलेन विषयविशेष्ये सिद्धे: सति तदरिक्तबलेन: विशेष्याक्षेपस्य सर्वथैवाशास्त्रीयत्वात् विषयं विशिनष्टि, अहं श्रेयान् पूर्वस्मात् अहं श्रेयान् प्रशस्ततर: इत्याकारकं विवादं प्रस्तुवन्त: व्यूदिरे विवादं चक्रिरे।।श्री:।।

नन्वसंगतं जडीभूतानां प्राणवाक्चक्षुश्श्रोत्रमनसां कृते यथाक्रमं श्रेष्ठज्येष्ठ-प्रतीष्ठासम्पद् आयतनादि नामानि तत्तन्नामतया तेषां परिज्ञानं तत्तद्विधेयाज्ञानेन तेषां तत्तद्फलाभिधानप्रपञ्चश्च व्यर्थ एवेति चेन्मैवम्, औपनिषदानामस्माकं मते पूर्वोक्तानां प्राणादीनां न जडत्वं तत्तद्देवताधिष्ठिततया तत्तच्चेतनानुरोधेन चेतनत्वं दैवत्वं च। एवं प्राणे परात्मा 'स उ प्राणस्य प्राण:' (केन.उ. १-१-२) इति श्रुते:। स एव सर्वतो ज्येष्ठश्रेष्ठश्च तज्ज्ञानस्य ज्येष्ठत्वश्रेष्ठत्वरूपे फले तथा वाचमधुतिष्ठत्यग्नि स एव वसुमत्तम: वसितमश्च 'होतारं रत्नधातवम्' इति सर्वप्रथम ऋचि प्रतिपादितत्वात्। तस्मात् स एव वसिष्ठ:, तज्ज्ञस्य वसिष्ठताफलं तदनुरूप इत्थं चक्षुरधितिष्ठति सविता स एव सर्वेषां प्रतिष्ठा सूर्य आत्मा जगतस्तस्थुश्च इति श्रुते:। तस्मात् तज्ज्ञ: प्रतितिष्ठति, तथा श्रोत्रदैवतं दृग् सैव सम्पत् तज् ज्ञातरि निखिलकामसम्पत्तिरुचितैव दिशां मातृत्वेन वात्सल्यावच्छिन्नचेतनतया तत्रवदान्यता सुसंघटा। एवं मनसो दैवतं चन्द्र: सुधा मयूखत्वात् जीवनपोषकत्वाच्च प्राणिनां स एव सर्वायतनं, तज्ज्ञस्य स्वायतनताफलम्। किन्त्वमूषां देवतानां वाक्चक्षुत्रमनोधिष्ठानानाम् एकैकफलदानसामर्थ्यं, प्राणरूपस्य परमात्मनस्तु सर्वफलदानसामर्थ्यम्। अतएव श्रीभागवतस्य द्वितीयस्कन्धे तृतीयाध्याये तत्तत् फलार्थं तत्तत् दैवतोपासनं समुदिश्य प्रकरणमुपसंहरतां भगवताशुकाचार्येण परात्मन्येव सर्वफलदानसामर्थ्यं विनिश्चिन्वता विधेयतया भक्त्येकप्रवणचेतसा भगवद्भजनमेव समुपदिष्टं तथा हि, '**अकाम: सर्वकामो वा मोक्षकाम उदारधी:। तीव्रेण भक्तियोगेन यजेत पुरुषं परम्।** (भागवत २-३-१०) तस्मात् प्राणभूतस्य परमात्मन: श्रेष्ठस्य वाच्यम् । ज्ञाते हि श्रेष्ठत्वे साधकस्य तत्तद्देवोपासनतो निवृत्तिपूर्विका समनन्यनिष्टा सीतापतौ परमात्मन्येव कामतो भजनप्रवृत्तिरिति समवतारयति कारुणिकशिरोमणिर्माताश्रुतिराख्ययिकामिमाम्। यत्तु शंकराचार्या: आख्यायिकासु

काल्पनिकत्वमारोपयन्ति तत्तु सर्वथा प्रच्छन्नबौद्धविजल्पिततया नास्तिकभाषण-मिवोपेक्षम्। श्रुतीनां ह्यपौरुषेयत्वात् तासां निरस्तभ्रमप्रमादलिप्साकर्णापाटवादि पुंदोषसमस्तशङ्कापङ्ककलङ्कावकाशतया भगवन्निश्वासभूतानां भगवन्मयत्वं त्रिकालज्ञत्वं च निर्बाधं न खलु तद्व्यलीकं वदिष्यन्ति। भूतार्थवादिना हि माता श्रुतिः तस्मात् प्रत्यक्षरं प्रमाणं श्रुतीनां स्वत एवेति निश्चिनुते रामभद्राचार्यः। तत्र नैकमक्षरमप्यप्रमाणम्। आख्यायिकारस्वरूपमाह—

ते ह प्राणाः प्रजापतिं पितरमेत्योचुर्भगवन्को
नः श्रेष्ठः इति तान्होवाच यस्मिन्
व उत्क्रान्ते शरीरं पापिष्ठतरमिव
दृश्येत स वः श्रेष्ठ इति ।।७।।

ते प्राणाः अहं श्रेयान् अहं श्रेयान् इति परस्परविवदमाना अपि कञ्चिन्निर्णयमलभमानाः प्रजापतिं प्रजानां पतिः प्रजापतिः तं प्रजापतिं हिरण्यगर्भं नेत्याः पितरं सकलप्राणिनां पितरं परमेश्वरं श्रीरामनामकं साकेतपतिं, यत्तु प्रजापतिः हिरण्यगर्भः इति प्राञ्चो व्याचक्षते। तत्तु वेदोपबृंह्मणपरायणपुराणसिद्धान्तानामनालोचितत्वादेव ब्राह्मणस्वयं प्राणवत्वात्। तस्य तेषां पितृत्वानुपपत्तेश्च। तथा च श्रीभागवते, सृष्टिवर्णनप्रारम्भे मैत्रेय आह विदुरम्—

सा वा एतस्य संद्रष्टुः शक्तिः सदसदात्मिका ।
माया नाम महाभाग ययेदं निर्ममे विभुः ।।
कालवृत्या तु मायायां गुणमय्यामधोक्षजः ।
पुरुषेणात्मभूतेन वीर्यमाधत्त वीर्यवान् ।।

(भागवत ३-५-२५,२६)

तस्मान्मदुक्तः पन्थाः ज्यायान्। न खलु पुराणेतिहासमनालोच्य श्रुतिर्व्याख्यातुं शक्या यथोक्तं भारते 'इतिहासपुराणाभ्यां वेदार्थमुपवृंहयेत् बिभेत्यल्पश्रुताद्वेदो मय्यसौ प्रहरिष्यति सत्य गत्वा ऊचुः निर्णयार्थं निवेदयाञ्चक्रुः। भगवन् हे षडैश्वर्यसम्पन्न! साकेताधिपते! न अस्माकं मध्ये कः श्रेष्ठः? कतमोगुणाधिक इति प्रश्नाकारः। सः भगवान् तान् पञ्चविवदमानान् उवाच प्रत्युत्तरयामास। यस्मिन् उत्क्रान्ते शरीरं त्यक्तवती शरीरमिदं पापिष्ठतरमतिशयेन पापवत्तरं पापवत्तरता च श्रौतस्मार्तकर्माकरणजनित-प्रत्यवायमूलिका दृश्यते, दृष्टिगोचरं स्यात्, स एव वः युष्माक मध्ये श्रेष्ठः प्रशस्ततरः, अहं न कमपि श्रेष्ठतरं कथयिष्यामि, नोचेत् यूयं मम तस्मिन् पक्षपातं गणयिष्यध्वे।

यूयमेव निष्क्रम्य-निष्क्रम्य महाक्षणानुसारेण कतमस्यचिच्छ्रेष्ठत्वमनुभविष्यथेति भगवतोऽभिप्राय: इति इत्युक्त्वा भगवान् विवदमानान् देवान् प्रेषयामास।।श्री:।।

अथाष्टमत: सकलसमाप्तिं यावत् पञ्चानामपि परीक्षाप्रकारपूर्वकं श्रेष्ठत्वावकलनमाह—

सा ह वागुच्चक्राम सा संवत्सरं प्रोष्य पर्येत्योवाच कथमशकतर्ते मज्जीवितुमिति यथा कला अवदन्तः प्राणन्तः प्राणेन पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेण ध्यायन्तो मनसैवमिति प्रविवेश ह वाक् ।।८।।

अथ भगवता श्रेष्ठत्वपरीक्षाप्रकारनिर्धारणानन्तरं वाक् तदधिष्ठिताग्निदेवतेतिभाव:। उच्चक्राम विराट्शरीरं त्यक्त्वा निर्जगाम। कियत् कालं दूरमासीत्? इत्याह, संवत्सरम् अत्र कालाध्वनोरत्यन्तसंयोगे इति सूत्रेण कालात्यन्तसंयोगे द्वितीया। एक वर्षं यावदिति भाव:। प्रोष्य प्रवासं कृत्वा भगवदात्मक आकाशे स्थित्वेति भाव:। पर्यत्य, पुनरागत्य वैराजं देहम् उवाच, ताश्चतुर: प्राणचक्षु:श्रोत्रमनोनामकान् उवाच पप्रच्छ धातूनामनेकार्थत्वात् ब्रुवोऽपि गीप्सार्थकत्वं प्रश्नाकारं सूचयति। महते वाग्दैवतं विना यूयं जीवितम् विराट्शरीरं धारयितुं कथमशक्त कथं समर्था अभवत्? त उत्तरं ददु:, यथा कला: कलन्ति अव्यक्तं रावं कुर्वन्ति इति कला: मूका: अवदन्त: वाणीव्यवहारं न कुर्वन्तोऽपि प्राणेन प्राणन्त: श्वसन्त:, चक्षुषा नेत्रेण पश्यन्त: रूपं विलोकयन्त:, श्रोत्रेण कर्णेन शृण्वन्त: शब्दं साक्षात् कुर्वन्त: मनसा ध्यायन्त: सङ्कल्पयन्त: तथैव तदभावेऽपि सर्वे व्यवहारा: यथावज्जाता: केवलं वाणी व्यवहारो व्यतिक्रान्त: एतेनेदमायातं, यत् त्वयि उत्क्रान्तायां वाणीव्यवहारं विना शरीरं पापिष्ठमासीत् किन्तु पापिष्ठतरं नहि, वाणीं विनापि तदतिरिक्तव्यवहाराणां पूर्ववत् सम्पन्नत्वात्। एतत् श्रुत्वा सा आत्मन: श्रेष्ठत्वाभिमानं त्यक्त्वा प्रविवेश विराट्शरीरं प्रविष्टवती बभूव।।श्री:।।

अथ चक्षुष: श्रेष्ठत्वाभिमाननिराकरणमाह—

चक्षुर्होच्चक्राम तत्संवत्सरं प्रोष्य पर्येत्योवाच कथमशकतर्ते मज्जीवितुमिति यथान्धा अपश्यन्तः प्राणन्तः प्राणेन वदन्तो वाचा शृण्वन्तः श्रोत्रेण ध्यायन्तो मनसैवमिति प्रविवेश ह चक्षुः ।।९।।

चक्षु: चक्षुरभिमानदैवतम् उच्चकाम विराट्शरीरं तत्याज अशक्तमितिशेष:। अन्धा: दृष्टिहीना: अपश्यन्त: चक्षुर्व्यापारं न कुर्वाणा: प्रविवेश त्यक्ताभिमानं विराट्

शरीरं प्राविशत् सारांशस्यायं नेत्रमन्तरेणापि जीवनं सर्वव्यापारसाधारणं तिष्ठत्येव अत: शरीरं पापिष्ठं न तु पापिष्ठतरं तस्मान्नास्य श्रेष्ठता।।श्री:।।

अथ श्रोत्रपराजयप्रकारं वर्णयति—

श्रोत्रꣳहोच्चक्राम तत्संवत्सरं प्रोष्य पर्येत्योवाच कथमशकतर्त्ते मज्जीवितुमिति यथा बधिरा अशृण्वन्तः प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा ध्यायन्तो मनसैवमिति प्रविवेश ह श्रोत्रम् ।।१०।।

एवं श्रोत्रं श्रेत्रदैवतमपि शरीरादुत्क्रम्य संवत्सरं यावत् प्रवासं कृत्वा पुनरागत्य प्राणादीन् निजाभावजन्य तन्निष्ठप्रतिक्रिया पप्रच्छ ते न्यवेदयन् यथावधिरा: श्रवणशक्ति-मन्तरेणापि प्राणवाक्चक्षुर्मनो व्यापारान् कुर्वन्तोऽपि जीवन्ति तथा वयमपि इत्यनेन श्रोत्रदैवतमपि गलिताभिमानं श्रेष्ठं मन्यमनोमदं त्यक्त्वा तत्र प्रविष्टम्।।श्री:।।

अथ मनोऽभिमाननिरसनमाह—

मनो होच्चक्राम तत्संवत्सरं प्रोष्य पर्येत्योवाच कथमशकर्तेतला मज्जीवितुमिति यथा बाला अमनसः प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेणैवमिति प्रविवेश ह मनः ।।११।।

मन: मनोऽभिमानिदैवतं चन्द्रमयमुत्क्रम्य संवत्सरं यावत् प्रवासं विधाय पुन: परावर्त्य निजव्यतिरेकपरिस्थितिं जिज्ञासाञ्चक्रे। प्राणादय: प्राहु: यथा बाला: बालशब्दोऽत्र विक्षिप्तमनस्कपर: न तु शिशुपर: शिशूनामपि समनस्कत्वात्।

बाला:विक्षिप्तमनस: बालामूढातथार्भका:। इति वैष्णवकोशात्। तथाहि यथा मनसोव्यतिरेकेऽपि मत्ता: प्राणवाक् चक्षु:श्रोत्राणां व्यवहारांश्चरन्त: प्रकामं जीवन्ति, तथैव त्वदभावे बाला इव वयम् अजीवाम इति मनोऽपि त्यक्त श्रेष्ठत्वाभिमति तदेव शरीरं प्रविवेश। एवं वाक्चक्षु: श्रोत्रमन:सु यथाक्रमं निजाभावेऽपि शरीरपापिष्ठतरत्वमननु-भवत्सु सत्सु प्राणश्रेष्ठता प्रतिपादनाय श्रुतिरग्रे प्रावोचत्।।श्री:।।

अथ प्राणोत्क्रमणचिकीर्षादशामाह—

अथ ह प्राण उच्चिक्रमिषन्स यथासुहयः षड्वीशशङ्कून्संखिदेदेवमितरान्प्राणान्समखिदत्तꣳ हा-भिसमेत्योचुर्भगवन्नेधि त्वं नः श्रेष्ठोऽसि मोत्क्रमीरिति ।।१२।।

अथ अनन्तरं ह निश्चयेन सः प्राणः तद्दैवतमन्तर्यामी भगवान् उच्चिक्रमिषन् उत्क्रान्तमिच्छन् आसीत्। अनन्तरं किमभूदित्यत आह यथा सुहयः शोभनो हयः सुहयः वेगशालिवाजी तोत्राभिहतः निजबलेन यथा पड्वीश शंकून्पड्वेशं पदबन्धनं तस्य शंकवः षड्वीशशंकवः तान् संखिदेत लडर्थे लोट्, संखिदतीत्यर्थः। एवम् अयम् इतरान् प्राणान् गौडवृत्या प्राणव्यवहारभाजः समखिदत उत्खातवान्। अनन्तरं चत्वारः समेत्य तं प्रोचुः भगवन् एधि त्वं नः श्रेष्ठः वयं त्वां श्रेष्ठं मन्यामहे या उत्क्रमी मा उत्क्रमणं कार्षीः।।श्रीः।।

अथ द्वाभ्यां मन्त्राभ्यां प्राणाय स्वस्व योग्यताभिमानसमर्पणमाह—

अथ हैनं वागुवाच यदहं वसिष्ठोऽस्मि त्वं तद्वसिष्ठोऽसीत्यथ हैनं चक्षुरुवाच यदहं प्रतिष्ठास्मि त्वं तत्प्रतिष्ठासीति ।।१३।।

अथ हैनं श्रोत्रमुवाच यदह्ँ संपदस्मि त्वं तत्संपदसीत्यथ हैनं मन उवाच यदहमायतनमस्मि त्वं तदायतनमसीति ।।१४।।

वाचश्चापि वसिष्ठत्वं प्रतिष्ठाचक्षुषस्तथा ।
श्रोत्रस्यापि च संपत्वं मनसश्चायतन्यता ।।

सर्वं प्राणे समर्प्यैते बभूवुस्तस्य किंकराः ।
तस्मात् प्राणस्य मुख्यत्वं निर्विवादं श्रुतिःश्रुतम् ।।श्रीः।।

प्राणश्रेष्ठत्वप्रतिपादनाय भूयः श्रुतिराचष्टे—

न वै वाचो न चक्षूँषि न श्रोत्राणि न मनाँसीत्याचक्षते प्राणा । इत्येवाचक्षते प्राणो ह्येवैतानि सर्वाणि भवन्ति ।।१५।।

वै निश्चयेन वाचः वागधिष्ठांतृदैवतानि चक्षूंषि नैव नेत्रदैवतं, न श्रोत्राणि नैव तद्दैवतानि, न मनांसि चञ्चलत्वेऽपि तदभिज्ञाज्ञापितानि प्राण इत्याचक्षते। किमाचक्षते? इत्यत आह प्राण इत्येन तस्मात् इमान् सर्वान् प्राणो बिभर्त्ति।।श्रीः।।

इति च्छान्दोग्योपनिषदि पंचमाध्याये प्रथमखण्डे श्रीराघवकृपाभाष्यं संपूर्णम्।।
।। श्रीराघवः शन्तनोतु ।।

द्वितीयः खण्डः

अथ पूर्वस्मिन् खण्डे प्राणस्य श्रेष्ठता प्रतिपादिता इदानीं तदन्न उवास आदि-निर्देशाय खण्डः प्रारभ्यते।

स होवाच किं मेऽन्नं भविष्यतीति यत्किञ्चिदिदमा श्वभ्य आ शकुनिभ्य इति होचुस्तद्वा एतदनस्यान्नमनो ह वै नाम प्रत्यक्षं न ह वा एवंविदि किञ्चनानन्नं भवतीति ।।१।।

सः सर्वश्रेष्ठप्राणः ह निश्चयेन उवाच वाक् आदीन् पृष्टवान्, मे अष्माकं मध्ये श्रेष्ठस्य मम किम् किन्नामकं वस्तुविशेषम् अन्नं भविष्यति अदनीयं सम्पत्स्यते। अहं किमदिष्यामि इत्यर्थ इति शब्दः प्रश्नाकारनिर्धारकः। एवं पृष्टा वागादयः ह निश्चयेन ऊचुः निर्दिदिशुः। कस्तेषां निर्देशः? इत्यताह— आश्वभ्य सुनः कुक्कुरान् अभिव्याप्य आ शकुनिभ्यः शकुनीन् पक्षिणो मर्यादीकृत्य अत्रोभयत्र "आङ् मर्यादावचने" इत्यनेन कर्म प्रवचनीयता "पञ्चम्यपाङ् परिभिः" इत्यनेन पञ्चमी। अत्र स्वपदं स्थलचरबोधकं शकुनि-पदञ्च नभश्चरसूचकम्। आश्वभ्य आशकुनिभ्य इति पदद्वयस्य अयमभिप्रायः यत् समस्ताः स्थलचराः नभश्चराश्च प्राणिनः भोजनं तव। यत्तु सुनां शकुनीनाञ्च भोजनं यत् तदेव ते इति कैश्चित् व्याख्यातं तदसंगतम्। प्राणिनां भोजनस्य प्राणभोजनत्वे मानाभावात्। वयं तु (अत एव प्राणाः) ब्र.सू. १-१-२३ इति ब्रह्मसूत्रनिर्देशात्। (अत्ताच्चराचरग्रहणात्) ब्र.सू. १-२-७ इति सूत्रान्तरलिङ्गात् (यस्य ब्रह्म च क्षत्रं च उभे भवतः ओदनः मृत्युर्यस्योपसेचनम् कइत्था वेद यत्र सः) कठो. उ-१-२-२५ इति श्रुतेः परमात्मभूतस्य प्राणस्य जगदेव चराचरं भोजनमध्यवस्यामः। अत एव (जा के डर अतिकाल डराहिं जो सुर असुर चराचर खाई) मानस ५-२२-९ इति श्रीमानसं सङ्गच्छते। अत्र स्व शकुनिपदे बद्धमुक्तप्राणिपरेब्रह्माणमारभ्य स्वपर्यन्ताः बद्धा जीवाः सनकादिमारभ्य शकुनिपर्यन्ताः मुक्ताः विधिनिषेधातीताः सर्वेऽपि अदनीया प्राणस्य भगवत इति यत्किञ्चिदिदं चराचरं तत् एतत् प्रत्यक्षपरोक्षात्मकं जीवजातं भोग्यम्। परमात्मनः एतस्य अनस्य अनितीति अनः तस्य प्राणस्य अन्नं भोग्यम्। वा शब्दोऽवधारणपरः को नामान? इति जिज्ञासायामाह— वै निश्चयेन एतस्य प्रष्टुरेव प्रत्यक्षम् एतद्गुणकर्मानुसारम् अनः इत्यक्षरद्वयं नाम वागादिभ्यः प्रकृष्टतरत्वात् प्रोपसर्गसंयोजनेन प्रकृष्टो न प्राणः इति व्युत्पत्तेः। प्राण इति व्यवह्रियते, यथा भगवतो दाशरथे सीतापतेः मुख्यं नाम राम इत्यक्षरद्वयं पश्चात् भवद्रमयितृत्वात् रामभद्र इति आह्लादकत्वात् चन्द्रमस इव रामचन्द्र इति ख्यातिमगमत्। अतः आमनन्ति प्राचीनाः—

रामेति रामभद्रेति रामचन्द्रेति वा स्मरन्।
नरो न लिप्यते पापैर्भुक्तिं मुक्तिं च विन्दति।।

(रामरक्षास्तोत्र १२)

वस्तुतस्तु भगवतो मुख्य नाम राम एव (तमात् ज्येष्ठं रामं महात्मानं)

(वा.रा.बा.का. १८-२०)

रामेति द्व्यक्षरं नाम मानभङ्ग पिनाकिनः।
राम मात्र लघु नाम हमारा।
परशु सहित बड़नाम तोहारा।।

(मानस १-२२२-६)

इत्यादीनि वाल्मीकिनागेशः तुलसीदासवचनानि सङ्गच्छन्ते। तथैवात्रापि अन् इति मुख्यन्नाम श्रेष्ठत्वात् सर्वेषाम् प्रोपसर्गसंयुक्तः प्राणः इति व्यवहृतः। एवं विदि अनेन रूपेण ज्ञातवति जने अत्र विषयसप्तमी न किञ्चित् अनत्रं सर्वमदनीयं भवति, अन्न-शब्दोऽत्र भोग्यपरं भोग्यत्वन्नाम मनोऽभिलषितपराप्यत्वम्।

स अश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता। (तै. २०)

इति श्रुतेः (नानावाप्तमवाप्तव्यं) गीता ३-३३ इति स्मृतेः। सम्पूर्णचराचरं भगवतैव भोग्यम् इति विरम्यते।।श्रीः।।

अथो वाचो जिज्ञासते—

स हो वाच किं मे वासो भविष्यतीत्याप
इति होचुस्तस्माद्वा एतदशिष्यन्तः
पुरस्ताच्चोपरिष्टाच्चाद्भिः परिदधति लम्भुको ह
वासो भवत्यनग्नो ह भवति।।२।।

सः मुख्यप्राणः उवाच— मे वासा परिधानीयं वस्त्रं किं भविष्यति? इति पृष्टास्ताः निर्दिशन् आपः जलानि ते आच्छादनं, तस्मात् कारणात् एतद् भोजनम् अशिष्यन्तः भुञ्जानाः "अनुदात्तेत्वलक्षणमात्मनेपदमनित्यम्" इति नियमात् परस्मैपदे शतृ प्रत्ययः, अशिष्यन्त असाना इति भावः। वैदिका ब्राह्मणाः भोजनस्य पुरस्तात् "अमृतपिधानमसि

स्वाहा'' इति मन्त्रं जपन्तः अद्भिः जलैः परिदधति परिधापयन्ति, परिदधति इति घटक धा धातुरन्तरभावितण्यर्थः। उपरिष्टात् भोजनसमाप्तेदनन्तरमपि ''अमृतस्तरणमसि'' इति मन्त्रेण अद्भिः परिदधति आशयोऽयं यत् अपः प्राणस्य वस्त्रं विदित्वैव भोजनात् पूर्वं पश्चात् च आचमनक्रियया जलेन प्राणाय भगवते परिधानं समर्पयन्ति। एवं कुर्वन् प्राणाय वैदिकमन्त्रेण जलपरिधानसमर्पणपुण्यमहिम्नवासःलम्भुको वस्त्रं लब्धमानः भवति अनग्नः सदैवाच्छादनयुक्तो भवति।

साम्प्रतं प्राणदर्शनं स्तौति—

तद्धैतत्सत्यकामो जाबालो गोश्रुतये
वैयाघ्रपद्यायोक्त्वोवाच यद्यप्येत-
तच्छुष्काय स्थाणवे ब्रूयाज्जाये
रन्नेवास्मिञ्छाखाः प्ररोहेयुः पलाशानीति ।।३।।

तदैतत् प्राणदर्शनं व्याघ्रपदपुत्राय वैयाघ्रपद्याय गोश्रुतये गो श्रुतीनाम्ने जाबालः सत्यकामः उक्त्वा महत्वमुवाचयदि एतद् शुष्काय स्थाणवे पत्रविहीनाय डित्थाय अपि कोऽपि ब्रूयात् तर्हि तस्मिन् स्थाणो एतत् पुण्येन शाखाः जायेरन् उत्पद्येरन् पलाशानि पत्राणि प्ररोहेयुः उत्पन्नानि भवेयुः, चेतनसमक्षकथने का कथा।।श्रीः।।

एवं प्राणदर्शनं निरूप्य अधुना तत्सिद्धिप्रतिपादकं मन्थकर्म निरूपयति—

अथ यदि महज्जिगमिषेदमावास्यायां
दीक्षित्वा पौर्णमास्यां रात्रौ सर्वौषधस्य
मन्थं दधिमधुनोरुपमथ्य ज्येष्ठाय श्रेष्ठाय
स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे संपातमवनयेत् ।।४।।

अथ चेत् अथ शब्दोऽयमधिकारपरः, यदि कश्चनापि साधकः महत् भावबोधकत्वात् एष शब्दः महत्वपरः, जिगमिषेत् गन्तुमिच्छेत्। अहं तु महच्छब्दस्य परमात्मेत्यर्थं व्याचक्षे। तथा च मम भावं हन्ति इति महत् अनुनासिकत्वान्नलोपे तुकि सिद्धोऽयं शब्दः। ननु परमेश्वरविशेषणे द्वितीयान्ते महच्छब्दस्याकारे महान्तमितिस्यात्? इति चेन्न ब्रह्मविशेषणतया तत्र क्लीबत्वोपपत्तेः। एवं भूतं परमात्मानं यदि लब्धुमिच्छेत् तर्हि अमावस्यायां कुहूनिशायां दीक्षितो भूत्वा आचार्यात् दीक्षां गृहीत्वा पञ्चदशदिनानि

ब्रह्मचर्यादिव्रतं धारयन् पौर्णमास्यां रात्रौ राकायां दधिमधुनो: दधिमधुसम्बन्धिसर्वोषधस्य मन्थं सकलौषधस्य मथ्यमानं सारमल्पमल्पं सर्वाभ्य ओषधिभ्यो गृहीत्वा श्रेष्ठाय स्वाहा इति मन्त्रेण उपमथ्य आज्यस्य घृतस्य संपातम् ईषद्द्रावमवनयेत्।।श्री:।।

अधुना वसिष्ठादीनां हवनक्रममाह—

वसिष्ठाय स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे संपातमवनयेत्प्रतिष्ठायै स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे संपात मवनयेत्संपदे स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे संपातमवनयेदायतनाम स्वाहेत्यग्नावाज्यस्य हुत्वामन्थे संपातमवनयेत् ।।५।।

वसिष्ठाय स्वाहा प्रतिष्ठायै स्वाहा संपदे स्वाहा आयतनाय स्वाहा इति मन्त्रान् जपित्वा अग्नौ घृतस्य द्रावं निक्षिपेत् इतिमन्त्रसार:।।श्री:।।

हवनविध्युपसंहारं दर्शयति—

अथ प्रतिसृप्याञ्जलौ मन्थमाधाय जपत्यमो नामास्यमा हि ते सर्वमिदँ् स हि ज्येष्ठः श्रेष्ठो राजाधिपतिः स मा ज्यैष्ठ्यँ् श्रैष्ठ्यँ् राज्यमाधिपत्यं गमयत्वहमेवेदँ् सर्वमसानीति ।।६।।

उपसंहारे मन्त्रप्रकारमाह— अथ अनन्तरं हवनं समाप्य अग्ने: प्रतित्य समीपं गत्वा अञ्जलौ मन्थं मथितद्रवम् आदाय वक्ष्यमाणं मन्त्रं जपति। मन्त्राकारमाह— अमोनामासीत्यारभ्य असानि इत्यन्तम् अस्यार्थ: हे प्राण! त्वम् अम: नाम असि अमा सर्वेषां साहित्यम् अस्त्यस्मिन् इति अम: सकलसाहित्यवान् नाम असि एतदभिधानेन प्रसिद्धोऽसि। यतो हि इदं सर्वं चराचरं ते तव अमा सह वर्तमानमास्ते ननु 'सहयुक्ते अप्रधाने' इति सूत्रेण सहार्थकस्य अमाशब्दस्य योगे त्वच्छब्दे कथं न तृतीया? इति चेत् शृणु साकं समं सार्धमिति सकारघटितानामेव शब्दानां सहार्थत्वेन भाष्यादौ प्रसिद्धत्वात्। अथवा अमाशब्दयोगे तृतीयायामपि 'बहुलं छन्दसि' इत्यनेन षष्ठ्यादेशेन दोषपरिहारात्। यतो हि स: प्राण:। ननु असंगतमेतत् पूर्वम् असिपदस्य समभिहारेण युष्मच्छब्दस्य वाच्यतां

गत: प्राणशब्द: अधुना तच्छब्दवाच्यतया कथं व्याख्यायते? इति चेत् मैवं वाक्यभेदेन व्याख्याने दोषपरिहार:। अथवा पुरुषव्यत्यो बोधव्य: अत: तच्छब्दो युष्मदर्थ: स हि ज्येष्ठ: श्रेष्ठ: राजा दीप्तिमान् अधिपति: ईश्वर: स: प्राणो भगवान् मा मां ज्यैष्ठ्यं ज्येष्ठ्यभावं श्रैष्ठ्यं श्रेष्ठतां गमयतु आधिपत्यं साम्राज्यं प्रापयतु यथा अहमिदं सर्वं सकलम् असानि भुञ्जीय।।श्री:।।

अथाचमनप्रकारमाह—

अथ खल्वेतयर्चा पच्छ आचामति
तत्सवितुर्वृणीमह इत्याचामति वयं देवस्य
भोजनमित्याचामति श्रेष्ठ ँ्सर्वधातममित्याचामति
तुरं भगस्य धीमहीति सर्वं पिबति।

निर्णिज्य कसं चमसं वा पश्चादग्ने:
संविशति चर्मणि वा स्थण्डिले
वा वाचं यमोऽप्रसाह: सायदि स्त्रियं
पश्येत्समृद्धं कर्मेति विद्यात्।।७।।

अथ हवनसमाप्त्यनन्तरं पच्छ: पादक्रमेण पादशब्दस्य पद्न्नोमास इति सूत्रेण पदादेशे क्रमार्थे शश् प्रत्यये पच्छ: पादौ प्रक्षाल्य इति भाव:। अथवा ऋच: एकैकपादक्रमेण तस्या: एकैकपादं पठित्वा एकैकमाचमनं कुर्वीत इति तात्पर्यं कासारिक् के ते पादा: इत्यत एकैकपादं विभज्य प्राह— तत्र प्रथमं तत् सवितुर्वृणीमहि इतिमन्त्रं जपित्वा आचामति आचमनं कुर्यात्। द्वितीयवारं वयं देवस्य भोजनम् इति मन्त्रजपं कुर्वन् आचामति। पुनस्तृतीयं श्रेष्ठ ँ्सर्वधातमम् इति तृतीयपादं ऋचो जपन् आचामति। एवम् आचामनत्रयं विधाय तुरं भगस्य धीमहि इति ऋचश्चतुर्थं पादं पठन् सर्वम् अविशिष्टं मन्थरसं पिबति पानविषयं करोति इत्थं समग्रेयम् ऋक् चतुष्पदी— तत् सवितुर्वृणीमहि वयं देवस्य भोजनं श्रेष्ठ ँ्सर्वधातमं तुरं भगस्य धीमहि इति अस्या: शब्दार्थ एष:। वयं साधका: सवितु: सूर्यस्य तत् देवस्य दीप्यमानस्य तत् भोजनं भक्ष्यं भोग्यजातं वृणीमहि स्वीकुर्याम् तथा च भगस्य षडैश्वर्यसंपन्नस्य भगवत: ननु भगशब्द: ऐश्वर्यवाची कथं तेन भगवदर्थप्रतीति: इति चेन्मैवम् भगानि ऐश्वर्यधर्मयश: श्रीज्ञानवैराग्यानि नित्यं

सन्त्यस्मिन्निति भग: भगवान् मत्वर्थीयोऽच् प्रत्यय: आकृतिगणत्वेनार्ष आदित्यं तस्य भगवत: भगस्य तुरं त्वरणशीलं पदाम्बुजं धीमहि। पूर्वे तु त्वरं भगनामकदैवतस्य वेगमिति व्याचक्षु: तत् साधारणम् एवमेव श्रेष्ठं सर्ववरिष्ठं सर्वधातवं सकलधातारं निजजन- संकटाटवीविध्वंससमीहात्वरितगतिं सकलप्राणभूतं परमात्मकमलचरणं धीमहि चिन्तयेमहि इति ऋचोऽर्थ:। इत्थं चरणौ निर्णिज्य कांसं चमसं वा पात्रविशेषं प्रक्षाल्य चर्मणि मृग- चर्मणि स्थण्डिले भूमौ वा संविशेत् शयीत यदि स्वप्ने यदि स्त्रियं काञ्चिदयोषितं पश्यति तथा कर्मसिद्धिं विद्यात् जानीयात्।

तमेव भावं निदर्शयति—

तदेष श्लोको यदा कर्मसु
काम्येषु स्त्रियꣳस्वप्नेषु पश्यति समृद्धिं
तत्र जानीयात्तस्मिन्स्वप्न
निदर्शने तस्मिन्स्वप्ननिदर्शने ।।८।।

तस्य भावस्य निबन्धनार्थम् एष: श्लोक: मन्त्र: भवति। यदा काम्येषु कामप्राप्तिसाधनेषु कर्मषु कोऽपि स्वप्नेषु स्त्रियं पश्यति सपुत्रां सौभाग्यवतीं तदा तस्मिन्स्वप्ननिदर्शने कर्मसमृद्धिं जानीयात् विद्यात् स्त्री भक्ति: सा च सौभाग्यवती भगवता पुत्रवती च ज्ञान- वैराग्याभ्याम्।

इति छान्दोग्योपनिषदि पंचमाध्याये द्वितीयखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।

।। श्रीराघव: शन्तनोतु ।।

तृतीय: खण्ड:

अथ खण्डैरष्टभि: पञ्चप्रश्नावतारणया संसारसारतासंसारगतिवर्णनच्छलेन विरक्तिप्रतिपादनं प्रारभ्यते तत्र विषयदुरूहतां सरलयितुं श्वेतकेतोराख्यायिकाऽपि प्रस्तूयते—

श्वेतकेतुर्हारुणेय: पञ्चालानाꣳसमितिमेयाय तꣳह प्रवाहणो। जैबलिरुवाच कुमारानु त्वाशिषत्पितेत्यनु हि भगव ।।१।।

ह शब्द: इतिहासप्रसिद्धसूचक:, आख्यानमिदं सर्वविदितमिति भाव:। अरुणस्य गोत्रापत्यम् इति आरुणि: आरुणेरपत्यम् आरुणेय: अरुपौत्र: अरुणगोत्रीयपुत्रो वा

श्वेतकेतुः एतन्नामको ब्रह्मचारी निजपित्रा आरुणिना कृतसमावर्तनसंस्कारः पञ्चालानां पाञ्चालजनपदानां समितिं राजसभाम् इयाय जगाम। प्रवाहणः एतन्नामा राजा जैबलिः जुबलपुत्रः तम् आगतं ब्रह्मचारिणम् उवाच— त्वाम् अन्वशिषत् अनुशिष्टवान् सत्यकेतुरवदत् भगव भगवन् अनु अनुशिष्टोऽस्मि इति एष उत्तराकारः।

अथ द्वाभ्यां मन्त्राभ्यां पञ्चप्रश्नान् अवतारयति—

वेत्थ यदितोऽधि प्रजाः
प्रयन्तीति? न भगव इति वेत्थ
यथा पुनरावर्तन्त ३
वेत्थ पथोर्देवयानस्य पितृयाणस्य
च व्यावर्तना इति३ न भगव इति ।।२।।

वेत्थ यथासौ लोको न
संपूर्यत इति न भगव इति
वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो
भवन्तीति नैव भगव इति ।।३।।

प्रवाहणः पप्रच्छ— कुमार यदि त्वं पित्रा समनुशिष्टः तर्हि मे पञ्चप्रश्नान् उत्तरय प्रश्नाकारं साक्षेपमाह— कुमार किमिदं त्वं वेत्थ जानासि यत् येन प्रकारेण प्रजाः प्राणिनः इतः अस्माँल्लोकात् अधिप्रयन्ति उपरियान्ति। कुमारः प्राह— भगव भगवान्! न नाहं जानामि इति इत्थं निवेदितः भूयः पप्रच्छ इदं जानासि यथा येन कर्मणा जीवाः पुनरावर्तन्ते स्वर्गादागत्य पुनर्जन्म गृह्णन्ति? श्वेतकेतुः प्राह— भगवन् न अहं न जानामि। प्रवाहणः देवयानस्य देवान् यान्ति येन स देवयानः पितृन् यान्ति येन स पितृयानः कर्णे ल्युट् तस्य देवयानस्य पितृयानस्य च पथोः मार्गयोः या व्यावर्तना इतरस्मात् इतरस्य वैलक्षण्यं तां वेत्थ? कुमारः प्राह— न भगव भगवन्! अहं न जानामि। भूयः साक्षेपं पप्रच्छ जैबलिः— कुमार! इदं वेत्थ यत् यथा असौ लोकः न संपूर्यते न पूर्णतां गच्छति। स श्वेतकेतुः प्राह न भागवः न भगवन्। इदमपि न जानामि। पुनः प्राह जैबलिः— कुमार इदमपि वेत्थ जानासि यथा पञ्चम्याम् आहुतौ अग्नौ दत्तायाम् आपः एव पुरुषवचसः पुरुष एव वचः यासु ताः पुरुषवचसः भवन्ति। पञ्चानां प्रश्नानां संग्रहश्लोकाः—

इमं लोकं परित्यज्य यथैवोर्ध्वं प्रजा समाः।
प्रयन्ति तत् प्रजानीशे नेति प्राह कुमारकः।।

स्वर्गं गत्वापि वै जीवाः यथास्मिन् भवसागरे।
पुनरावर्तिनो भान्ति नाहं वेदेति सोऽब्रवीत्।।

देवयानः पितृयानः पन्थानौ योहि शाश्वतौ।
तयोर्विशेषं किं वेत्थ नैव विप्रो ह्यवोचत।।

यथाऽसौ मर्त्यलोको हि कदाचिन्नैव पूर्यते।
तं हेतुं वेत्थ भगवन् नेति वाचं जगाद सः।।

आपः पुरुषवचसः पञ्चम्यामाहुतौ यथा।
भवन्ति वेत्थ तत् नैव श्वेतकेतुरभाषत।।

अथ साक्षेपमाह जैबालिः—

अथानु किमनुशिष्टोऽवोचथा यो हीमानि न विद्यात्कथँ् सोऽनुशिष्टो ब्रुवीतेति स हायस्तः पितुरर्धमेयाय तँ्होवाचाननुशिष्य वाव किल मा भगवानब्रवीदनु त्वाशिषमिति।।४।।

अथ शब्दः आश्चर्यपरः अहमनुशिष्टः पित्रा दत्तानुशासनः इति किमवोचथाः कथमवोचथाः किमर्थम् उक्तवानसि यद्येषां प्रश्नानां मध्ये नैकोऽप्युत्तरितः यः इमानि प्रश्नतत्वानि प्रजानाम् उपरिगमनं देवयानपितृयानयोर्वैलक्षण्यं जीवपुनरावृत्तिहेतुं लोकसंपूर्णता प्रतिबन्धककारणं पञ्चम्यां आहुतौ अपां पुरुषसंज्ञात्वपद्धतिम् इति पञ्च जिज्ञासितानि न विद्यात् सः कथं विदुषां मध्ये अनुशिष्टोऽस्मि इत्यात्मानुशासनं ब्रवीत वक्तुं साहसं कुर्वीत। स हायस्त इति इत्थं राज्ञा आक्षिप्तः आयस्तः अवमानितः सन् श्वेतकेतुः पितुः निजजनकस्यारुणेः अर्धं निवासस्थानं एयाय आ इयाय इति पदच्छेदः मर्यादायाम् आङ्शब्दः। ननु यदि चेत् मर्यादायाम् आङ्शब्दः तर्हि ङित्वात् कथं स्वरसन्धिः यतोहि निपातएकाजनाङिति पाणिनिसूत्रेण अङितावेव प्रगृह्यसंज्ञा विधानात्? इति चेन्मैवम् एतेन मम पक्ष एव पुष्टः अङितौस्वरसन्धिनिषेधः ङितौ तु स्वरसन्धिरेव

मर्यादायां ङितस्य शास्त्रसिद्धत्वात्। तथाहि भाष्यवार्तिकं (ईषदर्थे क्रियायोगे मर्यादाभिविधावपि एतमातं ङितं विद्याद्वाक्यस्मरण्योरङित्) एवम् एयाय आदरेण जगाम अपृच्छत् च भगवन् माम् अननुशिष्य न अनुशिष्टं विधाय, त्वाम् अन्वशिषम् अनुशिष्टवानस्मि इति कथम् अब्रवीत्।

अनुशासनबीजमाह—

पञ्च मा राजन्यबन्धुः प्रश्नानप्राक्षीत्तेषां
नैकञ्चनाशकं विवक्तुमिति स होवाच
यथा मा त्वं तदैतानवदो यथाहमेषां नैकञ्चनवेद
यद्यहमिमानवेदिष्यं कथं ते नावक्ष्यमिति ।।५।।

श्वेतकेतुः सग्लानिः प्राह— राजन्यबन्धुः दुष्टो राजा मा मां श्वेतकेतुं प्रति पञ्च पञ्च संख्याकान् प्रश्नान् अप्राक्षीत् तेषां प्रश्नानां मध्ये अहम् एकमपि विवक्तुं विविच्य वक्तुं नाशकं न शक्त आसं, पिता प्रत्युत्तरति स्म यत्— श्वेतकेतो यान् प्रश्नान् त्वम् अवदः तेषाम् एकमपि अहं न वेद। यदि अहमवेदिषम् ज्ञातवानभविष्यं तर्हि ते प्रियपुत्राय कथं नावक्ष्यं नाकथयिष्यम्।

अथ गौतमजैबलिसंवादपूर्वभूमिकां निरूपयति—

स ह गौतमो राज्ञोऽर्धमेयाय
तस्मै ह प्राप्तायार्हाञ्चकार स ह प्रातः
सभाग उदेयाय तँ होवाच
मानुषस्य भगवन्गौतम वित्तस्य वरं
वृणीथा इति स होवाच तवैव
राजन्मानुषं वित्तंय यामेव
कुमारस्यान्ते वाचमभाषकास्तामेव
मे ब्रूहीति स ह कृच्छ्री बभूव ।।६।।

अथ गौतमः गौतमगोत्र आरुणिः पुत्रेण सह पञ्चप्रश्नान् जिज्ञासमानः राज्ञः प्रवाहणस्य अर्धं भवनमेयाय सादरं जगाम। अतिथिरूपेण प्राप्ताय तस्मै अत्र उपपदस्थानिनिचतुर्थी तमनुकूलयितुमिति भावः अर्हाञ्चकारः पूजां विदधौ। श्वोभूते प्रातः

सभागः सभां गच्छति इति सभागः, भागः भजनं पूजा तेन सह वर्तमानः सभागः पूजनीय इति भावः समानाभा सभा राजसमानशोभा तां गच्छति इति सभागः, राजोचितालंकारमंडित इति भावः, भाग्यमेव भागः तेन सः वर्तमानः सभागः पञ्च विद्या ग्रहणयोगात् सौभाग्यवान् उदेयाय उद्गतः। राजा तं छन्दयामास यद्गौतममानुषस्य मनुष्योचितस्य वित्तस्य धनस्यास्पदं वरं वृणीः याचस्व। स कथयामास यद्राजन्! इदं मानुषं वित्तं तवैव पार्श्वे तिष्ठतु त्वं कुमारस्य समक्षं यां वाचम् अभाषथाः तामेव मे वद एतच्छ्रुत्वा राजा कृच्छ्रीबभूव। असामञ्जस्यचिन्तया जन्मना गुरवे ब्राह्मणाय कथं विद्यामहमुपदिशेयमिति संकटापन्नोऽभवत्।

अथ उपदेशप्राक्परिस्थितिं सूचयति—

तँ् ह चिरं वसेत्याज्ञापयाञ्चकार तँ् होवाच
यथा मा त्वं गौतमावदो यथेयं न प्राक् त्वत्तः
पुरा विद्या ब्राह्मणान्गच्छति तस्मादु सर्वेषु-
लोकेषु क्षत्रस्यैव प्रशासनमभूदिति तस्मै होवाच ।।७।।

अथ ब्राह्मणो न रिक्तहस्तः प्रेषणीयः इति कृत्वा चिरं वस अत्र नगरे चिरं निवासं कुरु इत्याज्ञापयाञ्चकार आदिष्टवान्, पश्चात् विद्यायाः आचार्यपरंपरां निर्देशात् हे गौतम! यथा त्वं माम् अवदः पञ्चप्रश्नान् समाधातुं न्यवेदयः तथा इमां विद्यां त्वत्तः पूर्वं न केऽपि कथयं, यतोहि यत् पूर्वम् इयं विद्या न कश्चित् ब्राह्मणं गच्छति अगच्छत्, स्मशब्दस्यात्र लोपो बोध्यः। तस्मात् अद्यावधि एतदविद्यायां क्षत्रस्यैव द्वितीयवर्णस्यैव प्रशासनम् अनुशासनमासीत् इति कथमित्वा तस्मै आरुणये उवाच अवदत्।

इति छान्दोग्योपनिषदि पञ्चमाध्याये तृतीयखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।

।। श्रीराघवः शन्तनोतु ।।

चतुर्थः खण्डः

अथ प्रवाहणः श्वेतकेतवे दातुमुपदेशमुपक्रमते—

असौ वाव लोको गौतमाग्निस्तस्यादित्य एव समिद्रश्मयो ।
धूमोऽहरर्चिश्चन्द्रमा अङ्गारा नक्षत्राणि विस्फुलिङ्गाः ।।१।।

इदानीम् अग्निरूपकेण सूर्यरश्मिचन्द्रतारकादीनां वर्णनं प्रारभ्यते। हे गौतम! असौ पुरो दृश्यममानोऽयं लोकः अग्निः अग्निरूपः तस्य लोकरूपाग्नेः आदित्यः सूर्यः समित् यथा समिधा अग्निः समिध्यते तथैव लोकोऽयम् आदित्येन। रश्मयः धूमवत् उभयोरपि ऊर्ध्वगमनरूपमानगुणकत्वम्। अहः दिनमेव अर्चिः लोकाग्नेर्ज्वाला। चन्द्रमाः एव अंगारस्तस्य लोकपावकस्य, उभयोरपि समानतया ज्योतिष्मत्वात् नक्षत्राणि विस्फुलिङ्गा तदवन्नक्षत्राणामपि चमत्कृतमहस्त्वात्।

एवम् आदित्यरश्मिदिवसचन्द्रनक्षत्रतुल्यसमिद्रश्मिधूमार्चिरङ्गारविस्फुलिङ्गमयलोकाग्नौ किं क्रियत इत्यत आह—

तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति।
तस्या आहुतेः सोमो राजा संभवति ।।२।।

एतस्मिन् एवं रूपकविशिष्टे तस्मिन् पूर्वोक्ते लोकाकारे अग्नौ, सूर्यसमित्समिद्धे सूर्यरश्मिधूमकेतो, अहरर्चिषि, चन्द्राङ्गारके नक्षत्रविस्फुलिङ्गे देवाः दैवीसंपदमुपासीनाः श्रद्धाम् आस्तिकबुद्धिं जुह्वति तस्याः निक्षिप्त्याः श्रद्धाः आहुतेः सकाशात् राजा राजनशीलो दीप्तिमान् सोमः अभीष्टफलदः रश्मयश्चन्द्रमा संभवति। पूर्वं यत्पृष्टं यत्पञ्चम्यामाहुतौ कथमापः पुरुषसंज्ञां लभन्ते तमेव प्रश्नं समादधते तदुपक्रमे खण्डेऽस्मिन् प्रथमाहुतेर्वर्णनमकारि।

इति छान्दोग्योपनिषदि पञ्चमाध्याये चतुर्थखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।

।। श्रीराघवः शन्तनोतु ।।

अथ पंचमः खण्डः

अथ द्वितीयाहुतिं वर्णयितुमुपक्रमते—

पर्जन्यो वाव गौतमाग्निस्तस्य वायुरेव समिदभ्रं
धूमो विद्युदर्चिरशनिरङ्गारा ह्रादनयो विस्फुलिङ्गाः ।।१।।

पर्जन्यः वर्षाकालिकमेघः, स एवाग्निरूपः, तस्य वायुरेव समित् तेनैव पर्जन्यस्य समिध्यमानत्वात्, अभ्रम् अपां भरणं जलधारणकालिकमेघः, धूमः उद्भूतत्वरूप-

समानत्वात् अर्चेरिव प्रकाशकत्वात्, एवमङ्गारवत् अग्निकणवितरकत्वात् अशनिः वज्रपातः एव अंगारः, ह्रादनयः मेघगर्जितान्येब विस्फुलिङ्गाः अग्निलवविशेषाः।

एतादृगग्नौ द्वितीयाहुतिप्रकारमाह—

तस्मिन्नेतस्मिन्नग्नौ देवाः सोमँ राजानं
जुह्वति तस्या आहुतेर्वर्षँ संभवति ।।२।।

एवं रूपकमये तस्मिन् पर्जन्याग्नौ देवाः सोमं राजानं दीप्तिमन्तं रसरूपं चन्द्रं जुह्वति, अर्थात् प्रथमाहुत्यदृष्टरूपं रसमेव विग्रहिणम् आहुतिरूपेण निक्षिपन्ति, तस्याः द्वितीयस्याः सकाशात् वर्षं वृष्टिः संभवति। इति द्वितीयाहुतिप्रकारः।

इतिच्छान्दोग्योपनिषदि पंचमाध्याये पंचमखण्डेश्रीराघवकृपाभाष्यं सम्पूर्णम्।।

।। श्रीराघवः शन्तनोतु ।।

अथ षष्ठःखण्डः

अथ तृतीयाहुतिं व्याख्याति—

पृथिवी वाव गौतमाग्निस्तस्याः
संवत्सर एव समिदाकाशो
धूमो रात्रिरर्चिर्दिशोऽङ्गारा
अवान्तरदिशो विस्फुलिङ्गाः ।।१।।

हे गौतम! आरुणे! पृथ्वी एव अग्निः, यत्र संवत्सरः समित् समिधेवाग्नेः पृथिव्या अपि संवत्सरेण समिध्यमानत्वात्। आकाश एव धूमः तद्वन्नीलत्वात् उपरितनत्वाच्च, रात्रिः अर्चिः ज्वाला भयावहत्वात्, दिशः अङ्गारः शान्तिमयप्रकाशत्वात्, अवान्तरदिशः विदिशः विस्फुलिङ्गाः। तस्मिन्नग्नौ देवाः किं कुर्वन्ति? इत्यत आह—

तस्मिन्नेतस्मिन्नग्नौ देवा वर्षं जुह्वति ।
तस्या आहुतेरन्नँ संभवति ।।२।।

एतस्मिन् पृथव्याग्नौ देवाः वर्षं वृष्टिमेव जुह्वति, तस्याः आहुतेः सकाशात् अन्नम् अदनीयं वस्तु भवति।

इति छान्दोग्योपनिषदि पंचमाध्याये षष्ठखण्डेश्रीराघवकृपाभाष्यं सम्पूर्णम्।।

।। श्रीराघवः शन्तनोतु ।।

अथ सप्तमःखण्डः

अथ चतुर्थाहुतिं व्याचष्टे—

पुरुषो वाव गौतमाग्निस्तस्य वागेव समित्प्राणो धूमो जिह्वार्चिश्चक्षुरङ्गाराः श्रोत्रं विस्फुलिङ्गाः ।।१।।

हे गौतम! अयं पुरुषः एव अग्निः, तस्य वाक् समित्, तथा अग्निरेव समिध्यमानत्वात् प्राण एव धूमः कृष्णवर्मत्वात्, जिह्वा एव अर्चिः तद्वदरूणत्वात्, श्रोत्रमेव अङ्गारः तद्वत् शब्दवितरकत्वात्।

अथ एतदग्निं किं कुर्वन्ति इत्यत आह—

तस्मिन्नेतस्मिन्नौ देवा अन्नं जुह्वति तस्या आहुतेरेतः संभवति ।।२।।

एवं गुणगणविशिष्टे वाक्समित्प्राणधूमजिह्वाचिष्चक्षुरङ्गारश्रोत्रविस्फुलिङ्गमण्डिते पुरुषाग्नौ देवाः अन्नम् अदनीयं जुह्वति आहुतित्वेन निक्षिपति, तस्याः चतुर्थ्याः अन्नाहुतेः सकाशात् रेतः शुक्रं संभवति। इति चतुर्थ्याहुतेः प्रकारः।

इति छान्दोग्योपनिषदि पंचमाध्याये सप्तमखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।

।। श्रीराघवः शन्तनोतु ।।

अथ अष्टमःखण्डः

अथ पञ्चमाहुतिं वर्णयति—

योषा वाव गौतमाग्निस्तस्या उपस्थ एव समिद्यदुपमन्त्रयते सधूमो

योनिरर्चिर्यदन्तः करोति तेऽङ्गारा अभिनन्दा विस्फुलिङ्गाः ।।१।।

योषा संगमेच्छुःनारी एव अग्निः, तस्य उपस्थं पुरुषमेद्रं तेन समिध्यमानत्वात्। उपामन्त्रयते संगन्तुं संकतेयते इत्येव धूमः योनिः जननद्वारं अर्चिः ज्वाला तत्रैवरेतसः समाहितत्वात्, यदन्तःकरोति रेतो निवेशयति त एव अङ्गाराः तत्स्पर्शजनितानन्दाः विस्फुलिङ्गाः।

अथाहुतिमाह—

तस्मिन्नेतस्मिन्नग्नौ देवारेतो जुह्वति तस्या आहुतेर्गर्भः संभवति ।।२।।

तस्मिन् पूर्वोक्तगुणविशिष्टे, एतस्मिन् योषाग्नौ, देवाः रेतः जुह्वति शुक्रमाहुतित्वेन निक्षिपति, तस्मात् गर्भः संभवति। एवं लोकाग्नौ हूयमाना श्रद्धा सोमत्वेन परिणमति सोमो द्वितीयस्यां हूयमानः वर्षत्वेन परिणमति पुनः वर्षा हूयमाना अन्नत्वेन, अन्नं हूयमानं रेतस्त्वेन, रेतो हूयमानं गर्भत्वेन। चतुर्थखण्डे लोकाग्नौ हूयमाना याहुतिः श्रद्धात्वेन निगदिता सैव श्रद्धा आपः, सैव सोमः, वर्षा अन्नं रेतः गर्भ इति पञ्चम्यां आहुतौ पुरुषसंज्ञां लभते।

इति छान्दोग्योपनिषदि पंचमाध्याये अष्टमखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।

।। श्रीराघवः शन्तनोतु ।।

अथ नवमः खण्डः

अथ प्रश्नमुपसंहरन्नाह—

इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति स उल्बावृतो गर्भो दश वा नव वा मासानन्तःशयित्वा यावद्वाथ जायते।।१।।

एवं पञ्चम्यामाहुतौ गर्भाधानरूपायामापः चतुर्थे खण्डे श्रद्धात्वेन संकेतिताः पुरुषवचसः भवन्ति। ननु देवाः श्रद्धां जुह्वति इत्येव कथमुक्तं, प्रश्नः अपाङ् कृते कथं पुरुषसंज्ञा इति आम्रान् पृष्टः कोविदारान् आचष्टे इतिवद् भवदुत्तरम्? इति चेन्न, लोक-रूपाग्नौ मानवः आस्तिकबुद्ध्या पितृभ्यः जलमयीं श्रद्धां समर्पयति, सैव सोमात्मा

वर्षात्मा रेत आत्मा अन्नात्मा गर्भात्मा सती पुरुषसंज्ञां लभते, यदि श्रद्धा न हूयते चेत् नैव पुरुषार्थयुक्तो गर्भो भवति इति तात्पर्यम्। एवं स गर्भः उल्वावृतः उल्वो जरायुः तेनावृतः दशमासाम् नवमासान् वा दशमासनवमाससंकीर्तनेन दसमासं पुत्रीरूपः नवमासं नररूपः यद्वा ततोऽप्यधिके क्लीब तां गतः जायते। गर्भपातपरिस्थितिको वा वचनमिदं त्रिलिङ्गसाधारणम्।

अथ जीवस्य पश्चाद्भाविनीं दशां निरूपयति—

स जातो यावदायुषं जीवति
तं प्रेतं दिष्टमितोग्नय
एव हरन्ति यत् एवेतो
यतः संभूतो भवति ।।२।।

एवं स्वकर्मवशाज्जातः आयुः यावत् कर्मणा प्राप्तं दीर्घायुः अल्पायुः क्षणायुः वा जीवति। तं प्रेतमग्नयः दिष्टं स्वकर्मपरिपाकं प्रापयन्ति, इतः संसारात् कुत्र हरन्ति यस्मात् मार्गादयमागतः। एवम्

पुनः श्रद्धां पुनः सोमं पुनर्वर्षमथान्नकम् ।
पुना रेत इति प्राहुः संसारेऽस्मिन् गतागतम् ।।

आवागमनमित्येव घटीयन्त्रवदीरितम् ।
जीवस्य विमुखस्याहो जानकीजीवनाङ्घ्रितः ।।

इति छान्दोग्योपनिषदि पञ्चमाध्याये नवमखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।

।। श्रीराघवः शन्तनोतु ।।

अथ दशमःखण्डः

अथ शेषप्रश्नानां दशमे खण्डे दशभिर्मन्त्रैः समाधानमुपक्रम्यते तद्वाभ्यां मन्त्राभ्यां देवयानम्—

तद्य इत्थं विदुः। ये चेमेऽरण्ये
श्रद्धा तप इत्युपासते तेऽर्चिषमभि-

संभवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमा-
पूर्यमाणपक्षाद्यान्षडुदङ्ङेति मासाँ्स्तान् ।।१।।

मासेभ्यः संवत्सरँ्
संवत्सरादित्यमादित्याच्चन्द्रमसं चन्द्रमसो
विद्युतं तत्पुरुषोऽमानवः स एनान्ब्रह्म
गमयत्येष देवयानः पन्था इति ।।२।।

पञ्चम्यामाहुतौ इति प्रश्नस्य शकलषटकेन समाधनं कृत्वा, प्रजाः कथमितः प्रयन्तीति नवमखण्डस्य चरमेण समाहितिं विधाय, पुनर्दशमे देवपितृयानयोर्व्यावर्तनां तत्प्रसंगेन पुनरावर्तगतिं लोकस्य च संपूर्तिराहित्यमिति प्रश्नत्रयं समाधत्ते। पूर्वं देवयानं व्याचष्टे— देवान्यान्ति येन स देवयानः तं पुरुषः प्रेत्य कथं याति? इत्यपेक्षायामाह— तत् एवं पञ्चाहुतिक्रमम् अविच्छिन्नसंसारपरंपरां संसारासारतां पौनःपुन्येन जननमरण-तरलतरंगतरंगायितष ड्रूर्मिष ड्विकारमकरभीषणसमगाधदुर्जयवासनाकीलालदुर्गममनोरथ-भीमावर्तशताकुलकोटिकोटिमनोरथमीनसंकुलपरमपारसंसारसागरं ये विदुः तत्वेन जानन्ति, ते तत उपरज्यमाना, अरण्ये कृतारण्यशरण्याः श्रद्धाम् आस्तिकबुद्धिं, तपः, ब्रह्म ब्रह्मज्ञानं वा उपासते सेवन्ते। ते अर्चिषं ज्वालाम् अभिसंभवन्ति प्रकाशाभिमुखाःभूत्वा अहः दिनाभिमानि दैवतं, तस्मात् अह्नादिनेन आपूर्यमाणं पक्षं शुक्लपक्षाभिमानिदैवतं तस्मात् यानि षड् मासान्सविता उदङेति उत्तरं याति तान् उत्तरायणान् माघतः आषाढं यावत् मासेभ्यः उत्तरायणेभ्यः संवत्सरं वर्षं, ततः ऊर्ध्वम् आदित्यं सूर्यं ततोप्यूर्ध्वं चन्द्रमसं ततोऽप्यूर्ध्वं विद्युतं परमप्रकाशरूपं सत्यलोकं तत्र सत्यलोके कश्चन अमानवः मानवविलक्षणपुरुषः साकेतलोके हनुमान् एनान्जीवान्ब्रह्म गमयति साकेतपतिं पतित-पावनं श्रीरामम् एष प्रापयति एष देवयानः।।।श्रीः।।

इदमेव गीतायां भगवान् प्राह—

अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् ।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः।।

(८।२४)

अथ पितृयाणं द्वाभ्यां मन्त्राभ्यां वर्णयति।

अथ य इमे ग्राम इष्टापूर्ते
दत्तमित्युपासते ते धूममभिसंभवन्ति धूमाद्रात्रिँ्
रात्रेरपरपक्षमपरपक्षाधान्षड् दक्षिणैति
मासाँ्स्तान्नैते संवत्सरमभिप्राप्नुवन्ति ।।३।।

अथ एतद्विपरीतं ये ग्रामे रामं त्यक्त्वा ग्राम्यभोगनिरता इष्टापूर्ते वैदिककर्मानुष्ठानं पूर्तं वापीकूपतडागादिनिर्माणं, दत्तं बहिर्वेदिदानं दरिद्रादिभोजनमुपासते धृतैकलक्ष्याः भजन्ते नैवारण्ये तपःश्रद्धे, ते मरणकाले धूमं ततः रात्रिं ततः अपरपक्षं कृष्णपक्षमिति-भावः, ततः यान्षड्माषान् सूर्यः दक्षिणदिशम् एति तान् षड्माषान् आश्रावणात् यावत्पौषं ततः सम्वत्सरं तदमिमानिदैवतं प्राप्नुवन्ति।।श्रीः।।

मासेभ्यः पितृलोकं पितृलोकादाकाशमाकशाच्चन्द्रमसमेष
सोमो राजा तद्देवानामन्नं तं देवा भक्षयन्ति ।।४।।

एवं षण्मासेभ्यः पितृलोकं ततः आकाशं सावकाशं ततः चन्द्रमसं प्राप्नुवन्ति ततोऽग्रे न गच्छन्ति। एष सोमो राजा तदेव देवानामन्नं भवति अदनीयमं तदेव देवाः भक्षयन्ति। चन्द्रभूतोऽयं देवैर्भक्ष्यते इत्येव पुनरावर्तनम्।।श्रीः।।

अथ पुनरावर्तनक्रमं निदर्शयति—

तस्मिन्यावत्संपातुमुषित्वाथैतमेवाध्वानं
पुनर्निवर्तन्ते यथेतमाकाशमाकाशाद्वायुं
वायुर्भूत्वा धूमो भवति
धूमो भूत्वाभ्रं भवति ।।५।।

अभ्रं भूत्वा मेघो भवति मेघो भूत्वा
प्रवर्षति तत इह व्रीहियवा
ओषधिवनस्पतयस्तिलमाषा इति
जायन्तेऽतो वै खलु दुर्निष्प्रपतरं
यो यो ह्यन्नमत्ति यो रेतः
सिञ्चति तद्भूय एवं भवति ।।६।।

एवं देवयानपितृयानगतिमुक्त्वा पुनरावर्तनक्रमं कथयति। तस्मिन् चन्द्रमसि अथवा चन्द्रलोके यावत्संपातं यावत्पुण्यक्षयमुशित्वा निवासं कृत्वा। आशयोऽयम् यत् स्वर्गलोके देवा: तं चन्द्रमेव तान् भोजयन्ति एवं भोज्यमानेषु तेषु पुण्यक्षये जाते पुनस्ते आवर्तन्ते। यथोक्तं गीतासु—

ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति।
एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभन्ते।।

(गीता २-२१)

ततः एतमध्वानं मार्गं निवर्तन्ते। कः सोऽध्वा इत्यत आह-ततः एतमाकाशम् आकाशाद् वायुर्भवति ततः धूमो, ततोऽभ्रं, ततः मेघः, ततो वर्षति जलमयस्ततो ब्रीहियवा ओषधयः वनस्पतयास्तिलमाषाः जायन्ते। ततः दुर्निष्प्रतरं संसारसागरं प्राप्य एतमन्नमत्ति तन्मयं यद् रेतः सिञ्चति स्त्रियाम् आदधाति तच्छरीरमेव जायते। लोकाभिरामः श्रीरामभजनमन्तरेण अहरहः संसरन् नैव शरच्छशाङ्कसुन्दरमनल्पसौन्दर्य-संयुतं कुटिलालकं श्रीसीतापतिवदनं निरीक्षितुं सौभाग्यभाग् भवति।

एवं षड्भिर्मन्त्रैरत्र देवयानपितृयानवैलक्ष्यण्यं पुनरावर्तना चोक्ता। इमे श्रीगीतासु अष्टमाध्ययाये श्रीकृष्णेनोक्तम्—

अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः।।

धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम्।
तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते।।

शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते।
एकया यात्यनावृत्तिमन्यया वर्तते पुनः।।

(गीता अ. २४,२५,२५)

ननु निष्कामकर्मयोगिनः देवयानमार्ग उक्तः, कर्मयोगिनश्च पितृयाणमार्ग उक्तः, किन्तु द्वाभ्यां विधुरस्य केवलं कर्माणि कुर्वतः बोधविक्लवस्य का गतिः? इत्यत आह द्वाभ्यां मन्त्राभ्याम्।

तद्य इह रमणीयचरणा अभ्याशो
ह यत्ते रमणीयां योनिमाप-
द्येरन्ब्राह्मणयोनिं वा क्षत्रिययोनिं वा
वैश्ययोनिं वाथ य इह
कपूयचरणा अभ्याशो ह यत्ते कपूयां
योनिमापद्येरञ्श्वयोनिं वा सूकरयोनिं वा
चण्डालयोनिं वा ।।७।।

तत इह संसारे ये रमणीयचरणाः रमणीयं शास्त्रीयं चरणम् आचरणम् कर्म येषां तथाभूताः, ब्राह्मणक्षत्रियवैश्यसम्बन्धिनीं रमणीयां निजोद्धारक्षमां योनिम् आपद्यन्ते, ये कपूयं निन्दितं चरणं कर्म येषां तथाभूतास्ते कपूयां निन्दितां योनिं श्वशूकरचाण्डाल-सम्बन्धिनीं योनिम् आपद्यन्ते, अभ्यासं शीघ्रम्। यद्यपि इदं क्रियाविशेषणं तत्वेन द्वितीयैकवचनं क्लीबत्वञ्च तथाऽपि व्यत्ययात् पुल्लिङ्गत्वं प्रथमैकविभक्तिश्च बोद्धत्या।।श्रीः।।

अथैतयोः पथोर्न कतरेण च न तानीमानि
क्षुद्राण्यस कृदावर्तीनि भूतानि भवन्ति
जायस्व म्रियस्वेत्येतत्तृतीयँ्स्थानं तेनासौ
लोको न सम्पूर्यते तस्माज्जुगुप्से तदेष श्लोकः ।।८।।

अथ एतद्विपरितं ये एतयोः देवयानपितृयाणयोः कतरेण केनाऽपि मार्गेण ये न गच्छान्ति, ते न वा क्षुद्राणि कीटपतङ्गादीनि न वा असकृतदावर्तीनि अपुनरागमनशीलानि भूतानि प्राणिनः भवन्ति। ते तु जायस्व जन्म गृहाण म्रियस्व उपरम इति ईश्वरेच्छया निर्देश्यमानाः जायन्ते म्रियन्ते म्रियन्ते जायन्ते, एवमेव ते निशारणयन्त्रे वृषभ इव संसरन्ति। इदमेव तृतीयस्थानम् अत एव असौ परलोकः न सम्पूर्ण्यते नैव पूर्णतां गच्छति, तस्माज्जुगुप्सेत तास्मात् निरासारसंसारतः विरज्जेत इति श्रुतेरादेशः, तत् प्रतिपादकोऽयम् श्लोकः।।श्रीः।।

अथ द्वाभ्यां मन्त्राभ्यां पञ्चाग्निविद्यां स्तौति—

स्तेनो हिरण्यस्य सुरा पिवँ्श्च
गुरोस्तल्पमावसन्ब्रह्महा चैते पतन्ति
चत्वारः पञ्चमश्चाचरँ् स्तैरिति ।।९।।

अथ ह य एतानेवं पञ्चाग्नीन्वेद
न सह तैरप्याचरन्पाप्मना लिप्यते
शुद्धः पूतः पुण्यलोको भवति
य एवं वेद य एवं वेद ।।१०।।

हिरण्यस्य सुवर्णस्य स्तेनः चोरः सुरां पिबन् मद्यपानं कुर्वन् गुरोस्तल्पम् आवसन् गुरुपत्निगामी, ब्रह्महा ब्राह्मणवधकर्ता इमे चत्वारः पतन्ति, पञ्चमः तैः सहाचरन् व्यवहारं कुर्वन् पञ्चमः पतितः, किन्तु य एतान् पञ्चाग्नीन् वेद सः एभिः सहाचरन्नपि पाप्मना न लिप्यते नैव पापीयान् भवति, सः शुद्धो भवति, पूतः पवित्रः पुण्य लोकः पुण्यपुञ्ज-युक्तो भवति दिरुक्तिरादरार्था प्रकरणसमाप्तिसूचिका च।

इति छान्दोग्योपनिषदि पञ्चमाध्याये दशणखण्डे श्रीराघवकृपाभाष्यम् सम्पूर्णम्।।

।। श्रीराघवः शन्तनोतु ।।

एकादशःखण्डः

अथैकादशखण्डमारभ्यसमाप्तिपर्यन्तो ग्रन्थः वैश्वानरविद्याव्याख्यापरः तत्र यथा-क्रमं पञ्चानां गृहमेधिनामश्वपतिना सह सम्वादवर्णनपराख्यायनं प्रतिपित्सित सुखावबोधार्थम्—

प्राचीनशाल औपमन्यवः सत्ययज्ञः
पौलुषिरिन्द्रद्युम्नो भाल्लवेयो जनः
शार्कराक्ष्यो बुडिल आश्वतराश्विस्ते
हैते महाशाला महाश्रोत्रियाः
समेत्य मीमासाञ्चक्रुः को
न आत्मा किं ब्रह्मेति ।।१।।

उपमन्योः व्याख्यातचरस्य गुरावनन्यनिष्ठस्य पुत्रः औपमन्वयः, प्राचीनशालः प्राचीना सुदृढा पुरा निर्मिता शाला भवनं यस्य तथाविधः अन्वर्थनामा, एवं पुलुषस्य पुत्रः पौलुषिः, सत्ययज्ञः सत्यं परमात्मानम् एव यजते अनन्यभावेन हृदये समर्चयति तथाभूतः। एवं भल्लवस्य पुत्रः भाल्ववि तस्यापि पुत्रः भाल्लवेयः इन्द्रद्युम्ननामा ऋषिः, शर्कराक्षी ऋषिपत्नी तस्याः अपत्यं पुमान् शार्कराक्ष्यः अथवा अरण्ये तपश्चरणात् सततं

धूलिधूसरितत्वात् यस्य नेत्रे शर्कराभिर्बालुकाकणिकाभिर्मलीमसे सः शर्कराक्ष्यो ऋषिस्तस्य शर्कराक्ष्यस्य अपत्यं पुमान् शार्कराक्ष्यः जनः एतन्नामा, एवम् अश्वतरः एव अश्वः तद्वद् व्यवहार एव वाहनं यस्य सोऽश्वतरांश्वः अश्वतराश्वस्य अपत्यं पुमानं आश्वतंराश्विर्बुडिलः। अत्र प्रत्येकमहर्षेर्नाम्ना सह तद्वंशाख्यानेन तेषां कुलीनता सूचिता नाकुलीनो हि ब्रह्म मीमांसितुं प्रभवति (विद्याहवै ब्राह्मणमाजगाम) इति श्रुतेः। एवं प्राचीनशालसत्ययज्ञेन्द्रद्युम्नजनबुडिलाः पञ्चापि ब्रह्मणाः किं प्रकारका इत्यत् आह- विशेषणद्वयं महाशाला महत्यः अग्निहोत्रपञ्चयज्ञबलिवैश्वदेवप्रभृतिवैदिकब्राह्मणोचित- सत्कर्म पूजिताः विशालायतनाश्च शालाः भवनानि येषां तथाभूताः, न केवलं भौतिकघनवन्त इमे, किं तर्हि महाश्रोत्रियाः श्रोत्रियश्छन्दोऽधीते इति पाणिनीयसूत्रेण छन्दः शब्दस्य श्रीत्रियशब्दनिपातने महान्तश्च ते श्रोत्रियाः इति महाश्रोत्रियाः, महत्वञ्च वेदपारगत्वेऽपि ब्रह्मविवित्सा इत्यने तपःश्रुतजातिभिर्ब्राह्मणत्वमेषां तथा हि—

जन्मना ब्राह्मणो ज्ञेयः संस्काराद्द्विज उच्यते।
वेदपाठी भवेतविप्रः श्रोत्रियो वेदपारगः।।

इति याज्ञवल्क्य वचनात्। एते एकदा समेत्य मीमांसाञ्चकुः विचारं कृतवन्तः। कः आत्मा किं नाम ब्रह्म? आत्मशब्दो जीवात्मवाच्यपि तत्रातिव्याप्तिवारणाय ब्रह्म इति प्रकृत्यादाववतिव्याप्तिवारणाय आत्मेतिं। यद्यपि मीमांसते इति आत्मनेपदीयधातोरपि जगद्धितार्थं परस्मैपदप्रयोगः। अत्रेदमवधेयम्-ब्रह्म विचारः खलु पूतात्मनः संस्पृशति येषां प्रशस्तमातृपितृमत्ता परमपावनकुलाचारः सर्वतोभावेन ब्राह्मणत्वं धर्मतो भोगसेवनं त एव ब्रह्म विचारयितुं समीयन्ते, अन्यथा विलसितविविधविकारे घोरदुःखाकारे समत्रव्याप्तमहान्धकारे निस्सारे संसारे यस्मिन् सागर इव नागराः भग्नप्लवाः सतत- मीप्सितकामलवाः परिपात्यन्ते। धर्मपूर्वके हि भोगसेवने जानकीजीवने संजायते काचित् दर्शनोत्कण्ठा यथोक्तं मानसे—

प्रथमहि विप्र चरन अति प्रीति। निज निज कर्म निरत श्रुति नीति।।
एहि कर फल पुनि विषय विरागा। तब मम धरम उपज अनुरागा।।

(मानस ३.१६.६.७)

तस्मादयं प्रथमो मन्त्रः ब्रह्मजिज्ञासायोग्यता प्रदर्शनार्थम्। अत्र नः कः आत्मा किं ब्रह्मेति लिङ्गद्वयनिर्देशः जीबब्रह्मणोर्भिदां प्रदर्शयतुम् आत्मशब्दोऽत्र जीवात्मवाची।

ब्रह्मशब्दश्च परमात्मबोधक:। न: अस्माकं पञ्चप्राणदशेन्द्रियचतुरन्त:करण-पञ्चतन्मात्र-पञ्चमहाभूतमध्ये को नाम आत्मपदार्थ इति जिज्ञासा बीजम्। किं गुणकं ब्रह्मेति प्रश्न:। तनु सर्वथै वासमीचीनोऽयं प्रश्नाकार:, ब्रह्मणस्तु प्रसिद्ध त्वात्। सत्यं प्रश्नाकारस्य नैतत्तात्पर्यम्। ब्रह्मणो निर्गुणत्वे सगुणत्वे च विप्रतिपत्तौ। किं तर्हि ब्रह्म निर्गुणं सगुणं वा? उभयमिति ब्रूम: अथैकस्मिन् धर्मिणि कथं विरुद्धधर्मद्वयं संघटते समञ्जसत्वात्। अतो भागवते वृत्रासुर: परेश्वरम् समञ्जसं प्राह—

समञ्जस त्वा विरहय्य काङ्क्षे।

(भागवत ६-११-२५)

सामञ्जस्यम् कथम्? शृणु निर्गुणत्वं नाम निर्लीनगुणकत्वं, कथं समास इति चेत् प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपश्च इति वार्तिकमेव तद् एवम् सगुणत्वं नाम प्रकटितमाहात्म्यगुणै:सहभूतत्वं, न खलु गुणा: परमात्मानं जहति न वा हातुं प्रभवन्ति गुणगुणिनोश्च समवायत्वप्रसिद्धेम् **न च उत्पन्नं सद् द्रव्यम् क्षणं निर्गुणं निष्क्रियञ्च तिष्ठति** इति नियमात् द्रव्यनिर्गुणत्वसिद्धौ द्रव्यभूतपरमात्मन्यपि गुणरहतित्वापत्तिरिति-वाच्यम्। उत्पन्नद्रव्य एव त्वदुक्तन्यायप्रवृत्ते: परमामनश्च नित्यत्वे न्यायाप्रसरेणादोषात् इति विरम्यते।

एवं निर्णयमलभमानास्ते किं चक्रु:? इत्यत आह—

ते ह संपादयाञ्चक्रुरुद्दालको
वै भगवत्तोऽयमारूणि: संप्रतीममात्मानं
वैश्वानरमध्येति तँ॒ हन्ताभ्यागच्छा
मेति तँ॒ हाभ्याजग्मु: ।।२।।

यत् भगवन्त: हे महानुभावा:! वयं यं सद्गुरुम् अन्वीक्षाम: अस्मान् समिलित: अरुणपुत्र: उद्दालक इमम् आत्मानम् वैश्वानरं, विश्वेनरा: यस्मिन् स: विश्वानर: विश्वानर एव वैश्वानर:। **नरे च संज्ञाययाम्** इति सूत्रेण विश्वघटकस्य अकारस्य दीर्घ:, स्वार्थेऽण् प्रत्यय: तादृशम् आत्मभूतं वैश्वानरमेव सम्प्रति स अध्येति स्मरति इङ् अध्ययने इत्यस्य छान्दसोऽयं परस्मैपदप्रयोग: हन्त: सहर्षं तमेव अभिगच्छाम: इति इत्थं विचार्य तमेवाभ्याजग्मु: आगता:।।श्री:।।

अथाग्रिमं वृत्तं सूचयति—

स ह संपादयाञ्चकार प्रक्ष्यन्ति
मामिमे महाशाला महाश्रोत्रियास्तेभ्यो
न सर्वमिव प्रतिपत्स्ये
हन्ताहमन्यमभ्यनुशासानीति ।।३।।

तान् समागतान् वीक्ष्य ह निश्चयेन सः सम्पादयाञ्चकार विचारयामास। संपादि क्रिया अत्र विचारणपरा। इमे प्रक्ष्यन्ति वैश्वानर विषये, अहम् इदं सर्वं न प्रतिपत्स्ये इति हेतोः आत्मने सर्वेषाम् प्रश्नानां प्रतिपादनाभावं कलयन् अहं स्वतोऽन्यं कमपि विशिष्टं सद्गुरुम् अनुशासानि वदितुम् इमान् प्रेरयामि।।श्रीः।।

एवं विचार्य सः कैकेयदेशमहाराजम् अश्वपतिं स्मारयामास।

तान्होवाचाश्वपतिर्वै भगोवन्तोऽयं कैकेयः संप्रतीममात्मानं
वैश्वानरमध्येति तँ् हन्ताभ्यागच्छामेति तँ् हाभ्याजग्मुः ।।४।।

सः आरुणिः तान् उवाच यत् साम्प्रतं कैकेयदेशराजा अश्वपतिः वैश्वानरम् आत्मानम् अध्येति तमेव वयम् अभिगच्छामः भवद्भिः सहाहमपि तमेवाभिगच्छानीति तात्पर्यम्, इति ते सर्वे तत्र जग्मुः।।श्रीः।।

अथ राज्ञः स्वागतं वर्णयति—

तभ्यो ह प्राप्तेभ्यः पृथगर्हाणि
कारयाञ्चकार स ह प्रातः संजिहान
उवाच न मे स्तेनो जनपदे न कदर्यो
न मद्यपो नानाहिताग्निर्नाविद्वान्न
स्वैरी स्वैरिणी कुतो यक्ष्यमाणो
वै भगवन्तोऽहमस्मि यावदेकैकस्मा
ऋत्विजे धनं दास्यामि तावद् भघवद्भ्यो
दास्यामि वसन्तु भगवन्त इति ।।५।।

एवं तेभ्य: प्राप्तेभ्य: षड्भ्योऽपि प्राचीनशालसत्ययज्ञेन्द्रद्युम्नजनवुडिलोद्दालकेभ्य: पृथक् पृथक् अर्हाणि पूजनानि कारयाञ्चकार। प्रात: सभां गच्छन् सञ्जिहान: तेभ्यो दक्षिणां दत्त्वा विसर्जयितुमियेश यदा ते न जगृहु: तदा राजा जनपदस्य शुद्धतां प्रावोचत्। हे भगवन्त:। मम जनपदे कोऽपि स्तेन: परधनापहर्ता, कदर्य: निन्दतिकार्यकर्ता, कृतघ्नो वा न हि मे जनपदे मद्यप: सुरापाय:, अनाहिताग्नि: न आहित: अग्नि: येन तथाभूत: अनग्निहोत्री, न मम जनपदे स्वैरी पदस्त्रीगामिन् तर्हि कुत: स्वैरिणी कथं परपतिगामिनी स्वैरिणी। अत: मम शुद्धं धनं परन्तु यदि भगवन्तोऽधिकम् वाञ्छन्ति तर्हि न चिराद् यक्ष्यमाण: यज्ञं करिष्यमाण: यावद्धनं यत् परिमाणकं द्रव्यं प्रत्येकम् ऋत्विजे याज्ञिकाय दास्यामि तावद् भगवद्भ्यो, तद् वसन्तु निवासं कुर्वन्तु इति निवेदयाञ्चकार।।श्री:।।

मुनीनां प्रार्थनामह

ते होचुर्येन हैवार्थेन पुरुषश्चरेत्तँ् हैव।
वदेदात्मानमेवेमं वैश्वानरँ् संप्रत्यध्येषि तमेव नो ब्रूहीति।।६।।

येन अर्थेन प्रयोजनेन पुरुष: चरेत् गच्छेत् तमेवार्थं वद, अर्थात् यत् प्रयोजनेन पुरुष: कुत्रचित् गच्छति तमेव वद इति प्राञ्च:। वस्तुस्तु नेदं व्याख्यानं समीचीनम्। अस्मिन् व्याख्याने वाक्यभेद: निराकाङ्क्षिताया अभाव: निरर्थकं लकारव्यत्यय कल्पना। न्यायतस्तु मुनीनामयमभिप्राय: यत् येन अर्थेन ब्रह्मविज्ञानघनेन पुरुष: पुरुषार्थवादिमानव: चरेत् परमात्मानम् अनुचरेत् तत्पदपद्मं गच्छेद्वा तमेव अर्थं वद। साम्प्रतं वैश्वानरमात्मानमध्येषि स्मरसि तमेव ब्रूहि किमनेन क्षणभङ्गुरधनेन।।श्री:।।

अथ तेषाम् उपसत्तिं वर्णयति—

तान्होवाच प्रातर्व: प्रतिवक्तास्मीति ते ह समित्पाणय:
पूर्वाह्णे प्रतिचक्रमिरे तान्हानुपनीयैवैतदुवाच।।७।।

राजा तेषाम् अभ्यर्थनां स्वीकृत्य प्राह— अहं प्रात: व: प्रतिवक्तास्मि युष्मान् उपदेष्टास्मि प्रात:काले षडपि मुनय: कुलजात्यभिमानं गृहस्थ अपि विद्याप्राप्तये समिद्भारहस्ता विद्यार्थिरूपेण प्रतिचक्रमिरे उपगता:। अश्वपति: तान् अनुपनीय क्षत्रियत्वेनाधिकाराभावात् उपनीतोपनयनानुपपत्तेश्च एतदुवाच, आत्मवैश्वानर-रहस्यमुपदिदेश।।श्री:।।

इति छान्दोग्यपनिषदि पञ्चमाध्याये एकादश खण्डे श्रीराघवकृपाभाष्यम् सम्पूर्णम्।।

।। श्रीराघव: शन्तनोतु ।।

अथ द्वादशःखण्डः

अथौपमन्यवाश्वपतिसंवादमवतारयति—

औपमन्यव कं त्वमात्मानमुपास्स इति
दिवमेव भगवो राजन्निति होवाचैष
वै सुतेजा आत्मा वैश्वानारो यं त्वमात्मानमुपासस्से
तस्मात्तव सुतं प्रसुतमासुतं कुले दृश्यते ।।१।।

राजा पप्रच्छ हे औपमन्यव! उपमन्युपुत्रप्राचीनशाल त्वं कं वैश्वानरम् आत्मबुद्ध्या उपास्से भजसे। स उत्तरयामास—राजन्! दिवम् एव द्युलोकमेव। राजा प्राह—स सुतेजा नाम वैश्वानरः शोभनं तेजः यस्मिन् तथाभूतः। अतएव तव कुलं प्रसूत- सुसंतानसमृद्धं अतएव तव कुलं प्रसुतं श्रेष्ठसंततियुक्तं दृश्यते विलोक्यते। प्रसुतं प्रकृष्टसंततिः, आसुतं मर्यादित वंशपरंपरा दृश्यते।

फलश्रुतिमाह—

अतस्यन्नं पश्यसि प्रियमत्त्यन्नं
पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं
कुले य एतमेवात्मानं वैश्वानरमुपास्ते
मूर्धा त्वेष आत्मन इति
होवाच मूर्धा ते व्यपतिष्यद्यन्मां
नागमिष्य इति ।।२।।

अतएव त्वम् अन्नम् अदनीयम् अत्सि अश्नासि, प्रियं पश्यसि प्रियदर्शनं करोसि यः एवं वैश्वारनरम् आत्मानमुपास्ते, सः अदनीयम् अत्तित प्रियं परमात्मानं पश्यति एषः आत्मा मूर्धा वैश्वानरस्य शिरोभागः, यदि त्वम् अत्र नागमिष्यः न आगतोऽभविष्यो मां प्रति तदातेमूर्धाप्यपतिष्यत मूर्धा निपतितोऽभविष्यत् एतज्ज्ञानेन त्वया मूर्धरक्षण कृतमितिभावः।।श्रीः।।

इति छान्दोग्योपनिषधि पञ्चमाध्याये द्वादशखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।

।। श्रीराघवः शन्तनोतु ।।

त्रयोदशः खण्डः

राजा सत्यज्ञं प्रति प्राह—

अथ होवाच सत्ययज्ञं पौलुषिं प्राचीनयोग्य कं त्वमात्मानमुपास्स इत्यादित्यमेव भगवो राजन्निति होवाचैष वै विश्वरूप आत्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्तव बहु विश्वरूपं कुले दृश्यते ।।१।।

प्रवृत्तोश्वतरीरथो दासीनिष्कोऽत्स्यन्नं पश्यसि प्रियमत्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवात्मानं वैश्वानरमुपास्ते चक्षुष्ट्वेतदात्मन इति होवाचान्धोऽभविष्यो यन्मां नागमिष्य इति ।।२।।

राजा प्राचीनयोग्यं पुलषपुत्रं सत्ययज्ञं पप्रच्छ, यत् त्वं कम् आत्मानम् उपास्ये। स उवाच, आदित्यम् आदित्य एव विश्वरूपो वैश्वानरः तस्य सर्वरूपत्वात् अत एव तव कुले विश्वरूपं अनेकरूपं दृश्यते। अपरञ्च अश्वतरीभ्यां युक्तो रथः अश्वतरीरथः दासिभिः सहितो निष्कः हारः इति दासीनिष्कः ब्रह्मणोवर्चः ब्रह्मवर्चसम् एषः विश्वरूपः आत्मनः परमात्मनः चक्षुः नेत्रम् अन्धः दृष्टिरहितः शेषं सुगमम्।।श्रीः।।

इति छान्दोग्योपनिषदि पंचमाध्याये त्रयोदशखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।

।। श्रीराघवः शन्तनोतु ।।

चतुर्दशः खण्डः

अथाश्वपति इन्द्रद्युम्नसंवादमवतारयति तृतीयवैश्वानरोपदेशच्छलेन—

अथ होवाचेन्द्रद्युम्नं भाल्लवेयं वैयाघ्रपद्य कं त्वमात्मानमुपास्स इति वायुमेव भगवो राजन्निति होवाचैष वै पृथग्वर्त्मात्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्त्वां पृथग्बलय आयन्ति पृथग्रथश्रेणयोऽनुयन्ति ।।१।।

अथ राजा इन्द्रद्युम्नं पप्रच्छ, य त्वं कं भजसे? सोऽब्रवीत् वायुम्। राजा प्राह अयं वायुः पृथग्वर्त्मानां वैश्वानरः आत्मा एतस्य वर्त्मानि मार्गाः पृथक्पृथक्सन्ति। अत एव त्वां पृथक्बलयः अनेकराजोपहाराः पृथग्रथश्रेणयः अनेकेषां रथानां समूहाः अनुयन्ति अनुगच्छन्ति।

फलश्रुतिशेषमाह—

अत्स्यन्नं पश्यसि प्रियमत्यन्नं पश्यति प्रियं
भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं
वैश्वानरमुपास्ते प्राणस्त्वेष आत्मन इति
होवाच प्राणस्त उदक्रमिष्यद्यन्मां नागमिष्य इति ।।२।।

एषः वायुरूपो पृथग्वर्त्मा आत्मनः परमात्मनः प्राणः उत्क्रमिष्यत् उत्क्रान्तोऽभविष्यत् पूर्ववदन्यत्।।श्रीः।।

इति छान्दोग्योपनिषदि पंचमाध्याये चतुर्दशखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।

।। श्रीराघवः शन्तनोतु ।।

पंचदशः खण्डः

अथाश्वपतिजनसंवादमवतारयति—

अथवोवाच जनँ्शार्कराक्ष्य कं त्वमात्मानमुपास्स
इत्याकाशमेव भगवो राजन्निति होवाचैष
वै बहुल आत्मा वैश्वानरो यं
त्वमात्मानमुपास्से तस्मात्त्वं बहुलोऽसि प्रजया च धनेन च ।।१।।

राजा शर्कराक्ष्यपुत्रं जनमपृच्छत्, तदुपासनाविषये। तेनोक्तं— यदहमाकाशमेव आत्मबुद्ध्या उपासे स आह, यद्वयमपि बहुलो नाम वैश्वानर आत्मा यं त्वमात्मानं मत्वा उपास्से। अत एव प्रजया संततिपरंपरया पशुभिः बहुलः अधिकसंपन्नः।

परिशेषमाह—

अत्स्यन्नं पश्यसि प्रियमत्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते संदेहस्त्वेष आत्मन इति होवाच संदेहस्ते व्यशीर्यद्यन्मां नागमिष्य इति।।२।।

अयम् आकाशरूपः बहुलनामा वैश्वानरः आत्मनः परमात्मनः संदेहः मध्यभागः तव संदेहः मध्यभागोविशीर्णं भविष्यत् शेषं समानम्।।श्रीः।।

इति छान्दोग्योपनिषदि पंचमाध्याये पंचदशखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।

।। श्रीराघवः शन्तनोतु ।।

षोडशः खण्डः

अथाश्वपति बुडिलसंवादमवतारयति—

अथ होवाच बुडिलमाश्वतराश्विं वैयाघ्रपद्य कं त्वमात्मानमुपास्स इत्यप एव भगवो राजन्निति होवाचैष वै रयिरात्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्त्वँ रयिमान्पुष्टिमानसि।।१।।

पुनः राजा बुडिलम् अपृच्छत्। सोऽब्रवीत्— यदहम् अप एव उपासे राज वदति यत् अयं रयिः एतज्ज्ञाता रयिमान् पुष्टिमान्।

परिशेषमाह—

अत्स्यन्नं पश्यसि प्रियमत्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते बस्तिस्त्वेष आत्मन इति होवाच बस्तिस्ते व्यभेत्स्यद्यन्मां नागमिष्य इति।।२।।

एषः अब्रूयो रयिर्नामा वैश्वानरः आत्मनः वस्तिः मेहग्रन्थिस्थानं यदित्वमत्र नागमिष्यः तदा ते वत्सिः व्यभेत्स्यत् भिन्नाभविष्यत्।।श्रीः।।

इति छान्दोग्योपनिषदि पंचमाध्याये षोडशखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।

।। श्रीराघवः शन्तनोतु ।।

सप्तदशः खण्डः

अथाश्वपत्युद्दालकसंवादम् अवतारयति—

अथ होवाचोद्दालकमारुणिं गौतम कं त्वमात्मानमुपास्स इति पृथिवीमेष भगवो राजन्निति होवाचैष वै प्रतिष्ठात्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्त्वं प्रतिष्ठितोऽसि प्रजया च पशुभिश्च ।।१।।

अश्वपतिना पृष्ट उद्दालकः आत्मत्वेन पृथिवीमुपास्यमाह, स कथयति, यद् अयं प्रतिष्ठानाम वैश्वानरः एतं भजन्नेव त्वं प्रतिष्ठितोऽसि।

परिशेषमाह—

अत्स्यन्नं पश्यसि प्रियमत्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते पादौ त्वेतावात्मन इति होवाच पादौ ते व्यम्लास्येतां यन्मां नागमिष्य इति ।।२।।

आत्मनः परमात्मनः पृथिवीरूपः प्रतिष्ठानामा वैश्वानरः आत्मनः परमात्मनः पादौ एतज्ज्ञानार्थं यदि त्वं नागतोऽभविष्यः पादौ ते व्यम्लास्येतां म्लानावभविष्यताम्।।श्रीः।।

इति छान्दोग्योपनिषदि पंचमाध्याये सप्तदशखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।

।। श्रीराघवः शन्तनोतु ।।

अष्टादशः खण्डः

अथाश्वपतिः वैश्वानरं सामग्र्येणोपदिशति—

तान्होवाचैते वैखलु यूयं पृथगिवेममात्मानं वैश्वानरं विद्वाँ्सोऽन्नमत्थ यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति ।।१।।

अथ राजा सर्वान्प्राह— एते यूयं प्राचीनशालादयः षट् इममात्मानं पृथक्सन्तमिव मन्यमानाः अन्नमत्थ इदं नोचितं यस्तु इमं प्रादेशमात्रं प्रादेशाः दिवादित्यवाय्याकाश-जलपृथ्वीनामानः तदाकाराः सुतेजा च विश्वरूपः पृथग्वर्त्मा बहुलःरयिः प्रतिष्ठा इत्येतानि समभिधानानि विदधतः मूर्धा चक्षुः प्राणः संदेहः वस्तिः पादौ इत्येतानि अंगानि तैरेवमियते इति प्रादेशमात्रः तं प्रादेशमात्रमथवा प्रादेशः द्युलोकमारभ्य पृथिवीपर्यन्तः प्रमाणो यस्य तथाभूतम् अभिविमानम् अभितो ज्ञानवैराग्यनेत्राभ्यां विमीयते विज्ञायते इति अभिविमानः तं सामग्रेणोपासते आत्मानं सेवकं मत्वा परमात्मानं चराचरेष्वेषु पश्यन्भजते स सर्वेषु भूतेषु उपश्लिष्टतया समुपस्थितः अन्नम् अत्ति ब्रह्मसुखमनुभवति।

तस्य ह वा एतस्यात्मानो वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मामा संदेहो बहुलो बस्तिरेव रयिः पृथिव्येव पादावुर एव वेदिलर्लोमानि बर्हिर्हृदयं गार्हपत्यो मनोऽन्वाहार्यपचन आस्यमाहवनीयः ।।२।।

ह वा इति निश्चयार्थौ निपातौ तस्य आत्मत्वेन समाराध्यस्य वैश्वानरस्य स्वतेजा एव मूर्धा, द्युलोकात्मकः चक्षुः नेत्रं विश्वरूपं सूर्यात्मा पृथग्वर्त्मा प्राणः वायुरूपः बहुलः संदेहः आकाशाख्यो रयिः बस्ती अब्रूपः पृथिवी एव प्रतिष्ठापादः उर एव वेदिः लोमानि रोमाणि एव बर्हिः कुशाः हृदयं मनः गार्हपत्यमन्वाहार्यपचनः चेतः आहवनीयम् आस्यं मुखम्।।श्रीः।।

इति छान्दोग्योपनिषदि पंचमाध्याये अष्टादशखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।

।। श्रीराघवः शन्तनोतु ।।

एकोनविंशः खण्डः

अथ भोजने निष्पादयितुम् अग्निहोत्रत्वं पञ्चप्राणानां पञ्चाहुतिविधितया प्रतिपत्तये तत्फलश्रुतिश्रावणाय शकलषट्कम् उपक्रमते।

तद्यद्भक्तं प्रथमभागच्छेत्तद्धोमीयँ स यां प्रथमामाहुतिं जुहुयात्तां जुहुयात्प्राणाय स्वाहेति प्राणस्तृप्यति ।।१।।

तद् तस्माद् हेतोः यद् भक्तं सिद्धम् अथवा भक्तिः परमेश्वरचरणाविन्दप्रेमप्रवणता अस्त्यस्मिन् तद्भक्तं, ननु प्रेम्णश्चेतनावन्निष्ठत्वात् भोजने कथमस्याधेयतेति चेत्? शृणु निर्मातृनिष्ठभगवत् प्रेम्णः प्रवणतायाः तत्रापि समारोपात्। भोजननिर्माणकाले यन्निर्मातृविशेषो भगवन्नामरूपधाम्नां समास्वादं कुर्वाणो भगवत् प्रतीये पचति तदा तद्भक्तिपरमाणवो भजोनेऽपि समागच्छन्ति। अतो भक्तं भगवद्भक्तिपूर्वकनिर्मितं प्रथमम् आगच्छति भोजनाय स्थाल्यामुपस्थाप्यते तद् होमीयं होमाय आध्यात्मिकाहुतये हितम् इति होमीयं तत्र सःभोक्ता याम् आहुतिम् जुहुयात् पूर्वोक्तवैश्वानरं सकलहृदये वर्तमानं परमात्मानं प्रीणयितुम् आहुतिबुद्ध्या यं प्रथमं ग्रासं मुखे मेलयेत् तत्र प्राणाय स्वाहा अनेन मन्त्रेण जुहुयात् आहुतिं प्रमाणं ग्रासं मुखे मेलयेत् एतेन कर्मणा प्राणः प्राणभूतपरमात्मा तृप्यति तृप्तिं लभते।

ननु तत्तृप्तौ को लाभ इत्यत् आह—

प्राणे तृप्यति चक्षुस्तृप्यति चक्षुषि तृप्यत्यादित्यस्तृप्यत्यादित्ये तृप्यति द्यौस्तृप्यति दिवि तृप्यन्त्यां यत्किंच द्यौश्चादित्यश्चाधितिष्ठतस्तत्तृप्यति तस्यानुतृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति ।।२।।

एवम् अत्र पञ्चधा सति सप्तमी। प्राणे तृप्यति तृप्तिं गच्छति सति। चक्षुः नेत्रं तृप्यति, चक्षुषि तृप्यति तृप्ते भवति आदित्यः चक्षुर्देवता तृप्यति तस्मिन् तृप्ते द्यौः आदित्याधारभूतो लोकः परमप्रकाशमानः साकेत इति भावः। तस्यां तृप्यन्त्यां तृप्तिं गच्छन्त्यां यत्किञ्चिद् रूपं यत् द्यौरादित्यसाकेतसूर्यौ अधितिष्ठतः आधारी कृत्य प्रकाशेते। यत्किञ्चिदधितिष्ठतः इत्यत्र (अधिशीङ् स्थासाम् कर्म) इत्यनेन आधारकर्म संज्ञायां द्वितीया। तृप्यति तद् ब्रह्मभूतं श्रीरामाख्यं वस्तु तृप्यति प्रीण्यते तस्य परमात्मनः तृप्तिम् अनु तृप्तेरनन्तरं भोक्ता प्रजया भगवद्भक्तनिर्देशकृदास्तिकसन्तत्या अन्नाद्येन भक्षणयोग्यभोजनेन। अन्नमेव आद्यमिति अन्नाद्यं तेन भगवद् प्रीतिजनकरसवदशनेन इति भावः। तेजसा शारीरिकबलेन ब्रह्मवर्चसेन ब्रह्मणः वर्चः इति ब्रह्मवर्चसं ब्रह्म हस्तिभ्यां वर्चसः। इति सूत्रेण अच् प्रत्ययः। ब्राह्मणसम्बन्धेन परमात्मानुग्रहलब्धतेजसा तृप्यति परितोषं व्रजति। इति शब्दः खण्डसमाप्तिसूचकः।

इति छान्दोग्योपनिषदि पञ्चमाध्याये एकोनविंशखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।

।। श्रीराघवः शन्तनोतु ।।

विंशोः खण्डः

अथ द्वितीयाहुतिं वर्णयति—

अथ यां द्वितीयां जुहुयाद् व्यानाय स्वाहेति व्यानस्तृप्यति ।।१।।

व्याने तृप्यति श्रोत्रं तृप्यति श्रोत्रे तृप्यति चन्द्रमास्तृप्यति चन्द्रमसि तृप्यति दिशस्तृप्यान्ति दिक्षु तृप्यन्तीषु यत्किञ्च दिशश्च चन्द्रमाश्चाधितिष्ठन्ति तत्तृप्यात तस्यानुतृप्ति तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति ।।२।।

व्यानाय स्वाहा इति मन्त्रं जपन् आहुति बुद्ध्यात् द्वितीयं ग्रासं मुखे मेलयेत् एवं व्यानस्तृप्यति तदनु श्रोत्रं श्रवणेन्द्रियं तदनु चन्द्रमाः श्रोत्ररूपस्य आकाशस्य अलङ्करणभूतत्वात्। तदनु दिशः चन्द्रमासः दिक्त्वात्। तदनु दिक् चन्द्राधिष्ठान् परमात्मा श्रीरामः।

इति छान्दोग्योपनिषदि पञ्चमाध्याये विंशखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।श्रीः।।

।। श्रीराघवः शन्तनोतु ।।

एकविंशः खण्डः

अथ तृतीयम् आहुतिं निरूपयति—

अथ यां तृतीयां जुहुयात्तां जुहुयादपानाय स्वाहेत्यपानस्तृप्यति ।।१।।

अपाने तृप्यति वाक्तृप्यति वाचि तृप्यन्त्यामग्निस्तृप्यत्यग्नौ तृप्यति पृथिवी तृप्यति पृथिव्यां तृप्यन्त्यां यात्किं च पृथिवी चाग्निश्चाधितिष्ठतस्तत्तृप्यति तस्यानुतृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति ।।२।।

तृतीयामपानाय स्वाहा इति मन्त्रं जपन् आहुतिभूतां ग्रासक्रियां निर्वर्तयेत्। एवम् अपानः तद्दैवतं तृप्यति तमनु वाक् वाणी तामनु अग्निः वाक् दैवतं तमनु पृथिवी आधारशक्ति अग्निरधिष्ठानत्वात्।।श्रीः।।

इति छान्दोग्योपनिषदि पञ्चमाध्याये एकविंशखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।

।। श्रीराघवः शन्तनोतु ।।

द्वाविंशः खण्डः

अथ चतुर्थीम् आहुतिमाह—

अथ यां चतुर्थीं जहुयात्तां।
जुहुयात्समानाय स्वाहेति समानस्तृप्यति।।१।।

समाने तृप्यति मनस्तृप्यति मनसि
तृप्यति पर्जन्यस्तृप्यति पर्जन्ये तृप्यति
विद्युत्तृप्यति विद्युति तृप्यन्त्यां यत्किञ्च
विद्युच्च पर्जन्यश्चाधितिष्ठतस्ततृप्यति
तस्यानुतृप्तिं तृप्यति प्रजया
पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति।।२।।

अथ चतुर्थं ग्रासं समानाय स्वाहा इति मन्त्रं जप्त्वा आहुतिबुद्ध्या मुखे मेलयेत्। अनेन समानस्तृप्यति तमनु मनः तदनु पर्जन्यः वर्षणदैवतं तमनु विद्युत्। तामनु तपोऽधिष्ठानं परमात्मा तमनु भोक्तेति तृप्तिक्रमः।।श्रीः।।

इति छान्दोग्योपनिषदि पञ्चमाध्याये द्वाविंशखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।

।। श्रीराघवः शन्तनोतु ।।

त्रयोविंशः खण्डः

अथ पञ्चमीम् आहुतिं वर्णयति—

अथ यां पञ्चमीं जुहुयात्तां स्वाहेत्युदानस्तुप्यति।।१।।

उदाने तृप्यति त्वक्तृप्यति त्वचि तृप्यन्त्यां वायुस्तृप्यति वायौ तृप्यत्याकाशस्तृप्यत्याकाशे तृप्यति यत्किं च वायुश्चाकाशश्चाधितिष्ठततस्तत्तृप्यति तस्यानुतृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति ।।२।।

पञ्चमीम् आहुतिम् उदानाय स्वाहा इति मन्त्रेण जप्यमानेन ग्रासरूपां जुहुयात् क्रिययानया उदानस्तृप्यति तमनु त्वक् त्वगेन्द्रियं तामनु वायुः त्वग् दैवतं तमनु आकाशः वारवाधारः। तमनु द्वयोरधिष्ठाता परमात्मा। तस्मिन् तृप्ते तृप्यति भोक्ता आदेशकारः सन्ततिभिः भगवदीयाभिर्भगवद्भक्तिवर्धकभोजनेन भगवद् भजनोपयोगिना शारीरेण तेजसा ब्राह्मणोचितेन भगवद् दत्तेन च मानसेन वर्चसा तृप्यति। एवं भोजनकाले प्रत्यहं भोजनात्पूर्वं हृदिस्थं वैश्वानररूपं भगवन्तं तोषयितु कामः पञ्चग्रासान् आहुतिप्रमाणान् यथाक्रमं प्राणाय स्वाहा,, व्यानाय स्वाहा, अपानाय स्वाहा समानाय स्वाहा, उदानाय स्वाहा इति मन्त्रैः हवनबुद्ध्या पश्चाद्यथारुचि भोजनं कुर्यात्। अत एव स्मरति भगवान् गीतासु।

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ।।

गीता १५-१४

प्राणापानशब्दः व्यानसमानोदानानामप्युपलक्षणः अन्नम् अदनीयमशनम् चतुर्विधं भक्षभोज्यलेह्यचोष्यरूपम्। इदमेवमाह मानसे गोस्वामी तुलसीदासः **पञ्च कवलि करि जेवन लागे, गारि गन सुनि अति अनुरागे**। (मानस १-३२-१।)

देवादित्येन्दुदिग्वाणी ज्वलनाम्भोदशम्पिका ।
वाताम्बरनियन्ता यस्तं रामं ब्रह्म संश्रये ।।श्रीः।।

इति छान्दोग्योपनिषदि पञ्चमाध्याये त्रयोविंशेखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।

।। श्रीराघवः शन्तनोतु ।।

चतुर्विंशः खण्डः

अथ विदुषां हवनस्वरूपं निरूपयति—

स य इदमविद्वानग्निहोत्रं जुहोति। यथाङ्गारानपोह्य भस्मनि जुहुयात्तादृक्तत्स्यात्।।१।।

सः एतत् पञ्च कवलप्रकारम् अविद्वान् न जानन् अग्निहोत्रं जुहुयात् मनः कल्पितं किमपि वाक्यं कथयित्वा भोजनं कुर्यात् सदा तस्य भोजनं तादृशमेव निष्फलं भवति यथा कोऽपि अङ्गारं निर्धूममग्निम् अपोह्य दूरीकृत्य भस्मनि हवनं करोति।

अथ विदुषां हवनस्वरूपं वर्णयति—

अथ य एतदेवं विद्वानग्निहोत्रं जुहोति तस्य। सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मसु हुतं भवति।।२।।

अथ यदि विद्वान् एतद् रहस्यं जानन् मन्त्रपञ्चकजपपुरस्सरम् आहुतिं कुर्यात् तदा तस्य हुतं हवनकर्म सर्वेषु भूतेषु प्राणिषु सर्वेषु लोकेषु साकेतपर्यन्तेषु सर्वेषु आत्मसु जीवात्मसु। अत्र बहूक्तिनिर्देशः जीवात्मनाम् अनेकत्वं प्रमाणयति।

अथ विदुषोऽग्निहोत्रफलं वर्णयति—

तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतवँ्हास्य सर्वे पाप्मानः। प्रदूयन्ते य एतदेवं विद्वानग्निहोत्रं जुहोति।।३।।

यः एतद् विद्वान् विदन् अग्निहोत्रमेतद्रूपं जुहोति पञ्चकवलं कृत्वा भोजनं करोति तस्य पाप्मानः अघानि तथैव प्रदूयन्ते नष्टा भवन्ति यथा ईशिका तूलं शरनामकतृण-राशिभिर्युक्तं कार्पाशं अग्नौ प्रदूयन्ते भस्मसाद् भवन्ति।

भूयः विद्वासं प्रशंसति—

तस्मादु हैवं विद्यद्यपि चण्डालायोच्छिष्टं प्रयच्छेदात्मनि। हैवास्य तद्वैश्वानरे हुतँ्स्यादिति तदेष श्लोकः।।४।।

तस्मात् अत एव एवं विद् एतद् रहस्यज्ञाता यदि चाण्डालाय यदि उच्छिष्टं प्रयच्छेत् तदात्। अत्र अपि शब्दः चतुर्थेनान्वेति। उच्छिष्टचाण्डालशब्दौ देय-

दायकेत्युभयत्र पवित्रापवित्रत्वभावसूचकौ। तत् सर्वम् आत्मनि वैश्वानरे भगवति हुतं प्रीणन् साधनं स्यात्। उच्छिष्टं हुतमेव चाण्डालस्य आत्मभूतवैश्वानर इव होतृकृते पुण्य-जनकतावच्छेदको घटते इति भावः।

अस्मिन् विषये एषः श्लोकः भवति। पद्यात्मकः मन्त्रः पद्यते।

यथेह क्षुधिता बाला मातरं पर्युपासतेँ।
एव सर्वाणि भूतान्यग्निहोत्रमुपासत इत्यग्निहोत्रमुपासत इति ।।५।।

यथा इह अस्मिन् लोके क्षुधिताः बुभुक्षापीडिताः बालाः बालकाः शिशवः मातरं निजजननीं पर्युपासते इति क्षुत्क्षान्तये प्रार्थयमाना भजन्ते। एवं सर्वाणि भूतानि जीवजातानि अग्निहोत्रं वैश्वानराग्नौ हूयन्ते पञ्चाहुतयः अनेन इत्यग्निहोत्रस्तं भोजनकाले पञ्चकवलकर्तारम् उपासते निजत्राणाय भजन्ते द्विरुक्तिरादरार्थाध्यायसमाप्तिसूचकार्था:।।

इति छान्दोग्योपनिषदि पञ्चमाध्याये चतुर्विंशखण्डः
इति श्रीचित्रकूटवास्तव्य सर्वाम्नाय श्रीतुलसीपीठाधीश्वरश्रीमज्जगद्गुरु श्रीरामानन्दाचार्य श्रीरामभद्राचार्यकृतौ श्रीराघवकृपाभाष्ये छान्दोग्योपनिषदि विवरणे पञ्चमाध्यायः सम्पूर्णम्।।
।। श्रीराघवः शन्तनोतु ।।

।।श्रीराघवो विजयते।।

।।श्रीरामानन्दाचार्याय नमः।।

षष्ठोऽध्यायः

प्रथमः खण्डः

एकमेवाद्वितीयं सद् ब्रह्म यं श्रुतयो जगुः
नीलोत्पलदलश्यामं रामं षष्ठे तमीड्महे।

अथ समस्तश्रुतीनां परमं तात्पर्यं, निरस्त समस्तहेयगुणं विशुद्धबोधविग्रहं भूमिजापरिग्रहं सकलकल्याणगुणसङ्ग्रहं सर्वसर्वेश्वरं परमात्मानं श्रीरामं ब्रह्म निरूपयितुं षष्ठोऽध्यायः उपाक्रम्यते। तत्र आरुणेय श्वेतकेतु तज्जनकारुणि सम्वादव्याजेन समवतार्यते चैषाख्यायिका—

श्वेतकेतुर्हारुणेय आस तछह पितोवाच श्वेतकेतो वस ब्रह्मचर्यम्। न वै सोम्यास्मत्कुलीनोऽननूच्य ब्रह्मबन्धुरिव भवतीति।।१।।

ह शब्दः आख्यायिकाया ऐतिएकत्वसूचकः, आरुणेयः अरुणस्य गोत्रापत्यं पुमान् आरुणिः तस्य आरुणेः गोत्रापत्यं पुमान् आरुणेयः, अरुणनामा ब्रह्मऋषिपौत्र इति भावः। श्वेतकेतु श्वेतः ब्रह्मविद्याया धवली करिष्यमाणः केतु ध्वयो यस्य सः श्वेतकेतु अन्वर्थनामा आस पूर्वकाले बभूव। "बहुलं छन्दसी" इत्यनेन "अस्तेर्भूः" इति सूत्रस्याप्रवृत्तेः आसेति अस् धातुरेव लिडन्त प्रयोगः। तादृशं श्वेतकेतुनामकं पुत्रम् अतिक्रममाणमवधिं व्रतवन्धसंस्कारस्य तं वेदाध्ययिनं न चिकीर्षन्तं व्यतीतद्वादशवर्ष-वयसं पिता तज्जनक आरुणिरुवाच, श्वेतकेतो एतन्नाम्ना पुत्रमभिमुखीकरोति। वस ब्रह्मचर्यं शास्त्राध्ययनाय कञ्चिदाचार्यं वृत्वा तच्चरणारविन्दसमीपे ब्रह्मचर्यव्रतं वसुमैथुनत्याग पूर्वकं गुरुकुल एव निवस, आदेशहेतुमाह सोम्य हे सोमरसपानार्ह पुत्र! कोऽपि अस्मत् कुलीनः अस्मद् वंश प्रसूतः अनूच्य वेदान् अनधित्य अकण्ठस्थि कृतवेद ब्रह्मबन्धुः ब्रह्माणो बन्धवो यस्य व्यपदे स्याह सः ब्रह्मबन्धु अन्यान् ब्राह्मणान् बन्धून्

मन्वान स्वयं ब्राह्मणसंस्कारहीनः ब्रह्मबन्धुः स इव न भवति न कोऽपि वेदाध्ययन-वर्जितः सन् ब्राह्मणाधमो जायते। स्वाध्याय एव ब्राह्मणानां तपः तद् विहीनो ब्रह्मबन्धुरेव।

''ब्रह्मबन्धुर्द्विजाधमः'' इतिकोशात् यथोक्तं मानसे—

सोचिय विप्र जो वेद विहीना ।
तजि निज धर्म विषय लयलीना ।।

मानस २-१७३-३

इति एष आदेशप्रकारः।।श्रीः।।

अथ श्वेतकेतोरुत्तरकालिकदशामाह—

स ह द्वादशवर्ष उपेत्य चतुर्विंशतिवर्षः सर्वान् वेदानधीत्य महामना अनूचानमानी स्तब्ध एयाय। तछ्ह पितोवाच श्वेतकेतो यन्नु सोम्येदं महामना अनूचानमानी स्तब्धोऽस्युत तमादेशमप्राक्ष्यः।।२।।

एवं शास्त्राध्ययनसमर्थोऽपि ब्रह्मविद्या दौर्लभ्यद्योतनाय द्वादशवर्षं स्वयमनुपनीयैव पुत्रेणैव वृतं कञ्चिदाचार्यं प्रति प्रेषयामास ननु कथमिदं ज्ञातं यत् द्वादशवर्षः श्वेतकेतुः प्रेषित इति? अनुपदमेव चतुर्विंशति २वर्षः इति श्रुत्येव वक्ष्यमाणत्वात् न च द्वादशवर्षस्य विप्रस्योपनयने **'व्रात्यत्वापत्तिरितिवाच्यम्'** **''अष्टवर्षं ब्राह्मणोमुपनयित''** इति श्रुतेः तत्र षोडशवर्षं यावत् उपनयनावधिनिर्धारणेनादोषात् षोडशवर्षानन्तर एव अनुपनीत ब्राह्मणव्रात्यत्वनिर्देशात्। यथोक्तं मनुना **आषोडषाधि विप्रस्य सावित्री नाति वर्तते।**

इति सः श्वेतकेतु पितुनिर्देशं पालयन् तत्र समग्रं वेदराशिं गुरोरेवाधिजग्रे, ततो द्वादशे वर्षे पूर्णे सति वयसा चतुर्विंशतिवर्षः रूढयौवनः सर्वान् वेदान् अधीत्य एकैकं वेदं त्रिभिस्त्रिभिवर्षैः शब्दतः अर्थतश्चाधिगम्य तान् पुनराचार्यसमक्षम् अनूच्य आनुपूर्व्या प्रकृतिविकृतिस्वरवर्णानुकूल्येन परीक्षायां विस्पष्टमुक्त्वा तस्माद् लब्धप्रमाणः एवं गुरुकुलमुपेत्य ततः शिक्षितो भूत्वा समावर्तनविधया गृहं प्रति निवृत्तः। कथम् आगच्छत्? इत्यत् आह महामना:महत् पूजनीयं मनः यस्य सः महामनाः मनसि विद्याभिमानयुक्तत्वात् इतरापेक्षया निज मन एव महन् मन्वानः अनूचानमाने आनुपूर्व्या आनुकूल्येन च

विकृति स्वरवर्णानां परिभाषणविधानेन अनुवक्ति समस्तश्रुतिजातं यः सः अनूचानः, अनूचानम् आत्मानं मन्यते इत्यनूचानमानी, आत्मानमानुपूर्व्यानुकूल्याभ्यां वेदानां वक्तारं मन्यमानः, अथ एव तेन गर्वेण एयाय आ इषत् इयाय इति एयाय, अभिमानयुक्तत्वात्। न तु पूर्ण पितुः समीपमगच्छत् इत्येव 'आङस्तात्पर्यम्' ननु कथमीषदर्थ एवाङ्निर्धारितस्त्वया? इति चेत् सन्धिकार्यं निरीक्ष्यैव, अथ कथं सन्धिकार्येण ईषदर्थोवधारितः इति चेच्छृणुः "ङित्स्वेवाऽङः" सन्धिकार्यमिति पाणिनीरनुशास्ति। तथा च सूत्रं "निपात एकाजनाङ्" ङित्वं च चतुर्ष्वर्थेषु ईषदर्थे क्रियायाः योगे मर्यादायाम् अभिविद्यावपि वाक्ये स्मरणे च अङित् तत्र नैव सन्धिकार्यम्। तथा च भाष्यश्लोकः—

ईषदर्थे क्रियायोगे मर्यादाभिविधावपि
एतमातं ङितं विद्यात् वाक्यस्मरणयोरङित्।

इति नन्वेतेषु चतुर्ष्वपि ङित्वज्ञाप्य वाच्येष्वः ईषदर्थ एव कथं निश्चितो भवता अनूचानमानीत्वस्तब्धत्वेति तन्मनः प्रतिक्रिया द्वयेन एवम् एयाय ईषदर्थसंपन्नः पितुःसमीपमगच्छत्। एवं समधीत वेदमपि विद्याभिमानगर्वितं पंडितं मन्यमानमनसं तं श्वेतकेतुं निरभिमानं चिकीर्षन् तं ब्रह्मविद्ययापि पावयिषन् उवाच अवदत् यत् श्वेतकेतो त्वं यस्मात् कारणात् अनूचानमानी आत्मानं सामग्र्येण वेदवक्तारं मन्यमानः, अतएव स्तब्धः विद्याभिमानेन गर्वितः असि किं तम् आदेशं ब्रह्मनिर्देशं आदरात् दिश्यते उपदिश्यते देशिकैः सत्पात्रेभ्यः यः स आदेशः,अथवा आ ईषदेव दृश्यते अनिर्वचनीयतया न तु सामग्रेण वर्ण्यते अनिर्वचनीयं नाम निःशेषेण वक्तुमनर्हत्वे सति यत्किंचित् वक्तुमर्हम् इत्यसकृदवोचाम श्रुतिरपि नेतिनेतिइति निगदन्ती ब्रह्मनिःशेषेण न वक्तुं प्रभवति। अथवा आ आकाशः सर्वेषां हृदाकाशः एवदेशः निवासदेशः यस्य स आदेशः भगवान्

"अंगुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये संनिविष्टः"

इति श्रुतेः (कठ० १.२.१३)

"ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति" (गी० १८.६१)

इति स्मृतेश्च। अथवा आदरात्दिशति अतिसृजति भक्तेभ्यः सकलाभीप्सितान् यः स आदेशः भगवान् श्रीरामः स हि समादरेण भक्तेभ्यः सकलानभीप्सितान् अतिसृजति।

यथोक्तं श्रीविभीषणशरणागतिप्रसंगे श्रीमानसे पंचमे—

जो संपति सिव रावनहिं दीन्ह दिये दसमाथ।
सोइ संपदा बिभीषणहिं सकुचि दीन्ह रघुनाथ।।

अथवा आदाय समन्तात् अत्ति (मा॰ ५.४९ख) खादति इत्यादः, सकल-कलाकलापकलनः कालः तस्यापि आदस्य कालस्यापि ईशः इत्यादेशः। तथा च पठन्ति काठकाः—

यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः।
मृत्युर्यस्योपशेचनं क इत्था वेद यत्र सः।।

(कठ॰ १.२.२५)

मानसकारोऽप्यामनति—

जाके डर अतिकाल डेराई।
जो सुर असुर चराचर खाई।।

(मा॰ ५.२२.९)

तात राम नहिं नरभूपाला।
भुवनेश्वर कालहुँ कर काला।।

(मानस ५.३८.१)

भृकुटिभंग जो कालहिं खाई।
ताहि कि सोहइ ऐसि लराई।।

(मानस ६.६७.२)

एवं विधम् आदेशं सकलहृदयाकाशदेशं कालाधीशं साकेतपतिं श्रीरामं ब्रह्म अप्राक्षः छान्दसोऽयमाकारः, मन्मते तु अप्राक्षीः इत्येव पाठः ।।श्रीः।।

अथ तमादेशं पुत्रगीप्साविवर्धयीषया विशिनष्टि

येनाश्रुत ँश्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति।
कथं नु भगवः स आदेशो भवतीति।।३।।

येन आचार्यचरणेभ्य: सविधिविज्ञाय प्रतीतिप्रीतिपूर्वकपरानुरक्तिरूपभक्तिप्रवणचेतसि संनिधीयमाने नानुगृह्णता भगवता हेतुभूतेन समुपजृंभितभक्तरितम्भरेण विश्वम्भरेण रघुवरेण अश्रुतं न कदापि श्रवणपथं नीतम् अपि समस्त श्रुतिजातं श्रुतं भवति। स्वयमेव श्रवणपथमागच्छति। निजं कृतार्थीचिकीर्षमाणम् अमतं यत् कर्हिचिदपि नैव ध्यातं तन्मतं भवति स्वयमेव ध्यानविषयी भवति। अविज्ञातं यन्न कदापि ज्ञानविषयतामागतं तदविज्ञातं विशेषेण ज्ञायमानं भवति, श्रुतमतयोर्निदिध्यासितस्यापि अन्तर्भाव:। एवं येन निर्भरभक्ति भागीरथीवारिधारया विमलिते मानसमन्दिरे परमाराध्यतया भगवद्भक्तेन समनुक्षणं प्रेमप्रवणानन्यचेतसा क्रियमाणभव्यभावना समर्चनेन येन श्रवणमनननिदिध्यासन-विज्ञानमन्तरेणापि निखिलं वस्तु सकल विलक्षणमविनस्वरं सर्ववेदान्तप्रतिपाद्यं ब्रह्म श्रुतं मतं निदिध्यासितं विज्ञातं च भवति। तमादेशं भक्तवाञ्छाकल्पतरुं कृपालु चूडामणिं प्रणतपालकं लोलालकं कौसल्याबालकं ब्रह्म निजगुरून् कदाचित् समगीप्स: न वेति यदि अगीप्सीष्य:। तर्हि न स्तब्धोऽभविष्य:, यतस्तब्ध: अतो न गीब्प्सितवानसि। न खलु ब्रह्मणि विज्ञाते कोऽपि स्तम्भते, एवं पित्रानिर्भर्त्सित: संचूर्णीकृतवेदाध्ययन-संजाताखर्वगर्व: खर्बोऽर्भक: कीदृगादेश: स इति पृच्छति।

हे भगव: हे पूज्यचरण! स आदेश: ब्रह्मरूप: कथं भवति कीदृगस्ति इति शब्दोगीप्साप्रकरसूचक:।।श्री:।।

अथादेशं त्रिभिर्मंत्रैर्विवृणोति—

यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातꣳस्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्।।४।।

यथा सोम्यैकेन लोहमणिना सर्वं लोहमयं विज्ञातꣳस्याद्वाचारम्भणं विकारो नामधेयं लोहमित्येव सत्यम्।।५।।

यथा सोम्यैकेन नखनिकृन्तनेन सर्वं कार्ष्णायसं विज्ञातꣳस्याद्वाचारम्भणं विकारो

नामधेयं कृष्णाय समित्येव सत्यमेवꣳसोम्य स आदेशो भवतीति।।६।।

इदानीम् आदेशस्य त्रैकालिकसत्यतां त्रिभिर्मन्त्रैः दृढीकरोति, आदेशशब्दवाच्यः परमात्मा त्रिकालं सत्यः अत्रेदमवगन्तव्यं यत् श्रुतिसंमतोऽयमविकृतपरिणामवादः। जगत्परमात्मनः परिणामः किन्तु विकारो नहि सर्वथैव तस्मिन् विकाराभावात्।

यथा दीपकाद्दीपः प्रभवति किन्तु प्रभावको न विक्रियते, यथा वृक्षात्फलं प्रभवति किन्तु न विकारमापद्यते वृक्षः।

यथा च चिन्तामणेः समीप्सिता निर्गच्छन्ति तथैव कोटि कोटि ब्रह्मांडानि भगवतः प्रभवन्ति। किन्तु भगवान् निर्विकार एव ननु ब्रह्मणो निर्विकारत्वे कथं परिणामवादः? चित्, अचिच्चेति ब्रह्मणो द्वे विशेषणे, विशेषणविशेष्यमध्यवर्ती शरीरशरीरिभाव सम्बन्धः। एवं चिज्जीवः, अचिज्जगत् तद् विशिष्टं ब्रह्म, तस्मिन्नेव प्रकृतिनामके अचिति विशेषणे विकारः। ननु चिदंशे विशेषणे, न वा विशेष्ये ब्रह्मणि इत्येव विशिष्टाद्वैतवादः। अत एव "परिणामात्" ब्र॰ सू॰ १-४-२७ इति बादरायणवचनं संगच्छते। इयमेव सर्वविज्ञानप्रतिज्ञा। यत्वेकत्ववादिनः जगतो विवर्तवादमाडम्बरयन्ति, तत्तु सर्वथैवाशास्त्रीयम्। तेषामेव लक्षणानुसारेण—

सतत्वतोऽन्यथाप्रथा विकार इत्युदाहृतः।
अतत्वतोऽन्यथाप्रथा विवर्त इत्युदीरितः।।

ते खलु रज्जुसर्पोदाहरणं उपस्थापयन्ति तत्र ते प्रष्टव्याः "सर्वं खल्विदं ब्रह्म तज्जलानीति शान्त उपासीत" (छान्दोग्य॰ ३.१४.१) इति श्रुत्या जगन्मयत्वं ब्रह्मणः प्रतिपादितम्। तर्हि ब्रह्मव्यतिरिक्तं यदि किमप्यवशिष्यते नहि ब्रह्मैव परमार्थतस्तत्वं तदा कुतमागतमतत्वं यद्यतत्वं नास्ति तर्ह्यतत्वतोऽन्यथाप्रथाकुतः मह्यन्यथाप्रथा नास्ति तर्हि कुतोयं विवर्तवादगर्तावर्तः। यथोर्णनाभिः सृजते गृह्णते च इति श्रुतिस्तु केवल ब्रह्मणः अभिन्ननिमित्तोपादानकारणत्वप्रतिपादनपरा। न तु तया कश्चनवादः प्रतिपाद्यते जगत् विषयकः। अहो रवोपधत्वमेषां ये सामान्यामुपमामपि न विवेक्तुं प्रभवन्ति, न खलु चन्द्रैव मुखमिति वाक्येन मुखे सामग्र्येण चन्द्रत्वं समुपस्थाप्यते। प्रत्युत आंशिकतया तद्गताह्लादकत्वमेव तत्र समारोप्यते। तस्मात् न वा जगद्ब्रह्मणो विवर्तो प्रत्युत्परिणामः

स चाविकृतत्वविशिष्ट इति तथ्यं स्पष्टयितुं त्रिर्विकारो निषिध्यते इति विरमामि लोकाभिरामे श्रीरामे। अथ तर्हि—

अनादिनिधनं ब्रह्म शब्दतत्वं यदक्षरम्।
विवर्त्ततेऽर्थभावेन प्रक्रिया जगतो यतः।।

वाक्यपदीयब्रह्मकाण्ड१—

एवं श्रीलक्ष्मीरमणं नौमि गौरीरमणरूपिणम्।
स्फोटरूपं जगत्सर्वं यत यतद्विवर्त्तते।।

वैयाकरणभूषणसारमङ्गलाचरण १

इत्यादौ विवर्तते इति पदप्रयोगः किमभिप्रायकः? इति चेत् नैषः प्रयोग आर्षः प्राचीनोवा भगवत्पादशङ्कराचार्यपदानुयायिनां पूर्वाग्रहग्रहीतभाव एषः। अथवा विशेषेण वर्तते विवर्तते इति योगव्याख्या करणीया। एवं विवर्तवादो न श्रौतः, कस्तर्हि परिणामवादः, स चाचिज् विशेषण एव, विशिष्टे ब्रह्मणि समुपचर्यते। "दण्डे नष्टे दण्डी नष्ट" इतिवत् भगवानेव चराचररूपेण परिणमति, एष परिणामवादः जीवभोग्याचित् पदार्थविषयक, न तु जीवः स तु भगवत्कलारूपः दासभूतो भगवत्पुत्र एव एषः नित्यो भगवानिव नित्यो नित्यानाम् चेतस् चेतनानाम् इति श्रुतेः।

"ममैवांशो जीवलोके जीवभूतः सनातनः"

गीता १५-७

इति स्मृतेश्च। नन्वखण्डस्य परमात्मनः अंशत्वकल्पने सखण्डतापत्तिरिति चेन्न दीपात् प्रवर्तित दीपवत्, अंशत्वकल्पनेऽपि तदखण्डत्वेनाक्षति। यतु अंशशब्दः अंशसदृशे लाक्षणिक इति केचन आहुः तन्न सनातनपदो पादानेन भगवत इव तस्य नित्यत्वस्वीकारात्। अत्र अंशत्व अंशित्वव्यवहारः अणुत्व व्यापकत्व अभिप्रायकः। एवं परमात्मा व्यापको भवन् चेतन जीवात्मा च अणुः संश्चेतनः तस्य जीवस्य भोग्य पदार्थ सर्व अभिकृतस्य भगवत परिणाम एव। अत एव श्रीभागवते—

खं वायुमग्निं सलिलं महीं च।
ज्योतींषि सत्वानि दिशो द्रुमादीन्।

सरित्समुद्राश्च हरेः शरीरं
यत्किञ्चभूतं प्रणमेदनन्यः।।

भा० पू० ११-२-४१

इति नारदीय वचनं सङ्गच्छते। इममेव परिणामवादं विस्पष्टयितुं यथाक्रमं मृत्पिण्ड-लोहमणिनखनिकृन्तनदृष्टान्तान्याह।हे सोम्य श्वेतकेतो! यथा येन प्रकारेण एकेन मृत्पिण्डेन लोष्ठेन तत्परिणामभूतं सर्वं मृण्मयं मृद् विकार: अत्र विकारार्थे मयट्। सर्वं विज्ञातं स्यात् अत्र लोऽर्थे लिङ् ज्ञानविषयीभूतं भवतीति भाव:। विकार: वाचारम्भणं वागालम्भनं, वाच: आरम्भणं वाचारम्भणम्। ननु कथमत्र न कुत्वं "अयस्मयादीनि छन्दसि" इत्यनेन अयष्मयादित्वेन तन्निषेधात्। अथ कथं न जस्त्वम् "उभय संज्ञानीति वक्तव्यम्" इति वार्तिके प्रयुक्त भत्वेन पदत्वबाधात्। नामधेयमत्र "नामरूपभागेभ्यो ध्येय:" इति वार्तिकेन स्वार्थे ध्येय प्रत्यय:, एवं विकार: वाचारम्भणं नामैव इति भाव:। अथवा भागुरिमतेन हलन्तानामाप्त्वे वाचायाम् आरम्भणं वाचारम्भणं विकारस्तु केवलं वाचमालम्भयन् नाममात्र किं सत्यं मृत्तिका इत्येव मृण्मयघटादिकारणभूता मृत्तिका प्रशस्तामृत "प्रशस्तायां त्यकन्" इति वार्तिकेन त्यकन् प्रत्यय:। यथा घटादिकं नाममात्रं मृद्विकार: सत्यं मृदेव तथैव परमात्मैव तन्मय जगति नाममात्रो विकार: सत्यं तु परमात्म एव कारणकार्य एवाभिन्नत्वात्। इत्यनेन विवर्तवादं निरस्य विकारवादं चानिराकृत्य परिणामवादं व्यवस्थापयांबभूव। श्रुति: इममेव सिद्धान्तद्रढयितुम् अपरदृष्टान्तमाह हे सोम्य! लोहं धातव: तेषां मणिलोहमणिकनकं तेन लोहमणिना विज्ञातेन हेतुभूतेन सर्वं लोहमयं सुवर्णरचितं विज्ञातुं भवति। इदं कटकम् इदम् कुण्डलम् इति विकार: वाचारम्भणं वाग्व्यवहाररूपं नामध्येयं होमं सुवर्णमित्येव सत्यम्। अथ तृतीयं दृष्टान्तं यथा एकेन नखनिकृन्तनेन नखच्छेदनयन्त्रेण सर्वं कार्ष्णायसं लोहनिर्मितपात्रादिकं विज्ञातुं स्यात्। इदं परशु इदं कुठारम् इत्यादिविकारस्तु वाक्विलासभूतं नाममात्रं, वस्तुत: कृष्णायसं लोहमित्येव सत्यम्। एवम् आदेश: भवति तेन परमात्म विज्ञातेन परिणामिता तत्कार्यभूतं नखनिकृन्तनेति दृष्टान्त त्रपं त्रिलोकाधिष्ठात् परमात्म सूचकं मृण्मयम् इति मर्त्यसम्बन्धिपदार्थलोहं देवयोनि: कृष्णायसं इति तिर्यक्योनिसंकेतकम्। एवं सर्वकारणभूतपरमात्मनि कृतया भक्त्या जीवश्चराचरमनायासेन जानाति इति हार्दं श्रौतम्।

भक्त्या मामभिजानाति यावान्यश्चास्मि तत्वतः।

गीता १८-५५

इति गीता वचनं सङ्गच्छते ।।श्रीः।।

एवांभूतमादेशमाकर्ण्य वर्धमानजिज्ञासा श्वेतकेतुः स्वगुरोःपितरं ब्रह्मवित्तरं मन्यमान तमेव समुपसन्नप्रश्नमादेशमुपक्रमते।

न वै नूनं भगवन्तस्त एतदवेदिषुर्यद्ध्येतदवेदिष्यन्

कथं मे नावक्ष्यन्निति भगवाꣳस्त्वेव मे

तद्ब्रवीत्विति तथा सोम्येति होवाच।।७।।

श्वेतकेतुः सरलतया साश्चर्यं कथयति। भगवन्! नूनम् एव ते भगवन्तः पूज्यचरणाः गुरवः एतद् आदेशरहस्यं न अवेदिषु न ज्ञातवन्तः कथं इत्यद् आह "हेतुहेतुमद्भावे क्रियातिपत्तिमूलक लृङ्लकारप्रयोगाभ्यां यदि ते अवेदिष्यन् ज्ञातवन्तोऽभविष्यन् तर्हि मे मह्यं कथं न अवक्ष्यन् न अवदिष्यन् यतो नावोचन् अतो न विदन्ति। ते तु शब्द एवार्थ भगवान् भवान् एव पूज्य पितृचरणः मेतमादेशं ब्रवीतु व्याख्यातु। इति श्वेतकेतु सरलतया पारितोषितस्वान्तः आरुणिः तथा तथास्तु इति आदेशमुपदेष्टुं उवाच प्रतिशुश्राव ।।श्रीः।।

इति च्छान्दोग्योपानिषदि षष्ठाध्याये प्रथमखण्डे श्रीराघवकृपाभाष्यम् सम्पूर्णम्।।

।।श्रीराघवः शन्तनोतु।।

द्वितीयः खण्डः

अथ पूर्वस्मिन् खण्डे त्रिभिर्मन्त्रैस्त्रिभिश्च दृष्टान्तयुग्मैर्यत्सत्यं प्रतिपादितं मृत्तिकेत्येव सत्यं, लोहमित्येवसत्यं, कृष्णायसमित्येव सत्यमिति। तत्र किं नाम सत्यम्? इति जिज्ञासायामुच्यते सदेव सत्यं स्वार्थे यत्प्रत्ययः भत्वात् पदत्वमूलकजस्त्वाभावः।

अथवा स ते जीवाय हितं सत्यम् एवं सत्यघटकं वस्तुसत् किं सार्वकालिकमुताहोसाम्प्रतिकमित्यत आह सदित्यादि—

सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् तद्धैक आहुरसदेवेदमग्र आसीदेकमेवाद्वितीयं तस्मादसतः सज्जायत।।१।।

हे सोम्य! अग्रे संसारसृष्टे प्राक् इदं सत् एव आसीत् इदं नाम रूपात्मकं जगत् कारणरूपं सत् अणु जीवात्मसंज्ञमासीत् अत्र सच्छब्दे तन्त्रः, तन्त्रत्वं नाम सकृदुच्चरितत्वे सति बह्वर्थबोधजनकतावच्छेदकत्वम्। प्रथमश्च सप्तम्यन्तः द्वितीयश्च प्रथमान्तरूपोऽर्थः। अथवा विशेषणीभूते नेदमा प्रथमान्तः सच्छब्द आक्षिप्यते, एवं श्रुत्युपात्तसच्छब्दः लुप्तसप्तमीकः, इत्थं सृष्टेः अग्रेः इदं नामरूपात्मकं सदेव सन्मात्रम् एकीभूतं सति परमात्मनि स्थितमासीत्। किमनेकं भवत् सदासीत् उताहो एकम्? इत्यत आह एकमेवाद्वितीयम् एकं सजातीयविजातीयस्वगतभेदशून्यं एव एवकारो अन्ययोगं व्यवच्छिनत्ति। किम् एतस्य पुत्रस्यापि उपमा नेत्याह? अद्वितीयं नास्ति द्वितीयः समानसत्ताकः अपरः यस्य सोऽद्वितीयस्तम्, अथवा यस्मिन् परमात्मनि सत्तिष्ठति स एक एव सतोऽप्यन्यः एवं सज्जीवः असत्माया प्रकृतिः ताभ्यां परः परमात्मा अतएव श्रुतिः "अनादिमत्परं ब्रह्म न सतन्नासदुच्यते" (श्वेताश्वतर उ० ५.१३) अतएव स्मृतिरपि "त्वमक्षरं सदसत्तत्परं यत्" (गीता० ११.३७) तत्पदेन सदसतीपरामृश्येते ताभ्यां परिभूतं ब्रह्म इत्यवधेयम्। एवं सृष्टेः अग्रे इदं सत् एव आसीत् प्रलयेऽपि नैतद्विनाशोना भूदिति तात्पर्यं इदं प्राचीनानुरोधेन, वस्तुतस्तु सृष्टेः अग्रे इदं चिदचिदभ्यां विशिष्टं, यद् वा चिदचिदात्मकं सत् अव्याकृतनामरूपतया सत् परमात्मात्मकमासीत् अत्र शरीरशरीरिभावतया एकवचनम्। एवकारः असद् व्यावृत्यर्थः, सृष्टेः प्राक् इदं जगत् व्याकृत नामरूपानर्हतया परमात्मनिलीनं सदात्मकमासीत्। तच्च परमात्मतत्वं एकं एव नानेकम्। अद्वितीयं तत् समानधर्मान्यवर्जितं, इत्यनेन विशिष्टाद्वैतवादः सूत्रितः। नन्वासीदिति भूतकालावच्छिन्नेदमभिन्नकर्तृक-सत्तानुकूलव्यापारवाच्यक्रियोपादनेनैव समीप्सितार्थसिद्धौ किमर्थं सदुपादानमिति चेत् सत्तायाः द्विरुपादानेन जीवस्य नित्यसत्तासूचिता। एवं प्रलयेऽपि जीवस्य न नाश इति फलितम्। अतएव "सर्गेऽपि नोपजायन्ते प्रलये न व्यपन्ति च" इतिभगवद्वाक्यं संगच्छते। एवं प्रलयेऽपि (गीता

१४.२) इदं जीवजातं सूक्ष्मीभूतपरमात्मनि स्थितमासीत्। नान्य: कोऽपि परमात्मनि इदमेवैकमद्वितीयम्, अकार: वासुदेव: एव द्वितीय: सहायक: यस्य तथाभूतं तत् एवं नित्यसत्ताकं वासुदेवाश्रितमेव। तत् हि निश्चयेन एके अद्वैतवादिन: वैनासिका: एके अस्मद्भिन्ना: आहु यत् अग्रे इदं नामरूपात्मकं जगत् असत् एव आसीत् अर्थात् सर्वाभावरूपमभवत्। यद्यपि श्रुति: भूतार्थवादिनी असत्पक्षं कथमुपस्थापयति? इति चेन्न परपक्षमनुवदति न तु सिद्धान्तयति सिद्धान्ते तु सदेवासीदित्येव सिद्धान्त:। श्रुते: प्रत्यक्षरं प्रमाणत्वात् कथमिदमपसिद्धान्तमिति चेत् सत्यम् अकार: वासुदेव: तत् सीदति इति असत् अकारं वासुदेवं सीदति प्राप्य निषीदति। इति अकारेण वासुदेवेन साद्यते समाप्यते कल्पितसंबन्ध: यस्य तत् असत्, एवम् असत: परमात्मन: सकाशात् सर्वाभावरूपाद्वा, सत् जीवात्मकं जायत अजायत। कीदृशम्? तत् एकमेवाद्वितीयम् अत्रैकपदेन वैनासिकै: जैनै: स: अद्वैतवादिनोऽपि तेषां नये सृष्टे: पूर्वमिदं जगत् असत् अस्तित्वशून्यमासीत्, एवमसत: अतत्वभूतात् सत् सत्तामात्रं जायते। ।।श्री:।।

इमं पक्षं खण्डयति—

कुतस्तु खलु सोम्यैवꣳस्यादिति
होवाच कथमसत: सज्जायेतेति।
सत्त्वेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्।।२।।

हे सोम्य! यदुक्तं तस्मात् असत: सज्जायत एवम् अनेन प्रकारेण कुत: स्यात् कथं संभवेत् यदि कारणे कार्यं तिष्ठति तदैवाविर्भवति, नहि बालुकाभ्यो जायमानं कोऽपि शृणोतीक्षुरसं, न वा पाटलपुष्पेभ्य: पङ्कजपरागा: प्रादुर्भवन्ति। यत् असत: सर्वाभावरूपात् सज्जायेत सत् एवपरमात्मन: सज्जीव: जायते इति जीवपरमात्मनोभिदासिद्धैव। सोम्य! अग्रे सत् आसीत् किं तत् एकमेवाद्वितीयं स्वजातीयविजातीय स्वगतभेदशून्यत्वे सति सकलोपमावर्जितम् इत्यनेन सत्कार्यवाद: अविकृतपरिणामवादश्चापि सूचित:। विवर्तवादे न किमपिप्रमाणमुपलभामहे, ''यतो वा इमानि भूतानि जायन्ते'' इत्यादिशास्त्रवचनानुरोधेन सर्वेषामपि मन्त्राणां परिणामवादविषयत्वात् इत्यनेन विवर्तवादाडम्बरमहाप्रासादोभूमिसात्कृत:। ।।श्री:।।

अथ सृष्टि प्रक्रियां वर्णयति।

तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत तत्तेज ऐक्षत बहुस्यां प्रजायेयेति तदपोऽसृजत। तस्माद्यत्र क्व च शोचति स्वेदते वा पुरुषस्तेजस एव तदध्यायो जायन्ते।।३।।

तत् सत् परमात्मभूतं वस्तु ऐक्षत अपश्यत् अव्याहितेन ज्ञानेन पूर्वकल्पसर्गं समन्वभवत् इति भावः। "सूर्याचन्द्रम सौधाता यथापूर्वमकल्पयत्" इति श्रुतेः। अथ सर्गं निरीक्ष्य समकल्पयत् सङ्कल्पाकारमाह साम्प्रतमामेकं तस्मात् प्रत्येक जीवस्य तद् तद् भोग्यपदार्थानां च साक्षात् चिकिर्षया प्रतिशरीरमात्मनं परिकल्प्य बहुस्यां बहु भवेयम्। किं तद् बहुत्वम् आरोपितम् उताहो पारमार्थिकं नारोपितमित्याह प्रजायेय प्रकर्षेण जन्मगृह्णियाम् प्राकर्षं च जीवानां शुभाशुभानां साक्षाद् दिदृक्षया प्रतिशरीरं प्रत्येक जीवात्मना सह कर्मबन्धननिरूपेक्षत्वे सति जीवविकारनिर्लेपत्वे सति च स्वकमन्तर्यामिरूपं विधाय प्रतिहृदयदेशं मन्दिरिकृत्य साक्षीभूय निजस्यावतरणं प्रजायेय इति कथनेन जीवानां प्रतिशरीरं प्रतिभोग्यपदार्थं च भगवतोऽन्तर्याम्यवतारः। सूच्यते। अथ जन्मने निजं शरीरं असृजत् निजं जीवस्य च द्वयोः कथं? इति चेत् भगवतो वैलक्षण्यमेतत् यत् भगवदीयं शरीरं सदपि जीवाः स्वकमेव मन्यमानाः तत्र ममत्वं कुर्वते। वस्तुतस्तु निजमन्दिररूपेण भगवता पदार्थानां रचनां व्यधायि निजावच्छेदकरूपेण वा तत्तत् पदार्थावच्छिन्नं एवं "तत्सृष्ट्वा तदेवानुप्राविशद्" इति श्रुत्यन्तरात्। असृजत् पूर्वमित्यत् आह तत्तेजः असृजत् पुनस्तेजोवच्छिन्नं चैतन्यं सत् पूर्ववद् आत्मनो बहु चिकीर्षया प्राकर्षेण जिजनिषया तद् अपः असृजत् जलानि व्यरीरचत् तदेव निदर्शयति, तस्मात् जलानां तेजस्सम्भवात् एव पुरुषः प्राणी यत्र क्वापि यस्मिन् कस्मिन्नपि स्थाने काले वा सोचति सोकजवारि विमुञ्चति नेत्राभ्यां स्वेदते च प्रस्वेदविन्दून् बिभर्ति तत्र अपः जलानि यज्जायन्ते नेत्रयोः देहे च दृश्यन्ते तत्तेजसः एव जेजसस्सकासादेव अधि अधिकृत्य जायन्ते।। श्रीः।।

सत् सदेव चेतयते चकास्ति च इदमेवान्तर्यामिप्रकरणे वृहदारण्यके श्रुतिराह। एवं अवच्छिन्नं चैतन्यं सत् किमसृजत् इत्यत् आह—

ता आप ऐक्षन्तः बह्व्यःस्याम प्रजायेमहीति ता अन्नमसृजन्त। तस्माद्यत्र क्वच वर्षति तदेव भूयिष्ठमन्नं भवत्यद्भ्य एव तदध्यन्नाद्यं जायते।।४।।

एवमेव ता आपः अधिष्ठानाभिप्रायेण बहुवचनम्। सदाधिष्ठिताः ऐक्षन्त पूर्वसर्गज्ञानपूर्वकं सङ्कल्पमकुर्वते इति भावः। किम्? अत आह बह्व्यः बहु शरीरावच्छिन्ना स्याम भवेम प्रजायेमहि प्रतिशरीरमात्मनः एकैकम् रूपं परिकल्पयेमहि इत्थं सञ्चिन्त्य अन्नमसृजन्त अदनीयं पदार्थं तदाधारशक्तिं पृथिवीं च व्यरीरचन्। तदेव निदर्शयति यतो हि जलादन्नं तस्माद् यत्र कुत्राऽपि वर्षति तद्वर्षणादेव भूयिष्ठमन्नं जायते अधिकमन्नमुत्पद्यते, अत एव अद्भ्यः जलेभ्य एव अन्नाद्यं भोग्यपदार्थः जायते प्रादुर्भवति। वस्तुतस्तु अबवच्छिन्नचैतन्यं सत्तत्वमेव अन्नाद्यमरचयत् इति हार्दम्, इत्थं त्रिः इक्षण क्रियाप्रयोगात् शाङ्ख्य स्वीकृतायाः प्रधाननाम्नः प्रकृते जगत् कारणत्वं श्रुतिरेव निराचकार। न खलु जडभूतायां प्रकृतौ ईक्षणं सङ्गच्छते। ननु तैत्तरीये "तस्माद् वा एतस्माद्वा आत्मन् आकाशः सम्भूत आकाशाद् वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथ्वी" इत्यादि श्रुतौ तेजसः प्राक् आकशवायवोः सर्गः प्रादर्शि। अत्र प्रथमं तेजस्सर्जनमुक्त्वा वदतो व्याघातं विधाय कथं विरूद्धम् उच्यते नैतद्दूषणं यतो हि नैवात्र सृष्टिक्रमो विवक्षितः अथवा तेजशब्दः आकाशवायूपलक्षणं यद्वा तेजः असृजत् इत्यत्र सृजधातु गुणाधानं रूपः तथा च पूर्वं शब्दगुणकमाकाशं रचयित्वा तद् गुणं च वायोः निवेश्य तं विरच्य आकाशवायुगुणो शब्दस्पर्शो तेजसि निधाय रूपं गुणाधिकं तद् विधत्ते इति भावः यद्वा अत्र त्रिवृत्करणसिद्धान्त एव निरूप्यते पञ्चीकरणसिद्धान्तमूलं तु मृग्यम्। ।।श्रीः।।

इतिच्छान्दोग्योपनिषदि षष्ठाध्याये द्वितीयखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।

"श्री राघवःशन्तनोतु"

तृतीयः खण्डः

अथ नभोवायूपलक्षकाणां सत्सृष्टानां तेजोऽवन्नानां सर्गवर्णनानन्तरं पारिशेष्येण पश्चाद् भावि सृष्टिक्रमं निरूपयति।

तेषां खल्वेषां भूतानां त्रीण्येव बीजानि
भवन्त्याण्डजं जीवजमुद्भिज्जमिति।।१।।

तेषाम् एभिसृष्टानाम् एषां पूर्वदृश्यमानानां भूनानां त्रीणि एव नैव चत्वारि न वा पञ्च किं तर्हि? त्रीत्वसंख्या बोध्यानि बीजानि कारणानि भवन्ति कानि तानि? इत्यद् आह अण्डाज्जायन्ते इति अण्डजा: त एव प्रयोजने भूता यस्य तदाण्डजं यत्तु अण्डमेव प्रयोजनं कथं न उक्तमं? इति पूर्वपक्षं समुत्थाप्य निरर्थकमुत्तरजालं प्रस्तुतं तदनर्गलं ग्रन्थविस्तारचिकीर्षया बिडम्बितम्। यत्तु अण्डजमेव अण्डजमिति स्वार्थप्रत्ययान्तं साधितं तदपि शाब्दिकसिद्धान्तानाभिज्ञतयावान्तमं। जीवजं जीवा जरायवः तेभ्यः जातं जीवजम् उद्भिद्या जातमिति उद्भिज्यं: तम् उद्भद्भ्य: जातं वा अत्र स्वेदजानामप्यन्तरभाव:इमानि त्रीण्येव बीजानि भवन्ति ।।श्रीः।।

अथ जगतोनामरूपाणां व्याकरणमाह।

सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन
जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति।।२।।

सा इयं सन्नाम्नि परमात्मसंज्ञा देवता स्त्रिलीङ्गनिर्देशस्तु भगवतोवात्सल्योत्कर्षोचित-मातृत्वप्रदर्शनाय मातर एव हि वात्सल्यं समधिम्। विजृम्भते ऐक्षत दृष्ट्वा व्यचारयत् हन्त इत्याश्चर्ये प्रसन्नतायां च अहमेव तिस्र देवता तेजोजलान्नरूपा: अहं तिस्र देवता इत्यस्य मदभिन्न सदभिधानचैतन्यावच्छिन्ना इति भाव:। अथ अहम् इमा: तिस्र देवता: तेजोजलपृथ्वीनाम्नी कर्मभूता: द्वितीयान्तव्यपदेश्या: अनेन मया सह नित्यं वर्तमानेन मम नित्येन सख्या जीवेन प्राणधारणसमर्थेन आत्मना अणुना चैतन्येन अत्र "वृद्धो यूना तत्त्वक्षणश्चेदेव विशेष:" पाणिनी अष्टाध्यायी ९-२-६६ इति सूत्र इव सह शब्दप्रयोगमन्तरेणाऽपि साहर्थकद्योतिका तृतीया। जीवेन आत्मना इति व्यस्त समानाधिकरण-पदद्वयप्रयोगस्तु स्पष्टप्रतिपत्तये जीवात्मना इह समासे तु सन्देह: स्यात्।

जीवस्य आत्मा जीवात्मा जीवधारको वा आत्मा जीवात्मा जीवाय वा आत्मा जीवात्मा इत्यादे: जीवेनात्मन: कथने तु जीवसंज्ञेन आत्मना इति फलितार्थ:। अत्र अहमिति पदोपादानात् सति परमात्मन्येव प्रवेशक्रियाकर्तृत्वं प्रवेशानुकूलव्यापाराश्रयत्वं वा सहार्थकद्योतकस्तु अप्रधान एव "सह युक्तेऽप्रधाने" इति पाणिनी निर्देशात्। एवम् अहम् परमात्मभूतासदाख्यादेवता अनेन निजसुहृदा जीवात्मना सह इमा: तेजप्रभृति: तिस्र देवता त्रिसंख्याका दैवीशक्ती: अनुप्रविश्य आशामानुकूल्यरक्षणपूर्वकं प्रविष्टा भूत्वा जगतो नामरूपाणि रामदासादि नामानि मानवादिरूपाणि व्याकरवाणि विस्पष्टं प्रस्तवानि इति अनेन व्याख्यानेन प्रच्छन्न बौद्धकल्पित: जीवप्रतिबिम्बवाद: पावकेन तूलमिव भस्मसात्कृत:। न खलु परमात्मा कदाप्येकाकी रमते स: एकाकी नारमत" इति श्रुते:। अत एव विनयपत्रिकायाम् गोस्वामी तुलसीदासाजगौ

तैं निज कर्म जाल जहां घेरो श्रीहरिसङ्ग तज्यो तहि तेरो।

विनय पत्रिका १३६ ।।श्री:।।

अथ कथं व्याकरवाणि इत्यत् आह—

तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति
सेयं देवतेमास्तिस्रो देवता
अनेनैव जीवेनात्मनानुप्रविश्य
नामरूपे व्याकरोत्।।३।।

तासां तेजो जलान्नवरूणाम् अन्यतमाम् एकैकां त्रिवृतं प्रत्येकस्यार्धांशेन इतरयोश्च चतुर्थेन चतुथेनांशेन युक्तां कृत्वा सृष्टिरचयेयम्।

नैकेनतेजसा न केवलाभिरद्भि: न केवलेनान्नेन तदुपलाक्षितपार्थिवांशेन वा स्त्रष्टुं शक्यते। सृष्टि: इति इत्थं विभाव्य ता: एकैकां विवृतं विधाय जगते नामरूपे व्याकरोत् समुद्भावयत्। कथं व्याकरोत्? इत्यत आह संकल्पोत्थं सा श्रुति चर्चिता इयं त्रिकाल सत्या सती देवता तिस्र: निजांशभूता: देवता: अनेन जीवेन आत्मना अनुप्रविश्य अन्तर्यामिरूपा इमे नामरूपे व्याकरोत् अत्रेदमवगन्तव्यं यत् "तत्तेजोऽसृजत् तदपोऽसृजत् ता आपोन्नमसृजन्त" इति श्रुतिनिर्देशात् तेजोजलान्नानां तु सर्जनमवगम्यते किन्तु नैतस्य जीवस्यात्मन: कुत्रापि एतत् सर्जनस्य श्रुतिनिर्दिष्टाभावात्। ।।श्री:।।

अथ त्रिवृतं प्रपञ्चयति—

तासां त्रिवृतं त्रिवृतमेकैकामकरोद्यथा नुखलु सोम्येमास्तिस्रो देवतास्त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानीहीति।।४।।

अथ सैव विलक्षणसृष्टिनिर्माणनिपुणा परमात्मभूता देवता तासां पूर्वोक्तानां तेजः प्रवृत्तीनां देवतानां मध्ये एकैकां एकामेकां त्रिवृतं तत्त्वत्रयोपेतां अकरोत्। हे सोम्य! यथा इमाः तिस्र देवता एकैका त्रिवृत त्रीणि वृणुते इति त्रिवृत् भवति तत् तत्प्रकारं मे मम सकाशात् विजानीहि विशेषेण जानी हि।

इति च्छान्दोग्योपनिषदि षष्ठाध्याये तृतीयखण्डे श्रीराघवकृपाभाष्यम् सम्पूर्णम्।

''श्री राघवःशन्तनोतु''

चतुर्थः खण्डः

एवं उदाहरणद्वारेण जगतीनामरूपयोरमिथ्यात्वं साधयति।

यदग्ने रोहितꣳ रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागादग्नेरग्नित्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम्।।१।।

यथा अग्निः त्रीणि रूपाणि तानिमिलित्वा अग्निरिति कथ्यते पृथकत्वे सति तेजोजलान्नानामेव रूपाणि एतस्य रोहितं रूपं तत्तेजसः यत्शुक्लं श्वेतवर्णं तत् अपां यत् कृष्णं श्यामं वर्णं तत् अन्नस्य, एवं त्रयाणां अंशभूतेषु सत्सु त्रिषु रूपेषु अग्नौ किमवशिष्टम्? अत आह अग्नित्वमेव तत्वमेव आपागात् अपगतम् एवम् अग्निः इति विकारस्तु वाचारम्भणं नामधेयं वाक् विषयमात्रं नामः अग्नेः त्रीणि रूपाणि लोहितशुक्लकृष्णानि तेजोजलान्नानामेव इति एव एतावदेव सत्यम्। एवं सति परमात्मनि ज्ञाते तत्कार्यं जातं जगत् स्वयमेव विज्ञातं स्यात्।।श्रीः।।

भूय: त्रिभिर्मन्त्रैरनयादित्या आदित्यचन्द्रविद्युत्सु त्रयाणां रूपाणां तेजोजलान्नानां सम्बन्धिनां निश्चायनं कृत्वा आदित्यचन्द्रविद्युन्नामान्यसत्यत्वेन प्रमाणयति।

यदादित्यस्य रोहितछ्वरूपं तेजसस्तद्रूपं
यच्छुक्लं तदपां यत्कृष्णं
तदन्नस्यापागादादित्यादादित्यत्वं वाचारम्भणं
विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम्।।२।।

यच्चन्द्रमसो रोहितछ्वरूपं तेजसस्तद्रूपं यच्छुक्लं
तदपां यत्कृष्णं तदन्नस्यापागाच्चन्द्राच्चन्द्रत्वं
वाचारम्भणं विकारो नामधेयं
त्रीणि रूपाणीत्येव सत्यम्।।३।।

यद् विद्युतो रोहितꣳ रूपं तेजसस्तद्रूपं
यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागाद्विद्युतो
विद्युत्वं वाचारम्भणं विकारो
नामधेयं त्रीणि रूपाणीत्येव सत्यम्।।४।।

आदित्यात् सूर्यात् आदित्यत्वं सूर्यगुण: अपागात् निर्गत: अर्थात् त्रयाणां व्यतिरेकेण सूर्यस्य चन्द्रस्य विद्युतो वा न किमपि पृथगस्तित्वम्। आदित्य: चन्द्र: विद्युत् इति विकारस्तु वाचारम्भणं वाक्विषयं नामधेयं वस्तुत: तेजो जलान्नानि व्यतिरिच्य न किमपि सत्यतया समवशिष्यते इति भाव:। तथा च ''आदित्यचन्दविद्युत्सु तेजोरूपं हि रोहितम्। शुक्लं रूपमपामाहु कृष्णमन्नस्य वै तनु: ।।श्री:।।

फलश्रुतिमाह—

एतद्ध स्म वै तद्विद्वाꣳस आहु:
पूर्वे महाशाला महाश्रोत्रिया न नोऽद्य
कश्चनाश्रुतममतमविज्ञातमुदाहरिष्यतीति
ह्येभ्यो विदाञ्चक्रु:।।५।।

एतत् तत् इदं श्रुतिप्रसिद्धं त्रिवृद्रहस्यं

ह निश्चयेन स्म पूर्वमेव विद्वांसः ज्ञातवन्तः पूर्वे अस्मत् पूर्ववर्तिनः महाश्रोत्रिया "श्रोत्रियश्छन्दोऽधीते" इति सूत्रेण छन्दोऽधीते इत्यस्य श्रोतृ श्रोत्रिय इति निपातनम् "श्रोत्रियो वेदपारगः" इति स्मृतिः "श्रोत्रियं ब्रह्मनिष्ठं" मु॰ उ॰ १-२-११ इति च श्रुत्यन्तरम्। महान्तश्च ते श्रोत्रियाश्च इति महाश्रोत्रियाः महत्यशालां येषां पञ्चयज्ञ वलिवैश्वदेवैः पूजनीयगृहाः गृहमेधिन आहुः यत् नः अस्मत् सम्बन्धि किमपि नः अस्माकं कुलेषु वाक्किमपि अश्रुतं श्रुतव्यतिरिक्तं अमतं मनन विषयीकृतातिरिक्तम् अविज्ञातं विज्ञानविषये बहिर्भूतं इति कश्चन अस्मत् कुटुम्बस्य कोऽपि कमपि नोदाहरिष्यति नोदाहरणरूपेण प्रस्तोष्यति। यतो हि एभ्यः त्रिवृत्कृतेभ्यः तेजोजलान्नेभ्यः ते सर्वं विदाञ्चक्रुः ज्ञातवन्तः। अर्थात् सत्यत्वेन सति विज्ञाते तत् परिणाभिभूततेजोऽवन्नानि तत्परिणामभूतसकलं प्रपञ्चजातानि च स्वयमेव विज्ञातानि भवन्ति। इदमेव सत परमात्मनः ज्ञानं ज्ञानम् तत्परिणामप्रपंचज्ञानं च विज्ञानम्। इदमेव हृदि निधाय भगवान् गीतायां द्विः सस्मार—

ज्ञानं तेऽहं सविज्ञानमिदं वक्षाम्यशेषत गीता ७-२

"ज्ञानं विज्ञान सहितं" गीता २-१ ।।श्रीः।।

ते किं विदाञ्चक्रुः इति प्रपञ्चायति—

यदु रोहितभिवाभूदिति तेजसस्तद्रूपमिति
तद्विदाञ्चक्रुर्यदु शुक्लमिवाभूदित्यपाः
रूपमिति तद्विदक्रुर्यदु कृष्णमिवाभूदित्यन्नस्य
रूपमिति तद् विदांचक्रुः।।६।।

एवम् अग्नयादित्यचन्द्रविद्युतष्विवसर्वत्र त्रिवृद्रहस्यज्ञाः अस्मत् पूर्वपुरुषाः यदपि रोहितं रक्तमिवासीत्। तत्तेजसः तेजसम्बन्धिरूपं नैवान्यदीयं यदपि शुक्लमिव ददृशुः तत् अपां जलसम्बन्धिरूपं, यदपि कृष्णकालो वर्णरूपं तदन्नस्यैव न त्वन्यदीयम् इत्येव विदाञ्चक्रुः एभ्योतिरिक्तामन्यां सत्तां नाङ्गिचक्रुरिति तात्पर्यम्। यथा किमपि रोहितं वस्तुदृष्टम् तदा अर्धं तेजो मयं चतुर्थांशं चतुर्थांशं जलमयमन्नमयं च तेजः प्राचुर्येण तयोस्तिरोहितत्वात् रोहितत्वस्य उत्कटत्वम् एवमन्यत्राप्युह्यम्।।श्रीः।।

विज्ञातमपि संहरति—

यद्विज्ञातमिवाभूदित्येतासामेव देवतानाꣳसमास इति तद्विदाञ्चक्रुर्यथा नु खलु सोम्येमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानीहीति।।७।।

एवमेव त्रयाणां रूपनिर्धारणेन यदपि नामरूपा सत्यत्वेन विज्ञातमेव अभूत्। तत् एतासां देवतानां तेजोजलान्नरूपाणां समासः त्रिवृत्करणं इति ते विदाञ्चक्रुः हे सोम्य! श्वेतकेतो इमाः तिस्रदेवता तेजः आपः अन्नम् इति पुरुषं प्राप्य जीवसखं परमात्मानामुपेत्य तल्लब्धचेतनाः यथा एकैका एकैक सह त्रिवृत्त्रिवृज्जायते तद् रहस्यं मे मम सन्निधौ विजानीहि विशेषेण जानीहि इति इत्थमुपदेष्टुं प्रतिजानीत आरुणिः ।।श्रीः।।

इति च्छान्दोग्योपनिषादे षष्ठाध्याये चतुर्थखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।

''श्री राघवः शन्तनोतु''

पञ्चमः खण्डः

अथानुनादीनां त्रिवृत्करणं परिणामं प्रपञ्चयति—

अन्नमशितं त्रेधा विधीयते तस्य
यः स्थविष्ठो धातुस्तत्पुरीषं भवति
यो मध्यमस्तन्माꣳसं योऽणिष्ठस्तन्मनः।।१।।

एवम् अशितं भुक्तमन्नं त्रेधा विधीयते ''संख्यायाविधार्थेधा'' इति सूत्रेण त्रिशब्दात् विद्यार्थे धा प्रत्ययः। तस्य यः स्थविष्ठ धातु अतिशयेन स्थूलोऽशः तदेव पुरीषं मलमेहनरूपेण परिणभ्यते। इह मध्यम अंश स एव रस रक्तरूपः सन् मांसं भवति, यश्च अणिष्ठः अतिशयेनाणुः स एव मननावच्छिन्न चैतन्यमयं मनः भवति। इत्यनेन श्रुत्यंशेन मनसः सादित्वं सूचयता तस्य परैस्विकृतनित्यत्वं निराकरोति अतएव श्रीभागवते—

वीक्ष्य रन्तुं मनश्चक्रे योगमायामुपाश्रितः। भागवत १०-२२-१ इति भगवान् वादरायणिरवादीत् ।।श्रीः।।

अथापां विकारं वर्णयति—

आपः पीतास्त्रेधा विधीयन्ते तासां यः
स्थविष्ठो धातुस्तन्मूत्रं भवति यो
मध्यमस्तल्लोहितं योऽणिष्ठः स प्राणः।।२।।

एवमेव पीताः आपः जलानि त्रेधा विधीयन्ते, तासाम् अतिशयेन स्थूलः मूत्रं मध्यम् लोहितं रुधिरम्, अणिष्ठः अतिशयेनाणुः अपाम् अंश प्राणः प्राणविग्रहः सन् परिणमति।।श्रीः।।

अथ तेजः परिणामं वर्णयति—

तेजोऽशितं त्रेधा विधीयते तस्य यः स्थविष्ठो
धातुस्तदस्थि भवति यो मध्यमः स मज्जायोऽणिष्ठः
सा वाक्।।३।।

एवं घृततैलादिरूपेण अशितं भुक्तं तेजः त्रेधा विधीयते तस्य स्थूलतमो भागः अस्थि मध्यमः मज्जा अणुतमश्च वाक्रूपेण परिणमति सारांशश्चायम्—

तेजोऽवन्नास्थविष्ठानि मलमूत्रास्थिसंज्ञया।
मांशलोहितः मज्जाश्च मध्यमानि भवन्त्युत।।
अणिष्ठानि च वै तेषां मनः प्राण गिरस्मृता।
परिणाम यथा शास्त्रं त्रिवृत्करणभोगतः।।

अणिष्ठ परिणामानि भूयो निर्दिशति—

अन्नमयः हि सोम्य मन आपोमयः प्राणस्तेजोमयी
वागिति भूय एव मा भगवान्विज्ञापयत्विति
तथा सोम्येति होवाच।।४।।

"विकारार्थे च मयटि", षष्ठलन्तात् अपां मय इति स्यात् अत्र बाहुलकात् अपामित्यस्य आपो इत्यादेशः एवं प्राणः जलस्याणुत्वम् परिणामः तेजोमयि तेजस एव इति तेजोमयि तेजः परिणामभूता वा वाणी। अथ श्वेतकेतुः भूय जिज्ञासते भगवान् पूजनीयचरणः मां पुनः विज्ञापयतु एतद्रहस्यं संशतुः तथा इति कथयित्वा पुनरुपदेष्टुं आरुणिः उवाच प्रतिजग्यौ।।श्रीः।।

इति छान्दोग्योपनिषदि षष्ठाध्याये पञ्चमखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।

"श्री राघवः शन्तनोतु"

षष्ठः खण्डः

अथ अन्नजलतेजसाम् अणिष्ठांशाः कथं मनः प्राणः वाक्संज्ञा लभन्ते इति दधिसर्पिदृष्टान्तेन श्वेतकेतुं आरुणिर्बोधयति।

दध्नः सोम्य मथ्यमानस्य योऽणिमा
स ऊर्ध्वः समुदीषति तत्सर्पिर्भवति।।१।।

हे सोम्य! दध्नः मथ्यमानस्य मन्थदण्डेन विलोड्यमानस्य अणिमा अतिशयेन अणुरंशः यः ऊर्ध्वः ऊर्ध्वम् ऊर्ध्वे वा अत्र ऊर्ध्वमित्यव्ययस्य ऊर्ध्व इति सप्तम्यन्तस्य वा अमः "ङि विभक्तेश्च सोपाम् स्वलुप" इत्यनेन स्वादेशे पुल्लिङ्गविपर्ययेण सोरुत्वे विसर्गे ऊर्ध्वः उपरिष्टात् इत्यर्थः। यत् समुदीषति समुद्गच्छति समुदेति इति प्रयोक्तव्ये अशुकागमः इट् च छान्दसौ तदेव सर्पिः भवति नवनीतं सत् सर्पिष्ट्वेन परिणमति।।श्रीः।।

एवमेवान्नाब् तेजसाम् अणिमांशाः यथा क्रमं मनः प्राण वाक्परिणामं गच्छन्ति। इति त्रिभिर्मन्त्रैदार्ष्टान्तियति।

एवमेव खलु सोम्यान्नस्याश्यमानस्य योऽणिमा
स ऊर्ध्वः समुदीषति तन्मनो भवति।।२।।

अपाꣳ सोम्य पीयमानानां योऽणिमा स ऊर्ध्वः
समुदीषति स प्राणो भवति।।३।।

तेजसः सोम्याश्यमानस्य योऽणिमा
स ऊर्ध्वः समुदीषति सा वाग्भवति।।४।।

एवमेव अनेनैव प्रकारेण अस्य मनस्य भूज्यमानस्य अन्नस्य अणिमासूक्ष्मांश अन्नं भवति। एवमेव पीयमानानां पानविषयीक्रियमाणानाम् अपां जलानां अणिमा प्राणरूपेण परिणमति। एवमेव तेजसः अश्य मानस्य सूक्ष्मांशः वाक्रूपेण परिणतो भवति, अत्र सर्वत्र परिणाम एव उदाहृतः स च विकारः विशेषणे न तु विवर्तवादः।।श्रीः।।

अथ प्रकरणमुपसंहरति—

अन्नंमयहि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति
भूय एव मा भगवान् विज्ञापयत्विति तथा सोम्येति होवाच।।५।।

एवमेव दध्नि सर्पिरेव मनः अन्ने अन्नं सति प्राणोऽप्सु आपः सति वाक् तेजसि तेजश्च सति इति दार्ष्टान्तिकनिदर्शनेन सत्कार्यवादः साधितः। सत् देवता कथम् अवक्रीयमाणा सति तत् तत् परिणामं लभत इति सिद्धान्तमनवगच्छन् भूय एवेत्यादि पृच्छति पिता च तथेत्यादि प्रतिजानीते।।श्रीः।।

इति छान्दोग्योपनिषदि षष्ठाध्याये षष्ठखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।

''श्री राघवः शन्तनोतु''

सप्तमः खण्डः

अथ षोडशकलामयं पुरुषमुपदिशति—

षोडशकलः सोम्य पुरुषः पञ्चदशाहानि माशीः
काममपः पिबापोपयः प्राणो न पिबतो विच्छेत्स्यत
इति।।१।।

हे सोम्य! पुरुषः षोडशकलः तत्र प्राणः जलमयः एतदहं कथं जानीयाम्? इति जिज्ञासमानम् आह इमानि पञ्चदश पञ्चदशसंख्याकानि आहानि दिनानि यावत् मा आशीः मा अश्नीयाः कामं यथेच्छं अपः जलानि पिव एवम् अपः पिवतः जलान्याचामतः

तव प्राणो न व्यच्छेत्स्यत् न विच्छिन्नो भविष्यति यतो हि आपोमय: जलमय: प्राण:।।श्री:।।

अथ श्वेतकेतो दशामाह—

स ह पञ्चदशाहानि नाशाथ हैनमुपससाद किं ब्रवीमि भो इत्यृचः सोम्य यजूꣳषि सामानीति स होवाच न वै मा प्रतिभान्ति भो इति।।२।।

अनन्तरं स: पञ्चदशाहानि यथोक्तदिनानि न आशनभोजनं कृतवान्, अथ षोडशे दिने एवं निज पितरम् उपससाद गत: अपृच्छत् भगवन् किं ब्रवीमि तेनोक्तम् ऋच: यजूंषि सामानि ब्रूहि स उक्तवान् किं ब्रवीमि मां न प्रतिभान्ति मम स्मृतिं कथं नायान्ति इति।।श्री:।।

अथ पितुरुपदेशमाह—

तꣳ होवाच यथा सोम्य महतोऽभ्याहितस्यैकोऽङ्गारः खद्योतमात्रः परिशिष्टः स्यात्तेन ततोऽपि नबहु दहेदेवꣳसोम्य ते षोडशानां कलानामेका कलातिशिष्टा स्यात्तयैतर्हि वेदान्नानुभवत्यशानाथ मे विज्ञास्यसीति।।३।।

तं पिता: उवाच यथा महत: महीयश: अभ्याहितस्य इन्धनप्रज्वलितस्य खद्योतमात्र: खद्योत: प्रमाणं यस्य अत्र "प्रमाणं द्वयसज् दध्नज् मात्र च:" इत्यनेन मात्रच् प्रत्यय:। स एक अङ्गार: स्फुलिङ्ग ततोऽपि अधिकतर: सन् न दहति तथैव एका अतिशिष्टा कला पञ्चदशक्षीणा: अत: वेदान् न अनुभवसे असान भोजनं कुरु अनेन विज्ञापयिष्यसि इति।।श्री:।।

अनन्तरं किमभूत् इत्याह—

स हाशाथ हैनमुपससाद तꣳह यत्किं च पप्रच्छ सर्वꣳह प्रतिपेदे।।४।।

अनन्तरं सः आश भोजनं कृतवान् पुनरागतः तं यत्किञ्चिद् पप्रच्छ पिता तत्सर्वं प्रतिपेदे उत्तरं दत्तवान्।।श्रीः।।

अथ पिता दृष्टान्तेन उपदेशमुपसंहरति—

तꣳ होवाच यथा सोम्य महतोऽभ्याहितस्यैकमङ्गारं खद्योतमात्रं परिशिष्टं तं तृणैरुपसमाधाय प्राज्वलयेत्तेन ततोऽपि बहु दहेत्।।५।।

एवꣳ सोम्य ते षोडशानां कलानामेका कलातिशिष्टाभूत्सान्नेनोप-समाहिता प्राज्वाली तयैतर्हि वेदाननुभवस्यन्नमयꣳहि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति तद्धास्य विजज्ञाविति विजज्ञाविति।।६।।

तं पिता उवाच हे सोम्य! यथा महतः अग्नेः समिन्धस्य परिशिष्टम् एकमङ्गारं तृणैः अलातैः समुपनिधाय आवृत्य प्रज्वालयेत् तदा सः पूर्वासु पक्षपादपि बहु दहेत् दग्धुं प्रभवति तथैव एकावशिष्टा तौ कला भोजनमयेन तृणेनोपचिता अतस्त्वं सर्वान् वेदान् अनुभवसि तस्मात् अन्नमयं मनः, आपोमयः प्राणः तेजोमयी वाक् इति पित्रोक्तं सिद्धान्तं स विजज्ञौ विशेषं ज्ञातवान् द्विरुक्तिरादरार्थाः।।श्रीः।।

इति छान्दोग्योपनिषदि षष्ठाध्याये सप्तमखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।

श्रीराघवः शन्तनोतु

अष्टमः खण्डः

अथ सुषुप्तिकाले जीवः किं दशाको भवति इति स्वपुत्रायोपदिदिक्षुः पुनरुपक्रमते।

उद्दालको हारुणिः श्वेतकेतुं पुत्रमुवाच स्वप्नान्तं मे सोम्य विजानीहीति यत्रैतत्पुरुषः स्वपिति नाम स-

ता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवति तस्मादेनꣳ स्वपितीत्याचक्षते स्वꣳ ह्यपीतो भवति।।१।।

ह निश्चयेन आरुणि: अरुणस्य गोत्रापत्यं पुमान् आरुणि: अरुण पुत्र: उद्दालक: एतन्नाम्ना प्रसिद्ध: श्वेतकेतुं श्वेत: ब्रह्मज्ञानेन धवलीकृत: ऊर्ध्वगामीमनोरूपोध्वजो यस्य तथाभूत: तं पुत्रं नरकात् त्रातुं क्षमं सुतम् उवाच सोम्य हे सोमार्ह वस्तुतस्तु सोमशब्दस्य द्वावर्थौ प्रसिद्धौ, एक: यज्ञे सोमलतारूप:, अपर: अपरश्चन्द्ररूप: पूर्वार्थस्तु मया बहुषु व्याख्यात: साम्प्रतमपरमर्थं व्याचक्ष्ये। चन्द्रपक्षे सोमशब्दं व्युत्पादयन्ति प्राञ्च: उमया सह वर्तमान: सोम: शिव: सोमोऽस्ति मण्डकतया आधारो यस्य स: सोम:, वयं तु सूयते सुधां य: स: सोम: स तु रामचन्द्ररेव। अत: एव—

पुष्णामि चौषधी: सर्वा: सोमोभूत्वा रसात्मक:।

(गीता १५-१३)

तं श्रीरामरूपं सोममर्हति इति सोम्य:, अथवा रामनामैव सोम: यथा स्मृतं मानसे श्रीमद्गोस्वामीतुलसीदासचरणै:—

राका रजनि भगति तव राम नाम सोइ सोम।
अपर नाम उडुगन विमल बसहु भगत उर व्योम।।

(मानस ३-४२क)

अथवा "सोमो राजा अष्माकं ब्राह्मणानां" इति श्रुत्यन्तरात् "सोमो राजा विद्वान्" इति श्रुतेश्च। सोमेन चन्द्रेण रामचन्द्रेण अनुगृहित: कृपापात्री कृत: इति सोम्य: तत्सम्बुद्धौ हे सोम्य भो भगवत् कृपाभाजन! साम्प्रतं स्वप्नान्तं स्वप्नस्य शयनस्य सुषुप्ते: अन्तं सिद्धान्तं मे मम सकाशात् विजानीहि समवगच्छ यत्तु प्राञ्च: अन्तशब्दं मध्यपरतयाव्याचक्षते, एवं स्वप्न: अन्ते मध्य यस्य तथाभूतं तदनुचितं स्वप्नशब्द: सुषुप्ते: प्रागवस्थाबोधकोऽपि सुषुप्तिबोधक: अत:एव स्वप्नमेव स्वप्न: "स्वपोनङ्" इत्यनेन भावे नङ् प्रत्यय:। तस्मात् "शीङ् स्वप्ने" इति सङ्गच्छते पाणिनीयधातुपाठ:। ननु कीदृश: स: षष्ठ्यन्तपदार्थ:? इत्यत् आह यत्र यस्मिन् स्वप्ने सुषुप्तिकाले एतत् पुरुष: एतस्य परमात्मन: पुत्रीभूतपुरुष: एतत् पुरुष: परमात्मपुत्रत्वविवक्षयैव एष: पुरुष: इति नोक्त्वा

समास आश्रितः इत्यनेनापि स्वरूपतो जीवब्रह्म ऐक्यवादः परास्तः स्वपिति शयनं करोति तदा सता परमात्मना सह सम्पन्नो भवति सङ्गच्छते एवमर्थं स्पष्टयितुं लोकप्रसिद्धिमाह अतएव एनं स्वपिति इति क्रियया: जना आचक्षते। निद्राति इति न कथयन्ति कथम्? स्वपितिशब्देऽपि इश्वरेच्छा रूप सरस्वती विवक्षितभावबोधनं सामर्थ्यात्। शयनकाले जीवः स्वं निजं आत्मीयं परमात्मानं न्यायदृष्ट्वा द्रव्यत्वेन निज ज्ञातिभूतं भक्तदृष्ट्या स्वं निजं परमधनम् अपीतः निश्चयेन प्राप्त भवति, अतएव स्वपिति इति कथ्यते। हिनिश्चयेन स्वं निजमात्मवत् प्रियं आत्मीयं द्रव्यत्वेन निजज्ञातिं निजं धनं च परमात्मानम् अपीतः प्राप्त भवति अतः शयनकाले परमानन्दोनुभूयते। किन्तु जीवस्य दौर्भाग्यमेतत् यत्।

सङ्गच्छते तेन यदा तु कामः तदा सः जागर्ति गृहीत बोधः।
यदा तु रामेण सः सङ्गतोऽस्ति तदा स्वपीत्येष विडम्बनैषा।।श्रीः।।

अथ मनो गतिमाह—

स यथा शकुनिः सूत्रेण प्रबद्धो दिशं दिशं पतित्वान्यत्रायतनमलब्ध्वा बन्धनमेवोपश्रयत एवमेव खलु सोम्य तन्मनो दिशं दिशं पतित्वान्यत्रायतनमलब्ध्वा प्राणमेवोपश्रयते प्राणबन्धनꣳ हि सोम्य मन इति।।२।।

शकुनिदृष्टान्ते मनसः प्राणाधारतां निरूपयति। यथा येन प्रकारेण सूत्रेण प्रबद्धः शकुनिः पक्षी दिशं दिशं पतित्वा गत्वा कुत्रापि आयतनमाधारं अलब्ध्वा अप्राप्य बन्धनं पिञ्जरात्मकम् उपश्रयते, तथैव मनः दिशं दिशं दिशोपलक्षितं संसारं पतित्वा पतङ्ग इव निपत्य भुक्त्वा च प्राणबन्धनम् उपश्रयते प्राणोः बन्धनं यस्य तथाभूतं मनः भवति।।श्रीः।।

अथ क्षुत्पिपासादि दृष्टान्तेन संसाराङ्कुरस्य समूलतां वर्णयति—

अशनापिपासे मे सोम्य विजानीहीति यत्रैतत्पुरुषोऽशिशिषति नामाप एव तदशितं नयन्ते

तद्यथा गोनायोऽश्वनायः पुरुषनाय इत्येवं तदप आचक्षतेऽशनायेति तत्रैतच्छुङ्गमुत्पतितꣳ सोम्य विजानीहि नेदममूलं भविष्यतीति।।३।।

अशनमशपचादित्वाद् अच् प्रत्ययः अशं अशितं पुरुषेण भुक्तं पदार्थं नयन्ति पाकं प्रापयन्ति इति अशनाया आपः अशनाया सन्ति यस्यां साशनाया बुभुक्षा, पातुमिच्छा पिपासा ते मम सकाशात् विजानीहि। उपपत्तिमाह यथालोके गवां नेतारं गोनायम्, अश्वानां नायकमश्वनायं, पुरुषान् नयन्तं पुरुषनाय इति कथयन्ति तथैव पुरुषः यत् अशशिषति भोक्तुमिहते तदापः नयन्ति अतः इमापि अशनाय इति कथ्यन्ते। तत् एव अपां सकाशात् एतत् शुङ्गं देहरूपम् अङ्कुरं उत्पतितं भवति इदं मूलं नास्ति।।श्रीः।।

एवं शुङ्गोत्पत्तिं निरूप्य क्रमेण सन्मूलतां साधयति—

तस्य क्व मूलꣳ स्यादन्यत्रान्नादेवमेव खलु सोम्यान्नेन शुङ्गेनापोमूलमन्विच्छाद्भिः सोम्य शुङ्गेन तेजोमूलमन्विच्छ तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः।।४।।

सोम्य! तस्य शुङ्गस्य अन्नात् अन्यत्र क्व मूलं स्यात् एवम् अन्नेन मूलेन अपः जलानि अन्विच्छ मार्गय एवं अद्भिः शुङ्गेन अङ्कुरेण तद् हेतोभूतं तेजः तेजसा तन्मूलं सत् अन्विच्छ नाजीहि, इमाः प्रजाः सन्मूलाः सत् मूलं यासां ता सदायतनाः सदाधाराः सत्प्रतिष्ठाः सदेव प्रतिष्ठा यासां ताः एवं सतो जाताः सताधारिताः सति विलीनाश्च।।श्रीः।।

अथ पिपासां निरूपयति—

अथ यत्रैतत्पुरुषः पिपासति नाम तेज एव तत्पीतं नयते तद्यथा गोनायोऽश्वनायः पुरुषनाय इत्येवं तत्तेज आचष्ट उदन्येति तत्रैतदेव शुङ्गमुत्पतितꣳ सोम्य विजानीहि नेदममूलं भविष्यतीति।।५।।

अथ यत् पुरुषः पिपासति तत्पीतं जलं तेजः नयति परिणामयति, अतः गोनायादिवत्। तेजः उदन्यः कथ्यते उदकं नयति इत्युदन्यः एवं तेजसा शुङ्गमुत्पतितमिदं अमूलं कथं भविष्यति।।श्रीः।।

अथ क्रमेण सद्देवताया जगत् कारणत्वमाह—

तस्य क्व मूलꣳ स्यादन्यत्राद्भ्योऽद्भिः तेजो मूलमन्विच्छ सोम्य शुङ्गेन तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठा यथा नु खलु सोम्येमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवति तदुक्तं पुरस्तादेव भवत्यस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि सम्पद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायाम्।।६।।

हे सोम्य! अद्भिरुत्पादितेन शुङ्गेन तेजः मूलमन्विच्छ तेन सत् अनेनैव सद्देवता मूलेन जगतः समूलता सायतनता सत्प्रतिष्ठा च अथ पुरुषं प्राप्य देवता त्रयस्य त्रिवृत्वं पुरस्तात् उक्तम् अनुपदमेव कथितम्। एवं संसारयात्रां निर्वर्त्य प्रयतः प्रकर्षेण गच्छतः प्रयति इति प्रयन् तस्य प्रयतः इति विग्रहः पुरुषस्य वाक्मनसि विलीयते, मनः प्राणे, प्राणश्च तेजसि तेजश्च तस्यां सदाख्यायां परदेवतायां सम्पद्यते। ननु "अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि" छा॰ उ॰ ६-२-३ इति श्रुत्या जीवात्मना सह सतः शरीरे प्रवेश उक्तः। तर्हि जीवस्य लयः कथं न उक्तः? इति चेत् शृणु सृष्टस्य लयो भवति तेजोजलान्नानि तन्मयाश्च वाक्प्राणमनोविशेषाः तन्मयं च शुङ्गरूपं शरीरम् इदं सृष्टिजातं सकारणं लीयते जीवस्तु नैव परमात्मनः सृष्टिः अतो एतस्य न लयः। अतो जीवात्मना सम्पन्नता नोक्ताः।।श्रीः।।

एवम् जीवस्य परमात्मनश्च नित्यत्वं साहचर्यं च प्रतिपादयति—

स य एषोऽणिमैतदात्म्यमिदꣳ सर्वं तत्सत्यँ स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान् विज्ञापयत्विति तथा सोम्येति होवाच।।७।।

एवं सदाख्यायां परदेवतायां सर्वेषु विलीनेष्वपि सत्सु यः अवशिष्यते स एव एषः श्रुतिप्रसिद्धः अणिमाः परमात्मापेक्षया अतिशयेनाणुः सर्वप्रलयेऽपि यस्य न प्रलयोभूत् स एव जीवात्मा एतस्यैव आत्म्यं आत्मनः इदं भोग्यरूपम् इदं सर्वं प्रपञ्चं तत् सद्रूपदैवतमेव सत्यं, सः आत्मा यः प्रलयेऽपि न नाशमगच्छत्। हे श्वेतकेतो तत्त्वं तदेवात्मतत्वं त्वमसि त्वं देहेन्द्रियमनोबुद्धिव्यतिरिक्तः विशुद्धचेतनघनः भगवतोदास-भूतः आत्माऽसि। अथवा एषः अणिमा भगवद्दासभूतजीवात्मा इदं सर्वम् एतद् भोग्यं तत् सत्यं सद्रूपं स एव एतस्य जीवात्मोऽपि आत्मा अधिष्ठाता परमात्मा, हे श्वेतकेतो त्वं तदसि तस्य असि तच्छब्दस्य त्वं शब्देन सह पञ्चधा समासयस्ते आत्मा तस्य त्वम् असि तत्पुत्रत्वं भवसि, तेन त्वम् असि, तस्मै त्वम् असि, तस्मात् त्वमसि, तस्मिन् त्वम् असि, एवं जीवात्मा परमात्मा विवरणं श्रुत्वा श्वेतकेतुः सिद्धान्तमनवगच्छन् सङ्कमान आह, एवं विधं परमात्मानं जीवात्मानं च कथमेहं न ज्ञातुं प्रभवामि? इत्यत् आह भगवान् पूज्यचरणः एतद् विषयं भूयः विज्ञापयतु। यत् सुषुप्तो सद्रूपेण परमात्मना सङ्गतोऽपि जीवः कथं न जानातीति आरुणिः तथा इति विज्ञापयतुमुवाच प्रतिशुश्राव।।श्रीः।।

इति छान्दोग्योपनिषदि षष्ठाध्याये अष्टमखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।

''श्रीराघवः शन्तनोतु''

नवमः खण्डः

ननु सुषुप्तौ यो जीवात्मानं निरन्तरं मिलति यश्च परमानन्दरूपः तं जीवात्मानो कथन्न जानन्ति कथं वा निजागमनावधिभूतत्वेन परमात्मानं नावगच्छन्ति इति जिज्ञासां श्वेतकेतोः मधुमक्षिका दृष्टान्तेन शमयितुमुपक्रमते यथेत्यादि—

यथा सोम्य मधु मधुकृतो निस्तिष्ठन्ति नानात्ययानां वृक्षाणाꣳ रसान्समवहारमेकताꣳ रसं गमयन्ति।।१।।

हे सोम्य! यथा येन प्रकारेण मधुकृतः मधुकुर्वन्तीति मधुकृतः मधुमक्षिकाः मधुमाध्वीं निस्तिष्ठन्ति उत्पादयन्ति धातूनामनेकार्थत्वात् निपूर्वकस्थाधातोरपि जन्मानुकूल-

व्यापारानुकूलव्यापारोऽर्थ:। कथं मधुनिष्पादयन्ति? इत्यत आह ते च नानात्ययानां नाना अनेक: अत्यय: स्वभाव: येषां ते नानात्यया: तेषां नानात्ययानां अनेकगतीनां नैकप्रकारफलकानां वृक्षाणां तरुणां फल्गुमहतां रसान् सारान् समवहारं णमुलन्तमेतत्। न च कथन्न द्वित्वमिति वाच्यम्? "छन्दसि बहुलम्" इत्यनेन तन्निषेधत्। तथा च समवहारमित्यस्य समवहृत्य समवहृत्य वृक्षाणां सारभूतभागं पीत्वापीत्वेति भाव:। एकतां पुनर्वान्तिविषयं कृत्वा एकभावं तत्तद्वृक्षरसवैलक्षण्यद्योतकस्वादप्रध्वंसाभावं तद्रूपं रसं मधुरसं गमयन्ति रसरूपतां नयन्ति।।श्री:।।

दृष्टान्तं निगमयति—

ते यथा तत्र न विवेकं लभन्तेऽमुष्याहं वृक्षस्य रसोऽस्यमुष्याहं वृक्षस्य रसोऽस्मीत्येवमेव खलु सोम्येमाः सर्वाः प्रजाः सति संपद्य न विदुः सति सम्पद्यामह इति।।२।।

हे सोम्य! अनेकवृक्षेभ्य: समानीता: मधुत्वमापादिता: ते रसा: यथा तत्र मधुकृतसंन्निधाने मधुकृत्मुखतो वान्तिधिकरणे अहममुष्य अस्य वृक्षस्य रस: आम्रस्य वा पनसस्य वा मिरिचस्य वा द्राक्षायावा वृक्षस्य रसोऽस्मि इति विवेकम् एकीभावेसति पृथक्करणज्ञानं न लभन्ते न प्राप्नुवन्ति। तथैवेमा: दृश्यमाना: प्रजा: जीवभूता: प्रकृतय: सति परमात्मनि संपद्यप्रलीय वयमनेकप्रकृतय: बद्धमुक्तनित्यस्वरूपा: विभिन्नस्वभावा: प्रजा: परमात्मनि संपद्यामहे इति न विदन्ति।।श्री:।।

अविवेकपरिणाममाह—

त इह व्याघ्रो वा सिꣳहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दꣳशो वा मशको वा यद्यद्भवन्ति तदा भवन्ति।।३।।

यतो हि ते सति संपद्यमानमात्मानं न विवेक्तुं प्रभवन्ति, न वा आधाराधेययो: वैलक्षण्यविवेकमवकलयन्ति। अतएव इह लोके व्याघ्र: विघाताय आजिघ्रति इति व्याघ्र: ईषत् सिंहान्न्यूनो हिंस्रव: जन्तु: सिंह: मृगेन्द्र: केशरी वृक: सृकालतो ज्यायान्

स्फारितमुखोगवादिवतसघाती पशु: वराह: वन्यसूकर: कीट: क्रमि: पतङ्ग: पक्षी दीपमित्रो वा पतनशीलकीटाणु: मसक: मत्सर: य: कर्णसमीपेगु ञ्जित्वा पृष्ठमांसं खादति। दंश: यो वर्षाकाले यो गोमयादि वृतस्थाने पशून् दशति, रक्तभोजी कीट: एवं यद्यद् प्रकारवाची द्विरुक्तो यच्छब्द: निकृष्टयोनिबहुत्वसूचक: उपदर्शितानामष्टानां वर्गतोऽपि तत्सजातीया: यावन्तोऽपि पापिष्ठ योनिविशेषा: भवन्ति संभवन्ति ब्रह्मसृष्टौ तत् तद्योनिसमुत्पन्ना: आ आभीक्ष्ण्येन भवन्ति। अत्रेदं विवेक्तव्यं यत् प्रजाशब्द: संतति प्रकृतिपर: ''प्रजासंततिप्रकृत्यो:'' इति कोषात्। जीवमात्रं भगवत: संतति न खलु पिता पुत्रयो: स्वरूपत एकत्वं साधयितुं शक्यते। तथैव जीवब्रह्मणोरैक्यं दुर्वारमेव (सति संपद्य सति संपद्यामहे) छा॰ ३.६.९.२ इति द्वि:श्रुति: संपत्तिक्रियां प्रति सदाधारतां प्रजाधेयतां च वर्णयति। नहि खलु जीवब्रह्मणोरैक्ये द्वैतपर्यवसायी आधाराधेयभावो घटयितुं शक्यते। दृष्टान्तोऽपि गमयत्येतमेवार्थं मधुकृत: अनेकतोवृक्षेभ्य: रसानाहृत्य एकतां नयन्ति तथैव परमात्मा अनेकत्र स्वकर्मवशात् विकीर्णान् जीवान् रसोपमानान् तत्तच्छारीरवृक्षेभ्य: यमरूपदशनै: समुपसंहृत्य कालरूपे निजमुखे गृहीत्वा प्रलयकाले एकतां निजोदरनिवासहेतो: रसं सत्तामात्रसंज्ञां नयति। वस्तुतस्तु सर्वे जीवा अनेक एव, किन्तु यथा रसानां परस्परवैलक्षण्यज्ञानाभाव: एवमेव जीवा अपि एकीभूता नात्मवैलक्षण्यं विवेक्तुमर्हन्ति। अतएव व्याघ्रादि पापिष्ठयोनिषु जायन्ते श्रुति: सुस्पष्टं निरूपयति यत् पृथक्सत्ताया: ज्ञानाभाव एव जीवानां निकृष्टयोनिजनननियामक: इति स्पष्टम् अद्वैतवादावलम्बिनामधोगतिनियामकम्। यदि ते निजागमनावधिं व्याज्ञास्यन्त तदानाजनिष्यन्त निकृष्टयोनिषु नन्वसंगतमेतत् एकीभावज्ञानपरिणामत: व्याघ्रादियोनिरुक्ताजीवस्य किन्तु गीतासु पृथक्त्वाभिन्नज्ञानं कथं राजसमुक्तं यथा—

पृथक्त्वेन तु यज्ज्ञानं नानाभावान् पृथक्विधान्—

वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम्।। (गी.अ. १८।२१)

एवमुभयत: पाशारज्जुरिति चेन्न तव परमात्मन: सह जीवेन संबन्धत: पृथक्त्वनिराशेनादोषात्। अतएव

मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव (गी.७.७)

इति सूत्रमणिदृष्टान्तेन भगवतैव भेदमूलकाधाराधेयभाव: प्रतिपादित:। न खल्वेकस्मिन्नेव धर्मणि प्रतियोग्यनुयोगिद्वित्वनिष्ठसूत्रमणित्वप्रकाराधाराधेयभाव: संगन्तुं

शक्यते। आशयोऽयं यत् अनेकेभ्य: स्थानेभ्य आगता: प्रजा: रसा इव भग्नचेतनाका:, अतएव निरस्तसेव्यसेवकभावमूलकभजनसंस्कारा: सूदूरत एवानास्वादित-रघुपतिपदपद्मपरागरागरसा: आत्मसंभाविता: स्तब्धा: भगवद्विमुखमलीमसमानसा: व्याघ्राद्यासुरीं योनिं लभन्ते इति भाव:। तथोक्तं गीतासु—

अहंकारं बलं दर्पं कामं क्रोधं च संश्रिताः।
मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः।।
तानहं द्विषतः क्रूरान् संसारेषु नराधमान्।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु।।
आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि।
मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम्।।

एकीभावे हि विज्ञाते (गीता १६,१८,१९,२०)

भक्तिः स्वादो विहन्यते। तामन्तरेण कश्चिद्यात् दुर्धर्षं भवबन्धनम्।।

इत्यनेन प्रच्छन्नबौद्धकल्पिताद्वैतवादमेघाडम्बरं प्रभञ्जनेनेव निकृत्य निरस्तम्।।श्री:।।

दृष्टान्तमुपसंहरति—

स य एषोऽणिमैतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ सआत्मा तत्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच।।४।।

एवं य: एतावामणीयान् अणिमा यं सर्वे ज्ञातुं न प्रभवन्ति, स एष: आत्मा परमात्मा एतस्यैव इदं सर्वम् आत्म्यं आत्मीयं तदेव सत्यं सत् सदेव सत्यं, हे श्वेतकेतो! त्वमपि तस्य असि तच्छब्द: लुप्तषष्ठीक:। ननु कथन्न प्रथमान्त:?तस्मिन् पक्षे स्वीकृते सत्यनावश्यककल्पनात्रयविडम्बना, यतोहि तच्छब्द: परोक्षत्वावच्छिन्नचैतन्यपर:। त्वं शब्दश्च प्रत्यक्षत्वावच्छिन्नप्रत्यगभिन्नचैतन्यपर:। न खलु परोक्षत्वप्रत्यक्षत्वयो: विरुद्धकालावच्छिन्नयो: द्यावापृथिव्ययोरिव संभवत्येकत्वं, अतएव पदयो: सामानाधिकरण्यं लक्षलक्षणभाव: विशेषणविशेष्यभावश्चेति नभ:पुष्पायमानं

समाधानत्रयं प्रजल्पितं तत् सर्वमनर्गलम्। यदुक्तं पदयोः सामानाधिकरण्यं तदसंगतं, सामानाधिकरण्यं नामसमानविभक्तिकत्वं तन्नात्र तच्छब्दस्य लुप्तषष्ठन्त्यत्वात्। न वा समानलिङ्गत्वं समानविभक्तिकत्वे हि तच्छब्दस्य विधेयत्वेन आयुष्मान् भव इत्यादिवत्। त्वं तदसीति स्यात् न वा लक्ष्यलक्षणभावः कथयितुं शक्यः। अनुपपन्ने हि तात्पर्ये तस्य प्रसक्तिः अद्वैतमेव तात्पर्यं श्रुतीनाम् इति नैव सर्वसम्मतसिद्धान्तः। नहि कतिपयेषु चिदुलूकेषु दिने रात्रिघोषणायां कोऽपि सुधी रात्रिव्यवहाराय कल्पते तस्मात् तात्पर्यानुपपत्यभावात् नैव लक्षणालौकिकवाक्येषु हि तात्पर्यानुपपत्तिः, श्रुतिर्भगवतो निःश्वासभूता। नहि त्वं भगवान् यः श्रुतीनां तात्पर्यं निर्धारयितुं प्रभवेत्। वैयाकरणानां नयेतु लक्षणा स्वीकृतैव नहि श्रुतिर्हि वेदः वेदो हि व्याकरणमुखः नहि मुखमन्तरेण चरणादिकं वक्तुं प्रभवति, तस्माच्छ्रुति व्याख्याने वयं वैयाकरणाः अस्मदीयोराद्धान्तश्चेति प्रमाणम्। नेदं साहित्यं यत्र लक्षणाप्रमाणं भवतु, यदुक्तं विशेषणविशेष्यभावश्चेति तदपि प्रमत्तप्रलपितमेव।

विशेषणविशेष्ये समानालिङ्गे एव भवताम् इति नैव राजाज्ञा, न वा शास्त्रीयनिर्देशः षष्ठ्यन्तमपि विशेषणं भवति तृतीयापि किं बहुना व्यधिकरणं विशेषणं बहुशो दृष्टमिह भूतले घटो नास्ति इत्यत्र सप्तम्यन्तस्यापि विशेषणत्वेन स्वीकृतत्वात्। ननु सप्तम्यन्तं चेद् विशेषणम्? तर्हि सप्तमीविशेषणे बहुव्रीहौ विशेषणत्वेन सप्तम्यन्तस्यापि क्राडीकृतत्वात् सत्यपि विशेषणपदे किमभिप्रायकं सप्तमीपदम् इति चेत् सप्तमीपदं व्यर्थीभूय व्यधिकरणबहुव्रीहि ज्ञापयति, तेन कण्ठे काल इत्यादि सिध्यति, तस्मात् तच्छब्दस्य बुद्धिस्थत्वपरामर्शकत्वे सति अणुभूतजीवात्मार्थः।

एवं हे श्वेतकेतो! त्वं तत् सर्वव्यापी आत्मा असि अथवा तत् सत्यमित्यत्र तन्निर्दिष्ट सतः मित्रं पुत्रोआसीत् पुत्रोवाऽसि। ननु सुप्तोत्थितः सन् जनः पूर्वसंस्कारं न विस्मरति प्रत्युत प्रबोधसमकालमेव तस्य सर्वे पूर्वसंस्काराः प्रतिबुद्ध्यन्ते, कथं वयं नावगच्छामः परमात्मानमिति बीजमलभमानो जिज्ञासते भगवान् पूजनीयतातपादः इमं सिद्धान्तं मां भूयएव एवकारोप्यर्थः पुनरपि विज्ञापयतु। प्रार्थनायां लोट् कृपया उपदिशतु इति प्रार्थये आनन्दमयत्वात् परमात्मनः तदभ्यासे नानुभवन्नालस्यं निष्प्रमादमारुणिरुवाच तथा एवमस्तु।।श्रीः।।

इति छान्दोग्योपनिषदि षष्ठाध्याये नवमखण्डे श्रीराघवकृपाभाष्यं संपूर्णम्।

''श्रीराघवः शन्तनोतु''

दशमः खण्डः

अथ दशमे खण्डे नदीसमुद्रदृष्टान्तेन सिद्धान्तं निरूपयति मन्त्रद्वयेन—

इमाः सोम्य नद्यः पुरस्तात्प्राच्यः स्यन्दन्ते पश्चात्प्रतीच्यस्ताः समुद्रात्समुद्रमेवापियन्ति स समुद्र एव भवति ता यथा तत्र न विदुरियमहमस्मीति।।१।।

एवमेव खलु सोम्येमाः सर्वाः प्रजाः सत आगच्छामह आगम्य न विदुः सत आगच्छाम इति त इह व्याघ्रो वा सिꣳहो वा वराहो वा कीटो वा पतङ्गो वा दꣳशो वा मशको वा यद्यद्भवन्ति तदा भवन्ति।।२।।

हे सोम्य! यथा पुरस्तात् अग्रतः स्यन्दमानाः प्राच्यः पुरो वाहिन्यः गंगादयः पश्चात् स्यन्दमानाः प्रतीच्यः पश्चिमवाहिन्यः सिन्ध्वाद्याः समुद्रात् निर्गत्य मेघमाध्यमेन तद्वृष्टजलेन लब्धाकाराः पुनः धारासारशतसहस्रैः समुद्रमेव सागरमेव अपियन्ति संगच्छन्ते, तासां तदितिरिक्तनिवासाभावात्। तथैव खलु निश्चयेन ताः इयमहं इति निजं नाम रूपं च न विदन्ति निजं नामरूपश्च विनाशयन्ति इति नोक्तम्। किं तर्हि? जानन्ति नहि तस्मिन्नगाधे महासागरे फल्गुनदीनां कुत्र सन्निधानं, तर्हि किं भवति? समुद्रः भवति प्राधान्येन समुद्रः प्रत्यक्षतो दृश्यते, पुनः समुद्रात् नद्यः पूर्यन्ते पुनश्च तस्मिन् विलीयन्ते, यथा च समुद्रो नदीसत्तां नैव भक्तुं पारयति तथैव परमेश्वरोऽपि जीवसत्तां न तिरोधापयितुं प्रभवति। समुद्रोपजीव्या हि नदी तथैव भगवदुपजीव्यो हि जीवः समुद्र इव आगाधो भगवान्। यथोक्तं वाल्मीकिना—

सर्वदाभिगतः सद्भिः समुद्र इव सिन्धुभिः। (वा.रा. बाल १.१६)

तत्र प्रतिरोमकोटिकोटिब्रह्माण्डानि को जानीयात्, को जीवः किं देशीयः किन्नामा, एवमेव सोम्य प्रजाः इमाः बद्धाः सतः परमात्मनः आगम्य संसारमासाद्य सांसारिकप्रपञ्चविस्मृतनिजस्वरूपाः न विदन्ति, यत् सतआगच्छामः इमं संसारं परमात्मनः

सकाशादागच्छामः, पश्चात् तत्रैव गमिष्यामः इति न जानन्ति। अतएव व्याघ्रादि दंशपर्यन्ताः योनिः आसुरीः प्राप्नुवन्ति। अनेनैव दृष्टान्तेन विशिष्टाद्वैतवादः समर्थितः, यथा समुद्रं गच्छन्त्यो नद्यः तिरोहित नामरूपा भवन्ति, तथैव परमात्मानं प्रप्य जीवाः तिरोहितनामरूपत्वात् परमात्मविशिष्टाः। यथा सतीषु शताधिकासु नदीषु समुद्र इत्येव कथ्यते, तथैव सत्स्वपि जीवसंकुलेषु परमात्मैव कथ्यते। अत एव अस्यैवाध्यायस्य द्वितीयखण्डे "सदेव सोम्येदमग्र आसीत्" इति श्रुतिः संगच्छते। अनया रीत्या तच्छब्दः तदात्मकाभिप्रायः तत्त्वमसि तदात्मा त्वमसि, तच्छरीरं त्वमसि वा, इति तात्पर्यकम्॥श्रीः॥

दृष्टान्तं निगमयति—

स य एषोऽणिमैतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच॥३॥

एवं गुणगणः यः अणिमा समुद्रवदगाधस्य स एव आत्मा सर्वव्यापकः, इदं सर्वं संसारजातं एतदात्म्यं एतत् स्वरूपं "आत्मा शरीरे जीवे च" इति कोषात्। आत्माशरीरमात्मैव आत्म्यम् एतस्य आत्म्यम् एतदात्म्यं तदेव विशिष्टं अद्वैतं सत्यं परमार्थः। हे श्वेतकेतो! त्वं तस्य नियम्यः असि, ननु एतावत् सन्निकृष्टं परमात्मानं जीवाः कथं न जानन्ति? अतः जिज्ञासते भूयः विज्ञापयतु आरुणिश्च तथा एवमेव करिष्यामि इति प्रतिजानीते॥श्रीः॥

इति छान्दोग्योपनिषदि षष्ठाध्यायेदशमखण्डे श्रीराघवकृपाभाष्यं संपूर्णम्।
॥श्रीराघवः शन्तनोतु॥

एकादशः खण्डः

अथ परमात्मसत्वे जीवसत्ता जीवसत्वे च जगत्सत्तेति वृक्षदृष्टान्तमाह। दृष्टान्तोऽयम् मन्त्रद्वयान्वयी

"अस्य सोम्य महतो वृक्षस्य यो मूलेऽभ्याहन्याज्जीवन्स्रवेद्यो मध्येऽभ्याहन्याज्जीवन्स्रवेद्योऽग्रेऽभ्याहन्याज्जीवन्स्रवेत्स एष जीवेनात्मनानुप्रभूतः पेपीयमानो मोदमानस्तिष्ठति॥१॥

अस्य यदेकाꣳ शाखां जीवो जहात्यथ सा शुष्यति द्वितीयां जहात्यथ सा शुष्यति तृतीयां जहान्यथ सा शुष्यति सर्वं जहाति सर्वः शुष्यति।।५।।

हे सोम्य! निजसमक्षं वर्तमानमिमं वृक्षं पश्यसि, अस्य महतः विशालस्य वृक्षस्य मूले यदि कोऽपि कुठारेण हन्यात् तदा सः जीवन् जीवनं धारयन् स्रवेत् रसः श्रावं कुर्यात्। यदि कोऽपि मध्ये अभ्याहन्यात् तस्मिन् कालेऽपि सः तथैव हरितः पल्लवः च्यवेत् रसम्, एवमेव अग्रे कोऽपि हन्यात् तदपि स्रवेदेव किन्तु जीवति एवमेव पेपीयमानः पादाभ्यां पिबन् जलं तिष्ठति। कथं जीवेन आत्मनानुप्रभूतः जीवेन सह परमात्मनः अनुप्राणितः। परन्तु यदा जीवः एकं शाखां जहाति तदा सा शुष्यति। एवं द्वितीयां तृतीयां यां यां त्यजति जीवः सा शुष्यति एवमेव यदि सर्वावच्छेदेन जहाति तदा सर्वः शुष्यति।।श्रीः।।

दृष्टान्तं निगमयति—

एवमेव खलु सोम्य विद्धीति होवाच जीवापेतं वाव किलेदं म्रियते न जीवो म्रियत इति स य एषोऽणिमैतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच।।३।।

हे सोम्य! यथा जीवात्मनि सति यत्किञ्चिदवच्छेदेन छिन्नोऽपि वृक्षस्तिष्ठति, किन्तु जीवे जहति न तिष्ठति क्षणमपि। तथैवेदं शरीरमपि जीवे निर्गच्छति म्रियते जीवे तिष्ठति तिष्ठति, य एवं गुणगणः एषु अणिमा अति सूक्ष्मः स एव आत्मा सर्वव्यापी परमात्मा, त्वमपि तस्यासि। इति समुपदिष्टोऽपि भूयः कथयति नाहं अवगच्छामि यत् सूक्ष्मात् स्थूलं कथं जायते तं बोधयितुं भूयः प्रतिजानिते।।श्रीः।।

इति छान्दोग्योपनिषदि षष्ठाध्याये एकादशखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।

।।श्रीराघवः शन्तनोतु।।

द्वादशः खण्डः

अथ न्यग्रोधफलदृष्टान्तेन सूक्ष्मात् स्थूलोत्पत्तिं निदर्शयति।

न्यग्रोधफलमत आहरेतीदं भगव इति भिन्द्धीति भिन्नं भगव इति किमत्र पश्यसीत्यण्व्य इवेमा धाना भगव इत्यासामङ्गैकां भिन्द्धीति भिन्ना भगव इति किमत्र पश्यसीति न किञ्चन भगव इति।।१।।

हे सोम! अत: तौ पुरत: वर्तमानात् अस्मात् वटवृक्षात् इदं न्यग्रोधफलं न्यग्रोधस्य वटस्य फलं आहर आनय, त्यादिष्ट: आहृत्य न्यवेदयत् भगव इदमाहृतम् आनीतं पुनरादिशत् पिता इदं भिन्धी स्फोटय, तथा कृत्वा न्यवेदयत् भिन्नं स्फोटितं तदापृच्छत् अत्र किं पृच्छसि उदतीतरत् अत्र आण्व्य धानात् लग्भ्य: कणिका पश्यामि विजानामि। पुनरुक्तवान् इमाम् एकैकां भिन्द्धी, भित्वा कथितवान् भिन्ना पुनरपृच्छत् अत्र भिन्नाया अणुधानायां किम् पश्यसि न किमपि दार्ष्टान्तिमाह।।श्री:।।

तꣳ होवाच यं वै सोम्यैतमणिमानं न निभालयस एतस्य वै सोम्यैषोऽणिम्न एवं महान्यग्रोधस्तिष्ठति श्रद्धत्स्व सोम्येति।।२।।

अथ तं श्वेतकेतुं उवाच पिता हे सोम्य! यमेतमणिमानमणु: भूतंन निभालयसे निकटस्थमपि न दृष्ट्या गोचरयसि एतस्य परमात्म सखस्य जीवस्य इव स्थूलरूप: विशेष: तिष्ठति वटवृक्ष: सोम्य श्रद्धत्स्व आस्तिकबुद्ध्या विचारय।।श्री:।।

प्रकरणमुपसंहरति—

स य एषोऽणिमैतदात्म्यमिदꣳ सर्वं तत्सत्यꣳस आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान् विज्ञापयत्विति तथा सोम्येति होवाच।।३।।

एवं भूत: अणुरपि महज्जनक: स: आत्मा आप्नोति व्याप्नोति चराचरम्। तथा भूत: इदं सर्वं नामरूपात्मकं जगत् एतदात्म्यं एतस्य स्थूलं रूपमेव। यथोक्तं वाल्मिकीना—

"जगत्सर्वं शरीरं ते" तत्सत्यं तथ्यं तत्त्वमसि तस्यैव सर्वाधारस्य सम्बन्धिभूतस्त्वम्। ननु महतो वृक्षस्य अणुर्धानात उपलभ्यते, किन्तु जगत्युपलब्धे तन्मूलभूतं सत् कथं नोपलभ्यते? इति जिज्ञासा बीजं भगवन् मां भूय विज्ञापयतु इति प्रार्थयमानं स: श्वेतकेतुं तथेति प्रतिज्ञाय लवणदृष्टान्तेनाह।।श्री:।।

इति छान्दोग्योपनिषदि षष्ठाध्याये द्वादशखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।

।।श्रीराघव: शन्तनोतु।।

त्रयोदश: खण्ड:

अथ लवणदृष्टान्तेन जगत्प्रविष्टं सत् निदर्शयति—

लवणमेतदुदकेऽवधायाथ मा प्रातरुपसीदथा इति स ह तथा चकार तद्धहोवाच यद्दोषा लवणमुदकेऽबाधा अङ्ग तदाहरेति तद्धावमृश्य न विवेद।।१।।

सोम्य! यत्त्वमप्राक्षी: जगतो मूलं सत् कथं न दृश्यते? जगति तस्येदं उत्तरं परमात्मा जगत्सृष्ट्वा जगदेव समनुप्रविष्ट: "तत्सृष्ट्वा तददेवानुप्राविशत्" इति श्रुते:। कथमेतत् विजानीयाम? इति लवणदृष्टान्तमाह— यथा लवणे जलं प्रविष्टं तद्रूपतां गतं नेत्राभ्यां न दृश्यते। किं तर्हि? तद्रशनायानुभूयते तथैव परमात्माऽपि लवणमेव जगत्प्रविष्ट रसनं एव भगवन्नामरूपलीलाधामसमास्वादनरसीक: परं प्रेमरूप: परभक्त्या समवगम्यते। तदेव सरलीकृत्य बोधयति, तत् सत् उदके अद्य लवणं निक्षिप्य स्व: प्रात: माम् उपसीदशा तत्त्वबुभूत्सया आगच्छे:। स: तथा चकार लवणं जले निक्षिप्य प्रात: लवणयुक्तजलभाजने न समागत: पिता कथयत् वत्स जले दोषा रात्रीवाचकोऽव्यय शब्दोऽयं रात्रौ उदके यत् लवणं सैन्धवमाद्या निक्षिप्तवानसि तत् आहर आनय, इत्युक्त: जले लवणं क्षारम् अवमृश्य अन्विश्य न विवेद।।श्री:।।

दार्ष्टान्तयति—

यथा विलीनमेवाङ्गास्यान्तादाचामेति कथमिति लवणमिति मध्यादाचामेति कथमिति लवणमित्यन्तादाचामेति कथमिति लवणमित्यभिप्राश्यैतदथ मोपसीदथा इति तद्ध तथा चकार तच्छश्वत्संवर्तते तछ्ंहोकवाचात्र वाव किल सत्सोम्य न निभालयसेऽत्रैव किलेति।।२।।

तमारुणिराह इदम् आदितः आचामः पिब किमस्ति मध्ये अन्ते च किमस्ति सः उक्तवान् लवणम् आरुणिरकथयत! इदं प्राश्य दूरे निक्षिप्य उपसीदथ अत्र आदरार्थे बहुवचनम् उपसीदेति भावः। तत्र लवणं शश्वत् समवर्तते तिष्ठति किन्तु त्वं चक्षुषा न निभालयसं न द्रष्टुं शक्नोषि। तथैव जले लवणमेव वर्तमानं सर्वहृदयान्तर्यामिनं न पश्यति इदं तु रसनास्थानभक्तिगम्यम्।।श्रीः।।

प्रकरणमुपसंहरति—

स य एषोऽणिमैतदात्म्यमिदꣳसर्वं तत्सत्यꣳस आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान् विज्ञापयत्विति तथा सोम्येति होवाच।।३।।

एवं जले लवणमिव समस्ते जगति तिरोहित ऐश्वर्यं साक्षिरूपेण विद्यमानं सत् एतदेव सत्यं स एव आत्मा सर्वः प्राणिनां जीवनरूपः। श्वेतकेतो तत्त्वमसि तस्य दासः त्वमसि, एवं सः भूयो जिज्ञासांचक्रे लवणमिव प्रच्छन्न महात्म्यतया विद्यमानं तं केनोपायान्तरेण ज्ञातुमहं प्रभवेयम्। इति भूय एव भगवन् मां विज्ञापयतु अतः स्थानान्तरादानितपुरुषदृष्टान्तेनाह यथा कश्चन पुरुषः पिहितनेत्रः निजस्थानात् आनित पुनर्जनैर्निदर्शितवर्त्मा गन्तव्यं लभते तथैवायं मोहनसंसारमानितः आज्ञानान्धिकृतः ज्ञानचक्षुः कारुण्यमूर्तिना आचार्येण सन्दर्शितभक्तिमार्गः सन् निज गन्तव्यं प्राप्नोति, तस्मात् तत् प्राप्तौ सद्‌गुरुपासत्तिरेव उपायः।।श्रीः।।

इति छान्दोग्योपनिषदि षष्ठाध्याये त्रयोदशखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।

।।श्रीराघाः शन्तनोतु।।

चतुर्दशः खण्डः

अन्यत्तानितं पुरुषदृष्टान्तं वितृणोति।

यथा सोम्य पुरुषं गन्धारेभ्योऽभिनद्धाक्षमानीय तं ततोऽतिजने विसृजेत्स यथा तत्र प्राङ्वोदङ्वाऽधराङ्वा प्रत्यङ्वा प्रध्मायीताभिनद्धाक्ष आनीतोऽभिनद्धाक्षो विसृष्टः।।१।।

हे सोम्य! यथा गन्धारेभ्यः गान्धारदेशेभ्यः कमपि पुरुषं कृतापराधं राजभयः देशनिर्वासनरूपः दण्डेन योजयन्तःअभिपिनद्धाक्षं पट्टिकया अभिपिनद्धे पिहिते अक्षिणी नेत्रे यस्य तथाभूतम् अतिजने जनान् अतीतम् अतिजनं तस्मिन् विसृजेत् त्यजति, सः पिहित नेत्रः प्राक् पूर्वमुखः उदङ् उत्तरे अधरङ् दक्षिणे, प्रत्यङ् पश्चिमे प्राध्मायित ध्माशब्दे शङ्ख इव चित्कार पुरःसरं क्रन्दते। अहं पिनद्धाक्षः अत्र विशिष्टः कोऽपि मार्गं निर्दिशतु नेत्रपट्टिकां च निरस्यतु।।श्रीः।।

दृष्टान्तशेषमाह—

तस्य यथाभिनहनं प्रमुच्य प्रब्रूयादेतां दिशं गन्धारा एतां दिशं व्रजेति स ग्रामाद्ग्रामं पृच्छन्पण्डितो मेधावी गन्धारानेवोपसम्पद्येतैव-मेवेहाचार्यवान्पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्य इति।।२।।

अनन्तरं कोऽपि कारुणिकः तस्य अभिनहनं नेत्रपट्टिकां प्रमुच्य लब्धनेत्रं निर्दिशति, एतां दिशं गन्धारा एतां दिशं ब्रज अथ ग्रामात् ग्रामं सर्वान् पृच्छन् स्वयमपि पण्डितः निज प्रतिभयादपि मार्गमनुसन्दधान मेधावी जननिर्देशं अविस्मरन् गान्धारं उपसम्पद्यते प्राप्नोति। तथैव इहापि गन्धं सम्बन्धम् आरान्तीति गन्धाराः गन्धारस्थानीयाः साकेतलोकविशेषाः तेभ्य एव प्रमादात् त्यक्तभगवत् भजनम् अत एव मोहबद्धनेत्रं तत्

आनीय जनातीते विसृजन्ति विकारा:। अनन्तरं कोऽपि आचार्यः तं क्रन्दन्तं निरीक्ष्य अज्ञानपट्टिकां विमुच्य भगवद्धाममार्गं निर्दिशति, ग्रामात् ग्रामं भगवदीयधामभूतं तीर्थं गच्छन् पुनः महात्मनः शास्त्राणि च पृच्छन् पण्डित सदसद्विवेककुशलः मेधावी शास्त्रज्ञानसम्पन्नः भगवन्तं प्राप्नोति। आचार्यवान् आचार्ये प्राशस्त्यञ्च भगवन्नामस्वरूपभक्ति भागीरथीविगाहन विमलीकृतमानसत्वरूपम्। एतादृिक् पुरुषः साधकः परमात्मानं वेद जानाति, तावदेव तस्य चिरं विलम्बः यावत् सः अहं मोक्ष्ये मुक्तो भवामि बन्धनतः सम्पत्स्ये भगवच्छरणागतिं विधास्ये इति सङ्कल्पो न कुर्यते।।श्रीः।।

प्रकरणमुपसंहरति—

स य एषोऽणिमैतदात्म्यमिदꣳसर्वं तत्सत्यꣳस आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान् विज्ञापयत्विति तथा सोम्येति होवाच।।३।।

एवं आचार्यकृपां प्राप्य परमेश्वर एव अणिमादिगुणविशिष्टः स आत्मा निखिलजीवनाधारतत्त्वं तस्य सेवकस्त्वं क्रमं जिज्ञासते कथं सत् सम्पद्येय? आरुणिः तथेति प्रतिजानीते।।श्रीः।।

इति छान्दोग्योपनिषदि षष्ठाध्याये चतुर्दशखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।

।।श्रीराघवः शन्तनोतु।।

पंचदशः खण्ड

अथ मुमूर्षुपुरुषदृष्टान्तेन सत् सम्पत्तिक्रमं वर्णयति—

पुरुषꣳ सोम्योतोपतापिनं ज्ञातयः पर्युपासते जानासि मां जानासि मामिति। तस्य यावन्न वाङ्मनसि सम्पद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायां तावज्जानाति।।१।।

हे सोम्य! यथा उपतापिनं पुरुषमुपताप: प्राणघातकज्वर: सोऽस्त्यस्येत्युपतापीतं आसन्नमरणं पुरुषं ज्ञातय: कुटुम्बिन: पर्युपासते, पृच्छन्ति मां जानासि मां जानासि, एष प्रश्नाकार अस्मासु कतममपि परिचिनोसि, एवं तस्य वाक् यावन् मनसि न लीयते मन: प्राणे न सम्पद्यते प्राणस्तेजसि तेजश्च परदेवतायां सति न सम्पद्यते तावज्जानाति।।श्री:।।

दृष्टान्तशेषमाह—

अथ यदास्य वाङ्मनसि सम्पद्यते मन: प्राणे प्राणस्तेजसि तेज: परस्यां देवतायामथ न जानाति।।२।।

एवं यदा तस्य मुमूर्षो: वाणि मनसि, मन: प्राणे, प्राणश्च तेजसि, तेजश्च परस्यां देवतायां सम्पद्यते तदा स: किमपि न जानाति। मुमूर्षोरिव मुमूक्षो: अपि दशा: सोऽपि तावत् एव जगत् जानाति यावत्तस्य वाङ्मनस: प्राण: तेजांसि जगत् प्रपञ्चे तिष्ठति। यदि वाक् भगवन्मय, मनसि मन: भगवत् समर्पिते प्राण: भगवच्चरणारविन्दचिन्तन-समिद्धप्रभे तेजसि अत्र तेजश्शब्दश्चेतनरूप: एवं चेतनात्मकं तेजश्च भगवत् ध्यानचिन्तनव्यापारं प्रभुप्रेमाकारं परस्यां देवतायां श्रीसीतारामनाम धेयायांसम्पद्यते, तदा न जानाति किमपि सम्पूर्णं जगत् विस्मरति। यथा चाह भगवाच्छुकाचार्य: श्रीभागवते दशमे—

तन्मनस्कास्तदालापास्तद्विचेष्टास्तदात्मिका:।
तद्गुणानेव गायन्त्यो नात्मागाराणि सस्मरु:।।

भागवत् १०-३०-४४।।श्री:।।

प्रकरणमुपसंहरति।

स य एषोऽणिमैतदात्म्यमिदꣳसर्वं तत्सत्यꣳस आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान् विज्ञापयत्विति तथा सोम्येति होवाच।।३।।

एवं गुण: य: श्रुतिभिर्गीतं स एष अणिमा अणु: जीवात्मा परमात्मा च जीवात्मपक्षे तदेव अणुरूपस्तं परमात्मपक्षे च तस्य कृपापात्रं त्वं, तर्हि किमन्तरम्? मुमुर्षुर्मुमुक्षो:? इति जिज्ञासते मां भूय: विज्ञापयतु स: तथा इति प्रतिजानीते।।श्री:।।

इति छान्दोग्योपनिषदि षष्ठाध्याये पञ्चदशखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।

।।श्रीराघवः शन्तनोतु।।

षोडशः खण्डः

अथ पुरुषपरशुग्रहणदृष्टान्तेन द्वयोरन्तरमाह—

पुरुषꣳसोम्योत हस्तगृहीतमानयन्त्यपहार्षीत्स्तेयमकार्षीत्परशुस्तस्मै तपतेति स यदि तस्य कर्ता भवति तत एवानृतमात्मानं कुरुते सोऽनृताभिसन्धोऽनृतेनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स दह्यतेऽथ हन्यते।।१।।

हे सोम्य! यथा कश्चित् हृतधनं भटा: हस्तगृहीतं हस्तयो: गृहीत: हस्तगृहीत तं हस्तगृहीतं गृहीत हस्तमानयन्ति, अयं धनं अपहार्षीत् अचूचुरत्। "अड्भावरछान्दस:" अयं स्तेयं चौर्यकर्म अकार्षीत्, स: नाहं अचूचुरम्। किं प्रमाणम्? इत्यादिप्रलपति तदा ते राजा व्यवस्थापयति अस्मै अत्र तादर्थ्ये चतुर्थी। एतदर्थन् अथवा उपपद चतुर्थी इमं परीक्षितुं परशुं तपत परष्वधं ऊष्णीं कुरुत तदा स: अनृताभिसन्ध: असत्यसन्धान: आत्मानमनृतेन असत्यभाषणेन गोपयित्वा परशुं प्रतिगृह्णाति स्पृशति दह्यते ज्वलति, अनन्तरं हन्यते यदि चौरस्य कर्ता भवति।।श्री:।।

यदि चौरस्य न कर्ता भवति तस्य प्रतिक्रियामाह—

अथ यदि तस्या कर्ता भवति तत एव सत्यमात्मानं कुरुते स सत्याभिसन्धः सत्येनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स न दह्यतेऽथ मुच्यते।।२।।

यदि सः चौरस्य न कर्ता भवति तदा आत्मानं सत्यं कुरुते एवं सत्यमभिसन्धते इति सत्याभिसन्धः सः सत्येन आत्मामानमन्तर्धाय कवचेन इव च्छादयित्वा परशुं प्रति गृह्णाति न दह्यते, न ज्वलति, अतः विमुच्यते मुक्तो भवति। एवमेव कर्तृत्वाभिमान-रहितः सत्यं परमात्मानं चिन्तयन् मुक्तो भवति॥श्रीः॥

अध्यायमुपसंहरति—

स यथा तत्र नादाह्येतैतदात्म्यमिदꣳसर्वं तत्सत्यꣳस आत्मा तत्त्वमसि श्वेतकेतो इति तद्धास्य विजज्ञाविति विजज्ञाविति॥३॥

सः यथा एन सत्येन न दह्यते तस्यैव आत्मभूतसिदं सर्वं तदेव सत्यं स आत्मा परमेश्वरः तच्चिन्तनेन विद्वान् न पुनरावर्तते। श्वेतकेतो! तत्त्वमसि तस्य परमात्मनः सेवकः सखा दासः पुत्रः कृपापात्रं नियम्यस्त्वं जीवात्मभूत भवसि इति श्रुत्वा श्वेतकेतुः विजज्ञौ परमात्मतत्त्वं विज्ञातवान् द्विरुक्तिरादरार्थाः अध्यायसमाप्तिसूचिका च।

इह नवभिः खण्डैः आरुणिरुद्दालकः जीवात्मपरमात्मनोः शरीरिशरीरभावमेव नवकृत्वः "तत्त्वमसीति" समुपदिदेश। अत्र "विधिकरणसमानाधिकरणे" इति मतद्वयम्। विधिकरणे पञ्चधा समासः, तेन त्वमसि, तस्मै त्वमसि, तस्मात् त्वमसि, तस्य त्वमसि, तस्मिस्त्वमसि इति। सामानाधिकरणे च शरीरिशरीरभावप्रतिपत्तौ तत्त्वमसि तदात्मकस्त्वमसि तच्छरीरं त्वमसि वा॥श्रीः॥

यं षष्ठाब्दमथाब्दसुन्दरतनुं श्रीचक्रवर्तीमुदाः।
राजा पङ्क्तिरथो रथैः परिवृतो दिव्यं महं योजयन्।
सानन्दं व्रतबन्धभव्यविधया यज्ञोपवीतान्यूतम्।
चक्रे तं रघुसिंधु षोडशकलं षष्ठे स्तुवे राघवम्॥

इति श्रीचित्रकूटवास्तव्यसर्वाम्नायश्रीतुलसीपीठाधीश्वरश्रीमज्जगद्गुरु-श्रीरामानन्दाचार्यश्रीरामभद्राचार्यकृतौछान्दोग्योपनिषदिषष्ठेऽध्याये श्रीराघवकृपाभाष्यं सम्पूर्णम्।

॥श्रीराघवः शन्तनोतु॥

श्रीराघवो विजयतेतराम

श्रीरामानन्दाचार्याय नमः

सप्तमः अध्यायः

प्रथमः खण्डः

मंगलाचरणम्

सप्तानामपि पूर्वजं गुणनिधिं सप्तभ्य ईर्ष्यं परम्।
यं ज्ञातुं प्रभवन्ति नो नरवरं सप्तापि सामान्यतः।।१।।

तं तामिस्रहरं तमालवपुषं ताम्राक्षमात्तेषुधिं।
सीतानेत्रचकोरचारुशशिनं भूमानमीडे हरिम्।।२।।

षष्ठे यं सत् समुच्चार्य सानन्दं श्रुतयो जगुः,
षड्विंशत्या च शकलैः सप्तमेऽपि तमूचिरे।
सामान्येन विशेषस्य ग्रहणं शास्त्रसम्मतम्।
तामेव रीतिमाश्रित्य सप्तमोऽध्याय ईर्यते।।३।।

यथारुह्य क्रमेणासौ सोपानानां परम्पराम्।
ताटागं तोयमाप्नोति स एवात्र क्रमः स्थितः।।४।।

सनत्कुमारदेवर्षिसंवादच्छलतोऽधुना।
ब्रह्मविद्या महत्वं हि प्रतिमन्त्रं महीयते।।५।।

नारदः पूर्णकामोऽपि शास्त्रज्ञोऽपि विवित्सया।
सनत्कुमारं शरणं गत इत्येव गौरवम्।।६।।

नामोपाशनमारभ्य यावदाशा समर्चनम्।
सप्तद्विगुणितैः खण्डैः सोपपत्युपवृंहणैः।।७।।

शाखाचन्द्रीयन्यायेन पारम्पर्यप्रयोगतः।
अध्यारोपापवादाभ्यां भूयोभूमानिरूपितः।।८।।

आपञ्चदशमारभ्य यावदन्तं यथाश्रुतम्।
सामान्यप्रतिषेधेन व्याख्यातं हि विवित्सितम्।।९।।

सत्यस्वरूपो भूमा हि सुखात्मामृतविग्रहः।
निश्चयप्रतिपत्युभ्यां श्रुत्या सम्यक् विवेचितः।।१०।।

ॐ अधीहि भगव इति होपससाद सनत्कुमारं नारदस्तꣳ होवाच यद्वेत्थ तेन मोपसीद ततस्त ऊर्ध्वं वक्ष्यामीति स होवाच।।१।।

ॐ इति मंगलाचरणं ह निश्चयेन अधीहि भगवः इत्याकारकं मन्त्रं पठन्। मन्त्रस्यार्थः भगवन् मा मध्यापय। नारदः नराय हितं नारं ज्ञानं तद्द्यति यशतथाभूतः, नरे भवं नारं तद् द्यति खण्डयति इति नारदः एतादृक गुणसम्पन्नः प्रशान्तात्मा देवर्षिरपि समस्तशास्त्रपारंगतोऽपि ब्रह्मबोधमन्तरेण संतोषमलभमानः सनत्कुमारमुपससाद। तं शास्त्राध्ययनचिकीर्षया स्वमुपसन्नं देवर्षिं प्राह सनत्कुमारः यदवेत्थ यदपि जानीषे तेन तद्वर्णनपुरःसरं मामुपसीद मम समीपमागच्छ। ततः ऊर्ध्वं ते तुभ्यं वक्ष्यामि इति सनत्कुमारः तद्ज्ञान सीमा चिखण्डयिषया निर्दिशत्।।श्रीः।।

अथ नारदः निजज्ञानं शूच्या श्रावयति—

ऋग्वेदं भगवोऽध्येमि यजुर्वेदꣳ सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदं पित्र्यꣳ राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्याꣳ सर्पदेवजन-विद्यामेतद्भगवोऽध्येमि।।२।।

हे भगवः! ऋग्वेदमृचां वेदं ऋग्वेदमध्येमि "ईङ्" अध्ययने इत्यधिपूर्वकस्य उत्तमपुरुषैकवचनरूपम्। अध्येमि साधिकारं स्मरामि। यजुर्वेदं यजुषां वेदः यजुर्वेदः तं

कर्मकाण्डात्मकम्। सामवेदं साम्नां उद्‌गीथ प्रभृतीनां ज्ञेयानां वेदः सामवेदः तं सामवेदं गीतात्मकम्। आथर्वणं युद्धवर्णनमंत्रसंकलनात्मकमथर्वणा प्रोक्तं आथर्वणं वेदं चतुर्थम् एवं इतिहासपुराणं इतिहासो वाल्मीकीयरामायणं, महाभारतं च पुराणानि मत्स्यादिभागवतान्तानि नन्वेषां रचनाकृदनुरोधेन तत्सादित्वं सादित्वं श्रुतिरनादिः तत्कथं द्वयोः सामञ्जस्यमिति चेत् श्रुतावमीशां चर्चयैव तदनादित्वसिद्धेः। न चानादि रचनाकृतामनुपपतिरिति वाच्यं कथावस्तुनामनादित्वेन तन्निबन्धपरदेववाणी छंदसां सादित्वेन च कथानुपूर्वी वैलक्षण्येन द्वयोरपि सामञ्जस्येनादोषात्। इतिहासौ च पुराणानि च तेषां समाहारः इतिहासपुराणं रामायणं महाभारतम्। पञ्चमं वेदवेद्मि अतएव "इतिहासपुराणं च पञ्चमोवेद उच्यते" इति भारतवचनं संगच्छते। वेदानां वेदं पञ्चानामपि वेदानां वेद-मुखत्वेन प्रतिपादकं व्याकरणम्। अतएव चतुर्दशसूत्री विवर्णप्रसङ्गे प्राह प्राञ्जलिः पतञ्जलिः— सोऽयमक्षरसमाम्नायः ब्रह्मराशिः पुष्पितः फलितश्चन्द्रतारकवत्। अतएव च पाणिनीय शिक्षा वचनं (येनाक्षरसामाम्नायमधिगम्यमहेश्वरात् कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः पा॰ शि॰ १) एवमेवाह (इति माहेश्वराणि सूत्राणि) इत्यस्य व्याख्यां कुर्वन् नागेशोऽपि लघुशब्देन्दुशेखरे (आनुपूर्वीश्रुतिरेषा लघुशब्देन्दुशेखरसंज्ञा प्रकरण)।। पित्र्य ं पित्रिभ्यो हितं पित्र्यं श्राद्धकल्पं, दैवं देवशास्त्रं, शशिं गणितशास्त्रं, देवम् औत्पातिकमित्यपि, निधिं-सामुद्रिक शास्त्रं, वाकोवाक्यं-न्यायशास्त्रं वाकः पूर्वप्रयुक्तं पाण्याः वाक्यं प्रयुक्तमुत्तरम्। वाक् युद्धरूपं। **देवविद्यां** संस्कृतभाषां, **ब्रह्मविद्यां** ब्रह्मणः वेदस्य प्रतिपादनीं शिक्षाकल्पनिरुक्त रूपां। **भूतविद्यां**-भौतिकशास्त्र, **एकायनं**-राजनीतिं। **क्षत्रविद्यां**-क्षत्राणां क्षत्रियाणां विद्यां-धनुर्वेदं। **नक्षत्रविद्यां**-नक्षत्रसम्बन्धिनी विद्यां ज्योतिषशास्त्रं, **सर्पदेवजनविद्यां**-सर्पनिरोधशास्त्रसङ्गीतशास्त्रं हे भगवः! एतत् इदं सर्वम् अध्येमि जानामि।।श्रीः।।

अथ, **"तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।**
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः"।।

गीता ४-३४

इतिस्मृतेः। **सद्‌गुरुपसत्ति** निदर्शकविनयाकारमाहः। सोऽहं इत्यादि—

सोऽहं भगवो मन्त्रविदेवास्मि नात्मविच्छ्रुतꣳ ह्येव
मे भगवद्दृशेभ्यस्तरति शोकमात्मविदिति सोऽहं

भगवः शोचामि तं मा भगवाञ्छोकस्य पारं तारयत्विति तꣳ होवाच यद्वै किञ्चैतदध्यगीष्ठा नामैवैतत्।।३।।

हे भगवन्! एतां समस्तां विद्यामधित्यापि अहं नारदः मन्त्रवित् मन्त्रं वेत्ति इति मन्त्रवित् केवलं मन्त्रज्ञाता नैव मन्त्रार्थज्ञाता मन्त्रार्थज्ञानमन्तरेण आत्मज्ञानं न सम्भवति। तात्पर्यमेतत् यत् आनुपूर्व्या वेदश्रुतिः प्राप्तवानस्मि। मन्त्रान् विन्दति इति मन्त्रवित् पिञ्जरगत शुक इव मन्त्रमात्रं रटामि न च तदर्थं चिन्तयामि मन्त्रा हि श्रुतयः , मन्त्रार्थो हि परमेश्वरः नात्मवित् आत्मा परमात्मा, आत्मा जीवात्मा, आत्मा च इति आत्मानौ तौ वेत्तीति आत्मवित् न वेत्तीत्यनात्मवित्, आत्म परमात्मस्वरूपं सेवकसेव्यभावात्मकं न जानामि इति तात्पर्यम्। ह निश्चयेन भगवद्दृशेभ्यः भवद्दृशेभ्यो महात्मभ्यः सकाशात् मे मया नारदेन एवम् अनेन कारेण श्रुतं समाकर्णितं यत् तरति शोकमात्मवित् आत्मानौ जीवात्मपरमात्मानौ वेत्ति सेवकसेव्यसम्बन्धमयो जानाति सः परमात्म्येष्टदैवतः शोकं तरति अपारं शोकसागरं निस्तरति लब्धपारं करोति। किन्तु अहं शोचामि अगाधशोकसागरे निमग्नोऽस्मि तत् तस्मात् भगवान् प्रथमः भगवदवतारः यथोक्तं श्रीभागवते—

स एव प्रथमं देवः कौमारं सर्गमास्थितः।
चचार दुश्चरं ब्रह्मा ब्रह्मचर्यमखण्डितम्।।

—भागवत १-३-६

मामेवं शोचन्तं नारदं शोकसागरनिमग्नं शोकस्य सागररूपस्य दुःखस्य पारं तीरौ तारयतु करोतु। इति इत्थं प्रार्थितः सन् सनत्कुमार तमुवाच यत् त्वं यदेतत् अध्यगीष्ठा तत् नाम एव शब्दमात्रं नामशब्दोऽत्र व्याकरणचर्चितघटपटादि डित्थडवित्थादि व्युत्पन्नाव्युत्पन्नप्रातिपदिकरूपशब्दपरः, नैव परमार्थपरः। व्याकरणेऽपि स्फोटय एव गीयत्वेन निर्णीतः नात्र नामशब्दो भगवद् विधान श्रीरामाद्यर्थकः।।श्रीः।।

अथ साधुशब्दरूपः नाम्नः व्यपकत्वं निरूपयति।

नाम वा ऋग्वेदो यजुर्वेदः सामवेद आथर्वणिश्चतुर्थ इतिहासपुराणः पञ्चमो वेदानां वेदः पित्र्यो राशिर्दैवो

निधिर्वाकोवाक्यमेकायनं देवविद्या ब्रह्मविद्या भूतविद्या नक्षत्रविद्या सर्वदेवजनविद्यया नामैवैतन्नामोपास्स्वेति।।४।।

ऋग्वेदमारभ्य देवजनविद्यापर्यन्तं नामैव शब्दमात्रं वर्तते इतिहासपुराणः अन्यपदार्थतया जहत्क्लीवत्वविशेषणमिदं वेदस्य। एवं इतिहासः पुराणं यस्मिन् सः इतिहासः पुराणः, एकायनम् एकनयनं मार्गः यस्मिन् तथाभूतं, दैवः उत्पातः निधिः सामदृकज्ञानं देवविद्या देवभाषाः, सर्पदेवजनविद्या सर्पः वासुक्यादि तस्य विद्या, देवजनः किन्नरायक्षाश्च एतेषां विद्या सङ्गीतविद्या इदं सर्वं नामैव शब्दमात्रं तयोः नामः ब्रह्मबुद्ध्या उपास्व भजस्व।।श्रीः।।

फलफलश्रुतिमाह—

स यो नाम ब्रह्मेत्युपास्ते यावन्नाम्नो गतं तत्रास्य यथाकामचारो भवति यो नाम ब्रह्मेत्युपास्तेऽस्ति भगवो नाम्नो भूय इति नाम्नो वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति।।५।।

एवं नाम ब्रह्मः 'शब्दो ब्रह्मैव' इति बुद्ध्यात्। यः शब्दमुपास्ते सः नाम्नः यावत् गतं येषु येषु लोकेषु नाम्नः गतं नाम सम्बन्धिनी गति व्याप्तिर्वा तेषु तेषु लोकेषु तस्य कामचारः स्वेच्छाचारो भवति। यः नाम ब्रह्मेत्युपास्ते एतत् फलश्रवणेनापि न लुब्धो भूत्वा, नारदः पप्रच्छ भगवः हे भगवन्! नाम्नःशब्दात् भूयः अधिकतरमपि अस्ति, सनत्कुमार उवाच अस्त्येव नारद प्राहः तर्हि नैतेन फलश्रवणेन स्वल्पफलकं नामोपाशिष्ये, किं तर्हि? एतस्मात् भूयो फलवति तत्त्वे मे जिज्ञासा तदेव कृपया मां ब्रवीतु।।श्रीः।।

इति छान्दोग्योपनिषदि सप्तमाध्याये प्रथमखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।

।।श्रीराघवः शन्तनोतु।।

द्वितीयः खण्डः

अथ वागुपासनं निरूपयति—

वाग्वाव नाम्नो भूयसी वाग्वा ऋग्वेदं विज्ञापयति यजुर्वेदꣳ सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदं पित्र्यꣳराशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्यां सर्पदेवजनविद्यां दिवं च पृथिवीं च वायुं चाकाशं चापश्च तेजश्च देवाꣳश्चꣳ मनुष्याꣳच पशूꣳश्च वयाꣳसि च तृणवनस्पतीꣳ ज्छवापदान्याकीटपतङ्गपिपीलिकं धर्मं चाधर्मं सत्यं चानृतं च साधु चासाधु च हृदयज्ञं चाहृदयज्ञं च यद्वै वाङ्नाभविष्यन्न धर्मो नाधर्मो व्यज्ञापयिष्यन्न सत्यं नानृतं न साधु नासाधु न हृदयज्ञो नाहृदयज्ञो वागेवैतत्सर्वं विज्ञापयति वाचमुपास्वेति।।१।।

वाव निश्चयेन नाम्नः मन्त्रिर्दिष्टोपास्य नामापेक्षया वाक् वाणी भूयसी अधिकतरा भूयस्त्वे हेतुं प्रपञ्चयति। वाक् ऋग्वेदं वागेव विज्ञापयति ज्ञानविषयतां नयति, एवमेव ऋग्वेदमारभ्य देवजनविद्यापर्यन्तं त्वज्ज्ञातम् आकाशादि पञ्चभूतानि देवमनुष्यतिर्यक्योनिः हृदयज्ञं सुन्दरं 'हृदयज्ञो मनोज्ञश्च सुन्दरः सुभगः रुचिः'' इति कोषात् अहृदयज्ञं असुन्दरं, धर्मं वेदविहितकर्मानुष्ठानजनितादृष्टरूपमधर्मं तद्विपरीतं, सत्यं यथार्थभाषणम्, अनृतं व्यलीकं, साधु उचितम् असाधु अनुचितं, इदं सर्वं वागेव विज्ञापयति, यदि वाग् नाभविष्यत् तर्हि किमपि नाव्यज्ञापयिष्यत्। यथोक्तं वाक्यपदीये—

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भाषते।।

(वाक्यपदार्थब्रह्मकाण्ड) तस्मात् वाचमेव ब्रह्मदृष्ट्योपास्व।।श्रीः।।

फलश्रुतिं निर्दिशति—

स यो वाचं ब्रह्मेत्युपास्ते यावद्वाचो गतं तत्रास्य यथाकामचारो भवति यो वाचं ब्रह्मेत्युपास्तेऽस्ति भगवो वाचो भूय इति वाचो वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति।।२।।

एवं यः वाचं ब्रह्मेति ब्रह्मभावनया उपास्ते स यावद्वाचोगतं वाण्याः गतिं यावत् वाग्गोचराणां लोकानामस्य कामचारो भवति। फलश्रुतितोऽपि न लोभितो नारदः वाचोऽपि भूयस्तत्वं जिज्ञासते, सनत्कुमारः प्राह-अस्ति वाचोऽपि भूयः किमपि नारदः भगवान्तद् ब्रवीतु यतो हि साम्प्रतं नाल्पे मे मनो रमते परम्परया यत्र भूयस्त्वात् व्यस्यति भवान् तदेवोपाषिष्ये इति हार्दं नारदीयम्।।श्रीः।।

इति छान्दोग्योपनिषदि सप्तमाध्याये द्वितीयखण्डे श्रीराघवकृपाभाष्यं संपूर्णम्।

।।श्रीराघवः शन्तनोतु।।

तृतीयः खण्डः

अथ मन उपासनां निरूपयति—

मनो वाव वाचो भूयो यथा वै द्वे वामलके द्वे वा कोले द्वौ वाक्षौ मुष्टिरनुभवत्येवं वाचं च नाम च मनोऽनुभवति स यदा मनसा मनस्यति मन्त्रानधीयीयेत्यथाधीते कर्माणि कुर्वीयेत्यथ कुरुते पुत्रांश्च पशूंश्चेच्छेयेत्यथेच्छत इमं च लोकममुं चेच्छेयेत्यथेच्छते मनो ह्यात्मा मनो हि लोको मनो हि ब्रह्म मन उपास्वेति।।१।।

मनो हि वाचो भूयः अधिकतरमुपपत्तिमाह-जीवो यत्किंचिद् मनस्यति तदेव कुरुते यथा शास्त्राणि अधीयीय शास्त्राध्ययनं कुर्यां इति चिन्तयते तदा शास्त्राण्यधीते

कर्माणि कुर्वीय इति अभिलषति तदा तानि कुरुते। एवम् इच्छीय इति पुत्रपशून् अध्यवस्यति तदा तदर्थे यतते अत: मन आत्मा जीवनं मनो लोक: मनोमयोऽयं संसार: मनसो ध्यानव्यापारत्वात् ध्यानस्य च वासनायतनतया तन्मूलत्वाच्च संसारस्य तस्मान् मन एव ब्रह्मबुद्ध्योपास्व।।श्री:।।

फलश्रुतिं ततोऽप्यधिकतरस्य नारदजिज्ञासां निरूपयति—

स यो मनो ब्रह्मेत्युपास्ते यावन्मनसो गतं तत्रास्य यथाकामचारो भवति यो मनो ब्रह्मेत्युपास्तेऽस्ति भगवो मनसो भूय इति मनसो वाव भूयोऽस्तीति तन्मे भगवान् ब्रवीत्विति।।२।।

यो वै मन: ब्रह्मत्वेनोपास्ते तस्य मनस: गतं गतिं यावत् मनोगोचरलोकपर्यन्तं कामचार: कामानां संचरणं भवति। मनोगोचरलोकतोऽपि न लोभमापादितो नारद: ततोऽपि भूयस्तत्वं पप्रच्छ सनत्कुमारोऽपि अस्तीति प्रत्यवोचत् तद्ज्ञातुं ब्रवीतु अतिप्रार्थयते देवर्षि:।।श्री:।।

इति च्छान्दोग्योपनिषदि सप्तमाध्याये तृतीयखण्डे श्रीराघवकृपाभाष्यं संपूर्णम्।

।।श्रीराघव: शन्तनोतु।।

चतुर्थ: खण्ड:

अथ संकल्पोपासनां वर्णयति—

संङ्कल्पो वाव मनसो भूयान्यदा वै संङ्कल्पयतेऽथ मनस्यत्यथ वाचमीरयति तामु नाम्नीरयति नाम्नि मन्त्रा एकं भवन्ति मन्त्रेषु कर्माणि।।१।।

सङ्कल्प: मनस: भूयान् अधिकतर: उपपत्तिमाह-यदा संङ्कल्पयते अध्यवसायं करोति तदा मनस्यति ध्यायति तदेव वाचं वाणिम् ईरयति वदति। तां नाम्नि शब्दविषये

निश्चयेन ईरयति प्रयुङ्क्ते नाम्नि शब्द एव मन्त्रा: कर्मप्रतिपादका: एकं क्रियावेशेषणमेतत् एकीभावमापाद्यन्ते।।श्री:।।

तत् परिशेषमाह—

तानि ह वा एतानि सङ्कल्पैकायनानि संङ्कल्पात्मकानि सङ्कल्पे प्रतिष्ठितानि समक्लृपतां द्यावापृथिवी समकल्पेतां वायुश्चाकाशं च समकल्पन्तामा पश्च तेजश्च तेषाꣳसंक्लृप्त्यै वर्षꣳ सङ्कल्पते वर्षस्य संक्लृप्त्या अन्नꣳ सङ्कल्पतेऽन्नस्य प्राणा: संकल्पन्ते प्राणानाꣳ संक्लृप्त्यै मन्त्रा: सङ्कल्पन्ते मन्त्राणाꣳ सङ्क्लृप्त्यै कर्माणि संङ्कल्पन्ते कर्मणाꣳसङ्क्लृप्त्यै लोक: संकल्पते लोकस्य सङ्क्लृप्त्यै सर्व ꣳ सङ्कल्पते स एष सङ्कल्प: सङ्कल्पमुपास्स्वेति।।२।।

तानि कर्माणि संङ्कल्पायिकायनानि, सङ्कल्प: एकयनं गति: येषां तथाभूतानि सङ्कल्पैकगतीनि, सङ्कल्प: आत्मा येषां तानि संकल्पकात्मकानि संङ्कल्पाधाराणीति भाव:। प्रत्येकं कर्मण: संङ्कल्प एव आधारो भवति एवं सङ्कल्पे प्रतिष्ठितानि लब्धप्रतिष्ठानि द्यावापृथिवी द्यौ: पृथिवी च इति द्यावापृथिव्यौ ''सुपां सुलुक्'' इत्यनेन पूर्वसवर्णदीर्घे, द्यावा पृथिवी समकल्पेतां सङ्कल्पमकुरुतां एवं वायु: आकाशं समकल्पयतां सङ्कल्पं कृतवती आप: समकल्पयन्तां सङ्कल्पं कुर्वन्ति स्म। तेजोऽपि तथाऽकरोत्, तेषां द्यावा पृथिवी वाय्वाकाशजलतेजसां सङ्क्लृप्ते सङ्कल्पसिद्धये वर्षं समकल्पयत्। तत् सङ्कल्पसिद्ध्यै अन्नं समकल्पयत्, एवमेव अन्नस्य सङ्कल्पसिद्धये प्राणा: संङ्कल्पन्ते सङ्कल्पं कुर्वन्ति। तेषां सिद्धये कर्माणि कर्मणां सिद्ध्यै लोका: सङ्कल्पन्ते, तेषां सङ्क्लृप्त्यै सर्व: संङ्कल्पते चराचर: सङ्कल्पमयो भवति तस्मात् सङ्कल्पमेव ब्रह्मधियोपास्व।।श्री:।।

अथ सङ्कल्पोपासनफलमाह—

स यः सङ्कल्पं ब्रह्मेत्युपास्ते क्लृप्तान् वै स लोकान्ध्रुवान्ध्रुवः प्रतिष्ठितान् प्रतिष्ठितोऽव्यथमानोऽभिसिध्यति। यावत्सङ्कल्पस्य गतं तत्रास्य यथा कामचारो भवति यः सङ्कल्पं ब्रह्मेत्युपास्तेऽस्ति भगवः सङ्कल्पाद्भूय इति संकल्पाद्वाव भूयोऽस्तीति तन्मे भगवान् ब्रवीत्विति।।३।।

एवं यः सङ्कल्पं ब्रह्मधिया उपास्ते सः सङ्क्लृप्तान् सङ्कल्पसिद्धान् ध्रुवान् अन्य लोकापेक्षया शाश्वतान् अव्यधमानान् व्यथारहितान् लोकान् कर्दमादिरिव व्यथाशून्यः ध्रुवः प्रतिष्ठितो भवति। तद्गोचरलोकपर्यन्तं कर्दमादेरिवास्य कामचारो भवति। सङ्कल्पोपासन-फलनिदर्शनप्रसङ्गस्तु श्रीभागवते देवहूतिकर्दमविहारप्रघट्टके द्रष्टव्यः एतत् सङ्कल्पसिद्धलोकसुखेनापि न प्रलोभनमानीतो भगवत्कृपानीतो भक्तिमसृणित हृदयनवनीतो भगवान्नारदः ततोऽपि भूयस्त्वे जिज्ञासाञ्चक्रे सनत्कुमारेण अस्तीत्याश्वासितः ब्रवीतु इति प्रार्थयते।।श्रीः।।

इति छान्दोग्योपनिषदि सप्तमाध्याये चतुर्थखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।

।।श्रीराघवः शन्तनोतु।।

पञ्चमः खण्डः

अथ चित्तं प्राधान्यं निरूपयति—

चित्तं वाव सङ्कल्पाद्भूयो यदा वै चेतयतेऽथ सङ्कल्पयतेऽथ मनस्यत्यथ वाचमीरयति तामु नाम्नीरयति नाम्नि मन्त्रा एकं भवन्ति मन्त्रेषु कर्माणि।।१।।

चित्तं सङ्कल्पात् सङ्कल्पमुपेक्ष भूयः अधिकतरं भवति, चित्तं नाम चतुर्थमन्तःकरणम्। ननु मनोबुध्यहंकारचित्तमीति चत्वार्यन्तःकरणानि परन्त्वत्र मनसोव्यतिरिक्तः सङ्कल्पः श्रुत्येवोक्तः, तर्हि पञ्चभविष्यन्त्यन्तःकरणानि? नैतद्दूषणम्। सांख्यसिद्धान्तो नान्तरङ्गदर्शनं श्रुतेः अतस्तत्सिद्धान्ते सङ्कल्पात्मकं मनः इति सिद्धान्तितम्, परन्तु वेदान्तं नाम परमान्तरङ्गदर्शनं श्रुतिमूलकम् अतएवेदमौपनिषदं कथ्यते। सांख्ये चित्तस्यापि मनस्यन्तर्भावः न वेदान्ते यतो हि मनसः संङ्कल्पः सङ्कल्पा च चित्तं भूयस्त्वेन प्रतिपादितम्। अतो हेतोश्चित्तं पृथगन्तःकरणं मनसः सङ्कल्पस्य भूयस्त्वे न तस्मिन् तस्यान्तर्भावः सङ्कल्पो नाम बुध्यध्यवसायविशेष इति मे प्रतिभाति। एवं सङ्कल्पापेक्षया चित्तस्य भूयस्त्वं यदा चेतयते सम्यक् चिन्तनं करोति तदनुसङ्कल्पं तदनुमनस्यनं तदनुमन्त्रे कर्मणमेकिभवनं भवतीति श्रुतिहार्दम्।।श्रीः।।

उपपत्तिपारिशेष्यमाह—

तानि ह वा एतानि चित्तैकायनानि चित्तात्मानि चित्ते प्रतिष्ठितानि तस्माद्यद्यपि बहुविदचित्तो भवति नायमस्तीत्येवैनमाहुर्यदयं वेद यद्वा अयं विद्वान्नेत्थमचित्तः स्यादित्यथ यद्यल्पविच्चित्तवान्भवति तस्मा एवोत शुश्रूषन्ते चित्तꣳह्येवैषामेकायनं चित्तमात्मा चित्तं प्रतिष्ठा चित्तमुपास्स्वेति।।२।।

तानि सङ्कल्पादीनि चित्तैकायनानि केवलचित्तगतिकानि, चित्तात्मानि चित्तमेव आत्मा उत्पत्तिस्थानं येषां तथाभूतानि चित्त एव प्रतिष्ठितानि। यद्यपि कोऽपि बहुवित् बहु समधिकं वेत्ति यस्तथाभूतोऽपि यदि अचित्तः अस्पष्टगुणचित्तः तदा लोके अयं न किमपि वेद इति व्यवहरन्ति। कथमिति चेदाह, यदि बहुवित् तर्हि कथमचित्तः यतो चित्तस्ततो न विद्वान्, यदि चित्तवान्सन्न विद्वान् तदापि तस्मै तदर्थं सर्वे सुश्रूष्यन्ते सेवन्ते द्वितीयार्थे वा चतुर्थी। अतएव येषां सङ्कल्पादीनां चित्रमेकायनं चित्तमेव आत्मा जीवितं जनानां चित्तं प्रतिष्ठा सर्वेषामधिष्ठानं तस्मात् चित्तमेव ब्रह्मत्वेनोपास्व।।श्रीः।।

चित्रोपासनफलश्रुतिं, ततो भूयसि श्रीनारदजिज्ञासितं प्रस्तावयति,

स यश्चित्तं ब्रह्मेत्युपास्ते चित्तान्वै स लोकान् ध्रुवान्ध्रुवः प्रतिष्ठितान्प्रतिष्ठितोऽव्यथमानानव्यथमानोऽभिसिद्धति। यावच्चित्तस्य गतं तत्रास्य यथाकामचारो भवति यश्चित्तं ब्रह्मेत्युपास्तेऽस्ति भगवश्चित्ताद्भूय इति चित्ताद्वाव भूयोस्तीति तन्मे भगवान्ब्रवीत्विति।।३।।

एवं यो ब्रह्मबुद्ध्या चित्तमुपास्ते स चित्तान् चेतनामयान् शेषं समानम्। अथ चित्रलोकतोऽपि विरतिं लभमानो नारदः प्राह, भगवः भगानि सन्त्यस्मिन् इति भगवस् तत् सम्बुद्धौ हे भगवः! हे पूज्यचरण! एवं ध्रुवत्वप्रतिष्ठात्वविशिष्टलोकप्रदातुः चित्रादपि भूयः अधिकतरं किमप्युपास्यमस्ति सनत्कुमारः प्राह अस्ति चित्ताद्भूयः उपास्यं, नारदः प्रार्थयते भगवान् मे कृपया तत् ब्रवीतु समुपदिशतु इति शब्दः निवेदनसूचकः। ननु सर्वं जानन्नपि सनत्कुमारः कथं नारदाय पूर्वमेव न भूमानमुपादिशत् किमर्थमेतावदनुधावनमचकिरत्? इति चेन्मैवम्।दुरूहविषयो हि क्रमशो बोद्ध्यमानो बुद्धिमनुषज्ञते। अल्पबलस्य पयः पिबतो बालकस्य मातुः शनैः शनैर्दुग्धदानवत् रुग्णस्य रोगचिकीर्षणा क्रमश ओषधि प्रयोगवच्च।।श्रीः।।

इति छान्दोग्यमुपनिषदि सप्तमाध्याये पञ्चमखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।

।।श्रीराघवः शन्तनोतु।।

षष्ठः खण्डः

अथ ध्यानं वर्णयति, ध्यानं नाम निजाराध्यपरमेश्वरनामरूपलीलाधाम्नां मनसि पौनःपुन्येन प्रेमप्रवणतया स्मरणम्। तत् प्रपञ्चयति—

ध्यानं वाव चित्ताद्भूयो ध्यायतीव पृथिवी ध्यायतीवान्तरिक्षं ध्यायतीव द्यौर्ध्यायन्तीवापो ध्यायन्तीव पर्वता ध्यायन्तीव देवमनुष्यास्तस्माद्य

इह मनुष्याणां महत्तां प्राप्नुवन्ति ध्यानापादांशा इवैव ते भवन्त्यथ येऽल्पाः कलहिनः पिशुना उपवादिनस्तेऽथ ये प्रभवो ध्याना पादांशा इवैव ते भवन्ति ध्यानमुपास्स्वेति।।१।।

चित्तात् ध्यानं भूयः अस्य संज्ञानफलरूपत्वात् तद्विस्तारमाह। ध्यायतीव पृथिवी इत्यारभ्य ध्यायन्तीव देवमनुष्या इत्यन्तेन पृथिव्यादयो हि भगवद्विभूतयः तेषाम् अचलत्वं स्थिरत्वं प्रतिष्ठा च भगवद्ध्यानबलेनैव अतोऽत्र इव शब्दः एव परकः। यत्तु प्राचीनैः पृथिवी ध्यायतीव ध्यानं कुर्वाणा इव निश्चला दृश्यते इति व्याख्यातं तदसंगतं, न च तत्र जडत्वात् ध्यानं कथमुपपन्नम्? इति वाच्यं वेदे पृथिव्या देवत्वेन स्वीकारात् तत्र विशुद्धचेतनत्वमुपपत्तेः। यथोक्तं मन्त्रवरणे, **ॐ पृथिवी त्वया धृता लोका देवि त्वं विष्णुणा धृता। त्वं च धारय मां देवि पवित्रं कुरु चासनम्।।**

न खलु जडत्वे श्रुत्युक्तप्रार्थनादिसंगच्छेत एवं पृथिवी ध्यायत्येव आन्तरिक्षम् आपः जलानि पर्वताः तदभिमानदेवताः देवाः मनुष्याश्च सर्वे दण्डकविपिनविहारिणं मैथिलां मनोहारिणं श्रीमन्दाकिनां पुलिनललितलीलाकारिणं वल्कलवसनधारिणं श्रीचित्रकूटचारिणं श्रीरामाभिधेयं ब्रह्म सर्वे प्रेमप्रवणचेतसा ध्यायन्त्येव अतएव अचलाः। तस्माद् ये मनुष्याणां मध्ये महत्तां प्राप्नुवन्ति महत्वं लभन्ते। ते ध्यानापादांशाः ध्यानस्य आपादः लाभः ध्यानापादः तस्य अंशः येषु ते ध्यानापादांशा, इव इवार्थस्तु यदि कदाचित् ते भगवद्ध्यानस्य सामग्रेणांशं प्राप्नुयुः। तदा तु स्वर्गापवर्गमपि त्रीणि कृत्य गणयेयुः भगवद्ध्यानपराः। यथोक्तं वृत्रासुरेण श्रीभागवते—

न नाकपृष्ठं न च पारमेष्ठ्यं न सार्वभौमं न रसाधिपत्यम्।
न योगसिद्धिरपुनर्भवं वा समञ्जसत्वाविरहय्यकांक्षे।।

(भागवत ६/११/२५)

तथैव श्रीमानसेऽपि भुषुण्डि प्राह श्रीगरुडं प्रति—

सोई सुख लवलेश बारक जिमि सपने लहयो
ते नहि गनहिं खगेस ब्रह्म सुखहिं सज्जन
सुमति। (मानस ७/८८/ख)

अथ ये अल्पा: "प्रथमचरमतयाल्पार्ध कतिपयनेमाश्च" अष्टाध्यायी १/१/३४।।

इत्यनेन सर्वनामसंज्ञा विकल्पे स्यभावे पूर्वसवर्णादिकार्यम्। क्षुद्राः क्षुद्रत्वं च भगवच्चरणारविन्दनखमणिचन्द्रचन्द्रिकापीयूषपानरूपध्यानपराङ्मुखत्वेन, तथोक्तं मानसे श्रीशिवेन,

सुनहु उमा ते लोग अभागी। हरि तजि रोइ विषय अनुरागी।।

(मानस ३/३३/४)

ते महत्वं न लभन्ते यतो न ध्यायन्ति परमेश्वरम्। तर्हि कीदृशास्ते? कलहिनः क्रीयमाणकलहाः पिशुनाः परकथनसूचकाः उपवादिनः परापवादिनिरताः भवन्ति, ये च प्रभवः एतद् दोषनिरसनसमर्थः तेऽपि ध्यानापादांशा एव तस्माद् ध्यानमेव ब्रह्मबुद्ध्या उपास्व। यद्यपि ध्यानं उपासनाप्रकारः ध्येय उपास्यो भवति अतः पूर्वं फलश्रुत्या नारदं ध्यानलब्धलोकेन लोभयति, निर्लोभं च दृष्ट्वा ततो भूयसि जिज्ञासायै प्रवर्तयति।।श्रीः।।

फलश्रुतिमाह—

स यो ध्यानं ब्रह्मेत्युपास्ते यावद्ध्यानस्य गतं तत्रास्य यथाकामचारो भवति यो ध्यानं ब्रह्मेत्युपास्तेऽस्ति भगवो ध्यानाद्भूय इति ध्यानाद्वाव भूयोऽस्तीति तन्मे भगवान् ब्रवीत्विति।।२।।

एवं यः कश्चन ध्यानं भगवद्चरणारविन्दयो पौनःपुन्येन स्मरणाम् उपास्ते स यावद् ध्यानस्य गतिः तत्र तेषु ध्यानगोचरेषु लोकेषु यथाकामचारः कामम् अनतिक्रम्य इति यथा कामं यथाकामं चरतीति यथाकामचारः यथैच्छविहरणलब्धगतिः एतद्फलं श्रुत्वापि नारदस्य मनोलोभं न प्रविवेश, यतो हि स तु स्वयमेव सकललोकेष्वव्याहतगतिः परिभ्रमत्येव। किमतो वैशिष्ट्यमिति ध्यानतो भूयस्ते जिज्ञासांश्चक्रे अस्त्यतो भूयः किमपीति समाश्वासतः सनत्कुमारेण तच्छ्रोतुकामः ब्रवीत्विति प्रार्थयते।।श्रीः।।

इति छान्दोग्योपनिषदि सप्तमाध्याये षष्ठे खण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।

।।श्रीराघवः शन्तनोतु।।

सप्तमः खण्डः

अथ ध्यानाद् विज्ञानं भूयस्त्वेन व्याख्याति। ननु श्रीगीतासु "**ज्ञानाद्ध्यानं विशिष्यते**" (गीता १२-१२) इत्युक्तम्। अत्र च ध्यानाद्विज्ञानं भूयस्त्वेन प्रतिपाद्यते इति महदसमञ्जसं श्रुतिस्मृत्योः? नैतद्दूषणं विषयभेदात् ज्ञानविज्ञानयोर्हि विषयभेदः अथ किं नाम ज्ञानम्? किं वा विज्ञानमिति चेदत्र प्राञ्चः ज्ञानम् आत्मानात्मविवेकः, विज्ञानं शास्त्रार्थज्ञानं तन्न मे विचारसहम्। शास्त्रज्ञानात् परमात्मज्ञानस्य श्रेयस्त्वं मा विद्वत्पामरप्रसिद्धं, वेरुपसर्गस्य च वैशिष्ठ्यमपि सार्वजनीनं तथा हि विशिष्टं विशिष्टाद्वैतसम्मतं ज्ञानं विशिष्टाद्वैतज्ञानम् अतो ज्ञानाद् विज्ञानं श्रेय इति शब्दार्थः तन्मते यदि शास्त्रज्ञानं विज्ञानम् आत्मज्ञानं च ज्ञानं तर्हि किं आत्मज्ञानात् शास्त्रज्ञानं विशिष्टम्? यदि नहि तर्हि "वि" उपसर्गस्य प्रयोजनं तैरेवालप्यतां निष्प्रयोजनं चेत् वि उपसर्गोपादानं तर्हि श्रुतिस्मृतिविरोधः परिह्रियताम्। विषयभेदमन्तरेण ज्ञानविज्ञानयोः श्रुतिस्मृतिविरोधोविधात्रापि परिहर्तुं न शक्यस्तेषां का कथा, तस्मात् ज्ञानं शास्त्रसद्गुरुकृपया संसारनिःसारत्वविवेकः। विज्ञानं हि विशिष्टं ज्ञानं तच्च विस्मृतनिःसारसंसारसम्बन्धत्वे सति परमात्मपरमाराध्यत्वनिश्चयवत्वे सति सेवकसेव्यभावेन परमात्मसम्बन्धद्रढीकरणविवेकः, इदं विज्ञानमेव ध्यानाद्भूयस्त्वेन प्रतिपादयितुमुपक्रमते। विज्ञानमित्यादि—

विज्ञानं वाव ध्यानाद्भूयो विज्ञानेन वा ऋग्वेदं विजानाति यजुर्वेदꣳ सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदं पित्र्यꣳराशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्या ꣳ सर्पदेवजनविद्यां दिवं च पृथिवीं च वायुं चाकाशं चापश्च तेजश्च देवाꣳश्च मनुष्याꣳश्च पशूꣳश्च वयाꣳसि च तृणवनस्पतीञ्छ्वापदान्याकीटपतङ्गपिपीलिकं धर्मं चाधर्मं च सत्यं चानृतं च साधु चासाधु च हृदयज्ञं चाहृदयज्ञं चान्नं चरसं चेमं च लोकममुं च विज्ञानेनैव विजानाति विज्ञानमुपास्स्वेति।।१।।

वाव शब्दौ निश्चयार्थौ विज्ञानं वाव विज्ञानमेव शास्त्रत परमात्मज्ञानं परमात्मना सह आत्मनः सेव्यसेवकभावसम्बन्धदृढीकरणम्। ध्यानात् भूयः श्रेयः कथम्? तेन विज्ञानेनैव ऋग्वेदं विजानाति, पित्र्यं पितृणा इदम् "पितुर्यत्" इत्यनेन यत् प्रत्ययः, पितृं श्राद्धकल्पं देवानां इदं दैवं देवोत्पातज्ञानम्, राशिं-गणितं वाको वाक्य-न्यायशास्त्रम्, एकायनं-एकनयनं निश्चयः यस्मिन् तदेकायनं नीतिशास्त्रम्, देवविद्यां-देवानां विद्या देवविद्या निरुक्तं संस्कृत भाषाः वा, ब्रह्मविद्यां ब्रह्मणः वेदस्य प्रतिपादनसमर्थां शिक्षा कल्पनिरुक्तः छन्दो रूपां भूतविद्यां भूतप्रेतनिग्रहक्षमः तन्त्रविद्यां, क्षत्रविद्यां-युद्धकलां, सर्पविद्यां-पिङ्गलसर्पेण भाषितां पिङ्गलाख्याम्, अथवा सर्पविषनिग्रहः क्षमां गारुडिं विद्यां, दिवं स्वर्गं एवमादीनि सर्वाणि भूतानि धर्माधर्मौ साधु असाधु सर्वं विज्ञानेनैव जानाति, अत एव षष्ठोक्तं भगवत् विज्ञाते सर्वं विज्ञातं भवति। एतादृशं विज्ञानं ब्रह्मधिया समुपास्व।।श्रीः।।

फलश्रुतिमाह—

स यो विज्ञानं ब्रह्मेत्युपास्ते विज्ञानवतो वै स लोकाञ्ज्ञानवतोऽभिसिध्यति यावद्विज्ञानस्य गतं तत्रास्य यथाकामचारो भवति यो विज्ञानं ब्रह्मेत्युपास्तेऽस्ति भगवो विज्ञानाद्भूय इति विज्ञानाद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति।।२।।

एवं ब्रह्मबुद्ध्या विज्ञानमुपासिनो विज्ञानवतः परमात्मज्ञानयुक्तान्, ज्ञानवतः जगत् क्षणभङ्गुरत्वज्ञानयुक्तान् अभिसिध्यति। अनेन लोभेनापि प्रलोभ्यमानो न विचलित-मनाः नारदः ततोऽपि भूयसि जिज्ञासाञ्चक्रे सनत्कुमारोऽस्तीति आश्वासयामास, ब्रवीतु इति नारदो प्रार्थयाञ्चक्रे।।श्रीः।।

इति छान्दोग्योपनिषदि सप्तमाध्याये सप्तमखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।

।।श्रीराघवः शन्तनोतु।।

अष्टमः खण्डः

अथ बलं विज्ञानादपि भूयस्त्वेन बलं प्रतिपादयति अत्र बलं परमात्मविज्ञान-लब्धाभयरूपां भगवत्कृपा बलं वा यथोक्तम्—

बलं बलबतां चाहं कामरागविवर्जितम्।गीता ७-११

बलं वाव विज्ञानाद्भूयोऽपि ह शतं विज्ञानवतामेको बलवानाकम्पयते। स यदा वली भवत्यथोत्थाता भवत्युतिष्ठन् परिचरिता भवति परिचरन्नुपसत्ता भवत्युपसीदन् द्रष्टा भवति श्रोता भवति मन्ता भवति बोद्धा भवति कर्ता भवति विज्ञाता भवति। बलेन वै पृथिवी तिष्ठति बलेनान्तरिक्षं बलेन धौर्बलेन पर्वता बलेन देवमनुष्या बलेन पशवश्च वयांःसि च तृणवनस्पतयः श्वापदान्याकीटपतङ्गपिपीलिकं बलेन लोकस्तिष्ठति बलमुपास्स्वेति।।१।।

बलं विज्ञानाद् भूयः अधिकतरं शतं विज्ञानवतः एकमेकः बलवान्, आकम्पयते चालयते यदा बली भवति भगवत्कृपाबलो भवति। तदा उत्थाता भवति परमार्थायाग्रेसरो भवति। उतिष्ठन् उपसत्ता भवति, गुरुसन्निधिं गन्तुकामाः भवति, उपसीदन् तत्त्वबोधाय गुरुसमीपे तिष्ठन् श्रोता भवति श्रवणाधिकारं प्राप्नोति, मन्ता भवति मननाधिकारी जायते, अनन्तरं विज्ञाता भवति विज्ञानपात्रतां गच्छति किं बहुना बलेनैव पृथिवी तिष्ठति एवमन्तरिक्षादयः तस्मात् बलमेव ब्रह्मदृष्ट्या उपास्व।।श्रीः।।

फलश्रुतिमाह—

स यो बलं ब्रह्मेत्युपास्ते यावद्बलस्य गतं तत्रास्य यथाकामचारो भवति यो बलं ब्रह्मेत्युपास्तेऽस्ति भगवो बलाद्भूय इति बलाद्वाव भूयोऽस्तीति तन्मे भगवान् ब्रवीत्विति।।२।।

बलोपासनां कुर्वन् बलगोचरलोकेषु कामचारवान् भवति, येषु लोभोऽपि नारदं नालोभयत् तदा नारदः ततो भूयसि जिज्ञांसाञ्चक्रेः सनत्कुमारश्च उपदेष्टुं प्रतिज्ञातवान्।।श्रीः।।

इति छान्दोग्योपनिषदि सप्तमाध्याये अष्टमखण्डे श्रीवाघवकृपाभाष्यं सम्पूर्णम्।।

।।श्रीराघवः शन्तनोतु।।

नवमः खण्डः

अथान्नं बलतोऽपि भूयस्त्वेन वर्णयति—

अन्नं वाव बलाद्भूयस्तस्माद्यद्यपि दशरात्रीर्नाश्नीयाद्यद्युह जीवेद-थवाद्रष्टाश्रोतामन्ताबोद्धाकर्ताविज्ञाता भवत्यथान्नस्यायै द्रष्टा भवति श्रोता भवति मन्ता भवति बोद्धा भवति कर्ता भवति विज्ञाता भवत्यन्नमुपास्स्वेति।।१।।

अन्नं बलतः श्रेयः, कथम्? यदि कोऽपि दशरात्रीः दशरात्री पर्यन्तं नाश्नीयात् तदा पूर्वं तु जीवनमसम्भवं यदि कथञ्चित् जीवेत् तदा अश्रोता अद्रष्टा एवं सर्वत्र अकाराप्रश्लेष्टव्य, श्रवणमननकर्तृत्वविज्ञातृत्वद्यभाववान् भवति। अन्नस्य आये प्राप्तौ श्रवणादिवान् भवति अतः अन्नं ब्रह्मदृष्ट्या उपास्व।।श्रीः।।

फलश्रुतिमाह—

स योऽन्नं ब्रह्मेत्युपास्तेऽन्नवतो वै स लोकान्पानवतोऽभिसिध्यति यावदन्नस्य गतं तत्रास्य यथाकामचारो भवति योऽन्नं ब्रह्मेत्युपास्तेऽस्ति भगवोऽन्नाद्भूय इत्यन्नाद् वाव भूयोऽस्तीति तन्मे भगवान् ब्रवीत्विति।।२।।

एवम् अन्नोपासनं कुर्वन् अन्नं पानवतः लोकान् प्राप्नोति, अन्नगोचरलोकेषु कामानुसारं विहरति अस्माल्लोभादपि विरज्यमानो नारदो जिज्ञासते ततो भूयसि अतः सनत्कुमारः ततोऽपि श्रेयः समुपदिशति।।श्रीः।।

इति छान्दोग्योपनिषदि सप्तमाध्याये नवमखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।

।।श्रीराघवः शन्तनोतु।।

दशमः खण्डः

अथ जलमन्नतो भूयस्त्वेन निर्दिशति—

आपो वावान्नाद्भूयस्यस्तस्माद्यदा सुवृष्टिर्न भवति व्याधीयन्ते प्राणा अन्नं कनीयो भविष्यतीत्यथ यदा सुवृष्टिर्भवत्यानन्दिनः प्राणा भवन्त्यन्नं बहु भविष्यतीत्याप एवेमा मूर्ता येयं पृथिवी यदन्तरिक्षं यद् द्यौर्यत्पर्वता यद्देवमनुष्या यत्पशवश्च वयाꣳसि च तृणवनष्पतयः श्वापदान्याकीटपतङ्ग-पिपीलिकमाप एवेमा मूर्ता अप उपास्स्वेति।।१।।

आपः जलानि अन्नात् अदनीपात् भूयस्यः श्रेयस्यः यतो हेतुमाह-यदा सुवृष्टिः शोभनवर्षणं न भवति तदा प्राणाः प्रकर्षेण अनन्ति जीवन्ति इति प्राणाः प्राणिनः अथवा प्राणाः सन्ति येषां ते प्राणाः, व्याधीयन्ते व्याधिग्रस्ता भवन्ति। अन्नं कनीयः अल्पतरं भविष्यति, अत्र लडर्थे लृट् भवतीत्यर्थः। यदा सुवृष्टिर्भवति तदा प्राणाः जीवा आनन्दिनः आनन्दशीला भवन्ति, अन्नं च बहु भवति। किं बहुना आप एव मूर्ता प्रजाः पृथिव्यादयः स्वापदानि हिंस्रपशवः कीटाश्च पतङ्गाश्च पिपीलिकाश्च इति कीटपतङ्गपिपीलिकं तदभिव्याप्य वयांसि पक्षिणः एवम् अमूर्ता सूक्ष्मः तस्मात् अप एव ब्रह्मबुद्ध्या उपास्स्व।।श्रीः।।

आपोपासना फलश्रुतिमाह—

स योऽपो ब्रह्मेत्युपास्त आप्नोति सर्वान्कामाꣳस्तृप्तिमान् भवति यावदपां गतं तत्रास्य यथाकामचारो भवति योऽपो ब्रह्मेत्युपास्तेऽस्ति भगवोऽद्भ्यो भूय इत्यद्भ्यो वाव भूयोऽस्तीति तन्मे भगवान् ब्रवीत्विति।।२।।

यः अपः ब्रह्मदृष्ट्या उपास्ते सः सर्वान् कामान् मनोभिलषितान् आप्नोति। एवं अप गोचरलोकेषु तृप्तः सन् विहरति यथेच्छं, यतल्लोभतोऽपि निर्वृण्णो देवर्षिः ततोऽप्यधिकतरे जिज्ञासते स्म, तद् विरतिं विलोक्य सनत्कुमारः जलतोऽप्युत्कृष्ट तत्त्वमस्ति इति निरदिशत् तज्ज्ञानाय नारदः ब्रवीत्विति प्रार्थयाञ्चक्रे।।श्रीः।।

इति छान्दोग्योपनिषदि सप्तमाध्याये दशमखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।

।।श्रीराघवः शन्तनोतु।।

एकादशः खण्डः

अथ तेजो भूयस्त्वं वर्णयति—

तेजो वावाद्भ्यो भूयस्तद्वा एतद्वायुमागृह्याकाशमभितपति तदाहुर्निशोचति नितपति वर्षिष्यति वा इति तेज एव तत्पूर्वं दर्शयित्वाथापः सृजते तदेतदूर्ध्वाभिश्च तिरश्चीभिश्च विद्युद्भिराह्लादाश्चरन्ति तस्मादाहुर्विद्योतते स्तनयति वर्षिष्यति वा इति तेज एव तत्पूर्वं दर्शयित्वाऽथापः सृजते तेज उपास्स्वेति।।१।।

तेजः अद्भ्यः जलेभ्यः भूयः अधिकतरं, तेजः वायुम् आगृह्य निगृह्य आकाशं नभोमंडलम्अभितपति ऊष्णं करोति। अत एव जनाः आहुः निशोचति बहूष्मा भवति,

अतः वर्षिष्यति मेघ इति शेषः। तत् तस्मात् पूर्वं तेजः दर्शयित्वा आत्मान अपः सृजते जलं रचयति, एवमूर्ध्वाभिः उपरिगताभिः तिरश्चीनाभिश्च परिवृताः विद्युद्भिः ह्रादाः मेघाश्चरन्ति तेजोमयशंपासंयुतत्वादिति भावः तस्मात् तेज एव ब्रह्मबुद्ध्या उपास्व इति भावः।।श्रीः।।

अथ फलश्रुतिमाह—

स यस्तेजो ब्रह्मेत्युपास्ते तेजस्वी वै स तेजस्वतो लोकान्भास्वतोऽपहततमस्कानभिसिध्यति यावत्तेजसो गतं तत्रास्य यथा कामचारो भवति। यस्तेजो ब्रह्मेत्युपास्तेऽस्ति भगवस्तेजसो भूय इति तेजसो वाव भूयोस्तीति तन्मे भगवान्ब्रवीत्विति।।२।।

यः तेजसो ब्रह्मभावेनोपासनं कुरुते स भास्वतः प्रकाशमानान् अपहततमस्कान् अपहतं विनाशितं तमः येषां तथाभूतान् लोकान् तेजस्वी सन् गतं प्रशरणं यावत् अस्य यथाकामचारः यथेच्छगमनं भवति सूर्यचन्द्रात्मकं तेजो यावत्भासयते तावदेव अयं गच्छति, तस्मात् बहिर्भूते भगवद्धाम्नि नास्य गतिः, तत्र तेजसः प्रसरणासंभवात्। नं तत्र सूर्यो भाति न चन्द्रतारकं नेमाविद्युतो भान्ति कुतोऽयमग्निः (कठ॰ १.३.१३) इतिश्रुतेः।

न तद्भासयते सूर्योनशशांको न पावकः।
यद्गत्वा न निवर्तन्ते तद्धाम परमं मम।।

(गीता॰ १५.६)

इति स्मृतेश्च। एवं तेजोमयलोकं प्राप्यापि नाकृष्टो नारदः, जिज्ञासते ततो भूयसि अस्तीति तेजसो भूयः किमपीति सनत्कुमारः प्राह तद्वेत्तुं नारदोऽपि भगवान् ब्रवीतु इति प्रार्थयाञ्चक्रे।।श्रीः।।

इति छान्दोग्योपनिषदि सप्तमाध्याये एकादशखण्डे श्रीराघवकृपाभभाष्यं संपूर्णम्।।

।।श्रीराघवः शन्तनोतु।।

द्वादशः खण्डः

अथाकाशं तेजसो भूयत्वेन प्रतिपादयति—

आकाशो वाव तेजसो भूयानाकाशे वै सूर्याचन्द्रमसावुभौ विद्युन्नक्षत्राण्यग्नि-राकाशेनाह्वयत्याकाशेन शृणोत्याकाशेन प्रतिशृणोत्याकाशे रमत आकाशेन रमत आकाशे जायत आकाशमभिजायत आकाशमुपास्स्वेति।।१।।

आकाश: एव तेजसो भूयान् उत्कृष्टतर:, ननु अन्नत: जलं जलतस्तेज: इत्युत्कृष्टतरत्वक्रमेण तेजसोवायोर्भूयस्त्वं कथन्नोक्तम्? वायुं तेज आगृह्णाति "वायुमागृह्य" (छा० दो० उ० ७.११.१ इतिश्रुते:) तस्मात् तेज उत्पादकं सदपि तन्नियन्तुमशक्यत्वात्। न तस्मात् भूय:, अत आकाशभूयस्त्वं, आधारआधेयाद्भूयान् भवति इत्युपपादयति। उभौ सूर्याचन्द्रमसौ सूर्यश्च चन्द्रमाश्च इति सूर्याचन्द्रमसौ देवताद्वन्द्वे इत्यनेन अनङ्। विद्युत् नक्षत्राणि चपलातारका: अग्नि: इमे सर्वे तेजोमया: आकाश एव सन्ति एवं तेजोमयीवाक् (छान्दो० उ० ६.४.३) इतिश्रुते:। तेजोमयवागीधकरणेन आकाशे नाह्वयति आकारयति, परस्परमाकाशेन शब्दगुणेन कर्णविवरवर्तिना शृणोति तेनैव प्रतिशृणोति तेजोमयशब्दस्याकाशगुणत्वमेव तेजोभूयस्त्वं तस्मिन् प्रमाणयति, एवम् आकाशे रमते क्रीडति आकाशे न रमते आकाश एव न जायते अभिजायते च अंकुरात्मना तस्मादाकाशमेव ब्रह्मबुद्ध्या समुपास्व।।श्री:।।

अथ फलश्रुतिमाह—

स य आकाशं ब्रह्मेत्युपास्त आकाशवतो वै स लोकान्प्रकाशवतोऽसम्बाधानुरुगायवतोऽभिसिध्यति यावदाकाशस्य गतं तत्रास्य यथाकामचारो भवति य आकाशं ब्रह्मेत्युपास्तेऽस्ति भगव आकाशाद्भूय इत्याकाशाद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति।।२।।

एवमाकाशमुपासीनः आकाशवतः अवकाशयुक्तान् प्रकाशवतः तेजः सहितत्वेन परमप्रकाशमानान् असम्बाधान् जनसम्मर्दवर्जितान् बाधारहितान् वा लोकानभिसिध्यति, तस्य आकाशस्य गतिं यावत् यथेच्छचरणं भवति। अस्मादप्युपरमन् नारदोऽतो भूयसि तत्वे जिज्ञासते स्म, एतेषामपि लोकानां ससीमत्वात्। अथ सनत्कुमारः ततोऽपि भूयसे स्मरतत्वाय संकेतयति तं विज्ञातुञ्चानुरुन्धे देवर्षिः ब्रवीत्विति।।श्रीः।।

इति छान्दोग्योपनिषदि सप्तमाध्याये द्वादशखण्डे श्रीराघवकृपाभाष्यं संपूर्णम्।।

।।श्रीराघवः शन्तनोतु।।

त्रयोदशः खण्डः

अथ स्मरतत्वं निरूपयति— स्मरणं स्मरः पचादित्वात् अच्। उपास्यमानोऽयं जगद्विस्मरणपूर्वकः भगवन्नामरूपलीलाधामस्मृत्याकारः कारामिमां विहिनस्ति—

स्मरो वावाकाशाद्भूयस्तस्माद्यद्यपि बहव आसीरन्नस्मरन्तो नैव ते कञ्चन शृणुयुर्न मन्वीरन्न विजानीरन् यदा वाव ते स्मरेयुरथ शृणुयुरथ मन्वीरन्नथ विजानीरन् स्मरेण वैपुत्रान्विजानाति स्मरेण पशून् स्मरमुपास्स्वेति।।१।।

स्मरः स्मरणम् आकाशाद्भूयः भूयानिति वक्तव्ये भूय इति निर्देशस्तु "व्यत्ययो बहुलम्" इति सूत्रेण क्लीबत्वम्। व्यत्त्ययात् कथं स्मरः उत्कृष्टतरः इत्युच्यते? कुत्रचित् बहवः जनाः आसीरन् तिष्ठेयुः यदि न स्मरेयुः तर्हि न शृणुयुः नवामन्वीरन् स्मरणमनना भाववन्तो भवेयुरिति भावः तदसत्वे च तदवन्तो भवेयुः स्मरेण स्मरणेनैव पुत्रान्पशून् भगवच्चरित्रादिकं विजानाति अतस्मरमेव ब्रह्मबुद्ध्या उपास्व।।श्रीः।।

फलश्रुतिमाह—

स यः स्मरं ब्रह्मेत्युपास्ते यावत्स्मरस्य गतं तत्रास्य यथाकामचारो भवति यः स्मरं ब्रह्मेत्युपास्तेऽस्ति

भगवः स्मराद्भूय इति स्मराद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति।।२।।

एवं स्मरमुपासीनो यावत्स्मरणगोचरं।
यथेच्छचारी स्याल्लोकादतो नैव प्रलोभितः।।
ततो भूयसि जिज्ञासाञ्चक्रे देवर्षिरादरात्।
सनत्कुमारोस्त्याहेति सोऽनुरुन्धे ब्रवीत्विति।। श्रीः।।

इति छान्दोग्योपनिषदि सप्तमाध्याये त्रयोदशखण्डे श्रीराघवकृपाभाष्यं संपूर्णम्।।

।।श्रीराघवः शन्तनोतु।।

चतुर्दशः खण्डः

अथाशां वर्णयति—

आशा वाव स्मराद्भूयस्याशेद्धो वै स्मरो मन्त्रानधीते कर्माणि कुरुते पुत्रांश्च पशूंश्चेच्छत इमं च लोकममुं येच्छत आशामुपास्स्वेति।।१।।

आशा स्मरादपि भूयसी उत्कृष्टतरा, यतोहि आशया इद्धः आशेद्धः आशया समृद्धमनाः स्मरः स्मरणशीलः मन्त्रानधीते परलोकाशयैव मन्त्रग्रामं पठति, एवं तद्विहितकर्माणि कुरुते आशयैव शुभपरिणामस्य पुत्रान्पशून् लोकं परलोकं येच्छीत अभिलषति। तस्मादाशामेव ब्रह्मबुद्ध्या उपास्व ब्रह्मभावनापन्ना सती एषैवाशा परिकलित श्रीमद्राघवेन्द्र शरन्मृगाङ्कमुखसंदर्शनाभिलाषा भग्नसकलभीषणभवपाशा नाशाय कल्प्स्यते दुरन्तभवबन्धननाशाय।।श्रीः।।

अथ फलश्रुतिमाह—

स य आशां ब्रह्मेत्यु पस्त आशयास्य सर्वे कामाः समृद्ध्यन्त्यमोघाः हास्याशिषो भवन्ति यावदाशाया गतं तत्रास्य यथाकामचारो भवति य आशां ब्रह्मेत्युपास्तेऽस्ति भगव आशाया भूय इत्याशाया वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति।।२।।

आशां ब्रह्मेत्युपासीनस्य आशयैव ब्रह्मभूतया सर्वे कामा मनोऽभिलषितपदार्थाः समृद्ध्यन्ति समृद्धाः भवन्ति। अमोघाः आशिषः सफलाः शुभाकांक्षाः एवम् आशागोचरलोकेषु तस्य यथेच्छगमनं, इतोऽपि न लोभवशीभूतो नारदस्ततोऽपि भूयसि जिज्ञासते। भगवः इत्यादिना सनत्सुमारः आशाया अपि समधिकं श्रेष्ठं किमपि अस्ति इति प्राह नारदः भगवान् तदेव ब्रवीतु इति प्रार्थयते स्म।

इति च्छान्दोग्योपनिषदि सप्तमाध्याये चतुर्दशखण्डे श्रीराघवकृपाभाष्यं संपूर्णम्।।

।।श्रीराघवः शन्तनोतु।।

पञ्चदशः खण्डः

अथ पञ्चदशप्राणतत्वं निरूपयति—

प्राणो वा आशाया भूयान्यथा वा अरा नाभौ समर्पिता एवमस्मिन्प्राणे सर्वꣳ समर्पितम्। प्राणः प्राणेन याति प्राणः प्राणं ददाति प्राणाय ददाति। प्राणो ह पिता प्राणो माता प्राणो भ्राता प्राणः स्वसा प्राण आचार्यः प्राणो ब्राह्मणः।।१।।

प्राणः आशाया अप्यपेक्षया प्राणः भूयान् उत्कृष्टतः यथा अराः रथस्य नाभौ समर्पिताः तथैव इदं सर्वं चराचरं प्राणे समर्पितमाश्रितं, प्राणेनैव जीवनभूतेन प्राणः प्राणति इति प्राणः, प्राणवान् याति संसारयात्रां करोति प्राणाः प्राणाय प्राणभृते ददाति

प्राण एव माता पिता भ्राताष्वसा आचार्यो ब्राह्मण: वात्सल्यपालकत्वरक्षकत्वममत्व-ज्ञानदातृत्वपूज्यत्व विशिष्ट: प्राण एव। प्राणमन्तरेण सकलव्यवहारानुपपत्ते:।।श्री:।।

प्राणत्वमुपपादयति—

स यदि पितरं वा मातरं वा भ्रातरं वा स्वसारं वाचार्यं वा ब्राह्मणं वा किञ्चिद्भृशमिव प्रत्याह धिक्त्वास्त्वित्येवैनमाहुः पितृहा वै त्वमसि मातृहा वै त्वमसि भ्रातृहा वै त्वमसि स्वसृहा वै त्वमस्याचार्यहा वै त्वमसि ब्राह्मणहा वै त्वमसीति।।२।।

यदि कदाचित् कोऽपि मातृपित्र्यादीन् प्रति भृशं कठोरमाह तदाधिक्कारे पितृहा इत्यादि कथयित्वा तं धिक्कुर्वन्ति। मातरं हन्ति इतिमातृहा प्राणवत्स्वेतेषु कठोरवाक्येऽपि तन्मरण समक्लेशो भवति।।श्री:।।

तद्व्यतिरेकपरिणाममाह—

अथ यद्यप्येनानुत्क्रान्तप्राणाञ्छूलेन समासं व्यतिषंदहेन्नैवैनं ब्रूयुः पितृहासीति नमातृहासीति न भ्रातृहासीति न स्वसृहासीति नाचार्यहासीति न ब्राह्मणहासीति।।३।।

अथ यदि उत्क्रान्तप्राणा उत्क्रान्त: प्राण: येषां तथाभूतान् प्राणरहितान् यदि शूलेनापि समासं छिन्नं छिन्नं कृत्वा व्यतिषंदहेत् व्यस्तं कृत्वा वा भस्मसात् कुर्यात्, तथापि कोऽपि मातृहा इत्यादि न कथयति तस्मान्मातृपित्रित्यादि निर्देश: प्राणसत्वएव।।श्री:।।

प्रकरणपरिशेषमाह—

प्राणो ह्येवैतानि सर्वाणि भवति स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नतिवादी भवति तं

चेद्ब्रूयुरतिवाद्यसीत्यतिवाद्यस्मीति ब्रूयान्नापह्नुवीत।।४।।

ह निश्चयेन प्राणः एव एतानि नामादीन्याशापर्यन्तानि भवति, एतान्यभिव्याप्य वर्तते। एतेषां तत्रैव गन्तव्यत्वात् तस्मात् प्राणमयानि एतानि पश्यन् प्राणमेव मुख्यं मन्वानः अतिवादी भवति वादं तत्वबुभुत्साम् अतिक्रामति तच्छीलः यदि कोऽपि एनम् अतिवादीतिक थयति तदायं न अपह्नुवीत न गोपयेत्।।श्रीः।।

इति च्छान्दोग्योपनिषदि सप्तमाध्याये पञ्चदशखण्डे श्रीराघवकृपाभाष्यं संपूर्णम्।।

।।श्रीराघवः शन्तनोतु।।

षोडशः खण्डः

एवं वादाति क्रमणकथां श्रुत्वा प्राणमेव परमं तत्वं मन्वानः आत्मानञ्चातिवादिनं विनिश्चित्वानो यदा तत्वबुभुत्सातो विरंस्यन् न कामपि जिज्ञासामाविश्चकार विनिश्चिकाय यत्—

ऋग्वेदादिनामैव नाम ब्रह्मेति विश्रुतं।
नामतोभूयसी वाणी वाचो भूयो मनः श्रुतम्।।
संकल्पो मनसो भूयान् चित्तं भूयस्ततः श्रुतम्।
विज्ञानं च ततो भूयस्तस्माद्ध्यानमुदाहृतम्।
भूयस्तस्माद्बलं भूयः अन्नं भूयः ततः स्मृतम्।
तत आपस्तु भूयस्य ततो भूयस्तु तैजसम्।।
आकाशस्तु ततो भूयः ततो भूयस्मरः स्मृतः।
आशा च भूयसी तस्मात् भूयान्प्राणः ततः श्रुतः।।
प्राण एव परं तत्वं नातोभूयोऽस्ति किञ्चन।
तं जानन्नतिवादी स्यात् जिज्ञासात उपारमत्।।

एवं शिष्यं नारदं सद्ग्राहयितुं षोडशं नामादि प्राणान्ततः सर्वतोऽपि सूक्ष्मतरं सत्यं समुपदिदिक्षुराह—

एष तु वा अतिवदति यः सत्येनातिवदति सोऽहं भगवः सत्येनातिवदानीति सत्यं त्वेव विजिज्ञासितव्यमिति सत्यं भगवो विजिज्ञास इति।।१।।

सनत्कुमारः प्राह-वत्स नारद! प्राणोपासनेनैव त्वमात्मानमतिवादिनं मन्यसे जिज्ञासातश्च व्यरंशीः नैतत्पर्याप्तम्। एषः यः पुरुषः अतिवदति स तु सत्येन सदेव सत्यं तेन परमात्मना समनुगृह्णता अतिवदति। तर्हि कथमुक्तं भवतैव यत् **एष एवं पश्यन् मन्वानोऽति वादी भवति** (छान्दोग्य उप० ७/१५/४) इति नाभिप्रायं मदीयं समवगतवान् भवान् सर्वेषां स्थूलानां नामाद्याशान्तानां पदार्थानामपेक्षया प्राणो भूयान्। किन्तु सत्यं ततोऽपि भूयः सर्वतो भूयिष्ठं सत्यम्। ननु पूर्वत्र सनत्कुमारेणैव प्राणतो भूयः सत्यमिति कथं नोक्तम्? अतिवादतो पूर्वेभ्यः चतुर्दशलोकेभ्यः प्रत्येकफलश्रुतिनिदर्शनावसाने नारदं निर्लोभं जिज्ञासमानं च निरीक्ष्य त्वरितमेव ततो भूयांसि तत्वानि प्राह किन्त्वतिवादेन लोभितं प्रशान्तजिज्ञासं प्रति सनत्कुमारः कथं ब्रूयात् **नापृष्ठः कस्यचित् ब्रूयात्** इति स्मृतेः। साम्प्रतं कथं ब्रवीति इति चेत्? अतिवादमेव परं लक्ष्यं मन्यमानस्य सत्यं समयागतस्य नारदस्य अवशिष्टैकमात्रसोपानातिक्रमस्य समधिकहितचिकीर्षया नारदकारुण्यवशंवदो भगवान् सद्गुरुमौलिमणिः सनत्कुमारः सत्यमेव परमं लक्ष्यं निर्दिधारयिषन् सत्येनेति अतिवाद हेतुं परं लक्ष्यमाह। तदा नारदो भग्नलोभसोपानः सत्यं जिज्ञासमान आह, भगवः अहं सत्येनैव अतिवदानि इच्छार्थे लोट्। सत्येन हेतुना अतिवदितुमिच्छामि इत्युक्तः सनत्कुमारः प्राह, तर्हि सत्यं विजिज्ञासितव्यम्, अधुना यावत् असत्यमेव जिज्ञासितवान् असि। तर्हि प्रथममेव नारदं कथं न न्यषेधीत् सनत्कुमारः? असत्यनिदर्शनेन सत्यं दर्शितं भवति शाखादर्शनेन चन्द्रदर्शनमत एव प्राह श्रीहरिः **उपायाशिक्षमाणानां बालानामुपलालनाः। असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते।।** (वाक्यपदीय

वाक्यकाण्ड) एवं समुदितजिज्ञासो नारदः प्रार्थयत्-भगवः। सत्यं विजिज्ञासे सत्यविषयिणीं जिज्ञासां करोमि। इति शब्दः जिज्ञासाकारसूचकः।।श्रीः।।

इति छान्दोग्योपनिषदि सप्तमाध्याये षोडशे खण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।

।।श्रीराघवः शन्तनोतु।।

सप्तदशः खण्डः

तस्यापि सत्यस्य जिज्ञासाया पूर्वं कानिचित् जिज्ञासितव्यानि सन्ति, यानि द्वाविंशखण्डं यावत् क्रमशो निरूपयिष्यन् तत्प्रथममाध्यममाह, न प्रथमं सत्यमेव प्रत्युत् तदन्तरङ्गंभूतं विज्ञानमुपपत्तिमाह—

यदा वै विजानात्यथ सत्यं वदति नाविजाननसत्यं वदति विजानन्नैव सत्यं वदति विज्ञानं त्वेव विजिज्ञासितव्यमिति विज्ञानं भगवो विजिज्ञास इति।।१।।

वै निश्चयेन यदा कोऽपि सदेव सत्यं सद्भ्यो हितं वा सत्यं सताम् इदं सम्बन्धिभूतं सेव्यं सत्यं वदति व्याख्याति **वदस्थैर्ये** निजहृदये स्थिरं करोति। तदा विजानन्नेव विज्ञानविषयं कुर्वन्नेव सत्यं वदति, अविजानन् यदि स्वयमेव परमात्मानं निजसेव्यत्वेन नाध्यवस्थिति नाध्यवस्यति तदा ततोऽसत्यभूतान् पावकादीनेव सत्यत्वेन व्याख्याति। यदा विजानाति त्रिवृत् करणमाध्यमेन त्रयाणां रूपाणामेकीभावम् अग्नित्वं व्यस्तेषु तेषु नाग्निन वा परमार्थतस्तानि इति विज्ञानविधिजानन्सत्यं वक्ष्यति। तस्मात् सत्यसहकारी सत्यपूर्वरूपं वा विज्ञानं विजिज्ञासितव्यं स तथैव प्रतिजानीते।।श्रीः।।

इति छान्दोग्योपनिषदि सप्तमाध्याये सप्तदशखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।

।।श्रीराघवः शन्तनोतु।।

अष्टादशः खण्डः

अथ मतेर्जिज्ञासितत्वं निरूपयति—

यदा वै मनुतेऽथ विजानाति नामत्वा विजानाति मत्वैव विजानाति मतिस्त्वेव विजिज्ञासितव्येति। मतिं भगवो विजिज्ञास इति।।१।।

यदा कोऽपि मनुते मननं करोति तदैव विजानाति विज्ञानवान् भवति, अमत्वा मननमकृत्वा न विजानाति न विज्ञानवान् भवति। अतो निश्चितं मत्वैव विजानाति मननं कृत्वैव विज्ञानवान् भवति। मतिस्त्वेव तु शब्दो हेत्वनुवादकः यतो हि विज्ञानं नामननपूर्वकं तस्माद्त्तदुपलब्धये मतिः विजिज्ञासितव्या विशेषजिज्ञासाविषयीकरणीया। नारदस्तथैव जिज्ञासां प्रतिजानीते। एवं सत्योपलब्धये विज्ञानं विज्ञानोपलब्धये च मननापरपर्याया मतिः अपेक्ष्यते।।श्रीः।।

इतिच्छान्दोग्योपनिषदि सप्तमाध्याये अष्टादशखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।

।।श्रीराघवः शन्तनोतु।।

एकोनविंशः खण्डः

अथ किं मूलिकामतिरित्याह—

यदा वै श्रद्दधात्यथ मनुते नाश्रद्दधन्मनुते श्रद्दधदेव मनुते श्रद्धा त्वेव विजिज्ञासितव्येति। श्रद्धां भगवो विजिज्ञास इति।।१।।

श्रद्धा नाम आस्तिकबुद्धिः यदा श्रद्दधाति लोकपरलोकयोः आस्तिकबुद्धिं करोति तैदव मनुते श्रुतविषयाणां मननं कुरुते, तदैव विजानाति। तदैव सत्यं वदति तदैवातिवादी भवति। अश्रद्दधत् अश्रद्धालुः न मनुते नैव श्रौतार्थमभ्यसति। किं तर्हि? श्रद्दधदेव

मनुते आस्तिकबुद्धिं कुर्वाण एव श्रुतमभ्यसति, तु अतो हेतोः मननोपलब्धये श्रद्धैव विजिज्ञासितव्या तथेति प्रतिज्ञाय तामेव जिज्ञासते।।श्रीः।।

इति छान्दोग्योपनिषदि सप्तमाध्याये एकोनविंशखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।

।।श्रीराघवः शन्तनोतु।।

विंशः खण्डः

अथ किं पूर्विका श्रद्धा इत्यत आह निष्ठैव श्रुतिविहितः देवतायां समाराध्यत्व निश्चयोनिष्ठा—

यदा वै निस्तिष्ठत्यथ श्रद्दधाति नानिस्तिष्ठञ्छ्रद्दधाति
निस्तिष्ठन्नेव श्रद्दधाति निष्ठा त्वेव विजिज्ञासितव्येति।
निष्ठां भगवो विजिज्ञास इति।।१।।

निष्ठाया पूर्वभावो हि श्रद्धा प्राप्तावपेक्ष्यते।
अनिस्तिष्ठन् कथं श्रद्धां कुर्यात् तस्माद्धि विद्धि ताम्।।

नारदः तामेव जिज्ञासते। एवं सत्योपलब्धये विज्ञानं, तदुपलब्धये मननं, तदुपलब्धये श्रद्धाः तदुपलब्धये च निष्ठेति क्रमः, निष्ठा नाम परमाराध्यदेवतायां मनसोऽवधान-निश्चयः।।श्रीः।।

इति छान्दोग्योपनिषदि सप्तमाध्याये विंशखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।

।।श्रीराघवः शन्तनोतु।।

एकविंशः खण्डः

अथ किं पूर्विका निष्ठा इति वर्णयति—

यदा वै करोत्यथ निस्तिष्ठति नाकृत्वा निस्तिष्ठति
कृत्वैव निस्तिष्ठति कृतिस्त्वेव विजिज्ञासितव्येति।
कृतिं भगवो विजिज्ञास इति।।१।।

कृतिर्नाम भगवन्नामरूपलीलाधामरससमुचितसत्सङ्ग सद्गुरोपसत्तिपूर्वकभागवत-धर्मानुष्ठानम्। यदा करोति तदैव निस्तिष्ठति, ज्ञेयवस्तुनि निश्चयपूर्वकमास्थावान् भवति। तदनुकूलमाचरणमकृत्वा न निस्तिष्ठति, तदभावे श्रद्धारहित: तन्मूलकमननाभावे विज्ञानविहितो: नैव सत्यं प्रतिपत्त्वं प्रभवति। ततो कृति: विजिज्ञासितव्या, नारदस्तथैव विजिज्ञासां प्रतिशृणोति।।श्री:।।

इति छान्दोग्योपनिषदि सप्तमाध्याये एकविंशखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।

।।श्रीराघवः शन्तनोतु।।

द्वाविंशः खण्डः

अथ कृति: किं मूलिका? इत्यत आह—

यदा वै सुखं लभतेऽथ करोति नासुखं लब्ध्वा करोति सुखमेव लब्ध्वा करोति सुखं त्वेव विजिज्ञासितव्यमिति सुखं भगवो विजिज्ञास इति।।१।।

यदा कोऽपि सुखं लभते तदैव करोति यदि भोजनेन क्षुच्छान्तिरूपं सुखं न लभेत तदा पामरोऽपि भोजनकरणे न प्रवर्तेत। अत: सर्वेऽपि प्राणी परिणामसुखार्थमेव कर्म करोति। एवम् अलब्ध्वा सुखं न कोऽपि कर्म करोति। किं तर्हि:? करणकालेऽपि सुखमनुभवति तत्समकालमेव कर्म करोति। अत: सर्वव्यापारसाधकं सुखमेव विजिज्ञासितव्यम्। एवं नारद: प्राह: भगवन् सुखं विजिज्ञासे इति जिज्ञासाप्रकार-सूचकम्।।श्री:।।

इति छान्दोग्योपनिषदि सप्तमाध्याये द्वाविंशखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।

।।श्रीराघवः शन्तनोतु।।

त्रयोविंशः खण्डः

एवम्—

पूर्वं कृतिस्ततो निष्ठा, ततश्श्रद्धा ततो मतिः।
ततो विज्ञानमित्याहुः ततः सत्यं समश्नुते।।
सुखार्थ वै कृतिर्नूनं, सुखं भूमा इहोच्यते।
सत्यादित्वचोभूमान्तं जिज्ञासाष्टकमीरितम्।।

एवं भूमैव सुखदिमेव जिज्ञासितव्यम्, इदमेव सत्यमे तस्मिन् ज्ञाते कृतिः तदनुनिष्ठाः तदनुश्रद्धाः तदनुमतिः तदनुविज्ञानं तदनुसत्यं सत्ये ज्ञाते न किमपि विजिज्ञासितव्यमवशिष्यते इति हार्दम्। अथ मुख्यं जिज्ञास्यं वृणोति अस्मिन् ज्ञाते सुखं ज्ञातं तदनु कृत्यादयः षट् स्वयमेव ज्ञाताः भविष्यन्ति। अतः तदेव निरूपयति—

यो वै भूमा तत्सुखं नाल्पे सुखमस्ति भूमैव सुखं भूमा त्वेव विजिज्ञासितव्य इति। भूमानं भगवो विजिज्ञास इति।।१।।

वै निश्चयेन यः भूमा अतिशयेन बहु यस्मिन्नकोऽप्यधिकतरः स एव निरस्त-समस्तदूषणोरणनिहतखरदूषणो लङ्काधिष्ठितविभीषणो मैथिलीहृदयभूषणो रघुवंशभूषणो भगवान् श्रीराम एव परब्रह्म भूमा, स एव सुखं भूम्नि निरवध्येव सुखम्। अल्पे सावधिके जगति सुखं न अस्ति न विद्यते। तस्मात् भूमैव सुखम्। अनुकूलवेद-नीयत्वात्, तु अत एव भूमा एव नान्यः जिज्ञासितव्यः जिज्ञासाविषयः कर्तव्यः। नारदः प्राहः भगवः भूमानम् एव निरतिशयं सुखं विजिज्ञासे विशेषेण ज्ञातुमिच्छामि विज्ञाते हि सत्यमनुभविष्यते तदाहं परमार्थतोऽति वदिष्यामि।।श्रीः।।

इति छन्दोग्योपनिषदि सप्तमाध्याये त्रयोविंशखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।

।।श्रीराघवः शन्तनोतु।।

चतुर्विंशः खण्डः

अथ भूम्नः स्वरूपं प्रतिपादयति—

यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति सभूमाथ यत्रान्यत्पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तदल्पं यो वै भूमा तदमृतमथ यदल्पं तन्मर्त्यम्। स भगवः कस्मिन्प्रतिष्ठित इति। स्वे महिम्नि यदि वा न महिम्नीति।।१।।

यत्र यस्मिन् भूम्नि साक्षात्कृते सति प्रमाता ततः अन्यन्न पश्यति, सर्वत्र भगवन्तमेव पश्यति यथोक्तं मानसे—

सरग नरक अपवर्ग समाना
जहं तहं दीख धरे धनुबाणा

—मानस २-१३१-७

यत्र च नान्यत् शृणोति श्रोता, यत्र च नान्यद्विजानाति तमेव विज्ञानविषयी करोति विज्ञाता, सः एव भूमा। अत्र क्रियापदेन कर्ता आक्षिप्यते। यत्र शब्दश्च सप्तम्यन्तः एवं द्रष्टादृश्यश्रोतृश्रव्यविज्ञातविज्ञेयविभागस्य स्पष्टं सिद्धत्वात् जीवब्रह्मणोर्द्वैतं स्वरूपतः सिद्धम्। अन्यच्छब्दः भूमावधिकव्यावृत्तिप्रतिषेधवाचकः, स एव भूमा यत्र द्रष्टा स एव दृश्यते, श्रोत्रा स एव श्रूयते, विज्ञात्रा स एव विज्ञायते। अथ ततो विलक्षणो यः जीवः तदल्पं तल्लक्षणं करोति। यत्र अन्यज्जानाति, अन्यच्छृणोति, अन्यत्पश्यति तदल्पम् इत्थं ततोदन्यदर्शन् श्रवणविज्ञानाभावयुक्ते परमात्मनि भूमत्वात् सुखं तद्वज्जीवे अल्पत्वाद् दुःखम् इत्यनेन जीवब्रह्मणोर्भिदा स्पष्टमुक्ता यदुक्तं द्वैते संसारेवन्धनं तन्न, वस्तुतस्तु द्वैते सेवकसेव्यभावेन भवबन्धनभञ्जनमेवं विधः यः भूमा निरतिशयसुखस्वरूपः तदमृतं मृतभिन्नम्। अथ एतद्व्यतिरिक्तं यत् अल्पं तत् मर्त्यं मरणधर्मोपेतं शरीरावच्छेदेन। एवं विज्ञातभूमास्वरूपः। नारद प्राहहे भगवः सः भूमासुखामृतस्वरूपः कस्मिन् प्रतिष्ठितकुत्र लब्धप्रतिष्ठस्तिष्ठति। इति इत्थं पृष्ठः सनत्कुमारः प्राह-स्वे महिम्नि निज महिममयविभूतिषु पृथिव्यादिषु भक्तहृदयेषु साकेतगोलोकवैकुण्ठादिषु। किं पूर्णतया उताहो अंशेन?

अंशेनेत्याह पूर्णतया नैव अत आह यदि वा पूर्णताभिप्रायेण तु न महिम्नि सर्वाधारत्वात् सः कुत्रापि न प्रतिष्ठितः, इति उत्तरसमाप्तिसूचना॥श्रीः॥

भगवन्महिमानमाह—

गोअश्वमिह महिमेत्याचक्षते हस्तिहिरण्यं दासभार्यं क्षेत्राणयायतनानीति नाहमेवं ब्रवीमि ब्रवीमीति होवाचान्यो ह्यन्यस्मिन्प्रतिष्ठित इति॥२॥

इह अस्मिन् लोके गोअश्वं गवाम् अश्वानां च समाहारः, हस्तिसहितं हिरण्यं सुवर्णंक्षेत्राणि भूमिपरिसराणि आयतनानि इत्येव महिमा आचक्षते। अहमेव न ब्रवीमि। यतो हि इमानि फल्गूनि भगवच्छरीराणि च अन्यः अन्यस्मिन् प्रतिष्ठितो भवति, गवादयोऽपि भगवद्रूपाणि कुत्र तर्हि? भक्तहृदयेषु भगवान् प्रतिष्ठापूर्वकं तिष्ठति॥श्रीः॥

इति छान्दोग्योपनिषदि सप्तमाध्याये चतुर्विंशः खण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्॥

॥श्रीराघवः शन्तनोतु॥

पञ्चविंशः खण्डः

अथो भूम्नः सर्वत्र सद्भावप्रतिपादनपुरःसरं देशविशेषप्रतिष्ठां निरष्यति। तर्हि किं स्वेमहिम्नीति श्रुतिवाक्यमप्रमाणमिति चेत्? न स्वे महिम्नीति रामकृष्णादिसगुणरूपाभिप्रायेण न महिम्नीति सर्वव्यापकत्वाभिप्रायेण इत्युभयं समञ्जसम्—

स एवाधस्तात्स उपरिष्टात्स पश्चात्स पुरस्तात्स दक्षिणतः स उत्तरतः स एवेदꣳ सर्वमित्यथातोऽहङ्कारादेश एवाहमेवाधस्तादहमुपरिष्टादहं पश्चादहं पुरस्तादहं दक्षिणतोऽहमुत्तरतोऽहमेवेदꣳ सर्वमिति॥१॥

स: सर्वत्र अधस्तात् नीचैः उपरिष्टात् उपरि पश्चात् पश्चिमे, पुरस्तात् पूर्वस्मिन् विभागे, दक्षिणतः दक्षिणस्यां दिशि, उत्तरतः उत्तरे वामे इदं सर्वं चराचरं स एव परमात्मा स्वस्वरूपभूतं निर्माय तिष्ठति, अतएव तस्य अहङ्कारादेशः अहमित्यादि।।श्रीः।।

अथ आत्मादेशं तद् ज्ञानफलं तद्विपर्ययं च प्राह—

अथात आत्मादेश एव आत्मैवाधस्तादात्मोपरिष्टादात्मा पश्चादात्मा पुरस्तादात्मा दक्षिणत आत्मोत्तरत आत्मैवेदꣳ सर्वमिति। स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नात्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः स स्वराड् भवति तस्य सर्वेषु लोकेषु कामचारो भवति। अथ येऽन्यथातो विदुरन्यराजानस्ते क्षय्यलोका भवन्ति तेषाꣳ सर्वेषु लोकेष्वकामचारो भवति।।२।।

एवमेव आत्मादेशः, आत्मशब्दः परमात्मपरः आप्नोति व्याप्नोति इति व्युत्पत्तेः। अधः ऊर्ध्वं चतसृषु दिक्षु सर्वत्र आत्मैव इदं चराचरम् आत्मैव आत्मनः परमात्मनः परिणामभूतम्। एवम् पश्यन् मन्वानः विजानन् श्रवणमननविज्ञानेन स्वातिरिक्तं सर्वत्र परमात्मभावं विभावयन् आत्मरतिः आत्मनि परमात्मनि रतिः रमणं यस्य तथा भवति, आत्मक्रीडः, आत्मना परमात्मना सह क्रीडति विहरति साकेतलोके यः सः आत्मक्रीडः आत्म इव मिथुनं सहचारी यस्य, अथवा आत्मा परमात्मा पुनश्चात्मा, जीवात्मा तयोः आत्मनोः मिथुनं मङ्गलमयमिलनसुखं यस्मिन् तथाभूतम्। एवम् आत्मानन्दः जीवात्मा परमात्मा संयोगजनितआनन्दः यस्मिन् तथाभूतः, स्वराट् स्वानां वशीकृतानामिन्द्रियाणां राजा, अथवा स्वेन परमात्मना हेतुभूतेन राजते दिव्यतः इति स्वराट्। तस्य सर्वेषु लोकेषु कामचारः ये एतद् अन्यत् विपरीतं जानन्ति ते अन्यराजानः अन्ये कामक्रोधादयः राजानः शासका येषां तथाभूताः, तेषां कुत्रापि कामगमनं न भवति, अत्रैव जायन्ते म्रियन्ते। तेषां लोकापि क्षय्याः पाप्मना कुठारभूतेन क्षेत्तुं शक्या ये लोकाः येषां ते क्षय्यलोकाः।।श्रीः।।

इति छान्दोग्योपनिषदि सप्तमाध्याये पञ्चविंशखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।

।।श्रीराघवः शन्तनोतु।।

षड्विंशः खण्डः

अथ आत्मज्ञानफलं वर्णयति—

तस्य ह वा एतस्यैवं पश्यत एवं मन्वानस्यैवं विजानत आत्मतः प्राण आत्मत आशात्मतः स्मर आत्मत आकाश आत्मतस्तेज आत्मत आप आत्मत आविर्भावतिरोभावावात्मतोऽन्नमात्मतो बलमात्मतो विज्ञानमात्मतो ध्यानात्मतश्चित्तमात्मतः सङ्कल्प आत्मतो मन आत्मतो वागात्मतो नामात्मतो मन्त्रा आत्मतः कर्माण्यात्मत एवेदꣳ सर्वमिति।।१।।

एवम् आत्मभूतस्य श्रवणमननविज्ञानवतः आत्मत एव आत्मनः सकाशादेव पूर्वोक्ताः प्राणाशास्मरतेजोजलान्नबलविज्ञानचित्रसङ्कल्पमनोवाङ्नाममन्त्रकर्माणि इदं सर्वम् आत्मनः सकाशादेव सम्पद्यते।।श्रीः।।

फलश्रुतिं वर्णयति—

तदेष श्लोको न पश्यो मृत्युं पश्यति न रोगं नोत दुःखताꣳ सर्वꣳह पश्यः पश्यति सर्वमाप्नोति सर्वश इति। स एकधा त्रिधा भवति पञ्चधा सप्तधा नवधा चैव पुनश्चैकादशः स्मृतः शतं च दश चैकश्च सहस्राणि च विꣳशतिराहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षस्तस्मै मृदितकषायाय तमसस्पारं दर्शयति भगवान्सनत्कुमारस्तꣳ स्कन्द इत्याचक्षते तꣳ स्कन्द इत्याचक्षते।।२।।

एवं पश्यतीति पश्यः सर्वमात्मत्वेन पश्यन् विद्वान् मत्युं प्राणवियोगंरोगान् त्रिविधांस्तापान्, दुःखतां प्रतिकूलवेदनीयतां न पश्यति। सर्वं पश्यति सर्वशः, सर्वेभ्यः

सर्वमाप्नोति, स एव एकधा जीवः भगवत्सेवकरूपः, त्रिधा पृथिवी जलतेजोमयः, पञ्चधा पञ्चभूतात्मा सप्तधा सप्तधात्ववच्छिन्नः नवधा भगवत्सेवोपयोगि-नवद्वारशरीरावच्छिन्नः पुनः एकादशः समनस्कदशेन्द्रियः सम्पन्नः भगवद्गुणगणा स्वादोपयोगिशरीरः, चकारेण बुद्ध्यहङ्कारचेतोऽवच्छिन्नः, स्मृतः भगवता निजपरिकरार्थं पौनःपुन्येन स्मृतिपथं नीतः। विंशतिः पञ्चभूतपञ्चप्राण पञ्चतन्मात्रपुरुषार्थचतुष्टये भगवद् भजनेति विंशतिसंख्यासम्पन्नः, शतं दशसहस्रं सहस्र नाडी संयुतः सहस्राणि अनन्तरूपाणि भगवत् सेवापयोगीनि बिभर्ति। भगवत् सेवार्थं शुद्धिक्रममाह-आहारशुद्धौ आहरन्ति मनः इति आहाराः इन्द्रियाणि, यथोक्तं गीतासु—

इन्द्रियाणां हि चरतां यन्मनोऽनु विधीयते
तदस्य हरति प्रज्ञां वायुर्नावभिवाम्भसि

गीता २-६७

तेषामिन्द्रियाणां शुद्धिः भगवत् सेवोपयोगेन, तथा हि— चक्षुषो रूपदर्शनेन श्रोत्रस्य कथाश्रवणेन, नासायाः भगवदर्पितपुष्पपरिमलघ्राणेन, त्वचः भगवत् पदपद्मस्पर्शनेन, रसनायाः भगवन्नैवेद्यभोजनेन, वाचो भगवद् गुणगानेन, हस्तयोः भगवन्निमित्तकर्मानुष्ठानेन, पादयोः भगवद् धामगमनेन, पायूपस्थयोः भगवद्भजनप्रतिबन्धक-मलमूत्रविसर्जनेन, मनसः भगवद् विग्रहध्यानेन, बुद्धेर्भगवद् गुणगणाध्यवसायेन, अहङ्कारस्य भगवत्स्वामित्वाभिमानेन, चेतसो भगवच्चरणारविन्दचिन्तनेन, एवमाहारशुद्धौ आहाराणां चतुर्विधानां भक्ष्यादीनां भगवन्नैवेद्यसमर्पणरूपशुद्धौ शास्त्रविहितभोजनप्रतिक्रिया जनितपुण्येन शुद्धौ सत्त्वरूपभावस्य शुद्धिर्जायते। अथवा सीदति परमात्मना सह तिष्ठति हृदये यः सः सत्त्वः जीवात्मा तस्य शुद्धिः सत्त्वशुद्धौ, ध्रुवास्मृतिः भगवद् भक्तिरूपा भवति अविच्छिन्नभगवच्चरणारविन्दध्यानस्मृतिलम्भे स्मृतेः लम्भः भगवच्चरणारविन्दसन्निधानमिति स्मृतिलम्भः तस्मिन् सति सर्वग्रन्थीनां त्रिगुणात्मिकानां विकारात्मिकानां च प्रमोक्ष्य सार्वकालिको विनाशः, इदं मृदितकषायाय मृदिताः विनाशिताः कषायाः कामक्रोधादयो यस्य सः मृदितकषायः तस्मै नारदाय तमसः अज्ञानस्य पारम् अज्ञानसागरस्य तटं भगवान् षडैश्वर्यसम्पन्नः सनत्कुमारः दर्शयति निदर्शयामास। सः सनत्कुमारः स्कन्दः स्कन्दयति कामक्रोधादीन् नाशयति इति स्कन्दः आचक्षते तं विद्वांसः कथयन्ति द्विरुक्तिरादरार्था अध्यायसमाप्तिसूचिका च।।श्रीः।।

यत्पादपाथोजपरागराग मधुव्रतो नारद आप्तबोधः।।
अज्ञानसिन्धोश्च जगाम पारं सनत्कुमाराय नमोऽस्तु तस्मै।।

इति छान्दोग्योपनिषदि सप्तमाध्याये षड्विंशखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।

इति श्रीचित्रकूटनिवासिसर्वाम्नायश्रीतुलसीपीठाधीश्वरश्रीमज्जगद्गुरुश्रीरामानन्दाचार्य श्रीरामभद्राचार्यमहाराजप्रणीते श्रीराघवकृपाभाष्येछान्दोग्योपनिषदिसप्तमाध्यायः सम्पूर्णः।

।।श्रीराघवः शन्तनोतु।।

अष्टमोऽध्यायः

।।प्रथमः खण्डः।।

प्रभुरपहतपाप्मा विज्वरो यो विमृत्यु-
र्नृपतिरथविशोको योऽजिघित्सोऽपिपासः।
गुणनिधिरभिरामः सत्यकामः स रामो
जयति जगदधीशः सत्यसङ्कल्प एषः।।

समस्तकल्याणगुणाभिरामः संसारपाथोधिविपद्विरामः।
लोकाभिरामोऽवतु पूर्णकामः सीताभिरामः सगुणः स रामः।।

निर्गुणं सगुणं ब्रह्म यं सदा श्रुतयो जगुः।
तमष्टमेष्टसंयुक्तं मुक्त्वा नांशरणं श्रये ।।

अथषष्ठसप्तमयोः श्रुतिभिरनेकाभिरुपपत्तिभिः नव कृत्वः श्वेतकेतूपदेशच्छलेन "तत्वमसि श्वेतकेतो" इति नवधा समाम्नातमन्त्रेण **"यो वै भूमा तत्सुखं"** (छ. उ. ७,२३,१) "यो वैभूमातदमृतम" (छा. उ. ७,२४,१) इत्यादि ब्रह्मस्वरूप प्रतिपादनपरैर्नैकश्रुतिसकलैः सत्यं ज्ञानमनन्तं ब्रह्म (तै.उ. २.४.१) इत्यादिभिश्च श्रुतिभिः यो निरस्तसमस्तहेयगुणप्रत्यनीकत्वेन समनन्तसमस्तप्रणतश्रेयोविधित्सु सौन्दर्यैश्वर्यमाधुर्यशौर्यसौशील्यसारव्यसौलभ्यवात्सल्यपतितपावनत्वदीनबन्धुत्वप्रभृतिलोकोत्तरदिव्यगुणानां नित्याश्रयत्वेन प्रत्यपादि। तमेव भूयोऽष्टमे तमालनीलं हृदयदेशे समाराध्यत्वेन महितप्रतिष्ठं प्रमाणयितुं श्रुतिरारभते प्रपाठकंमष्टमम्। ननु सर्वव्यापकस्य भगवतः आत्मैवाधस्तादात्मोपरिष्टादात्मापश्चादात्मा पुरस्तादात्मा दक्षिणत आत्मोत्तरत आत्मैवेदः सर्वमिति। (छान्दोग्य उपनिषत् ७.२५.२) इत्यादिश्रुतेः। सर्वमयस्य हृदयैकदेशपरिकल्पनायां श्रुतेरप्रामाण्यपूर्वकव्यापकत्व व्या घातापत्तिरिति चेन्न **"अणोरणीयान् महतोमहीयान् आत्मास्य जन्तुर्निहितोगुहायां तमक्रतुः पश्यति वीतशोको धातुः प्रसादान् महिमानमात्मनः"** (कठ १.२.२०) इत्यादिश्रुतेः। सकलविरुद्धधर्माश्रयत्वेन भगवत्येककालावच्छेदेन व्यापकत्वव्याव्यत्वेतिपरस्परविरुद्ध-धर्मद्वयवत्वनिधानत्वेनादोषात्। अत एव पठन्ति यत्सर्वतः पाणिपादंअशब्दमस्पर्श मरूपमव्ययं तदपि निजैश्वर्येण पुरुषाकृतिमणीयसीं विधाय जनानां हृदये तिष्ठति—

अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये संन्निविष्टः"

(कठ-१.३.१३)

अतएव श्रीभागवतेऽपि गर्भस्थपरीक्षिद्रक्षाप्रसंगे भगवान् बादरायणोऽपि संस्मरति—

अंङ्गुष्ठमात्रममलं स्फुरत्पुरटमौलिनं।
अपीच्यदर्शनं श्यामं तडिद्वाससमच्युतम्।।

(भागवत १.१२.८)

श्रुतिप्रमाणितयोरपि ब्रह्मणोनिर्गुणसगुणरूपयो: सगुणस्यैवान्यतरस्य रूपस्य निर्गुणाज्यायस्त्वं भूय: प्रतिपादितं श्रुतिभि:। अत एव पूर्वमणोरणीयान् अणो: जीवादपि अणीयान् अणुतर: सगुण: जीवस्य हृद्देशनिवासार्ह:, स एव निर्गुण: सन् महत: महत्तत्वादपि महद्भूताद्वा ब्रह्मण: महतोविष्णोर्वा महीयान् महत्तर: इति श्रुति:। गरीयस्त्वेन निर्गुणब्रह्मापेक्षया प्राथम्येन सगुणब्रह्मस्मृतिपथमनयत्। यत्तु प्रजजल्पु:प्रच्छन्नबौद्धा:- यद्यपि सत्सम्य-क्प्रत्ययैकविषयं निर्गुणं चात्मतत्वं तथापि मन्दबुद्धीनां गुणवत्वस्येष्टत्वात्सत्यकामादिगुणवत्वं च वक्तव्यम्- (छा.उ. अष्टम अध्याय खण्ड-१- शाङ्करभाष्य अवतरणिका) तत्तु दुराग्रहग्रहग्रस्तविक्षिप्तमस्तिष्कत्रिदोषजनितल्पितमिव नादरास्पदं हास्यास्पदञ्च सत्सम्यक् प्रत्ययैकविषयमिति अनावश्यकं वमता आत्मन्येव महात्मबुद्धि: समारोपि।

वस्तुतस्तु नेति नेतीति वादिनीनां श्रुतीनामप्यनिर्वचनीयतया यद्दुरवगमं तस्मिन् एकतरभावारोपणं प्रकामं दु:साहसं "निर्गुणं गुणभोक्तृ च" (श्वे. ४.१४ गीता- १३.१४) इति श्रुतिस्मृतिभ्यां समानाकारेणैव वाक्येन निर्गुणस्यापि भगवतो गुणवत्ता सुस्पष्टं प्रतिपादिता।

पूर्वं विचार्यतेऽयं पक्ष:, यत् किं नाम निर्गुणं सगुणञ्च निरूपसर्गस्य निर्गमनरूपेऽर्थे स्वीकृते निर्गता: गुणा: यस्मात् तन्निर्गुणं व्युत्पत्तावस्यां भगवति पूर्वगुणाश्रयत्वं सिद्धमेव विद्यमानस्यैव निर्गमनं भवति न ह्यविद्यमानस्यखपुष्पादेर्निर्गमनं साधयितुं शक्यं विधात्रापि, भगवति विद्यमानानां गुणानां निर्गमनं त एव चिकीर्षेयु:, ये भवादृशा: परमेश्वरं मन्यमानमनसो भवेयु: न वयं तादृशा: यदि चेत् निष्क्रान्तागुणायस्मात् तन्निर्गुणामिति त्युत्पत्तिश्चिकीर्षिता तथापि दोषस्तदवस्थ एव एकमेव वस्तु मस्तिष्कं नाम तदेव मुण्डं कथय कपालं वा समानमेवोऽभयं निर्गमननिष्क्रमणं, यदि चेत् कथञ्चित् साधुत्वविक्षयागमनक्रमणरूपार्थम् अविवक्षित्व सिसाधयिषसि तत्राऽपि गुणानां निष्क्रमणप्रयोजनं वाच्यम्। त्वन्मते ब्रह्मातिरिक्तसत्ताया: स्वीकाराभावे ब्रह्मातिरिक्तवस्तुव्यतिरिक्तेन ब्रह्मणोनिष्क्रम्य निर्गम्य वा कुत्र गमिष्यन्ति ते गुणा: तस्मात् अवध्यवधिमतो: साहचर्यानियमात् त्वन्मते च द्वित्वं कल्पयितुमशक्यत्वात्

पञ्चम्यर्थलापनं मसकस्य सुमेरूश्रृङ्गधारणमिव सर्वथैव दुष्करं कार्यम्। अपरश्च चेतनश्चेतनादग्च्छति पूर्वमिदं निर्धारणीयं त्वया यद्गुणाश्चेतना:जडा: वा यदि जडा: तर्हि निर्गन्तुं न शक्या:, नहि कुड्यं भूतलाद् गच्छति न वा वृक्षमलवालं जिहासति, यदि चेतनास्तर्हि समागतस्त्वत् प्राणघातको द्वैतवाद:, यस्मात् सिंहाद्गौरिव बिभेसि तस्मात् निजाधिष्ठितशाखाच्छेदमिव निजसिद्धान्तमेव कथं जिघांससि?

अथ चेत् गुणान्निष्क्रान्त: निर्गुण: इति व्युत्पत्तिं कृत्वा परमात्मन्येव निर्गमनादिकं साध्येत, तदप्यनुचितं, शब्दमर्यादाघातश्च शब्द प्रमाणका: वयं न त्वं द्वितीयया सह क्रान्ताद्यर्थे अत्यादय: समस्यन्ते, न तु निरादय: उपसर्गपाठे निर:पश्चात् अति: पठित: तथाहि निर अष्टम: अति: षोडश: इति द्विगुणितव्यवधानंअतिरादिरेषां ते अत्यादय:, अतिमारभ्य तत: पश्चात् पठिता: न चोपसर्गगणपाठ: अस्मदादिकृते इति वाच्यं "प्रादय:" इतिसूत्रे पाणिनिनैव उपसर्गपाठकरणस्य संकेतितत्वात्। यदि चेत् निरुपसर्ग: अत्यर्थक: इति चेत् तदपि न अतेर्निरियोग्यताविरहात् नहि वह्निना सिञ्चति इतिवाक्येन कोऽपि मन्दधीरपि वह्नौ शेकयोग्यतामध्यवस्यति का कथा त्वादृशस्य सर्वज्ञमानिमुकुटमणे:। अथ चेत् निरादय: क्रान्त्याद्यर्थे पंचम्या इति वार्तिकबलेन "कुगतिप्रादय:" इतिसूत्रेण समास:। एवं निष्कौषाम्बि: इति वत्, गुणेभ्यो निष्क्रान्तं निर्गुणामिति विगृह्येत तथापि दोषस्तदवस्थ एव स्वावधिकान्यनिष्ठप्रतियोग्यभावात्, सर्वदैव सर्वदेशवृत्तित्वाच्च त्वदीयं ब्रह्म कं हास्यति कं प्रति वा गमिष्यति इति चेत् साधुत्व प्रक्रियार्थमिदम्। न विवक्षितो निरर्थस्तदा तु पूर्ववदेवापत्ति: अवध्यवधिमत् वैलक्षण्यासंभवरूपानहि एक एव चैत्र: स्वस्मात् स्वं गच्छेत् अवध्यवधिमतो पार्थक्यस्य शास्त्रतो लोकानुभवतश्च सिद्धत्वात् न हि कोऽपि प्रयत्नशतैरपि निजद्रुतचण्डवेगभग्नभूरिभीषणश्रृङ्गमालं भागीरथीप्रवाहं प्रतीपयेत् तस्मात् भवत्स्वीकृतं भगवन् निर्गुणत्वं विडम्बनामात्रम्। एवं केन प्रकारेण त्वया निर्गुणशब्द: व्युत्पादयितुं शक्यते। ब्राह्मणो निर्धर्मत्वं, गुणरहितत्वं च शून्यवादिनां त्वया गृहीतम्। अथ श्रुतिभि: प्रतिपादितं निर्गुणकिमिति चेत्? "श्रृणु-निरुपमा: गुणा: यस्य तन्निर्गुणं" तथा च निगुणत्वनाम तुल्यधर्मावच्छिन्नानवच्छिन्नगुणप्रतियोगिक्-नित्याधारवत्वम्। ननु यदि भगवतो नोपमा निरुपमाश्च भगवदीया गुणा: तर्हि 'समुद्र इव गाम्भीर्ये धैर्येण हिमवानिव' इत्याद्यार्ष वाक्यानि व्याकुप्येरन्? इति चेन्न हीनोपमा एवैता:। अवाङ्मनसगोचरस्य परमेश्वरस्य कथंचित् साधारणोजनस्तत्वं बुध्येत इति कृत्वा बुबोधयिषया शाखाचन्द्रन्यायेन प्रादेशमात्रनिदर्शनमेतत्। अथवा इवार्थस्समुद्रादौ न तु भगवति, एवम् उपमानं कौसल्यानन्दवर्धन: उपमेया समुद्रादय: तद्यथा

सच सर्वगुणोपेता कौसल्यानन्दवर्धनः।
समुद्र इव गाम्भीर्ये धैर्येण हिमवानिव।।
विष्णुना सदृशो वीर्ये सोमवत् प्रियदर्शनः।
कालाग्निसदृशः क्रोधे क्षमया पृथ्वी समः।।
धनदेन समस्त्यागे सत्ये धर्म इवापरः।

—वा.रा.बा.का. १ (१७,१८,१९)

इति प्रघट्टके कथ्यमानम् उपमाष्टकम् उपमानेषु न्यूनतां द्योतयति, अथवा राममेव उपमानं मत्वा उपमेयैरुपमानोत्कर्षवर्धनं। तथाहि स कौसल्यानन्दवर्धनः इव गांभीर्ये समुद्रः, सोमवत् प्रियं दर्शनं यस्य तथाभूतः। अत्रापि अभेदो वत्यर्थः अर्थात् सोमाभिन्नं प्रियं दर्शनं दधानो भगवान्। यद्वा सोमः चन्द्रः अस्त्यस्य आभूषणरूपः सः सोमवान् भगवान् शंकरः सोमवते भगवते शंकराय प्रियं दर्शनं यस्य सः सोमवत् प्रियदर्शनः। यथोक्तं मानसकृद्भिः—

जासु सनेह सकोच बस राम प्रगट भे आइ।
जे हर हिय नयनन्हि कबहुँ निरखे नहि अघाई।।

(मानस २।२१०)

श्रीगीतरामायणेऽपि—श्रीगोस्वामितुलसीदासचरणाः आमतन्ति अहल्योद्धारप्रसंगे—

निगम अगम मूरति महेश-मति जुवति वराइ बरी।
सो मूरति भइ जान नयन पथ, इक टक ते न टरी।।

(गीतावली रामायण बा. ५७)

एवमेव धैर्येण, धैर्यरूपगुणेन स इव हिमवान् हिमाचलः, भगवत् सदृश इति भावः। विष्णुना सदृशो वीर्ये, वीर्ये पराक्रमे, विष्णुना असदृशः न समः प्रत्युत् तेन विष्णुरेव समः। उपमेयापेक्षयोपमानस्योत्कृष्टतरत्वात्। एवं क्रोधे क्रोधविषये कालाग्निरेव सदृशो येन स कालाग्नि सदृशः। क्रोधे- कालाग्निरेव कथंचित् एतद् सादृश्यं गन्तुं शक्नोति। एवमेव क्षमया अत्र विषयार्थेतृतीया। केन नियमेनेतिचेत् ''प्रकृत्यादिभ्यउपसंख्यानम्'' तथाहि क्षमया, क्षमाविषये पृथ्वीसमः पृथिवीसमासदृशा येन। अर्थात् क्षमायामेतस्य पृथ्वीव्यामेव सादृश्यं नैवान्यउपमेयः। धनदेन समस्त्यागे धनदेन इत्यत्र न तृतीया यत्तु त्यागे दाने धनदेन समः कुबेरेण सदृशः इति प्राचीनैर्व्याख्यातं तदसंगतं, कुबेरदानस्य कुत्राप्यप्रसिद्धे। अत एव रघुकाव्ये आक्रमणविधया कुबेराद्धनं समचीकमद्रधुः 'निष्क्रष्टुमर्थं चकमे कुबेरात्' (रघुवंशमहाकाव्य-५।२५) नहि दानशीलः

धनाध्यक्षो भवति लोके, आयमाध्यमेन धनसंचयनियुक्तःसन् कथं व्ययं कुर्यात्, आयप्राणं हि धनं, व्ययसारो हि दानी, तस्मात् धनदेन इति तृतीया असंगता। वस्तुतस्तु धनदस्य कुबेरस्य इनः स्वामी इति धनदेनः शंकरः स एव समः येन अर्थात् त्यागे श्रीरामेण कथंचित् धनदस्य स्वामी शंकर एव सादृश्यं घटयितुं शक्नोति नान्यः। तथोक्तं विभीषणशरणागतिप्रसंगे श्रीमानसे श्रीमद्गोस्वामितुलसीदासर्यैः—

जो सम्पति शिव रावनहिं दीन्ह दिये दश माथ।
सोई सम्पदा विभीषणहिं सकुचि दीन्ह रघुनाथ।।

(मानस ५।४९।ख)

एवमेव सत्ये सैव अपरः द्वितीयः कः? इति चेत् धर्म एव। एवं सर्वाः उपमाः परमात्मानमनिर्वचयीयतयैव बोधयन्ति। अनिर्वचनीयत्वं च यत् किंचित् वक्तुमर्हत्वेसति निःशेषेण वक्तुमनर्हत्वम् इत्यसकृदवोचाम इति समञ्जसम्। तस्मात् ''न तस्य प्रतिमा अस्ति यस्य नाम महद्यशः (श्वेताश्वतर ३।९)'' इति श्रुतिरपि मानम्। यद्वा निरस्ताः दूरीकृताः गुणाः भक्ताननुकूलाः क्रौर्यादयो येन तन्निर्गुणम्। भगवान् तानेव गुणानालम्बते यैर्भक्तानां सुखावहता। अथवा निरुपद्रवाः गुणाः यस्य तन्निर्गुणं, भगवदीय गुणेषु न कोऽप्युपद्रवः अत एव परमहंसपरिव्राजकाचार्यानप्याकर्षन्ति।

हरेर्गुणाक्षिप्तमतिर्भगवान् बादरायणिः।
अध्यगान् महदाख्यानं नित्यं विष्णुजनप्रियः।।

(भाग. १।७।११)

महदाख्यानमित्यत्र महतां महापुरुषाणां भगवत् कृपाभाजनीभवताम् आख्यानानि यस्मिन् तत् इति समासः करणीयः। एवमेव जयदेवोऽप्याह 'प्रसन्नराघवे'—

'कवीनां को दोषः स च गुण गणानामवगुणः।।

अथवा निःशेषाः गुणाः यस्मिन् तन्निर्गुणं, समस्ताः गुणाः भगवन्तमेव समाश्रयन्ते ''निर्गुणं मां गुणाः सर्वे भजन्ते निरपेक्षकम्'' (भागवत ९।४/६७)। निःशेषत्वं च प्रकटितसमग्रमहिमत्वेन अन्यत्र गुणाः सामग्र्येण न तिष्ठन्ति, भगवन्तं विना, क्षोदिष्ठानां जीवानां सामग्र्येण तेषां धारणे सामर्थ्याभावात्। अथवा निःसामान्याः निरस्तसाधारण्याः गुणाः यस्मिन् तन्निर्गुणं भगवतो लोकोत्तरगुणगणनिधानत्वात्, साधारणसौन्दर्यमिव किं भगवतोऽपि? यद्दृष्ट्वा स्वयमेव विसिस्मिये। तथोक्तं श्रीउद्धवेन भागवते—

यन्मर्त्यलीलौपयिकं स्वयोगमायाबलं दर्शयता गृहीतम्।
विस्मापनं स्वस्य च सौभगर्द्धेः परंपदं भूषणभूषणाङ्गम्।।

(भागवत ३।२।१२)

यथोक्तं मानसेऽपि श्रीभुशुण्डिना—

रूप राशि नृप अजिरबिहारी। नाचहि निज प्रतिबिम्ब निहारी।।

(मानस ७।७७।८)

अथवा निरस्ता अन्तः सीमा विनाशो वा यैस्ते निरन्ताः, निरन्ताः गुणाः यस्य तन्निर्गुणम्। भगवतः गुणानामन्तो नास्ति ''विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममेरजश्ंसि'' ऋग्वेद विष्णु सूक्ते

श्रीमानसेऽपि,

''राम अनन्त अनन्त गुणानि जनम करम अनन्त नामानि''

मानस ७-५२-३

अथवा निरन्तराः भगवता सह व्यवधानशून्यतया संयुक्ताः निरन्तराः निरस्तभेदाः गुणाः यस्मिन् तन्निर्गुणं, गुणाः क्षणमपि भगवन्तं न जहति तदतिरिक्तं तेषामधिष्ठा नाभावात्। एवं भगवतः गुणोऽपि प्रत्येकं भगवद्रूप एव गुणगुणिनोश्च समवायः सर्वतन्त्रसिद्धः, वात्सल्यादयः भगवन्तं न जिहासन्ति भगवानपि तान् न जिहासति। अथवा निरतिशयाः गुणाः यस्य तन्निर्गुणम्, अथवा निश्चिताः प्रणतोद्धारकृतनिश्चयाः गुणाः यस्य तन्निर्गुणं भगवतः गुणैरेव पतितपावनत्वादिभिः भक्तानां उद्धारः क्रियते। अथवा निःश्रेयस्कराः गुणाः यस्मिन् यस्य वा तन्निर्गुणं भगवद्गुणगणैरेव श्रेयो विधीयते श्रेयोऽर्थिनाम्। अथवा निर्लीनाः गुणाः यस्मिन् तन्निर्गुणं सर्वे गुणाः सौन्दर्यादयः भगवत्यवनिर्लीयन्ते। अथवा निष्क्रान्ताः निर्गता वा भक्तकल्याणार्थं गुणाः यस्मात् तन्निर्गुणं भक्तं भगवद्गुणाः यत्किञ्चित्तया समागत्य सनाथयन्ति एवं भूतं निर्गुणं ब्रह्म न तु गुणैर्विहीनं ''निर्गुणं गुण भोक्तृ च'' इत्यत्र निस्तिरोहिता भगवतो गुणाः अत एव निर्गुणत्वमाहु। एवं गुणानामदर्शनेन गुणवर्जितमित्याचक्षते। वस्तुतस्तु निर्गुणः सगुणयोर्मध्ये न कश्चन भेदः स च भाति यथा परिस्थिति गुणानां तिरोधानसमवधानवैलक्षण्येन न हि एकस्मिन्काल एव भगवदनन्तगुणानां प्राकट्येन जीवकल्याणं भवति। न वा शक्यास्ति प्रकटयितुं भगवत इव तेषामप्यनन्तत्वात्। यथा

मिथिलामण्डपे सौन्दर्यं प्राकट्यं रसावहम्। एवं रुद्रत्वप्राकट्यं क्लेशवहं युद्धकाले त्वेतद् विपरीतम् अतः यो गुणस्तिरोहितस्तं प्रति निर्गुणत्वं भगवतः, यश्च प्रकटितमाहात्म्यश्च समुपस्थापितः तं प्रति सगुणत्वं एवमुभयं समञ्जसम् तस्मान्निर्गुणं सगुणाज्यायः इति कथनमनुचितम्। वस्तुतस्तु एकमेव ब्रह्म रूपद्वयावच्छिन्नं, अतः आह गोस्वामी तुलसीदासः—

अगुण हि सगुण हि नहि कछु भेदा। गावहिं मुनि पुरान बुध वेदा।
अगुण अरूप अलख अज जोई। भक्त प्रेम वश सगुण सो होई।।
जो गुणरहित सगुण सो कैसे। जल हिम उपल विलग नहिं जैसे।।

(मानस १-११६-१-२-३)

वस्तुतस्तु निर्गुणात् सगुणं ज्यायः भक्तकल्याणकरत्वात् सुलभत्वात् शुभगत्वाच्च इत्येव निश्चितम्। श्रीगीतासु भगवताः द्वादशाध्यायस्य प्रारम्भे तथाहि अर्जुनेन विश्वरूपदर्शनानन्तरम् अव्यक्तसगुणपासकयार्मध्ये कतरः श्रेयान्?

एवं सतत युक्ता ये भक्तास्त्वां पर्युपासते।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः।।

तदा भगवता निर्गुणोपासकापेक्षया। सगुणोपासकस्यैव उत्कृष्टा प्रतिपादिता। मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते।।

श्रद्धया परयोपेतास्ते मे युक्ता तमा मताः।। गीता १२-२

एवमेव भगवता निर्गुणोपासने क्लेशोऽपि प्रादर्शि दुर्लभत्वं च प्रतिपादितम् देहवताम्।

क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते।। गीता १२-५

किं बहुना विदेहोऽपि योगिराज जनकः समाकृष्टो बभूव सगुणसाकारकौसल्याकुमार-श्रीराम दर्शनेन। यथोक्तं मानसे स्वयं जनकराजेनैव—

''इन्हहि विलोकत अति अनुरागा।
बरबस ब्रह्म सुखहि मन त्यागा।।'' मानस १-२१६-५

यत्तु विजल्पितमात्मतत्वं निर्गुणमेव गुणास्तुमायिकाह तन्महदनुचितं नहि मिथ्या भूतमाया परमप्रकाशरूपं ब्रह्म सवलयितुं शक्नोति। अतो भगवत आयुधभूषणवसनानीव तल्लोकोत्तरगुणा अपि दिव्याश्चिन्मया नित्याश्च। एवं भजनीय तत्त्वं सगुण ब्रह्मैव वस्तुतो गुणानन्तरेण परमात्मनोऽपि न तादृशि शोभा या भक्त नयन लोभिनी। अत: मानसकार: श्रीराघवेन्द्रवचनछलेन चतुर्थे सोपाने सुस्पष्टमाह—

फूले कमल सोह सर कैसा।
निर्गुण ब्रह्म सगुण भा जैसा।। मानस ४-१६-२

यथा सारसं कमलं निर्मलेन परिमलेन निरस्त सकलमलेन भ्रमरमावर्जयति स्वाभिमुखं तथैव भगवतो गुणोऽपि कमलमिव निज प्रभावेण भ्रमरमेव त्यक्त गृहां परिभ्रमन्तं सन्तं झटित्यावर्जयति तटागाभिमुखं एवमर्थं समर्थयति रावणवधमहाकाव्ये भट्टी—

न तज्जलं यन्न सुचारुपङ्कजम्, न पङ्कजं तद्ययदलीनषट्पदम्।
न षट् पदोऽसौ न जुगुञ्ज यः कलम्, न गुञ्जितं तन्न जहार यन्मनः।।

यदुप्युक्तं "तथापि मन्दबुद्धीनां गुणवत्त्वस्येष्टत्त्वात्सत्यकामादिगुणवत्त्वं च वक्तव्यम्" इति तदप्यसङ्गतम्। नहि मन्दधीयस्तोषयितु श्रुतीरलीकं वदिष्यति अनेन तस्यामप्रामाण्यापत्ते: भगवत: सगुणत्वप्रतिपादनाय सहस्रश: श्रुतय: बद्धपरिकरा: तर्जयन्ति प्रक्षन्नशून्यवादिन: अनुपमेव अपहतपाप्मादय: अष्टौ गुणा: उच्यन्ते। किमिमेवऽलिका: किं काऽपि माता विषाय स्पृह्यन्तं बालं तं तोषयितुकामा अनिष्टं कालकूटं पायिष्यति, गुणवत्त्वं यदनिष्टं अभविष्यात् तदा भूतार्थवादिनी श्रुति: तान् नावक्ष्यत्। यदुक्तं मन्दधीनां गुणवत्वस्येष्टत्वात् तत्तु महदनर्थावहम्। भगवतो गुणवत्त्वं तु सकलपरमहंस परिव्राजकपरमाचार्यवीतरागयोगीन्द्रवर्यश्रीमच्छुकाचार्यपादानामपि इष्टम्। तद्यथा—

आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे।
कुर्वन्त्यहैतुकीं भक्तिमित्थंभूतो गुणोहरि।। भागवत् १-७-१०

परिनिष्ठितोऽपि नैर्गुण्य उत्तमश्लोकलीलया।
गृहीतचेता राजर्षे आख्यानं यदधीतवान्।। भागवत २-१-९

हन्त शुकाचार्यसदृशा: परमहंसपरिव्राजकमुकुटमणय: भवत्गुरूणामपि पूज्यचरणा: श्रीराघवमाधवरूपसगुणब्रह्मगुणगणपीयूषपानलम्पटधियोमन्दीधय: त्वमेव महात्मशिरोमणि:

बुद्धिवाचस्पति: नहि ते दोष:। अह: कलिकालस्य महिमा एवं गुणवत्वं शास्त्रसिद्धं सगुणं ब्रह्मैव भजनीयं तथा चाह अत्रत्यैव करुणहृदया माताश्रुति:। पश्यनिर्मत्सरस्तां

श्यामाच्छबलं प्रपद्ये शबलाच्छ्यामं प्रपद्येऽश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात्प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंम्भवामीत्यभि-सम्भवामीति।। (छान्दोग्य उपनिषद् ८.१३.१)

अस्यान्वय: अहं श्यामात् शबलं प्रपद्ये शबलात् श्यामं प्रपद्ये अश्व: रोमाणि इव पापं विधूय राहो मुखात् प्रमुच्य चन्द्र इव अकृतं शरीरं धूत्वा कृतात्मा ब्रह्मलोकं अभिसंभवामि अभिसंभवामि इति।

एतस्य शब्दार्थ:—अहं साधक: श्यामात् नीलजलधरश्यामं सीताभिरामं श्यामवर्णाविच्छिन्नं श्रीरामं प्रसाद्य शबलं जगदवच्छिन्नं त्वदुक्तं निर्गुणं ब्रह्मशबलत्वं च तव दु:खबोधत्वेन स्वाश्रयोपकाराक्षमत्वेन पुनर्शबलात् शबलं निर्गुणं ब्रह्मविहाय श्यामं मोक्षेच्छामपि त्यक्त्वा श्यामं निकामश्यामसुन्दरं समरसमितदसकंधरं नव जलधरबन्धुरं धनुर्धरं श्रीरामं प्रपद्ये शरणं ब्रजामि। यत्तुशमशब्दस्य त्वया हार्दमिति व्याख्यायते, तत्तु तावकीनं हठप्रलपितं नहि कोऽपि मन्दधी: सागरशब्दस्य कमलरूपार्थं मन्येत। विना त्वां पंडितमानिनं, एवं श्यामाङ्ग श्रीरामं प्रपन्न: अश्वैव रोमाणि पापं विधूय राहो: मुखात् चन्द्र इव विवेकतो भग्नसिरस: संसारात् प्रमुच्य मुक्तो भूत्वा कृतात्मा कृतकृत्य: शरीरं पाञ्चभौतिकं धूत्वा समाप्य ब्रह्मलोकं साकेतं अभिसंभवामि संपद्ये। अनेन त्वदुक्त निर्गुणवादमहाटवी दवाग्निनेव विभूतिभूषणभूमिसात् कृता।

अथ प्रकृतमनुसराम:—

हरि: ॐ अथ यदिदमस्मिन्ब्रह्मपुरे
दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्न-
न्तराकाशस्तास्मिन्यदन्तस्तदन्वेष्टव्यं
तद्वाव विजिज्ञासितव्यमिति ।।१।।

हरि: नीलपीतश्रीसीतारामो शरीराभावच्छिन्नसगुणब्रह्मरूप: सीताभिराम श्रीराम:, ॐ भक्तरक्षणसमर्थ: निर्गुण ब्रह्म वा, इति द्वयो: ब्रह्मणो स्मरणं कृत्वा हृदयोपासना वर्णनं प्रारभ्यते। इयमेव दहर विद्यापि कथ्यते, अथ सप्तमाध्याये निष्कर्षरूपेण प्रतिपादितस्य भूम्न: कुत्रोपासना क्रियताम्? इति जिज्ञासापामाह: स्वयं कारुणिक श्रुति: प्रच्छन्नस्य पत्युस्थानं हितचिकीर्षया पुत्रेभ्यो मातेव अस्मिन् एतस्मिन् शास्त्र सद्गुरु कृपापूते ब्रह्मपुरे ब्रह्मनिवासाय समुचितपुरे नवद्वारात्मके शरीरे पूरोपमे आत्ममाहाराजा शासिते

यत् योगप्रसिद्धं इदं एतत् अतिसन्निकृष्टं दहरं स्वल्पाकारं पुण्डरीकं तन्मयशक्यतावच्छेदका रूप:, पुण्डरीकमयं कमलनिर्मितं इति भाव:। वेश्म गृहं परमात्ममन्दिरं तस्मिन् य: आकाश: अन्तरा कमलगृहमध्ये विराजमान: आकाश इव श्याम: **''आकाश शरीरं ब्रह्म''** तैत्तरीय उ.२.५।

तदन्त: तस्य कमलगृहस्य मध्ये अन्वेष्टव्यं क्लीवत्वं छान्दसाल्लिङ्गव्यत्ययात्। अन्वेष्ठव्य इति भाव:। नान्यत्र गन्तव्यं एकाग्रमनसा हृदयकमले भगवान् अन्वेष्टव्य:, आकाश श्याम तदेव विजिज्ञासितव्यं इति स एवं विषयजिज्ञासा करणीया इति ।।श्री:।।

अथ गुरुशिष्यप्रश्नपरम्परया विषयं सरलं करोति—

तं चेद्ब्रूयुर्यदिदमस्मिन्ब्रह्मपुरे दहरं
पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशः
किं तदत्र विद्यते यदन्वेष्टव्यं तद्वाव
विजिज्ञासितव्यमिति स ब्रूयात्।।२।।

एवं हृदये पुण्डरीकगत परमात्मानं जीवात्मा कथं पश्येत् इति के शिष्या: ब्रूयु: पृच्छेयु: यदस्मिन्ब्रह्मपुरे शरीरे अल्पतरं पुण्डरीकं तत्राप्यल्पतर: आकाश: तस्याऽपि अन्त: किं वर्तते? यत् अन्वेष्टव्यं यस्यान्वेषणम् कार्यम्?।।श्री:।।

अथ तदन्त: किं विद्यते? इत्यत आह—

यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश उभे
अस्मिन्द्यावापृथिवी अन्तरेव समाहिते उभावग्निश्च
वायुश्च सूर्याचन्द्रमसावुभौ विद्युन्नक्षत्राणि यच्चास्येहास्ति
यच्च नास्ति सर्वं तदस्मिन्समाहितमिति ।।३।।

अयं आकाश: यावान् यत्प्रमाणक: तथैव हृदयाकाशेऽपि अस्मिन्नेव द्यावापृथिवी स्वर्गलोको मर्त्यलोक: अग्नि: वायु: सूर्य: चन्द्रमा नक्षत्राणि ग्रहा: इह लोके यत् अस्ति विद्यते, य: नास्ति परोक्षं वर्तते तत्सर्वं अस्मिन् समाहितं इति तात्पर्यम्।।श्री:।।

भूय: प्रश्नपरिशेषमाह—.

तं चेद्ब्रूयुरस्मिꣳश्चेदिदं ब्रह्मपुरे
सर्वꣳसमाहितꣳसर्वाणि च भूतानि सर्वे च

कामा यदैतज्जरा वाप्नोति प्रध्वंसते
वा किं ततोऽतिशिष्यत इति।।४।।

तं शिष्याच्चेद् पृच्छेयुः यद् अस्मिन्ब्रह्मपुरे आकाशसहितानि सर्वाणि भूतानि सर्वे कामाः इदं सम्पूर्णं प्रपञ्च समाहितम्। तर्हि यदा इदं शरीरं जरा आप्नोति वृद्धावस्था भवति एवं प्रध्वंसते नष्टं जायते तर्हि किं अतिशिष्यते किं अवशिष्टं भवति।।श्रीः।।

अथ शिष्यस्य प्रश्नोत्तरं ददाति—

स ब्रूयान्नास्य जरयैतज्जीर्यति न वधेनास्य हन्यत एतत्सत्यं ब्रह्मपुरमस्मिन्कामाः समाहिता एष आत्मापहत पाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पो यथा ह्येवेह प्रजा अन्वाविशन्ति यथानुशासनं यं यमन्तमभिकामा भवन्ति यं जनपदं यं क्षेत्रभागं तं तमेवोपजीवन्ति।।५।।

सः ब्रूयात् इत्थमुत्तरयेत् यत् अस्य शरीरस्य जरया इदं न जीर्यते आकाशनामकं ब्रह्म अस्य वधेन शरीरस्य नाशेनापि इदं लौकिकशरीरपरिच्छेदशून्यतया न हन्यते न हिंस्यते, एतत् सत्यं परमार्थतः ब्रह्मपुरं ब्रह्ममन्दिररूपां अर्थात् स्वयमेव मन्दिरं स्वयमेव देवता, एषः आत्मा परमात्मा अपहत पात्मा अपहतानि पाप्मानि प्रणतानां पातकनि येन तथा भूतः विजरः जरारहितः पापक्षये तदभावात्, विमृत्युः मृत्युरहितः विजरः निजचरणविमुखानां जरा यस्मात् सः विजरः, विमृत्युः विमुखानां विद्विषां च मृत्युरूप, विशोकः विगतशोकः विद्विड् शोकश्च, अविजिधत्सः न विशेषम् अत्तुं इच्छति अथवा अविजिधित्सः नैव विमुखैर्दत्तं अत्तुमिच्छति, अपिपासः प्रीतिरहित दत्तं जलं न पातुमिच्छति, अथवा स्वयमेव क्षुप्तिपासेच्छारहितः। भक्तदत्तं अश्नाति पिवति च अत एव

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः।।

(गीता ९-२६)

इति भगवत् वचनं सङ्गच्छते।

सत्यकामः सत्याः अमोघाः कामाः इच्छाः यस्य सः सत्यकामः अथवा सद्भ्यो हितं सत्यं तदेव कामयते। सत्य सङ्कल्पः सत्यः अवितथसङ्कल्पः अद्ध्यवशायः यस्य

एवं यथा प्रजा: राजा अनुशास्ति तथैव सर्वा: प्रजा: सर्वकामा: इमं अन्वाविशन्ति प्रविशन्ति।

यथानुशासनम् अनुशासनमनतिक्रम्य यं यं अन्तं प्रान्तं जनपदं वा कामयन्ते तद् तद् व्रजन्ति तमेवमात्मानं आश्रित्य उपजीवन्ति तिष्ठन्ति॥श्री:॥

परिशेषगतिमाह—

तद्यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयते तद्य इहात्मानमननुविद्य व्रजन्त्येतांश्च सत्यान्कामांस्तेषां सर्वेषु लोकेष्वकामचारो भवत्यथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामांस्तेषां सर्वेषु लोकेषु कामचारो भवति॥६॥

तत् तस्मात् यथा इह अस्मिन् लोके कर्मचित: कर्मभि: समर्जित: लोक: अदृष्ट-परिणाम: क्षीयते नश्यति तथैव अमुत्र स्वर्गलोके पुण्येन जित: पुष्पजित: पुण्य प्राप्त: लोक: स्वर्गाख्य क्षीयते भोगावशानो भवति। अत: ये आत्मानं परमात्मानं अननुविद्य अज्ञात्वा एतानि सत्यान् कामान् व्रजन्ति तेषां सर्वेषु लोकेषु कामचारो न भवति। ये च इममात्मानं अनुविद्य विदित्वा लब्ध्वा वा व्रजन्ति तेषां सर्वेषु लोकेषु कामचारो भवति स्वेच्छाचरणं जायते॥श्री:॥

इति छान्दोग्योपनिषदि अष्टमाध्याये प्रथमखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।

॥ श्रीराघवः शन्तनोतु ॥

द्वितीयः खण्डः

अथ दहराख्यहृदयकमलब्रह्मोपासना फलमाह—

स यदि पितृलोककामो भवति सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्ति तेन पितृलोकेन सम्पन्नो महीयते॥१॥

स: दहर ब्रह्मोपासक: यदि पितृलोककाम: पितृलोकं कामयते इति पितृलोककाम तथा भूतो भवति, तर्हि अस्य सङ्कल्पेनैव पितर: अर्यमादय: समुपतिष्ठन्ति, तं सेवमानास्तत्तनयन्ति स: पितृलोकेन सम्पन्न: भवति पश्चाद् ब्रह्मैव प्राप्नोति॥श्री:॥

अथापर फलमाह:—

अथ यदि मातृलोककामो भवति सङ्कल्पादेवास्य मातरः
समुत्तिष्ठन्ति तेन मातृलोकेन सम्पन्नो महीयते।।२।।

मातृलोककामं गौर्यादयो लोकमातरः नयन्ति तं मातृलोकेन सम्पन्नः स महीयते ब्रह्मोपासनमहिमानं अनुभवति।।श्रीः।।

अथ यदि भ्रातृलोककामो भवति सङ्कल्पादेवास्य भ्रातरः
समुत्तिष्ठन्ति तेन भ्रातृलोकेन सम्पन्नो महीयते।।३।।
अथ यदि स्वसृलोककामो भवति सङ्कल्पादेवास्य स्वसारः
समुत्तिष्ठन्ति तेन स्वसृलोकेन सम्पन्नो महीयते।।४।।

ब्रह्मज्ञस्य जगतीतले कुटुम्बेष्वासक्तस्य परलोके तत्तत् सुखं दातुं तद्रूपा देवताः समुपतिष्ठन्ति, यथा भ्रातृलोककामस्य भ्रातृरूपाः देवताः, स्वसृलोककामस्य स्वसृभूताः देवताः समुपतिष्ठन्ति।।श्रीः।।

अथ यदि सखिलोककामो भवति सङ्कल्पादेवास्य सखायः
समुपतिष्ठन्ति तेन सखिलोके सम्पन्नो महीयते।।५।।
अथ यदि गन्धमाल्यलोककामो भवति सङ्कल्पादेवास्य
गन्धमाल्ये समुत्तिष्ठस्तेन गन्धमाल्यलोकेन सम्पन्नो महीयते।।६।।

एवमेव एतस्य सखिलोककामस्य मित्रलोकं जिगमिषतः सङ्कल्पबलेनैव देवाः सखायः भूत्वा समुपतिष्ठन्ति। एवं गन्धमाल्यमिच्छतः एतत् सङ्कल्पेन निर्मिते गन्धमाल्ये समुपस्थिते भवतः।।श्रीः।।

अथ यद्यन्नपानलोककामो भवति सङ्कल्पादेवास्यान्नपाने
समुत्तिष्ठतस्तेनान्नपानलोकेन सम्पन्नो महीयते।।७।।
अथ यदि गीतवादित्रलोककामो भवति सङ्कल्पादेवास्य
गीतवादित्रे समुत्तिष्ठतस्तेन गीतवादित्रलोकेन सम्पन्नो महीयते।।८।।

एवमेव अन्नं भक्ष्य भोज्य लेह्य चोष्य भेदाच्चतुर्विधं पानं पेयपदार्थाः सोमरसादि पीयूषान्तः तत्सम्बन्धिं लोककामयतः एते स्वयमुपतिष्ठतः।

एवमेव गीतवाद्य सम्बन्धि गन्धर्वलोकं कामयत
सङ्कल्प निर्मिते गीत वादित्रे समुपतिष्ठतः समुपस्थिते भवतः ।।

अथ यदि स्त्रीलोककामो भवति सङ्कल्पादेवास्य स्त्रियः समुत्तिष्ठन्ति तेन स्त्रीलोकेन सम्पन्नो महीयते।।९।।

यं यमन्तमभिकामो भवति यं कामं कामयते सोऽस्य सङ्कल्पादेव समुत्तिष्ठति तेन सम्पन्नो महीयते।।१०।।

एवमेव स्त्रीलोककामस्य सङ्कल्पनिर्मिताः स्त्रियं सेवां विदधति एवमेव यं यं अन्तं लोकं कामयते यं यं च कामं सर्वेऽपि एतस्य सङ्कल्पेनोपस्थितो भवति। तेन सम्पन्नो महिमानं अनु भवति। अथ किमनेन तत्तल्लोकनिर्देशपरफलप्रतिपादकप्रकरणेन यथा एतत् फलप्रलोभितः सामान्यजीवोऽपि दहर ब्रह्मोपास्तां पश्चात् वासनाशेष फलं भुक्त्वा परब्रह्मैव प्राप्नोतु—

यथा माता कट्वौषधं न पिबेत बालाय मोदकं दत्वा तल्लोभतः प्रवर्तयति तत्पाने मोदकदानलोभस्तु ओषधिपाने बालकप्रवृत्तये मुख्यं फलं रोगनाशः, तथैव इहापि मातृलोकमारभ्य स्त्रीलोकपर्यन्तदानं तु ब्रह्मोपासना प्रवृत्तये मुख्यं फलं ब्रह्मप्राप्तिरेव, प्रौढानां कृते इमे लोका न लोभविषयीकरणीयाः येषु लोभे परमात्मप्राप्तिर्विलम्बिता भवति इति वैराग्यार्थमपि।।श्रीः।।

इति छान्दोग्योपनिषदि अष्टमाध्याये द्वितीयखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।

।। श्रीराघवः शन्तनोतु ।।

तृतीयः खण्डः

अथ तृतीयखण्डे अनृतपिहितसत्योपासनं वर्णयति ननु ज्योतिस्वरूपस्य सत्यस्य किमर्थममृतपिधानमिति चेदुच्यते आलङ्कारिकं कथनमेतत् तात्पर्यं त्वन्यदेव किं तत्? समाकर्ण्य श्रुतिमिदं चिकथयिषति यत् प्रत्यक्षतः यथा दुग्धं केनचिद्पिधानेन पिहितं भवति तथैव सत्यस्य परमात्मनः स्वरूपमपि असत्येन नाशवता संसारेण नाशवत् कामनासमूहेन च पिहितं, अत इदं निराकृत्य कामांस्त्यक्त्वैव जीवोरामं ब्रह्मलभते इति हार्दम्—

त इमे सत्यकामा अनृतापिधानास्तेषाꣳसत्यानाꣳसताम-नृतमपिधानं यो यो ह्यस्येतः प्रैति न तमिह दर्शनाय लभते।।१।।

ते इमे पूर्वोक्ता: सत्या: कामा: सत्संबन्धिन: कामा: कि भूता:? अत आह अनृतापिधाना अनृतं असत्यं पिधानं आवरणं येषां तथाभूता: एवमेव तेषां सत्यानां कामानां यत् अमृतं अपिधानं तेनैव हेतुना सतां मध्ये य: इत: प्रैति ब्रह्मलोकं प्रति प्रतिष्ठते स प्रथमं तं परमात्मानं दर्शनाय न लभते। असत्य व्यवहितत्वात् तस्मादिदं दूरीकरणीयं ''हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखं तत्वम् पूषन्नपावृणु सत्यधर्माय दृष्टये'' (ईश. १५) इति श्रुते:।।श्री:।।

दृष्टान्तं निगमयति—

अथ ये चास्येह जीवा ये च ते प्रेता यच्चान्यदिच्छन्न लभते सर्वं तदत्र गत्वा विन्दतेऽत्र ह्यस्यैते सत्याः कामा अनृतापिधानास्तद्यथापि हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि सञ्चरन्तो न विन्देयुरेवमेवेमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्त्यनृतेन हि प्रत्यूढाः।।२।।

अथ अनन्तरं अस्य ब्रह्मज्ञसंबन्धिन: जीवन्ति प्राणान्धारयन्ति इति जीवा: च प्रेता: प्रकर्षेणेता: यान् इच्छन् दिदृक्षमाणोऽपि इह न लभते तानपि दहरे विन्दति। तत्र असत्या: कथं लभ्यन्ते? अतो दृष्टन्तयति-यथा अक्षेत्रज्ञा: न क्षेत्रं जानन्ति तथाभूता: हिरण्यनिधिं न लब्ध्वा उपरि उपरि तस्योपरिष्टादेव भ्रमन्ति किन्तु विन्देयु: नहि एवमेव इमा: प्रजा: तत्रापि अनृतेषु बन्धुबान्धवेषु रममाणा: अहरह: प्रतिदिनं सुषुप्तौ गच्छन्त्योऽपि अनृतेन प्रत्यूढा: क्षणभंगुरजगत्संबन्धिशक्ता: ब्रह्मलोकं न लभन्ते। तस्मात् परिहृत्य जगतसंबन्धिनोऽसत्यान् शाश्वतं संबन्धिनं श्रीरामं ब्रह्म वृणीतेति हार्दम् ।।श्री:।।

फलश्रुतिमाह—

स वा एष आत्मा हृदि तस्यैतदेव निरुक्तꣳहृद्यमिति तस्माद्धृदयमहरहर्वा एवंवित्स्वर्गं लोकमेति।।३।।

स आत्मादूरे नास्ति प्रत्युत हृदि एव, तस्यैव हृद: आत्मसत्वात् हृद्यं हृदयसंबन्धि हृद्यं सुन्दरं वा निरुक्तं अर्थानुकूलविग्रह:, अयं आत्मा हृदये तस्मात् हृदि अयं इति समुदायो यस्मिन् तद्हृदयं, एवं वित् परमात्मानं हृदयनिवासिनं जानन् साधक: अहरह: प्रतिदिनं स्वर्गं गच्छति द्वित्वस्य तात्पर्यम् यस्मिन्नपि कस्मिन् समये।।श्री:।।

अथ ब्रह्मज्ञगतिं निरूपयति—

अथ य एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति तस्य ह वा एतस्य ब्रह्मणो नाम सत्यमिति।।४।।

अथ अनन्तरं यः पूर्वोक्तसाधकः परमात्मानं हृदिस्थं जानाति सः सम्प्रसादः, सम्यक्प्रसीदति इति सम्प्रसादः इति प्राञ्च वस्तुतस्तु हृदिस्थस्यैव परमात्मनः सम्यक्प्रसादः परमानुग्रहः यस्मिन् स सम्प्रसादः, ''मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम्। (गीता. १८,५७) इति स्मृतेः। अस्मात्शरीरात् समुत्थाय शरीरभावं तन्निमित्तसम्बन्धिनश्च विस्मृत्य इति भावः। स्वेन रूपेण सेवकसेव्यभाव संबन्धनिबन्धनेन भगवतो नित्यपरिकरात्मना परंज्योतिः साकेताधिपतिं परमात्मानं उपसंपद्य सामीप्यमुक्तिविधया समधिगम्य ईशः आत्मा निरस्तदेहेन्द्रियमनोबुद्धिभावः भगवत् कैंकर्यपरायणः आत्मैव अणिमा विशुद्धजीवात्मा संपद्यते। इति ह निश्चयेन श्रुतिः उवाच। प्राप्यं किम्? इत्यत आह एतत् अमृतं अमृतवन्मधुरं अभयं, अथवा जीवात्मनो विशेषणमिदं मृतभिन्नं भयशून्यञ्च स्वभावं प्रतिपद्यते। किं नाम उपास्यस्य? इत्यत आह तस्य ब्रह्मणः सत्यं नाम उपासनार्हम्।।श्रीः।।

अथ सत्यनामनिरुक्तमाह, सत् इयं इति शब्दद्वयेन इकारं तिरोधाप्य सत्यमिति निष्पद्यते सद्देवतास्त्रीलिङ्गावच्छिन्ना तदर्थं इयमिति तदनुकूलविशेषणं त्रिभिरक्षरै किं किं लभ्यते? इत्यत आह—

तानि ह वा एतानि त्रीण्यक्षराणि सतीयमिति तद्यत्सत्तदमृतमथ यत्ति तन्मर्त्यमथ यद्यं तेनोभे यच्छति यदनेनोभे यच्छति तस्माद्यमहरहर्वा एवंवित्स्वर्गं लोकमेति।।५।।

तानि सत्यं शब्दे त्रीण्यक्षराणि तद्दर्शयति सत् इयम् तत्र, यत्, सत्, तत् अमृतं मरणाभावं यच्छति ददातीत्यमृतं यं अमृतमृतञ्च उभयं ददाति एवं विद् अहरहः स्वर्गं गच्छति।।श्रीः।।

इति छान्दोग्योपनिषदि अष्टमाध्याये तृतीयखण्डे श्रीराघवकृपाभाष्यं संपूर्णम्।।

।। श्रीराघवः शन्तनोतु ।।

चतुर्थः खण्डः

अथ सेतुरूपं परमात्मानं विवेचयति। सेतुर्हि अतिक्रमणनिरोधाय सरित्सागरपाराय जलमज्जनतोनिवारणाय च प्रभवति भगवान् तस्य नाम रूपं चरित्रं इमे सर्वे सेतवः। अथोक्तं श्रीमानसे—

नाथ नाम तव सेतु नर चढि भवसागर तरहिं।।

अतिनागर भवसागरसेतुः त्रातु सदा दिनकरकुलकेतुः।।

करत चरित नर अनुहरत संसृति सागरसेतु।।

स्वयमेव श्रुतिं पालयतिश्रुतिसेतुपालक राम तुम जगदीश माया जानकी।

(मानस-६.सो.२.) (मा. ३,११,१४) (मा. २, ८७) (मा. २,१२६।)

अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसम्भेदाय नैतꣳ सेतुमहोरात्रे तरतो न जरान मृत्युर्न शोको न सुकृतं न दुष्कृतꣳ सर्वे पाप्मानोऽतो निवर्तन्तेऽपहतपाप्मा ह्येष ब्रह्मलोकः।।१।।

साम्प्रतं ब्रह्मब्रह्मलोकयोरैक्यं निरूपयन्ती श्रुतिः प्राह—अथ उपासनायाः अन्योऽपि क्रमः, यः आत्मा हृदयपुण्डरीक उपास्यते स एषः लोकानां जनानां असंभेदाय परस्परकलहभेदवारणाय विधृतिः विशेषेण धरतीति विधृतिः विशिष्टाधृतिर्धारणक्रिया वा यस्य तथाभूतः, एवं अगाधभवसागरसंतरणाय अयमेव भक्तानां कृते सेतुः पुलं अनुल्लंघनीयत्वात् इमं अहोरात्रे न तरतः नातिक्रामतः, एवमेव जरावृद्धावस्थामृत्युः मरणं शोकः इष्ट वियोगजनितदुःखं सुकृतं पुण्यं दुष्कृतं पापं इमे सर्वेऽपि इमं न तरन्ति। सर्वे पाप्मानः पातकविशेषाः अतः निर्वन्तन्ते अक्लेशयित्वैवास्मान् निवृत्ताः भवन्ति सिनोति तटद्वयं बध्नाति इति सेतुः। एषः अपहतपाप्मा निरस्तपातकः एष एव ब्रह्मलोकः साकेताख्यः।।श्रीः।।

सेतुतरणफलमाह—

तस्माद्वा एतꣳ सेतुं तीर्त्वाऽन्धः सन्ननन्धो भवति विद्धः सन्नविद्धो भवत्युपतापी सन्ननुपतापी भवति तस्माद्वा

एतꣳसेतुं तीर्त्वापि नक्तमहरेवाभिनिष्पद्यते सकृद्विभातो ह्येवैष ब्रह्मलोकः।।२।।

तस्मात् अपहतपाप्मत्वात् एतं सेतुं तीर्त्वा उल्लंघ्य विशुद्धभक्त्या वशीकृत्य अन्धः नष्टविवेकदृष्टिरपि अनन्धो भवति सूरदासादिवत्। यथोक्तं सूरसागरे—

चरणकमल बंदौ हरिराइ

जाकी कृपा पंगु गिरि लंघै अँधे को सब कुछ दरसाइ।

बहिरो सुनै मूक पुनि बालै रंक चलै सिर छत्र धराई।

सूरदास स्वामी करुणामय बारबार बंदौ तेहि पाइ।

(सूरसागर १.१)

विद्धः पूर्वं शरतक्षतेऽपि अविद्धो भवति—

ब्रह्मप्राप्यं यथा श्रीभीष्मः—

इदमाश्चर्यमासीच्च मध्ये तेषां महात्मनाम्।
सहितैर्ऋषिभिः सर्वैस्तदा व्यासादिभिः प्रभो।।
यद्यन्मुञ्चति गात्रं हि स शान्तनुसुतस्तदा।
तत्तद् विशल्यं भवति योगयुक्तस्य तस्य वै।।

(म.भा. अ.प. १६८-३-४)

एवं नक्तं अहरेव निष्पद्यते अन्धकारोऽपि प्रकाशतां गच्छति इति भावः। यतो हि एष ब्रह्मलोकः सकृत् सदैव विभातः प्रकाशमयः ब्रह्मलोकः, अथवा असकृद्विभातः निरन्तरं प्रकाशमानः।।श्रीः।।

परिशेषमाह—

तद्य एवैतं ब्रह्मलोकं ब्रह्मचर्येणानुविन्दन्ति तेषामेवैष-ब्रह्मलोकस्तेषाꣳसर्वेषु लोकेषु कामचारो भवति।।३।।

तत् तस्मात् ये ब्रह्मचर्येण इन्द्रियनिग्रहपूर्वकधातुनिरोधेन ब्रह्मलोकं अनुविन्दन्ति प्राप्नुवन्ति, तेषां सर्वेषु लोकेषु कामचारो भवति यथेच्छचारो भवति।

इति छान्दोग्योपनिषदि अष्टमाध्याये चतुर्थखण्डे श्रीराघवकृपाभाष्यं संपूर्णम्।

।। श्रीराघवः शन्तनोतु ।।

पञ्चमः खण्डः

अथ यज्ञे ब्रह्मचर्यभावनां निरूपयति—

अथ यद्यज्ञ इत्याचक्षते ब्रह्मचर्यमेव तदब्रह्मचर्येण ह्येव यो ज्ञाता तं विन्दतेऽथ यदिष्टमित्याचक्षते ब्रह्मचर्यमेव तद् ब्रह्मचर्येण ह्येवेष्टात्मानमनुविन्दते।।१।।

अथ यदि यज्ञः इति जनाः आचक्षते कथयन्ति तद् ब्रह्मचर्यमैव यतो हि यज्ञशब्दस्य विपर्ययेण यो ज्ञाता एवं अनेन ज्ञात्वा परमात्मानं विन्दते एवं यत् इष्टं तदपि ब्रह्मचर्यम्। यतो हि ब्रह्मचर्येणैव आत्मानं इष्ट्वा पूजयित्वा अनुविन्दते प्राप्नोति।।श्रीः।।

अथ सत्रायण मौनयोरपि ब्रह्मचर्यत्वमाहः—

अथ यत्सत्रायणमित्याचक्षते ब्रह्मचर्यमेव तद्ब्रह्मचर्येण ह्येव सत आत्मनस्त्राणं विन्दतेऽथ यन्मौनमित्याचक्षते ब्रह्मचर्यमेव तद्ब्रह्मचर्येण ह्येवात्मानमनुविद्य मनुते।।२।।

एवं सत्रायणं ब्रह्मचर्यं उपपत्तिमाह सत्रायणशब्दस्य व्युत्पत्तिश्चेत्थम् त्राणं त्रा सतस्त्रा इति सत्रा तं अयति प्राप्नोति येन तत् सत्रायणम्, एवमेव ब्रह्मचर्येण सत् वस्तुना आत्मानः विकारेभ्यः स्त्राणं प्राप्नोति, एवं मौनमपि ब्रह्मचर्यं यतो हि मनुते इति मुनि तस्य भावः मौनं मननकर्म ब्रह्मचर्येण ब्रह्मं ज्ञात्वा मनुते तत्समानत्त्वात् तदपि ब्रह्मचर्यम् ।।श्रीः।।

अथ अपरामपि ब्रह्मचर्यभावना निदर्शयति—

अथ यदनाशकायनमित्याचक्षते ब्रह्मचर्यमेव तदेष ह्यात्मा न नश्यति यं ब्रह्मचर्येणानुविन्दतेऽथ यदरण्यायनमित्याचक्षते ब्रह्मचर्यमेव तत्तदरश्च ह वै ण्यश्चार्णवौ ब्रह्मलोके तृतीयस्यामितो दिवि तदैरं मदीयꣳसरस्तदश्वत्थः सोमसवनस्तदपराजिता पूर्वब्रह्मणः प्रभुविमितꣳहिरण्मयम्।।३।।

अथ यत् अनाशकायनं इति जना आचक्षते तद् ब्रह्मचर्यं एव कथम्? तदुच्यते यत् अनाशकायनं न भवति नाशो यस्य सः अनाशकः नाशरहितः आत्मा, तं अयति येन तद् अनाशकायनम् ब्रह्मचर्यणैव अविनाशिनमात्मानं विन्दति। एवं अरः ण्यः इमौ

द्वौ समुद्रौ यस्मिन् तद् अरण्यं ब्रह्मलोकः तं अरण्यं अयति येन तत् अरण्यायनं, यतो हि इतः मर्त्यलोकात् तृतीयस्यां मर्त्यलोकमारभ्य तृत्त्वसंख्या बोद्धयायां अरः ण्यः इति द्वौ महारणौ सागरौ अयिरमदीयम् अन्नमयं पानमयं च। सरोवरं अश्वत्थः पिप्पलीवृक्षः, सोमसवनः अमृतस्रावी, एवं देवानां अपराजिता पुः तथा प्रभुविमितं प्रभुणा निर्मितं हिरण्मयं कनकमयं मण्डपम्।।श्रीः।।

फलश्रुतिशेषमाह—

तद्य एवैतावरं च ण्यं चार्णवौ ब्रह्मलोके ब्रह्मचर्येणानुविन्दन्ति तेषामेवैष ब्रह्मलोकस्तेषाꣳ सर्वेषु लोकेषु कामचारो भवति।।४।।

ये ब्रह्मचर्येण वसुमिथुनधर्मत्यागेन अरौ ण्यं इति महासागरौ विन्दति सः ब्रह्मलोके साकेते तस्य सर्वेषु लोकेषु कामचारः इच्छाचारो जायते।।श्रीः।।

इति छान्दोग्योपनिषदि अष्टमाध्याये तृतीयखण्डे श्रीराघवकृपाभाष्यं संपूर्णम्।।

।। श्रीराघवः शन्तनोतु ।।

षष्ठः खण्डः

अथ नाडीमाध्यमेन ब्रह्मोपासनं निरूपयति।

अथ या एता हृदयस्य नाड्यस्ताः पिङ्गलस्याणिम्नस्तिष्ठन्ति शुक्लस्य नीलस्य पीतस्य लोहितस्येत्यसौ वा आदित्यः पिङ्गल एष शुक्ल एष नील एष पीत एष लोहितः।।१।।

अथ हृदयस्य नाड्यः अनिम्नः सूक्ष्मस्य पिङ्गलत्वप्रभृतिवर्णविशिष्टस्य सन्ति स एष आदित्यः पिङ्गलत्वादिवर्णविशिष्टोऽस्ति।।श्रीः।।

दृष्टान्तेन सिद्धान्तं स्पष्टयति—

तद्यथा महापथ आतत उभौ ग्रामौ गच्छतीमं चामुं चैवमेवैता आदित्यस्य रश्मय उभौ लोकौ गच्छन्तीमं चामुं चामुष्मादादित्यात्प्रतायन्ते ता आसु नाडीसु सृप्ता आभ्यो नाडीभ्यः प्रतायन्ते तेऽमुष्मिन्नादित्ये सृप्ताः।।२।।

यथा एक: महापथ: महंश्चासौ पन्थाश्च इति महापथ इमं अमुं च मार्गं आतत: सम्बध्य व्याप्त:, तथैव आदित्यश्च रश्मय: इमं लोकं अमुं परलोकं च व्याप्य आतता: ता: अमुष्मात् आदित्यात् प्रतायन्ते विस्तृता: भवन्ति, पुनर्नाडीषु सृता:, एवं ताभ्य: प्रतापमान: अस्मिन् आदित्ये सृप्ता: गता: एवं नाडीद्वारेणैव जीवं सूर्यरश्मय: आदित्यमभिनयन्ति अज्ञानिनां परावर्तनं ज्ञानिनां चापुनरावृत्तिरिति विवेक:।।श्री:।।

अथ ज्ञानिनो गतीमाह:—

तद्यत्रैतत्सुप्तः समस्तः सम्प्रसन्नः स्वप्नं न विजानात्यासु तदा नाडीषु सृप्तो भवति तं न कश्चन पाप्मा स्पृशति तेजसा हि तदा सम्पन्नो भवति।।३।।

यत्र एतत् येषु जीव: सुषुप्त: भगवत् स्नेहसमाधिसुखे निद्रित: समस्त: पूर्णतां गत: सम्प्रसन्न: निर्विकारसुखे निद्रित: समस्त: पूर्णतां गत: सम्प्रसन्न: निर्विकार तदा आसु नाडीषु पिङ्गलादिषु सृप्त: भवति प्राप्यते, तेजसा सम्पन्नो भवति योज्यते एनं कश्चन कोऽपि पाप्मा। ब्रह्मलोकप्रतिबन्धक: न स्पृशति न परामृशति।।श्री:।।

अथ मरणदशां वर्णयति—

अथ यत्रैतदबलिमानं नीतो भवति तमभित आसीना आहुर्जानासि माँ जानासि मामिति स यावदस्माच्छरीरादनुत्क्रान्तो भवति तावज्जानाति।।४।।

यदा अबलिमानं नास्ति बलं यस्मिन् सोऽबल: अबलस्य भाव अबलिमा, तं अबलिमानं बलाभावप्रयोज्य मरणसामीप्यं नीत: प्राप्त: तदा ये अभित: आसीना पुत्रादय: ते पृच्छन्ति मां जानासि शरीरं यावत् न उत्क्रान्त: तावज्जानाति परिचिनोति।।श्री:।।

आनन्तरीक दशां वर्णयति—

अथ यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्व-माक्रमते स ओमिति वा होद्वामीयते स यावत्क्षिप्येन्मनस्तावदादित्यं गच्छत्येतद्वै खलु लोकद्वारं विदुषां प्रपदनं निरोधोऽविदुषाम्।।५।।

अथ यत्र यदा एतच्छदीरात् उत्क्रामति गच्छति तदा एतै: रश्मिभि: किरणै: सौरै: ऊर्ध्वं आक्रम्यते, स ओम् इति उच्चै: मीयते शब्दं करोति। अनन्तरं यावत्

प्रमाणं कालं वा मनः क्षिप्येत् वेगेन गच्छेत् तदेव वेगेन आदित्यं सूर्यं गच्छति, इदमेव लोकद्वारं लोकयोः इह लोक परलोकयोः द्वारं विदषाम् ब्रह्मज्ञानां प्रपदनं प्रपद्यन्ते ब्रह्मलोकं येन तत् प्रपदनं ब्रह्मलोक प्रापकम्, अविदुषाम् अज्ञानिनाम् निरोधः निरुध्यन्ते येन तथाभूतः।।श्रीः।।

अथ प्रकरणमुपसंहरति—

तदेष श्लोकः। शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका। तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्त्युत्क्रमणे भवन्ति।।६।।

व्याख्यात चरापि श्रुतिरयं पुनर्व्याख्यायते हृदयस्य शतं चैका एकोत्तरशतसंख्याः नाड्यो भवन्ति, तासां मध्ये एका सुषुम्ना मूर्धानम् अभिनिःसृता मस्तकद्वारमभिव्याप्य निर्गता तया ऊर्ध्वं आयन् ब्रह्मरन्ध्रेण गच्छन् अमृतत्वं अमृतभावं भगवतोनित्यकिङ्कर-स्वरूपं एति प्राप्नोति। अन्याः इतो व्यतिरिक्ता नाड्यः विश्वं उत्क्रमणे सर्वत्र योनिषु गमने निमित्ती भवन्ति। द्विरुक्तिः प्रकरणसमाप्तिसूचिका।।श्रीः।।

इति छान्दोग्योपनिषदि अष्टमाध्याये षष्ठे खण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।

।। श्रीराघवः शन्तनोतु ।।

सप्तमः खण्डः

अथेतः यावत् द्वादश खण्डं षड्भिशकलैः षडैश्वर्यसम्पन्नस्य आत्माभिधेयस्य परमात्मनो भगवतः समनुसन्धानं स्पष्टयितुं विरोचनेन्द्रप्रजापतिसंवादयुक्ता आख्यायिकात्मिका मनोहरतमा परिचर्चा प्रारभ्यते। देवराज इन्द्रः दैत्यराजश्च विरोचनः

द्वावपि विख्यातबलवीर्यवैभवौ त्रीणि कृतपराभवो समुल्लीलङ्घिसितभवौ प्रजापति सम्भवौ आत्मतत्त्वं समनुसन्धातुं प्रजापतिमुपाषेदतु तत्र च प्रकरणचतुष्टयकलेवराः आत्ममीमांसा।

प्रजापतिवचनमवतारयति—

य आत्मापहतपाप्मा विजरो विमृत्युर्विशोको-ऽविजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः स सर्वा꣡ꣳश्च लोकानाप्नोति सर्वा꣡ꣳश्च कामान्यस्तमात्मानमनुविद्य विजानातीहि ह प्रजापतिरुवाच।।१।।

एवं अपहतवाप्मत्वादि व्याख्यात चर गुणाष्टक संयुक्तः यः आत्मा स एव हृदयकमले अन्वेष्टव्यः परिमार्गितव्यः, विजिज्ञासितव्यः अन्वेषणेऽनुपलब्धो महापुरुषानुपसद्य विशेषेण जिज्ञासनीयः, चः आत्मानं अनुविद्य अनुकूल्येन लब्ध्वा वस्तुतस्तु अनुविद्य इत्यस्य समुपाश्रितङ् कृत्वा इत्यर्थः। विजानाति विज्ञानविषयी करोति।

भक्त्या मामभिजानाति (गी. १८-५५ इति स्मृतेः।)

इति प्रजापतिः उवाच प्रजापतिर्नाम कस्यपः न तु ब्रह्म।।श्रीः।।

अथ इन्द्रविरोचनोपसत्तिमवतारयति—

तद्धोभये देवासुरा अनुबुबुधिरे ते होचुर्हन्त तमात्मानमन्विच्छामो यमात्मानमन्विष्य सर्वा꣡ꣳश्च लोकानाप्नोति सर्वा꣡ꣳश्च कामानितीन्द्रो हैव देवानामभिप्रवव्राज विरोचनोऽसुराणां तौ हासं विदानावेव समित्पाणी प्रजापतिसकाशमाजग्मतुः।।२।।

तत् प्रजापत्युक्तात्मलक्षणं जज्ञकामप्राप्तीं च देवासुराः देवैःसहिता असुरा अनुबुबुधिरे कथंचित् ज्ञातवन्तः। नन्वत्र कथं नैकवद् भावः क्लीवत्वं च? तथा हि सूत्रं येषां च विरोधः शाश्वतिकः समुचितम् पृष्टम्। अत्र आत्मलक्षणश्रवणेन सञ्जात पुण्य-पुञ्जतः उभयेषां विस्मृतसात्विकविरोधत्वात् तन्मूलकक्लीवत्वैकभावाप्रसक्ते दोषपरिहारः। ते ऊचुः मन्त्रयाञ्चक्रुः हन्त आश्चर्ये विस्मये च यमनुविद्य आराध्यत्वेन ज्ञात्वा सर्वान् लोकान् कामांश्च आप्नोति तमात्मानं अपहत पाप्मत्वादि वसुलक्षणं लक्षितमन्विच्छामः मृगयामः। इत्थम् विचार्य समस्तदेवानां प्रतिनिधि इन्द्रः, असुराणां राजा विरोचनो द्वावपि स्व स्ववर्गकल्याणाय ज्ञातुं निश्चिक्कितु। देवानां मध्ये इन्द्रः प्रवव्राज जगाम, असुराणां मध्ये विरोचनः द्वावपि असंविदानौ ब्रह्मतत्वं न जानन्तौ समित्पाणी विद्यार्थिवेषौ प्रजापतिसकाशं कश्यपसविधे आजग्मतुः।।श्रीः।।

अथ तयोः उपसत्तिप्रकारमाहः—

तौ ह द्वात्रिंꣳशतं वर्षाणि ब्रह्मचर्यमूषतुस्तौ ह प्रजापतिरुवाच किमिच्छन्ताववास्तमिति तौ होचतुर्य आत्मापहतपाप्मा विजरो विमृत्युर्विशोकोऽविजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः स सर्वाꣳश्च लोकानाप्नोति सर्वाꣳश्च कामान् यस्तमात्मानमनुविद्य विजानातीति भगवतो वचो वेदयन्ते तमिच्छन्ताववास्तमिति।।३।।

तौ द्वात्रिंशत् वर्षाणि ब्रह्मचर्यम् उषतु ब्रह्मचर्यव्रतनियमेन अवसतां अथ प्रजापतिः तयोरागमनकारणमपृच्छत् किमिच्छान्तावित्यादि, तदा तावुचतुः प्रजापतिवाक्यमनुवदन्तौ यः आत्मा भवदुक्तः तमिच्छन्तौ आवां ब्रह्मचर्यं अवास्तां व्यत्ययात् प्रथम पुरुष द्विवचनम्।।श्रीः।।

अथ शिष्ययोग्यतानुसारं परम्परया वर्णयत्यात्मतत्त्वं—

तौ ह प्रजापतिरुवाच य एषोऽक्षिणि पुरुषो दृश्यत एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेत्यथ योऽयं भगवोऽप्सु परिख्यायते यश्चायमादर्शे कतम एष इत्येष उ एवैषु सर्वेष्वन्तेषु परिख्यायत इति होवाच।।४।।

कश्यपः तावुवाच, यः एषः अतिसन्निकृष्टपुरुषः अक्ष्णि नेत्रे दृश्यते योगिभिः एष आत्मा परमात्मा इदमेव अमृतं मरणवर्जितम्, अभयम् भयशून्यं, ब्रह्म अतिशयेन वृहत् एतच्छ्रुत्वा तौ निजपक्षं प्रदर्शयन्तौ प्राहतुः, भगवः भवतु नाम अक्ष्णि दृष्टपुरुषः किन्तु यः अप्सु जलेषु परिव्यायते प्रतिविम्ब्यते आदर्शे च कतमः आत्मा प्रजापतिरवदत् एष एव अक्ष्णि दृश्यमानः सर्वेषु अन्तेषु चराचरेषु परिख्यायते अत्र आत्म प्रतीतिर्वस्तुतो नात्मा नायमात्मा, छायामात्र सः किन्तु अस्मिन्नेवात्मबुद्धिं कुर्वन्तौ समतुष्यतां इन्द्रविरोचनौ।।श्रीः।।

इति छान्दोग्योपनिषदि अष्टमाध्याये सप्तमखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।

।। श्रीराघवः शन्तनोतु ।।

अष्टमः खण्डः

एवं पूर्वपक्षं न कुर्वन्तौ असद् ग्राहिणौ शिष्यौ प्राहः प्रजापतिः।

उदशराव आत्मानमवेक्ष्य यदात्मनो न विजानीथस्तन्मे प्रब्रूतमिति तौ होदशरावेऽवेक्षाञ्चक्राते तौ ह प्रजापतिरुवाच किं पश्यथ इति तौ होचतुः सर्वमेवेदमां वां भगव आत्मानं पश्याव आलोमभ्य आनखेभ्यः प्रतिरूपमिति।।१।।

उदकस्य शरावे पात्रे आत्मानं वीक्ष्य यदि आत्मनः विषये न विजानीथ तन्मां पृच्छथ, ते तथा चक्राते पुनः पृष्टौ उक्तवन्तौ यत् नखतः शिरः पर्यन्तं लोमादिमन्तं आत्मानं प्रतिरूपम् पश्यावः।।श्रीः।।

प्रजापतिरभिप्रायः यत् उदकशरावे आत्मन च्छायां दृष्ट्वा ततः उरी करिष्यत् आत्मबुद्धिं यतो हि छाया पुरुषो नापहत पाप्मत्वादि लक्षणविशिष्टः अतः साध्वलङ्कारकरणाय आदिष्टौ अनेनास्य परिवर्तनेन कदाचित् एतस्मात् अपरिवर्तनीयं विलक्षणो विज्ञास्यते इति—.

तौ ह प्रजापतिरुवाच साध्वलङ्कृतौ सुवसनौ परिष्कृतौ भूत्वोदशरावेऽवेक्षेथामिति तौ ह साध्वलङ्कृतौ सुवसनौ परिष्कृतौ भूत्वोशरावेऽवेक्षाञ्चत्क्राते तौ ह प्रजापतिरुवाच किं पश्यथ इति।।२।।

प्रजापतिना आदिष्टौ सुवसनौ शोभनवस्त्रधारिणौ साध्वलङ्कृतौ शोभनालङ्कारौ परिष्कृतौ स्मश्रुनखलोमादिकौ उदशरावे विक्ष्येथां पश्यतम् तथा कृतवन्तौ किं पश्यथः? इति प्रजापतिरपृच्छत्।।श्रीः।।

अथ तयोरुत्तरमाह—

तौ होचतुर्यथैवेदमावां भगवः साध्वलङ्कृतौ सुवसनौ परिष्कृतौ स्व एवमेवेमौ भगवः साध्वलङ्कृतौ सुवसनौ परिष्कृतावित्येष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति तौ ह शान्तहृदयौ प्रवव्रजतुः।।३।।

तावुक्तवन्तौ यथा आवां अलङ्कारवसनपरिष्कारयुक्तौ तथेमावपि, प्रजापतिरुवाच एष आत्मा अमृतत्त्वादियुक्तः किं प्रजापतिरसत्यमवोचत्? न हि दृष्टान्तं यथा एकेव पुरुषः अनलङ्कृतः अन्यादृक् अलङ्कृतश्च अपर इव दृश्यते, तथैव जीवात्मापि शरीरवसनगुणभूषणसंस्कारपरिष्करणवैलक्षण्येन बाल इवाजरठ इति विभिन्नाकारो दृश्यते, किन्तु तौ देहमेव मन्वानावात्मानौ शान्तहृदयौ गतौ।

"नापृष्टः कस्यचिद् ब्रूयात्" इति नियमात् जानन्नप्यसद् ग्राहिणौ प्रजापतिरपृष्टो नावोचत्।।श्रीः।।

अथ प्रजापतेर्देवानां विरोचनस्य च विपरीतज्ञानमाह—

तौ हान्वीक्ष्य प्रजापतिरुवाचानुपलभ्यात्मानमननुविद्य व्रजतो यतर एतदुपनिषदो भविष्यन्ति देवा वाऽसुरा वा ते पराभविष्यन्तीति स ह शान्तहृदय एव विरोचनोऽसुराञ्जगाम तेभ्यो हैतामुपनिषदं प्रोवाचात्मैवेह महय्य आत्मा परिचर्य आत्मानमेवेह महयन्नात्मानं परिचरन्नुभौ लोकाववाप्नोतीमं चामुं चेति।।४।।

अथ दूरं गच्छन्तौ तौ अन्वीक्ष्य खिन्नमनाः प्रजापतिरुवाच यत् इन्द्र विरोचनौ अपहतपाप्मादि लक्षणां आत्मतत्त्वं अनुपलभ्य अननुविद्य असाक्षात् कृत्य प्रतीतज्ञानौ व्रजेतां, यतरे अहोवत देवाः असुरा वा एतदुपनिषद् एषैव उपनिषद् आत्मज्ञप्तृ एषाम् तथाभूताः पराभविष्यन्ति तथापि श्रुतवन्तौ विरोचनस्तु इमामेव विपरीतबोधां उपनिषदं तामेव समचिख्यपत्। यत् इह आत्मेव महय्य शरीरमेव पूज्यं आत्मैव परिचर्य सेवनीयः इमं पूजयन् परिचरन् सेवमानः इमं अमुं च लोकं प्राप्नोति।।श्रीः।।

असद् ज्ञान परिणाममाह:—

तस्मादप्यद्येहाददानमश्रद्दधानमयजमानमाहुरासुरो वतेत्यसुराणा ᳪ᳭ ह्येषोपनिषत्प्रेतस्य शरीरं भिक्षया वसनेनालङ्कारेणेति सᳪ᳭स्कुर्वन्त्येतेन ह्यमुं लोकं जेष्यन्तो मन्यन्ते।।५।।

तस्मात् विपरीतज्ञानादेव अद्यापि साम्प्रतमपि इह लोके अददानं दानं न कुर्वन्तं अश्रद्धधानं श्रद्धाहीनं भवन्तं अयजमानं यज्ञं न कुर्वन्तं, आसुरः असुसु प्राणेषु तदवति

देहे च रमन्ते इति असुरा: तेषु भव आसुर इति आहु असुराणामेव इयमुपनिषत् प्रेतस्य इदं शरीरमेव भोजनेन वसनेन अलङ्कारैश्च संस्कुर्वन्ति मण्डशन्ति। अत एव शवं मण्डयन्त: परलोकं जेष्यन्ते इति ते समध्यवष्यन्ति।।श्री:।।

इति छान्दोग्योपनिषदि अष्टमाध्याये अष्टमखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।

।।श्रीराघवः शन्तनोतु ।।

नवमः खण्डः

अथ इन्द्रस्य ब्रह्मविचारणामाह—

अथ हेन्द्रोऽप्राप्यैव देवानेतद्भयं ददर्श यथैव खल्वयमस्मिञ्छरीरे साध्वलङ्कृते साध्वलङ्कृतो भवति सुवसने सुवसनः परिष्कृते परिष्कृत एवमेवायमस्मिन्नन्धेऽन्धो भवति स्रामे स्रामः परिवृक्णे परिवृक्णोऽस्यैव शरीरस्य नाशमन्वेष नश्यति।।१।।

अथ इन्द्र: सात्त्विकविचारतया चिन्तयन्नात्मानं एतद्भयं भीतिं ददर्श, यत् यथा बिम्बे अलङ्कृते प्रतिबिम्बोऽलङ्कृत: सुवसने सुवसन: एवमेव अन्धे अन्ध: स्रामे नासिकादि स्रामिणि श्राम: परिवृक्णे हस्तादौ छिन्ने छिन्न: एवं शरीरे नष्टे नष्टोऽपि भविष्यति विनश्यतीत्यस्य विनंक्षति इत्यर्थ: निकटनाशसम्भावनया वर्तमानसामीप्ये लट्।।श्री:।।

अथेन्द्रस्य पुनरुपसत्यमाह—

नाहमत्र भोग्यं पश्यामीति स समित्पाणिः पुनरेयाय त ँ् ह प्रजापतिरुवाच मघवन्यच्छान्तहृदयः प्राव्राजीः सार्धं विरोचनेन किमिच्छन् पुनरागम इति स होवाच यथैव खल्वयं भगवोऽस्मिञ्छरीरे साध्वलङ्कृते साध्वलङ्कृतो भवति सुवसने सुवसनः परिष्कृते परिष्कृतः एवमेवायमस्मिन्नन्धेऽन्धो भवति स्रामे स्रामः परिवृक्णे

परिवृक्णोऽस्यैव शरीरस्य नाशमन्वेष नश्यति नाहमत्र भोग्यं पश्यामीति।।२।।

अत्राहं भोग्यं फलं न पश्यामि, अतः भूयः परावृत्य समित्पाणिः येयाय उपसन्नः प्रजापतिम् तमागमनकारणं पृष्ठः सन् पूर्ववदुवाच यथेत्यादि।।श्रीः।।

अथ प्रजापतिरुवाच—

एवमेवैष मघवन्निति होवाचैतं त्वेव ते भूयोऽनुव्याख्यास्यामि वसापराणि द्वात्रिंशतं वर्षाणीति स हापराणि द्वात्रिंशतं वर्षाण्युवास तस्मै होवाच।।३।।

हे मघवन्! एषः पक्षः एवमेव छायापुरुषो देहो वानात्मा द्वात्रिंशत् वर्षं ब्रह्मचर्यं वस अनुत्तिष्ठ तदनु तं व्याख्यास्यामि, तथैव कृतवतेन्द्रे द्वात्रिंशत् वर्षानन्तरं तस्मै प्रजापतिरुवाच इति सारांशः।।श्रीः।।

इति छान्दोग्योपनिदि अष्टमाध्याये नवमखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।

।। श्रीराघवः शन्तनोतु ।।

दशमः खण्डः

अथेन्द्रं प्रति स्वप्नपुरुषमुपदिशति—

य एष स्वप्ने महीयमानश्चरत्येष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति स ह शान्तहृदयः प्रवव्राज सहाप्राप्यैव देवानेतद्भयं ददर्श तद्यद्यःशरीरमन्धं भवत्यनन्धः स भवति यदि स्राममस्रामो नैवैषोऽस्य दोषेण दुष्यति।।१।।

यः एषः स्वप्ने महीयमानश्चरति जाग्रतप्रपञ्चैरकृष्यमानतैव महीयमानता एष एव अभयत्वादि विशिष्ट आत्मा इति शान्तहृदयजिज्ञासः प्रगतः, किन्तु देवानप्राप्यैव मध्ये मार्गं भयं ददर्श भयाकारमाह यद्यपि स्वाप्नपुरुषः जाग्रतप्रपञ्चैर्न दुष्यते तथैव अस्मिन्नन्धेतस्य नान्धत्वं अस्मिन् स्रामत्वादुक्ते तस्मिन् न तथात्वं एतद्दोषेण न दुष्यति तस्मात् उदकशरावपुरुषतः किमप्यस्मिन्नधिकतरम्।।श्रीः।।

तथापि किमनुपपन्नमित्यत आह—

न वधेनास्य हन्यते न स्राभ्येण स्रामो घ्नन्ति त्वेवैनं विच्छादयन्तीवाप्रियवेत्तेव भवत्यपि रोदितीव नाहमत्र भोग्यं पश्यामिति।।२।।

अस्य शरीरस्य वधेन हिंसनेन अयं न हन्यते अस्य स्राम्येण स्रावेण न स्रामः जाग्रदवस्थामतीतत्वात्, परन्तु स्वप्नपुरुषमपि धनन्तीव हिंसन्तीव विच्छादयन्तीव अतेव अप्रियवेत्ता इव प्रियाः प्रियं जानन्यथा रोदितीव रोदनं कुर्वाण इव च भवति। अतो नात्र भोग्यं पश्यामि, यतो हि अपहतपाप्मत्वाविलक्षणं नात्र घटते।।श्रीः।।

अथेन्द्रस्यपुनरुपसत्यमाह—

स समित्पाणिः पुनरेयाय त ँ्ह प्रजापति उवाच मघवन्यच्छान्तहृदयः प्राव्राजीः किमिच्छन्पुनरागम इति स होवाच तद्यद्यपीदं भगवः शरीरमन्धं भवत्यनन्धः स भवति यदि स्राममस्रामो नैवैषोऽस्य दोषेण दुष्यति।।३।।

एवं समृद्ध जिज्ञासः समित्पाणिः भूयः प्रजापतिमुपसन्नः कथं पुनरागमः इति हेतुं पृष्टः यथापूर्वमन्ववदत्।।श्रीः।।

अनुवादशेषं प्रजापत्युपदेशञ्चाह—

न वधेनास्य हन्यते नास्य स्राम्येण स्रामो घ्नन्ति त्वेवैनं विच्छादयन्तीवाप्रियवेत्तेव भवत्यपि रोदितीव नाहमत्र भोग्यं पश्यामीत्येवमेवैष मघवन्निति होवाचैतं त्वेव ते भूयोऽनुव्याख्यास्यामि वसापराणि द्वात्रिँ्शतं वर्षाणीति स हाऽपराणि द्वात्रिँ्शतं वर्षाण्युवास तस्मै होवाच।।४।।

नावधेनेत्यारभ्य नात्रभोगं पश्यामि एतदन्तोऽनुवादशेषः व्याख्यात चरः, एतच्छ्रुत्वा प्रजापतिराह मघवन्! एवमेव एषः बद्धः दुःखादिकं आरोपयति पुनः द्वात्रिंशत् वर्षं ब्रह्मचर्यं वश तथा कृतवतीन्द्रे प्रजापतिरुवाच।।श्रीः।।

इति छान्दोग्योपनिषदि अष्टमाध्याये दशमखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।

।। श्रीराघवः शन्तनोतु ।।

एकादशः खण्डः

अथ सुषुप्तिपुरुषमुपदिशति—

तद्यत्रैतत् सुप्तः समस्तः सम्प्रसन्नः
स्वप्नं न विजानात्येष आत्मेति
होवाचैतदमृतमभयमेतद्ब्रह्मेति स ह
शान्तहृदयः प्रवव्राज स हाप्राप्यैव
देवानेतद्भयं ददर्श नाह खल्वयमेवꣳ
सम्प्रत्यात्मानं जानात्ययमहमस्मीति नो
एवेमानि भूतानि विनाशमेवापीतो भवति
नाहमत्र भोग्यं पश्यामीति ।।१।।

यत्र एतत् सुषुप्तः निद्रितः सन् आत्मानं न विजानाति, एष आत्मा इति प्रजानन् इन्द्रः मध्ये भयं ददर्श यत् अयमपि पूर्व आत्मानं न विजानाति अतः विनाशं उपैति, अतो विमृत्युत्वलक्षणविरहात् नायं यथार्थ आत्मा।

अतः पुनरुपसीदति—

स समित्पाणिः पुनरेयाय तꣳ ह प्रजापतिरुवाच
मघवन्यच्छान्तहृदयः प्राव्राजीः किमिच्छन्पुनरागम इति
स होवाच नाहं खल्वयं भगव एवꣳ सम्प्रत्यात्मानं
जानात्ययमहमस्मीति नो एवेमानि भूतानि विनाशमेवा-
पीतो भवति नाहमत्रभोग्यं पश्यामीति ।।२।।

पुनरुपसन्नः समित्पाणिः किमिच्छन्पुनरागम इति प्रजापतिना पृष्टः पूर्ववदन्ववदत्।।श्रीः।।

अथ इन्द्रस्य भूयो ब्रह्मचर्यवासं प्रजापत्युपदेशं च वर्णयति—

एवमेवैष मघवन्निति होवाचैतं त्वेव ते
भूयोऽनुव्याख्यास्यामि नो एवान्यत्रैतस्माद्वसाऽपराणि
पञ्च वर्षाणीति स हापराणि पञ्च वर्षाण्युवास
तान्येकशतꣳ सम्पेदुरेतत्तद्यदाहुरेकशतꣳ ह वै वर्षाणि
मघवान्प्रजापतौ ब्रह्मचर्यमुवास तस्मै होवाच ।।३।।

हे मघवन्! एवमेव एष पक्ष: अस्मात् अन्यत्र न किमपि अधुना तव प्रतिबन्धकोऽपि अल्पीयान् अत: पञ्च वर्षाणि ब्रह्मचर्येण वस एवं एकाधिकशतं वर्षाणि इन्द्रोब्रह्मचर्यमुवास प्रजापतौ इत्याहु: तदवसाने तस्मै इन्द्राय प्रजापति: प्राह।।श्री:।।

इति च्छान्दोग्योपनिषदि अष्टमाध्याये एकादशखण्डे श्रीराघवकृपाभाष्यं संपूर्णम्।।

।। श्री राघवः शन्तनोतु ।।

द्वादशः खण्डः

अथ आत्मन: पारमार्थ्यं वर्णयति—

मघवन्मर्त्यं वा इदꣳशरीरमात्तं मृत्युना तदस्यामृतस्याशरीरस्यात्मनोऽधिष्ठानमात्तो वै स शरीरः प्रियाप्रियाभ्यां न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्त्यशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः ।।१।।

मघवन् हे इन्द्र! इदं शरीरं वाव निश्चयेन मर्त्यं मरणधर्मावच्छिन्नं मृत्युना यमेन आत्तं गृहीतं अशरीरस्य देहरहितस्य अमृतस्य मरणधर्मवर्जितस्य आत्मन: जीवात्मन: अधिष्ठानं सशरीर: शरीरमुक्त: प्रियाप्रियाभ्यां आत्त: गृहीत: शरीरावच्छिन्नमेव प्रियाप्रिययो गृह्णीत: सशरीरस्य सत: देहभावापन्नस्य प्रियाप्रिययो: तन्मूलकशुभाशुभयो: अपहति: विनाशो। न अशरीरं अननुभूतशरीरधर्मं प्रियाप्रिये अनुकूलप्रतिकूले न स्पृशत: न शबलयत:।

अशरीराणां दृष्टान्तमाह—

अशरीरो वायुरभ्रं विद्युत् स्तनयित्नुरशरीराण्येतानि तद्यथैतान्यमुष्मादाकाशात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यन्ते ।।२।।

यथा शरीररहितानि वायुघनविद्युतगर्जितानि आकाशात् समुत्थाय स्वेन रूपेण परं ज्योति:अभिनिष्पद्यन्ते प्राप्नुवन्ति।।श्रीः।।

दृष्टान्तमुपसंहरति—

एवमेवैष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमपुरुषः स तत्र पर्येति जक्षन्क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा नोपजनꣳ स्मरन्निदꣳशरीरꣳ स यथा प्रयोग्य आचरणे युक्त एवमेवायमस्मिञ्छरीरे प्राणो युक्तः ।।३।।

एवमेव एष जीवात्मा भगवत् कृपाप्रसादः अस्मात् शरीरात् उत्थाय भजनबलेन विस्मरणेनोत्थितो भूत्वा परं ज्योतिः श्रीरामाख्यं ब्रह्म उपसंपद्य समीपतः प्राप्य स्वेन रूपेण नित्यदासात्मना निष्पद्यते, जगत्सम्बन्धविस्मरणेन निष्पन्नो भवति। पश्चात् यच्छत् ददत् स्त्रीभि:यानैः क्रीडन्नपि इदं शरीरं उपजनं जन्मनिमित्तं न स्मरति केवलमात्मानं दासमनुभवति। यथोक्तं सुतीक्ष्णेन श्रीमानसे—

अस अभिमान जाइजनि भोरे ।
मैं सेवक रघुपति पति मोरे ।।श्रीः।।

(मा. ३।११।२१।)

एवं शब्दादीनुपदर्शयति आत्मसङ्कल्पसिद्धान्—

अथ यत्रैतदाकाशमनुविषण्णं चक्षुः स चाक्षुषः पुरुषो दर्शनाय चक्षुरथ यो वेदेदं जिघ्राणीति स आत्मा गन्धाय घ्राणमथ यो वे देदमभिव्याहराणीति स आत्माभिव्याहाराय वागथ यो वेदेदꣳ शृणवानीति स आत्मा श्रवणाय श्रोत्रम् ।।४।।

अथ अनन्तरं महाकाशमनु विषण्णं समुपलक्षितं स चाक्षुषः पुरुषः तस्य दर्शनाय चक्षुः यदेव जिघ्रीत तदघ्राणां यदा व्याहराणि इतीच्छति तदा व्याहाराय भाषणाय वाक्, यदा शृण्वति इति श्रोतुमिच्छति तदेव श्रोत्रं भवति।।श्रीः।।

अथ: मनस: सङ्कल्पमाह—

अथयो वेदेदं मन्वानीति स आत्मा
मनोऽस्य दैवं चक्षुः स वा एष एतेन
दैवेन चक्षुषा मनसैतान् कामान् पश्यन् रमते ।।५।।

एवं शब्दस्पर्शवचनादीनां ज्ञानमुक्त्वा मन आह पूर्वत्र अथ अनन्तरं य: आत्मा मन्वानि इति वेद स एवात्मा मन: अस्य चक्षु: नेत्रं अनेन सर्वान् कामान् पश्यति।।श्री:।।

प्रकरणं समाप्तं करोति—

य एते ब्रह्मलोके तं वा एतं देवा आत्मानमुपासते तस्मत्तेषां
सर्वे च लोका आत्ताः सर्वे च कामाः स सर्वाꣳश्च
लोकानाप्नोति सर्वाꣳश्च कामान्यस्तमात्मानमनुविद्य
विजानातीति ह प्रजापतिरुवाच प्रजापतिरुवाच ।।६।।

ब्रह्मलोके ये देवा: ते एतं आत्मानं उपास्ते सेवन्ते, एवं तेषां सर्वे कामा: आत्ता: अनेन एवं य: आत्मानं अनुविद्य उपास्य विजानाति स सर्वान् कामान् विजानाति इति प्रजापति: इन्द्राय उवाच। अत्रेदमवधेयं यदिन्द्र: प्रजापतिसकाशात् चतुरात्मतत्वमधिजज्ञे, तत्र त्रि: भयं ददर्श, शरीरावच्छिन्नत्वात् अन्तिमेऽभयम्। वस्तुतस्तु प्रजापतिर्वारत्रयं यथाक्रमं जाग्रत्स्वप्नसुषुप्त्याख्येन अवस्थात्रयेण समवच्छिन्नं आत्मानं निर्दिदेश। अन्तिमे अवस्थात्रयातीतं निरस्त पाञ्चभौतिकशारीरसम्बन्धं स्वीकृतभगवन्नित्यकैङ्कर्यानुबन्धं विगलितविश्वविषादं सम्प्रसादं नित्यमात्मानं समुपदिश्य पुरन्दरमभयं चकार प्रजापति: इत्येव विशिष्टाद्वैतवादराद्धान्त: श्रुतिसम्मत:। यत्तु जाग्रत्स्वप्नसुषुप्तिसमवच्छिन्नो जीवात्मा, तूर्यस्तु परमात्मैव, न सावस्था जीवात्मन: तदनर्गलं, अत्रत्य श्रुतिविरोधात्। तथा च श्रुति: 'एवमेवैष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरूपसंपद्य स्वेन रूपेणाभिनिष्पद्यते' छा. ८.१२.३, अत्र विभावयत्तु सुधिय:, सम्प्रसाद: कर्ता स एव आत्मा, परंज्योति: कर्म स एव परमात्मा तं परम ज्योतिस्वरूपं परमात्मानमुपसंपद्यमानोऽपि न स्वं रूपं जहाति। अत आह— '**अस्मात् शरीरात् समुत्थाय**' शरीरं तत्संबन्धिनश्च व्यक्त्वा परं ज्योति: परमात्मानं उपसंपद्य सामीप्यमुक्तिविधया प्राप्य पुनश्च तस्य परमात्मनो भगवतो रामचन्द्रस्य समनुमत्य स्वेन रूपेण वास्तवेन नित्य भगवत् कैङ्कर्योपयोगिना चतुर्भुजेण रूपेण करणीभूतेन अभिनिष्पद्यते अभीष्टतया योज्यते।

इदमेवाह भगवान् बादरायणः ब्रह्मसूत्रे, यथा— '**भोगमात्रसाम्यलिङ्गाच्च**' ब्र.सू. ४.४.२१, तात्पर्यमेतत् यत् परं ज्योतिरूपसंद्यापि स्वेन रूपेणाभिनिष्पद्यमानो जीवात्मा यं न परमात्मा भवति, न वा परमात्मा समानो भवति। '**स उत्तमः पुरुषः**' इत्यस्य तात्पर्यं यत् भोगेषु उत्तमपुरुषेण सह तस्य समानता, अन्यथा स्वेन रूपेण इति नोक्तं स्यात्। अत एव भगवान् व्यासः कथयति—'**जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च**' ब्र.सू. ४-४-१७ तस्मात् जटायुः भौतिकं गृध्रशरीरं त्यक्त्वा स्वेन चतुर्भुजरूपेणाभिनिष्पद्यमानो न जहौ जीवात्मभावम्। अत आह मानसकारः —

गीध देह तजी धरी हरिरूपा ।
भूषन बहु पट पीत अनूपा ।।
श्याम गात विशाल भुज चारी ।
अस्तुति करत नयन भरि वारी ।।

मानस ३-३२-१,२

इत्येव श्रौतारोद्धान्तः।।श्रीः।।

इति च्छान्दोग्योपनिषदि अष्टमाध्याये द्वादशखण्डे श्रीराघवकृपाभाष्यं सम्पूर्णम्।।

।। श्रीराघवः शन्तनोतु ।।

त्रयोदशखण्डः

मन्त्राम्नायमाह—

श्यामाच्छबलं प्रपद्ये शबलाच्छ्यामं प्रपद्येऽश्व
इव रोमाणि विधूय पापं चन्द्र इव
राहोर्मुखात्प्रमुच्यधूत्वा शरीरमकृतं कृतात्मा
ब्रह्मलोकमभिसम्भवामीत्यभिसम्भवामीति ।।१।।

